L. D. Series : 155

वामध्वजविनिर्मिता सङ्केतटीका
तया सहितः
उदयनाचार्यनिबद्धः न्यायकुसुमाञ्जलिः

VĀMADHVAJA'S SAṄKETA COMMENTARY
ON
UDAYANĀCĀRYA'S NYĀYAKUSUMĀÑJALI

Edited by
Nagin J. Shah
Former Director, L. D. Institute of Indology

General Editor
Jitendra B. Shah
Director

L. D. INSTITUTE OF INDOLOGY
AHMEDABAD 380 009

वामध्वजविनिर्मिता सङ्केतटीका
तया सहितः
उदयनाचार्यनिबद्धः न्यायकुसुमाञ्जलिः

VĀMADHVAJA'S SAṄKETA COMMENTARY
ON
UDAYANĀCĀRYA'S NYĀYAKUSUMĀÑJALI

वामध्वजविनिर्मिता सङ्केतटीका

तया सहितः

उदयनाचार्यनिबद्धः न्यायकुसुमाञ्जलिः

VĀMADHVAJA'S SAṄKETA COMMENTARY

ON

UDAYANĀCĀRYA'S NYĀYAKUSUMĀÑJALI

Edited by

Nagin J. Shah

Former Director, L. D. Institute of Indology

General Editor

Jitendra B. Shah

Director

L. D. INSTITUTE OF INDOLOGY

AHMEDABAD 380 009

L. D. Series : 155

•

VĀMADHVAJA'S SAṄKETA COMMENTARY
ON
UDAYANĀCĀRYA'S NYĀYAKUSUMĀÑJALI

•

© L. D. Institute of Indology

•

Nagin J. Shah

•

Published by
Dr. Jitendra B. Shah
Director,
L. D. Institute of Indology
Ahmedabad-380009 (India)
Phone : (079) 26302463 Fax : 26307326
email : ldindology@gmail.com

•

Copies : 500

•

First Edition : 2013

•

ISBN :81-85857-39-3

•

Price : Rs. 300/-

•

Type-Setting by
Krishna Graphics
966, Naranpura Old Village,
Naranpura, Ahmedabad-380013
Phone : 079-27494393

•

Printed by :
Sarvoday Offset
13-A, Gajanand Estate,
Old Manek Chowk Mill Compound,
Nr. Idgah Police Chowky, Ahmedabad-380 016

CONTENTS

PREFACE 7

INTRODUCTION 8

न्यायकुसुमाञ्जलिसहिता वामध्वजविनिर्मिता सङ्केतटीका **1-189**

प्रथमः स्तबकः **1-45**

ईश्वरे वादिनां मतानि, ईश्वरविषये विप्रतिपत्तयः, कार्यकारणभावव्यवस्थापनम्, कार्यकारण-प्रवाहस्यानादित्वव्यवस्थापनम्, शक्तिपदार्थखण्डनविचारः, अपूर्वकारणताव्यवस्थापनम्, प्रध्वंसस्य व्यापारत्वखण्डनम्, उपलक्षणस्य कारणताखण्डनम्, शक्तिपदार्थनिर्णयः, अदृष्टस्य भोक्तृनिष्ठत्वव्यवस्थापनम्, सांख्यमतप्रक्रिया, सांख्यमतखण्डनम्, भूतचैतन्यवादः, भूतचैतन्य-वादखण्डनम्, क्षणभङ्गवादः, क्षणभङ्गवादखण्डनम्, नित्यविभोः कारणत्वव्यवस्थापनम्

द्वितीयः स्तबकः **46-80**

ईश्वरानुमानम्, प्रमाण्यस्य गुणजन्यत्वव्यवस्थापनम्, प्रामाण्यस्य परतोग्रहव्यवस्थापनम्, शब्दानित्यत्वोपपादनम्, जातिशक्तिवादखण्डनम्, प्रलयव्यवस्थापनम्, वेदह्रासव्यवस्थापनम्, आचारस्य प्रत्यक्षश्रुतिमूलकत्वव्यवस्थापनम्, महाजनपरिग्रहपदार्थनिर्वचनम्, प्रलयानन्तरं सृष्ट्युपपादनम्

तृतीयः स्तबकः **81-125**

अनुपलब्धेरीश्वरबाधकत्वनिरासः, योग्यानुपलब्धेरभावनिश्चायकव्यवस्थापनम्, मनोवैभववादः, मनोवैभववादखण्डनम्, स्वापनिरुपणम्, सुषुप्तिनिरुपणम्, परमात्मनः परस्यायोग्यत्वव्यवस्थापनम्, प्रत्यक्षमात्रप्रमाणवादखण्डनम्, अनुमानप्रामाण्यव्यवस्थापनम्, अप्रयोजकनिरुपणम्, उपाधिलक्षणम्, अप्रयोजकस्य हेत्वाभासान्तर्भावविचारः, सिद्धसाधनस्य हेत्वाभासान्तर्भावविचारः, सादृश्य-स्यातिरिक्तपदार्थत्वखण्डनम्, शक्तिसंख्यादीनामतिरिक्तपदार्थत्वखण्डनम्, उपमानस्य प्रमाणान्तरत्व-व्यवस्थापनम्, उपमानस्य लक्षणम्, शब्दस्य प्रमाणान्तरत्वव्यवस्थापनम्, शब्दस्य बाधकत्वखण्डनम्, अर्थापत्तेर्बाधकत्वखण्डनम्, उपलब्धेः प्रमाणान्तरत्वखण्डनम्

चतुर्थः स्तबकः **126-140**

प्रमाणलक्षणम्, ज्ञाततासाखण्डनविचारः, क्षणिकत्वविचारः

पञ्चमः स्तबकः **141-189**

ईश्वरानुमानम्, परमाण्वादीनामीश्वरशरीरत्वव्यवस्थापनम्, ईश्वरस्यापि शरीरपरिग्रहः, वेदलक्षणम्, द्व्यणुकपरिमाण्वादीनां संख्याजन्यत्वव्यवस्थापनम्, विधिविचारः, स्वप्नस्यानुभवरूपत्वव्यवस्थापनम्

परिशिष्ट - १ **190-192**

न्यायकुसुमाञ्जलिकारिकार्धपादानाम् अकारादिक्रमेण सूची

परिशिष्ट - २ **193-194**

सङ्केतगतानां ग्रन्थ-ग्रन्थकारादिनाम्नां सूचिः

PREFACE

It is our great pleasure to publish pandit Vāmadhvaja's 'Saṅketa' commentary on 'Nyāya-kusumāñjali' of the great philosopher Udayanācārya. This commentary was hitherto unpublished. It's only plam-leaf manuscript is preserved at the distinguished manuscript depository 'Hemacandrā-cārya Jaina Jñāna Bhaṇdāra', Patan in Gujarat. The current commentary is edited through that manuscript. 'Saṅketa' is a very lucid commentary on 'Nyāyakusumāñjali'.

Prof. Nagin J. Shah, who is a renowned scholar of Indian Philosophy, is the editor of present work, He has edited and translated a large number of works. The institute is grateful to him for despite his advancing years and frail health he has prepared such an excellent edition.

Through the publication of this work the scholars of Indian Philosophy will be benefitted. We are also thankful to Harjibhai who has printed the present edition.

2013, Ahmedabad **Jitendra B. Shah**

INTRODUCTION

Manuscript Description

The Manuscript, which we utilised, of Vāmadhvaja's Saṅketa Commentary on Udayanācārya's Nyāyakusumāñjali belongs to Sanghavi Pāḍā Bhaṇḍāra, now it is preserved in Shri Hemacandrācārya Jñāna-mandira, Patan (Gujarat)[1]. It is a palm-leaf manuscript. It is not in good condition. It is damaged. At places filaments of the uppermost layer of palm-leaves are curled, detached, severed and lost. Hence letters written on them are also lost. It bears No. 191(2). Its size : 40 x 6.5 cms. It has 155 folios. Each side of a folio has 6 or 7 lines, and each line has 70 to 73 letters. The manuscript is very currupt.

The colophon[2] yields the following information : The copyist who wrote this plam-leaf manuscript was Ṭhakkura Śrī Mādhava of Karṇakula. He was a resident of Causā, Tīrabhukti. He wrote this manuscript for the study of Upādhyāya Mahādeva, a son of Mahāmahopādhyāya Miśra Śūlapāṇi who too was a resident of Causānagara which was then under the rule of the king Yuvarājadeva. He completed the writing of the manuscript on Sunday, the fourth day of the white half of the month of Bhādra of the year 1312 of Vikrama Era.

---

1. There is an old tradition among the Jaina community to employ Maithila pundits to teach Jaina monks Nyāya. And Jaina monks too respectfully acknowledged the help they received from their Maithila pundit teachers. As for example, Vācaka Guṇaratnagaṇi (16th century A.D.), in his *Tarkatarahgiṇī*, a subcommentary on Govardhana's *Tarkaprakāśikā* which is itself a commentary on Keśva Miśra's *Tarkabhāṣā*, writes : श्रीमन्नारायणात्मजपुष्करमिश्रमुखादधिगम्य वाचकगुणरत्नगणिना व्याख्यातम् (p. 166 of the edition published by L. D. Institute of Indology, Ahmedabad). So the Maithila pundits come to Gujarat and even settle in Gujarat. It is quite possible that some Maithila pundit brought this manuscript with him to Patan (Gujarat).

2. परमभट्टारकपरमेश्वरपरमशैवसत्प्रक्रियोपेतमहाराजाधिराजमहासामन्ताधिपतिः राजा श्री युवराजदेवसद्भुज्यमानचौसानगरावस्थितमहामहोपाध्यायमिश्रशूलपाणिसुतउपाध्यायमहादेवस्य पाठार्थं तीरभुक्ति सं. [चौसावास्तीक See p. 140] कर्णकुलालङ्कारठक्कुर श्री माधवेन लिखितमिदम् । यथादृष्टं तथा लिखितम् । गतविक्रमादित्यसंवत १३१२ भाद्रसुदि ४ रविदिने ।

Vāmadhvaja, the Author

Vāmadhvaja or Vameśvaradhvaja was a highly learned scholar. He was well-versed in the systems of Indian philosophy. His spiritual teacher (guru) was Virūpākṣa.[3] He was *paramapāśupatācāryā*.[4] He calls himself *muni*.[5] As the manuscript of his commentary is written by the copyist in Vikrama Samvat 1312 (1256 A.D.), we may safely say that he composed the commentary at least 60 years earlier than the date of the manuscript, that is, in about 1196 A.D. And as the manuscript is written in Causānagar in Tīrabhukti we may conclude that he belonged to Mithila.

Vāmadhvaja's Commentary on Nyāyakusumāñjali (NKu)

Udayanācārya composed *Lakṣaṇāvalī* in Śaka Saṁvat 906 (984 A.D.).[6] So we can safely say that the date of the composition of *NKu* is c. 990 A.D. In *Nku* Udayana, having refuted strongly arguments adduced against the existence of God by opponents, logically establishes His existence. In the course of his tirade against atheists like Sāṅkhya, Bauddha, Mīmāṁsaka, etc., he refutes their other philosophical ideas and theories too. His *NKu* is pregnant with far-reaching implications and hidden significance. Hence it requires good illuminating commentaries to bring out deeper meaning and hidden significance of the text of *NKu*. Vāmadhvaja's *Saṅketa* commentary to a great extent fulfils this requirement. Let us see how Vāmadhvaja himself evaluates his own commentary on *Nku*. He considers it to be an exposition glowing with the light of great signification.[7] It is charming to the reasoning faculty.[8] It unfolds the tough knots of very hard text.[9] It is adored by the learned.[10] We agree with Vāmadhvaja. His commentary explains knotty points lucidly. It evinces deep study and understanding of Nyāya system. It refers to and quotes from authoritative texts and authors like Dharmakīrti, Jñānaśrī, Bhūṣana, Śabara, Kumārila, Śālikanātha, Vācaspati, Udyotakara, Īśvarakṛṣṇa, *Kāśikā*, Trilocana, Vindhyavāsī, etc. He has studied and consulted major works of the systems

3. नमामि विरूपाक्षं गुरुं वाक्कायमानसैः ।
   तस्मात् तत्त्वमवेत्य तात्त्विकगुरोः श्रीमद्विरूपाक्षतः । p. 189
4. p. 140, 189
5. श्रीवामध्वजनामधेयमुनिना.... । p. 140
6. तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्तः ।
   वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥
7. येनाहं कुसुमाञ्जलेर्विवरणं कुर्यां महार्थद्युतिम् । p. 1
8. टीकेयं.....चेतश्चमत्कारिणी । p. 140
9. विषमग्रन्थदुर्ग्रन्थिविपाटनपुरस्सरम् । p. 1
10. विद्यावतामर्चिता टीकेयम् । p. 140

of Indian philosophy. This is evident from the commentary. The commentary ably discusses grammatical points and the problems of various pramāṇas. It testifies to Vāmadhvaja's erudition and scholarship. Moreover, this commentary is the oldest among the commentaries on *NKu*. As we have already concluded, the composition of Vamadhvaja's commentary must have taken place round about 1196 A.D. One important fact revealed by the study of Vamadhvaja's commentary is that Vardhamāna (c. 1300 A.D.) heavily depends on Vamadhvaja's Saṅketa Commentary while composing his *Prakāśa* commentary on *NKu*. Vārdhamāna bodily takes several passages and so many sentences from *Saṅketa* and cleverly incorporates them in his *Prakāśa*. This proves the importance of Vāmadhvaja's *Saṅketa*. Some of the supporting instances are given below :

Vāmadhvaja's Saṅketa

(१) यथा सुषुप्तौ कर्मणां युगपद्वृत्तिनिरोधेन श्वास-सन्तानानुवृत्तिवशात् कदाचित् प्रबोधस्तथा परमाणूनां कर्मसन्तानानुवृत्तिवशादेव कदाचित् सर्ग इत्यर्थः। **प्रचये**ति। यावत् प्रचयाख्यः संयोगोऽनुवर्तते तावत् कर्मसन्तानानुवृत्तिरित्यर्थः। p. 78

(२) **एतेने**ति। साधर्म्यवैधर्म्ययोरर्थापत्त्यन्तर्भावेनेत्यर्थः। पूर्वदृष्टं च तन्मध्येऽसन्निकृष्टं चेति दृष्टासन्निकृष्टं तस्य प्रत्यभिज्ञानमिति। ... प्रत्येकं व्यभिचारेऽपि समुदितयोर्वाक्यप्रत्यक्षया (योः) फलं भविष्यतीति। .... नन्विन्द्रियसम्बद्धे गवये वाक्यतदर्थस्मृतौ च सत्यां प्रमाणसमाहारो भविष्यतीति। ... ननु यदि तत्फलत्वेन तदन्तर्भावो न स्यात् तर्हि विकल्पस्याप्यालोचनफलस्य प्रत्यक्षान्तर्भावो न स्यात्। भविष्यति चेत् तदा लिङ्गसादृश्यसाक्षात्कारयोः कः प्रद्वेषः ? ... यत्र व्यापारिण इन्द्रियसन्निकर्षादेरवस्थितिस्तत्र तत्फलस्यावान्तरव्यापारता, यत्र पुनर्व्यापारिण

Vardhamān's Prakāśa

(१) यथा सुषुप्तौ कर्मणां युगपद्वृत्तिनिरोधेऽपि श्वासानुवृत्तिबलात् कदाचित् प्रबोधस्तथा परमाणूनां कर्मसन्तानानुवृत्तिवशात् कदाचित् सर्ग इत्यर्थः। **प्रचये**ति। यावत् प्रचयाख्यः संयोगोऽनुवर्तते तावत् कर्मसन्तानाऽनुवृत्तिरित्यर्थः।
- काशी संस्कृतग्रन्थमाला ३०, वि.संवत् २०१३, p. 304

(२) **एतेने**ति। साधर्म्यवैधर्म्ययोरर्थापत्त्यन्तर्भावेनेत्यर्थः। दृष्टं च तन्मध्येऽसन्निकृष्टं चेति तत् तथा, तस्य प्रत्यभिज्ञातम्। ..ननु प्रत्येकं व्यभिचारेऽपि समुदितयोस्तयोः फलं स्यादिति। ... ननु प्रत्येकं व्यभिचारेऽपि समुदितयोस्तयोः फलं स्यादिति। ...नन्विन्द्रियसम्बद्धे गवये वाक्यतदर्थस्मृतौ च सत्यां प्रमाणसमाहारः स्यादिति। ... ननु तत्फलस्य तदन्तर्भावे विकल्पोऽप्यालोचनफलं प्रत्यक्षं न स्यात्, अन्तर्भावे वा लिङ्गसादृश्याध्यक्षयोः कः प्रद्वेषः ? ... यत्र व्यापारिण इन्द्रियसन्निकर्षादेरवस्थितिस्तत्र तत्फलस्यावान्तरव्यापारता, यत्र तु तस्यानवस्थितिस्तत्र प्रमाणबहिर्भूतत्वमित्यर्थः।
p. 376-377

एवानवस्थितिस्तत्र प्रमाणबहिर्भूतत्वम् ।

p. 96-97

(३) अतीतेनापि क्षणेनोपलक्षितस्य वर्तमान(ना)[र्थ]-तयाऽनुवृत्तेरित्यर्थः । ननु ज्ञातता[पक्षे] अर्थ-निरपेक्षवर्तमानज्ञाततासम्बन्धमात्रेणैव तज्ज्ञन-कत्वा(स्य) ज्ञानस्य वर्तमानाभू(भ)ताऽर्थापि(त्य) य(ये)ऽप्युपपद्यते । अन्वये (त्वन्नये) त्य(अ)र्थ-स्यातीतत्वा[द्] ज्ञाततात्रयानभ्युपगमात् कथ-मुपपद्यत इति । p. 135

(३) अतीतेनापि क्षणेनोपलक्षितस्य वर्तमानार्थ-तयाऽनुवृत्तेरित्यऽर्थः । ननु ज्ञाततापक्षे अर्थ-निरपेक्षवर्त्तमानज्ञाततासम्बन्धमात्रेणैव तज्ज्ञन-कज्ञानस्य वर्त्तमानाभताऽर्थात्ययेऽप्युपपद्यते । त्वन्नयेऽर्थस्यातीतत्वाज्ज्ञाततायाश्चाभावात् सा नोपपद्यतेति । p. 467-468

(४) आत्ममनः संयोगस्य बुद्ध्यात्मसमवायस्य च पूर्वसिद्धत्वेन [उत्पन्नं] ज्ञानं मनसा सम्बद्धं चेत्येकः कालः । ततो निर्विकल्पकस्योत्पादो ग्राह्यज्ञानस्य विनश्यत्ता विकल्पस्योत्पद्यमानतेत्येकः कालः । ततो विकल्पस्योत्पादः, निर्विकल्पकस्य विनश्यत्ता ग्राह्यज्ञानस्य विनाश इत्येवमसमान-कालत्वेऽपि । ... p. 136

(४) आत्ममनः संयोगस्य ज्ञानत्मसमवायस्य च पूर्वसिद्धत्वेनोत्पन्नं ज्ञानं मनसा सम्बद्धश्चेत्येकः कालः । ततो ज्ञानत्वनिर्विकल्पकस्योत्पादो ग्राह्यज्ञानस्य विनश्यत्ता सविकल्पकस्योत्पद्यमान-तेत्येकः कालः । ततः सविकल्पकस्योत्पादो ग्राह्य ज्ञानस्य विनाशो निर्विकल्पकस्य विनश्यत्तेत्येकः काल इत्येवमसमानकालत्वेन.... p. 471-472

(५) यथा प्रागवस्थास्मरणसहकारिणा चक्षुषा जनिते प्रत्यभिज्ञाने प्रागवस्थायाः संयुक्तविशेषणतया स्फुरणमभ्युपेयते तथा व्यवसायसहकारिणा मनसा जनितोऽनुव्यवसायः संयुक्तसमवेतविशेषणतया विषयस्फुरणेऽपि न तत्र तस्य स्मरणत्वं प्रत्यभिज्ञानेन प्रागवस्थायामिवेत्यर्थः । p. 137

(५) यथा प्रागवस्थास्मरणसहकारिणा चक्षुषा जनिते प्रत्यभिज्ञाने प्रागवस्थायाः संयुक्तविशेषणतया स्फुरणं तथा व्यवसायसहकारिणा मनसा जनिते-ऽनुव्यवसाये संयुक्तसमवेतविशेषणतया विषय-स्फुरणेऽपि न तस्य स्मरणत्वमित्यर्थः ।

p. 137

(६) साक्षात्प्रयत्नाधिष्ठेयत्वेऽपि तस्यैवेन्द्रियाश्रयत्वं, येन [यद]वच्छिन्ने आत्मनि प्रयत्नः य(त)दवच्छि-न्नात्मज्ञानेनेन्द्रियकार्येण [भोगो] जनयितव्यः । अकार्यौ तु ज्ञानप्रयत्नाविन्द्रियाश्रयमन्तरेणापि स्यातामिति न कश्चित् विरोध इत्यर्थः । p. 146

(६) साक्षात्प्रयत्नाधिष्ठितत्वेऽपि तस्यैवेन्द्रियाश्रयत्वम्, यदवच्छिन्न आत्मनि प्रयत्नस्तदवच्छिन्नात्म-निष्टज्ञानेनेन्द्रियकार्येण भोगो जनयितव्यः । अकार्यौ तु ज्ञानप्रयत्नाविन्द्रियाश्रयत्वं विनाऽपि स्यातामिति न विरोध इति । p. 495

(७) यथाहि कुविन्दाधिष्ठानमन्वयव्यतिरेकाभ्यां सिद्ध्यति य(त)था वे(चे)श्वराभिधा(धिष्ठा)नं ज्ञानादिनित्य-

(७) यथाहि कुविन्दाधिष्ठानमन्वयव्यतिरेकाभ्यां तथेश्वर-स्याधिष्ठानं, ज्ञानादीनां नित्यतया सर्वविषयत्वात् ।

[तया] सर्वविषयत्वादर्थात् न तथाधिष्ठात्रन्तर-कल्पनायां प्रमाणमस्ति यतोऽनवस्था स्यादित्यर्थः। p. 148

तद्वदधिष्ठात्रन्तरकल्पनायां न मानमस्ति, येनानवस्था स्यात्। p. 497

(८) ननु तथापि प्रधानीभूतप्रयत्नपू[१२६B]र्वकत्व-साध्यपक्षेऽप्यप्रधानीभूता बुद्धिः कुतः सेत्स्यति। प्रयत्नादेवेति चेत्, न, शरीरसम्बन्धे ज्ञानगत-कार्यत्ववद् बुद्धिसम्बन्धेऽपि प्रयत्नगतकार्यत्व-स्योपाधेः सुवचत्वात्, तथा च प्रयत्नमात्रशाली कर्ता प्राप्त इति। p. 149

(८) ननु प्रधानीभूतकृतिपूर्वकत्वसाध्यपक्षे बुद्धिर-प्रधानीभूता कुतः सिद्ध्येत्? न हि यत्नात्तत्सिद्धिः, शरीरसम्बन्धे ज्ञानगतकार्यत्ववद् बुद्धिसम्बन्धेऽपि प्रयत्नगतकार्यत्वस्योपाधेः सुवचत्वात्, तथा च कृतिमात्रशाली कर्ता प्राप्त इति। p. 498

(९) नन्वत्रापि विपक्षे किं बाधकमित्यत आह - **हेत्वभाव** इति। हेतोश्चेतन[व्यापार]स्या-न्यत्रोपलब्धस्याभावे क्रियारूपफलाभाव इत्यर्थः। p. 152

(९) विपक्षे किं बाधकमित्याह **हेत्वभाव** इति। हेतोश्चेतनव्यापारस्यान्यत्रोपलब्धस्याभावे क्रिया-रूपफलाभाव इत्यर्थः। p. 503

(१०) प्रयत्नवदात्माल(त्मसं)योगासमवायिकारणकत्व एव हि परमाण्वादिक्रियाणां तेषां चेतनायोजितत्वं साध्यमित्यर्थः। ... p. 152

(१०) प्रयत्नवदात्मसंयोगाऽसमवायिकारणकत्वे हि परमाणुक्रियायां चेतनायोजितत्वं साध्यम्। p. 504

(११) एतेनेति धारकप्रयत्नधृतत्वव्युत्पादनेन। व्याख्याताः मुख्यार्थतयेति भावः। नन्विन्द्रादि-देवता[भेदा]भिधायकागम[स्य] मुख्यार्थत्वेऽभेद-प्रतिपादकागमविरोध इत्यत आह — सर्वावेशेति। p. 152-153

(११) एतेन धारकप्रयत्नधृतत्वव्युत्पादनेन। व्याख्याताः, मुख्यार्थतयेति शेषः। नन्विन्द्रादिदेवता-भेदप्रतिपादकागमस्य मुख्यार्थतायामभेदप्रतिपाद-कागमविरोध इत्यत आह सर्वावेशेति। p. 506

(१२) ननु विनाशविशेष एव प्रयत्नपदार्थ(त्नपूर्व)-कोऽन्यस्त्वन्यथा भविष्यतीत्याशङ्क्याद्वितत्र(ङ्क्य वृत्त)समाधानं क्रव्र्याण (कुर्वाण) एव [ग्रन्थ-लाघवाय] वर्तिष्यमाणो(णे)ऽतिदिशति। p. 153

(१२) ननु नाशविशेष एव प्रयत्नपूर्वकोऽन्यस्त्वन्यथाऽपि भविष्यतीत्याशङ्क्य वृत्तसमाधानं कुर्वाण एव ग्रन्थलाघवाय वर्तिष्यमाणेप्यऽतिदिशति। p. 507

(१३) यद्यपि व्यापारभूता हि प्रातिपदिकार्थेनान्वीयते, न तु कारकाध(न्त)रेण तस्य निराकाङ्क्षत्वात्। उभयाकाङ्क्षाम(मे)व दर्शयति - प्रातिपदिकेति। p. 170

(१३) यद्यपि व्यापारात्मिका भावना व्यापारिसामान्य-माकाङ्क्षति आक्षिपति, तथापि साकाङ्क्षेण व्यापारिणा प्रातिपदिकार्थेनान्वीयते न तु निरा-

काङ्क्षेण कारकान्तरेणेत्याह सामान्येति ।
उभयाकाङ्क्षामाह प्रातिपदिकार्थ इति । p. 538

(१४) प्रसक्तैव हि हिंसा यागादिविषया पाषण्डैः प्रतिषिध्यते, न च सा अनिष्टसाधनमिति व्यभिचार इति । p. 183

(१४) प्रसक्तैव हि हिंसा यागादिविषया पाषण्डेन प्रतिषिध्यते, न च सा अनिष्टसाधनमिति व्यभिचार इति । p. 566

It is strange that Gopi Nathji does not refer to or mention Saṅketa commentary while giving an account of commentarial literature on Nku. This means that he had no knowledge of its existence . As a matter of fact, no modern scholar of Nyāya had any knowledge of it.

Other Commentaries on NKu

Gaṅgeśa's son Vardhamāna (c. 1300-1350 A.D.) wrote a commentary *Prakāśa* on *NKu* which needed commentaries to bring out its implicatons and hidden significance. About it Gopi Nath Kavirajji writes : ''Vardhamāna's commentary, inspite of the great learning displayed in its pages, is not of much help in this respect, as it does not follow Udayana line by line and phrase by phrase.''[11] Varadarāja (15th century A.D.), a son of Rāmadeva Miśra, wrote a running commentary Bodhani on the whole text of *NKu*. So it is much useful to students and scholars. Guṇānanda Vidyāvāgīśa (16th century A.D.) too wrote a commentary on the complete text of *NKu*. This commentary was held in great repute in those days.

We conclude that by writing a commentary Saṅketa on *NKu* our author Vāmadhvaja has secured an important place among the learned commentators of *NKu*. And being the oldest commentator, he assumes even greater importance.

The manuscript is so corrupt that I was hesitant to undertake the work of editing it. After much hestitation, I persuaded myself to edit it because for more than 750 years no scholar attempted to edit it, so it is better to edit the corrupt manuscript than not to edit it and allow it to rot and remain in darkness for an indefinite period of time. The edition is bound to be fraught with flaws. But I thought it wise to leave to the great scholars of Nyāya and Mīmāṁsā the task of removing the flaws and making the text as flawless as possible. Of course, I have made sincere efforts to present the text correctly, to the best of my ability, without allowing defects to creep in.

11. Foreword to *Nyāyakusumāñjali*, Kashi Sanskrit Series No. 30, Varanasi, 1957

It is my pleasant duty to express my sincere gratefulness to the management of the L. D. Institute of Indology, and especially to the Director Dr. J. B. Shah, for approving the project and agreeing to publish the work in the L. D. Series.

Nagin J. Shah

23, Valkeshvar Society,
Ambawadi, Ahmedabad-380 015

1 August 2013

वामध्वजविनिर्मिता सङ्केतटीका

तया सहितः

महामहोपाध्यायश्रीमदुदयनाचार्यप्रणीतः

न्यायकुसुमाञ्जलिः

प्रथमः स्तबकः

[१] ॐ नमः शिवाय ।

यद् योगिमुखै(ख्यै)रपि नैव गम्यं
यत् कारणं सर्गलयस्थितीनाम् ।
यदर्धदेहस्थितसुन्दरीक-
मीशस्य तद्रूपमहं नमामि ॥१॥

भुवनत्रितये यस्य कीर्त्या पल्लवितं विभोः ।
नमामि **विरूपाक्षं** गुरुं वाक्कायमानसैः ॥२॥

विषमग्रन्थदुर्गस्थि(दुर्ग्रन्थि)[1]विपाटनपुरस्सरम् ।
वामध्वजेन सङ्केतः क्रियते **कुसुमाञ्जलौ** ॥३॥

भ्रातस्तर्क ! तवातिकर्कशतया मातर् ! मृदुत्वात् तव
ब्राह्मि ! क्वापि न दृश्यतेऽत्र युवयोर्योगो जने यद्यपि ।
कारुण्येन तथापि मामकमुखाख्याब्जे मुहुः स्थीतयाम्
येनाहं **कुसुमाञ्जले**र्विवरणं कुर्यां महार्थद्युतिम् ॥४॥

यद्यप्यस्य विवेचितानि बहुशस्तत्त्वानि तज्ज्ञैर्जनैः ।
मद्ग्रन्थे ननु पिष्टपेषणमतिः कार्या तथाप्यत्र न ।
रत्नानि त्रिदशैर्यदप्यवहितैर्निर्मथ्य पाथोनिधे-
राकृष्टानि तथापि जातु किमसौ रत्नैर्भवत्युज्झितः ॥५॥

1. **सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो**
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः ॥१॥

---

1. Square brackets are used to indicate filling of lacunae, and round brackets to enclose emendments by the editor.

1. निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामोऽविगीतशिष्टाचारपरिप्राप्ततया प्रारम्भणि(णी)यग्रन्थप्रतिपाद्यतत्प्रयोजनपुरस्सरं व्यक्ताव्यक्तमहेशपदगोचरकर्मज्ञानयोगरूपन[2A]मस्कारप्रतिपादनार्थमाह – **सत्पक्षे**ति । कर्मयोगपक्षे तावदित्थं व्याख्या – न्यायोपार्जितप्रसूनाञ्जलिरेव निष्पापईशस्य सदाशिवादिमूर्तेः पदयुगे चरणयुगे निवेशितो यतोऽतस्तस्यैव चरणयुगे सम चेतो मनो भ्रमर इव भ्रमदनवस्थितं रमयतु निश्चलमविघ्नं करोतु । अनघरूपता प्रसूनाञ्जलेर्दर्शयितुं कलिकात्वं स--नां च निवारयति । **सत्पक्षे**ति । सन्मनोहरः पक्षप्रसरः पत्रविकाशो यत्र स तथा । सतामविकलचक्षुषामित्यर्थः । प्रोद्बुद्धगन्धविशेषसम्बन्धितामाह - **परिमले**ति । सतामित्यत्रापि सम्बन्धनीयम् । सतां श्लेष्माद्यनुपप्लुतघ्राणानामित्यर्थः । परिमलो गन्धविशेषः, तस्य प्रोद्बोधो ज्ञानम्, तेन बद्ध उत्सवो रतिरानन्दो यत्रेति । अपर्युषितत्वं दर्शयति - **न विम्लान** इति । सतां विमर्दने करतलद्वयसम्पर्के न विम्लानो न विवर्णतां गतः । भ्रमरस्येव मनसो रमणनिमित्ततामाह - **अमृते**ति । अमृतसमो रसः अमृतरसः । **प्रस्यन्द** इति । प्रस्यन्दः प्रवाहः अविच्छेदेनानुवर्तमानः, स एव माध्वीकं म(म)धु, तस्य भूराश्रयः । ''तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय । द्वे ब्रह्मणि वेदितव्ये षरं चापरमेव च'' इत्यादि श्रुतेः परमात्मज्ञानस्य निःश्रेयसहेतुतावगतौ बौद्धाधि[2B] ..... कुतर्काभ्यासप्रगल्भनास्तिकप्रपञ्चितयुक्तिप्रकरापादिताप्रामाण्यापसारणाभिप्रायेण निःश्रेयसकारणभूतपरमेश्वरपदगोचरमननसाधकप्रमाणविशेषविप्रतिपन्नपुरुषबोधकन्यायप्रतिपादनाय वाऽयमेव श्लोको।

ज्ञानयोगपक्षेऽपि व्याख्यायते । **सत्पक्षे**ति । अस्मिन् पक्षे निर्दोषन्यायाः पञ्चावयवप्रयोगा एव प्रसूनानि, तेषामञ्जलिः । अञ्जलित्वं पुनर्न्यायरूपप्रशस्तानां निषेध्यविधेयरूपलिङ्ग.... पदयुगे प्रमाणयुगे, पद्यते गम्यते अनेनार्थ इति व्युत्पत्त्या । अत्र चागमस्य प्रामाण्या..... व्यतिरेकानुमाने च । अस्मदाद्यात्मव्यतिरिक्तपरमेश्वरविषये पदयुगतया द्रष्टव्ये । निवेशितो यतोऽतस्तस्यैव प्रमाणयुगे मननसाधके उक्तरूपं रेतो रमयतु । ततो म[न]नानन्तरचोदितनिदिध्यासनादिसिद्धौ मोक्षः सिध्यतु । अनघन्यायप्रसूनाञ्जलित्वमुक्तं तत् कथमित्यत आह - **सत्पक्षे**ति । सन्न वाधितो अप्रतिबुद्धः सिद्धसाधनादिरहितस्वपक्षः सत्पक्षः । तत्र प्रसरतीति तत्र वा प्रसरो [3A] यस्येति भागासिद्धिस्वरूपासिद्धिरहितः । एवं च बाधप्रतिबोधात् भागस्वरूपासिद्धिनिरासः । सतामदुष्टान्तःकरणानामिति सर्वत्र सम्बन्धः । दुष्टमनसां पुनः परेषां स्वान्त(न्तः)पाषाणपाटनपटीयान(नां) विपरीमेवाचरति । परिमलः परिशीलनं समन्तत आकलनं सामान्यव्याप्ततया, तस्य प्रोद्बोधो विशेषविषयतया पर्यवसानम्, तेन बद्धो निश्चलीकृत इत्यतः परमपुरुषार्थोपयोगीच्छाऽविच्छेदो यत्रेति । व्याप्यत्वासिद्धविरुद्धनिरासः । विमर्दनं तत्र द्विपक्षकोट्यदृष्टोद्भूत्यादिसंस्पर्शनम्, [न] तत्र विम्लानः । संभावितस्य....ष्टोद्भूतिवत्सविवृद्ध्यर्थं क्षीरप्रसवादेः पक्षकोटावन्तर्भावादित्यनैकान्तिकापाकरणम् । नन्वीश्वरपदयुगे मनो निवेशनमपि निष्फलं स्वातन्त्र्येण, प्रयोजनाश्रुतेः । फलवत्सन्निधानाप्रतिपादनाच्चेत्यत आह – **अमृते**ति । न विद्यते मृतमस्य यत्र तदमृतं निर्वाणम्, तस्य रसः तद्गोचरेच्छा । तस्य प्रस्यन्द उत्तरोत्तरप्रवाहाविच्छेद(दे)नानुवर्तनम् । स एव माध्वीकं मधु । तस्य भूराकरः । सञ्जातापि मुमुक्षा कुतार्किकैस्तत्तत्संदेहापादनेनापसार्यते । अतस्तदापादितसंदेहापनोदकप्रमाणविशेषविषयन्यायनिवेशनेन विवर्ध्यत इत्यर्थः । नन्वस्मदाद्यात्म[3B]ज्ञानमस्मदाद्यात्मसाक्षात्कारपर्यन्त.... तस्योक्तरूपं ज्ञानं संसारकारणमिथ्याज्ञानोन्मूलनद्वाराऽपवर्गकारणमस्मदात्मा च । तथा तर्त्कि परमात्मगोचरप्रमाणविशेषविषयन्यायनिरूपणेनेत्यत आह – **स्वर्गे**ति ।

2. **स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।**
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥२॥

2. परमात्मनोऽपि साक्षात्कारज्ञानस्य निःश्रेयसकारणत्वेन श्रवणात् तदुपायनिदिध्यासनमननश्रवणानामस्योपयोगः । तथा च परमेश्वरदर्शनसञ्जाता दृष्टविशेषवति संसारिणि पुरुषे संसारकारणमिथ्याज्ञान.... साक्षात्कारविज्ञप्तिसन्ततिरतिशयवती भवति । तन्नास्तिताभावनं संसारनिदानमेव । **स्वर्गे**ति रागिपुरुष....स्वर्गादिदुःखदवदहनदह्यमाना विचारतो मुमुक्षव एवेत्यर्थः । ननु निरूपणं तत्तद्वादिविप्रतिपत्तिसंपादितसंदेहविधूननेन निश्चयो.... सर्ववाद्यविवादसिद्धे सिद्धम् । कर्तृत्वाकर्तृत्वादित असिद्धं इति चेन्न विज्ञानस्य निःश्रेयसानु..... । उपयोगित्वे वा ''द्यावाभूमी.....'' इत्यादिश्रुतेरेव सिद्धेः मननिरूपणमिति चेत्, न, तस्याप्यनुमानविशेषसाध्यत्वेन । [न] । [4A] निःसंदिग्धे अनुपपत्तेरित्यत आह — **इहे**ति ।

3. **इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः, शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरुधैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः, किं बहुना, कारवोऽपि यं विश्वकर्मेत्युपासते, तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदासंसारं प्रसिद्धानुभावे भगवति भवे संदेह एव कुतः । किं निरूपणीयम् ।**

3. इह निरूपणप्राप्तौ निरूपणे कर्तव्ये संदेह एव कुतः ? समानधर्मादीनां तद्धेतुत्वानुपपत्तेरित्यभिप्रायः । विशेषदर्शनार्थमागमिकतार्किकाशेषमतानि दर्शयितुं वेदादीनां मतं तावदाह — **शुद्धे**ति । शुद्धः केवलः एको द्वितीयविरहात् । बुद्धः स्वप्रकाशः, द्वितीयाभावेन परप्रकाश्यत्वानुपपत्तेः । साङ्ख्यमतमाह — **आदी**ति । प्रथमतः स्वभावतः विद्वान् चिद्रूपो न तु प्रकृतिवत्, प्रकृतेस्तु चिद्रूपाभिमान इत्यर्थः । सिद्धः कूटस्थनित्यो न तु परिणामिनित्यः प्रकृतिविदिति प्रमाणादवधारितः । पतञ्जलिमतमाह — **क्लेशे**ति । कर्म धर्माधर्महेतुर्भावनासाध्यं यागहिंसादि । विपाको जात्यायुर्भोगाः । आसते फलोपभोगपर्यन्तमात्मनीति धर्माधर्मरूपम् । तैरपरामृष्टोऽसम्बद्धः । ननु कर्माद्यभावे देहेन्द्रिय.... शरूपवेदकर्त्रध्यापयितृव्याख्यातृत्वानुपपत्तेः । तथा च कथं हिताहितविषयप्रवृत्तिनिवृत्तिज....दिनिर्माणप्रदर्शनेन चानुग्राहको....ति । शरीरान्वयव्यतिरेकानुविधायिनि कार्ये भोक्तृकर्माभावेऽप्यनुग्राह्यक्षेत्रज्ञगतकर्मभावजजगन्निर्माणार्थप्रकाश..... कर्मविरहेनोपपद्यत इत्यर्थः । संप्रदीयते गुरुणा शिष्यायेति संप्रदायो वेदो घटा[4B]....। अत एव श्रूयते 'नमः कुलालेभ्यः' इत्यादि । सोमं राजानमसृजत, ततस्त्रयो वेदा अन्वसृ.... शरीरं दर्शयति च विभूतीरिति । अनुग्राहकः स्वर्गापवर्गदाता इत्यर्थः । महाव्रतिमतमाह — लोके... निर्लेपोऽधर्मरहितः । क्लेशसलिलावसिक्तायामात्मभूमौ कर्मबीजं [धर्मा]धर्म(र्माङ्)कुरं करोति न तु नित्यसर्वज्ञ... । पुरुषेषूत्तमो नित्यसर्वज्ञो जगत्कर्ता चेत्यर्थः । पितामहो जगज्जनकत्वात् । यज्ञे प्रधानाधिष्ठातृत्वं कर्मोपार्जितं यस्य स तथा । सर्वज्ञ इति । क्षणिकसर्वज्ञ इत्यर्थः । उपास्यत्वेनाराध्यत्वेन... त्यर्थः । यावदुक्तेनोपपन्नो न तु व्याख्यातेन । अथवा यावदुक्तोपपन्नो नोपपन्नो या.... । बुद्ध्यत इति कर्मकर्तृभ्यां प्रमाणगम्यो बोधाधारो वा। आदिविद्वान् नित्यचेतनाजन[5A]...नित्यचैतन्ययोग.... शेषं सुबोधम् । यथा जातिगोत्रादौ संसारमभिव्याप्य

प्रमाणसिद्धे न संदेहस्तथा तस्मिन् परमात्मनि श्रुत्यादिसिद्धे यद्यपि न संदेहः ।

4. **तथापि –**

न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥३॥

श्रुतो हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणेष्विदानीं मन्तव्यो भवति, ''श्रोतव्यो मन्तव्यः'' इति श्रुतेः,

आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥

इति स्मृतेः ॥३॥

4. मा प्रामाण्यात् तस्य... दौ सकर्तृ[क]त्वासकर्तृकत्वविवादेन कर्तृकत्वाकर्तृकत्वरूपपरमात्मसंदेह इति न्यायेन निदिध्या.... अनुमितिस्तत्साधकलिङ्गप्रतिपत्तिर्वा । **मननव्यपदेशभागि**ति । मनिर्मननमनुमितिर्मन्यात् ... पाया उपासनाया मोक्षं प्रति हेतुत्वावगमात् । एवकारस्तु निष्प्रयोजनत्वमपाकरोति । श्रवणानन्तरा... सूचितमिति दर्शितमिपि तात्पर्यम् । अत एव समस्तागमपूर्वकप्रतिपत्त्यनन्तरभावित्वं मननप्रतिपत्तेर्द.... । ननु मननं प्रमाणयुगलायत्तं तच्च तत्तद्वादिविप्रतिपत्तिदूषितं न मननसाधकमित्याह - **तदि**ति ।

5. **तदिह संक्षेपतः पञ्चतयी विप्रतिपत्तिः । अलौकिकस्य परलोकसाधनस्याभावात् । अन्यथापि परलोकसाधनानुष्ठानसंभवात् । तदभावावेदकप्रमाणसद्भावात् । सत्त्वेऽपि तस्याप्रमाणत्वात् । तत्साधक-प्रमाणाभावाच्चेति । तत्र न प्रथमः कल्पः यतः –**

5. प...युगलगोचरदूषणरूपेति । तत्र प्रथमं परमनास्तिकचार्वाकविप्रतिपत्तिमाह – **अलौकिकस्ये**[5B]ति । कार्यकारणभावावधारणोपायान्वयव्यतिरेकयोः सर्वदा सर्वत्राशक्यनिरूपणतया कादाचित्कत्वाकादाचित्कत्वयोश्च तयोर्व्यभिचारेण तथात्वानवधारकतया अन्यस्य चोपायस्याभावात् परैरनभ्युपगमाच्चेति कार्यकारणभाववैरिणश्चार्वाकस्याप्तोक्तत्वकार्यत्वासम्भवे आप्तोक्तत्वकार्यत्वयोः श्रवणमननसाधकयोरसिद्धिरित्याह – **साधनाभावादि**ति । साधनस्य कार्यत्वादेरसिद्धिरिति । स्वरूपासिद्धं दर्शयति । कार्यकारण.... करणाय वचनोच्चारणप्रश्नादिकमपि न घटते इति सांव्यवहारिकमपि हेतुत्वमभ्युपगन्तव्यमिति यद्यपि तथापि समानमेव कारणं कार्यजात... परिज्ञानं तच्च सिद्धसाधनमित्यत आह – **परलोके**ति । परस्यान्यस्य लोच्यमानसाधनस्याभावादिति अर्थः । कार्यवैचित्र्याद् विभिन्नविजातीयकारणस्वीकारेऽपि नादृष्टं सिध्यति । यदर्थमुपदेशो यत्परिज्ञानाय चातिरिक्तस्य कर्तुरभ्युपगम इत्याह – **अलौकिकस्ये**ति । अत्राप्यदृष्टाभावेन दृष्टकारण(णे)न अस्यास्मदादिभिरेव शक्यज्ञानत्वेन सिद्धसाधनमेवाभिमतमिति सूचितम् । अदृष्टानभ्युपगमे दृष्टनिरपेक्षाणां हिताहितप्राप्तिपरिहारसाधनगोचरप्रवृत्तिनिवृत्त्यनुपपत्तिप्रसङ्ग[:] । विनिवारितविपरीतशङ्काहङ्कारायाः प्रेक्षावतामुक्तप्रवृत्तेरेवादृष्टमास्थेयमिति । न तदभावेनोपदेष्टृकर्त्रनभ्युपगमः किन्तु प्रकारान्तरेणेति मीमांसकः । प्रकारान्त[6A]रमाह - **अन्यथे**ति । अन्यथाप्याप्तोक्तत्वावधारणव्यतिरेकेण संदेहेनापि पुरुषप्रवृत्तिनिवृत्तिरूपसाधनानुष्ठानस्य दृष्टे विषये संभवात् । परलोकसाधनस्य यागाद्यनुष्ठानस्यापि नित्यनिर्दोषवेदद्वारा संभवादित्यसिद्धमाप्तोक्तत्वम् । कार्यत्वमपि परमेश्वरमन्तरेण कादाचित्कादृष्टपरिपाकवाश(वशे)-

नापि परेण पुरुषविशेषेणास्मदादिविसदृशावलोक्यमान... दिप्रेरणरूपानुष्ठानसंभवादस्मदादिभिः सिद्धसाधनत्वेनाश्रयासिद्धम् । परलोकसाधनस्याप्यदृष्टस्यानुष्ठानं तत्तत्कार्यनिर्वर्तनम्, तदन्यथापि परमेश्वराधिष्ठानमन्तरेणास्मदादिपूर्वपूर्वकादृष्टपरिपाकवशेनापि संभवात् तदेवं सिद्धसाधनम्, तथा चाश्रय(या)सिद्धिरित्यर्थः । नन्वयुक्तमेतद्धर्ममात्रस्य वक्ष्यमाणन्यायेनानित्यत्वाच्छ्रुत(ते)स्तत्समूहपदवाक्यस्य तद्विशेषवेदस्य च नित्यत्वम्, तथा च पौरुषेयत्वे तदप्रामाण्यशङ्कापनोदकमाप्तोक्तत्वमनुसरणीयम्, अन्यथा परलोकसाधनानुष्ठाने प्रचुरतरवित्तव्ययायाससाध्ये प्रेक्षावतां प्रवृत्तिर्न स्यात् [त]था च नासिद्धमाप्तोक्तत्वम् । सकर्तृकत्वस्योपादानगोचरापरोक्षविज्ञप्तिचिकीर्षाकृतिसाक्षाज्जन्यत्वरूपस्य विवक्षितत्वादस्मदादीनां च तद्गोचरतथाविधविज्ञानासंभवाद् नास्मदादिभिः सिद्धसाधनमिति । कार्यत्वमपि नोक्तदोषकलुषितमित्युक्तदू[ष]णं परिहृतं समवलोक्य दूषणान्तरमाह – **तदिति** । तस्य महेश्वरस्याभावावेदकानुपल[6B]... बाधितविषयत्वं दर्शितम् । उक्तं च – प्रत्यक्षाद्यविसंवादीत्यादि । नानुपलब्ध्यनुमानोपमानागमार्थापत्तयो बाधकमयोग्यानाश्रयनियतविषयान्यार्थान्यथोपपन्नत्वादिति परिहृतं बाधकमवलोक्य तर्कापरिशुद्धिं दूषणान्तरमाह – **सत्त्वेऽपीति** । सत्त्वं तावन्नाभ्युपगच्छामः किन्तु बाधकप्रमाणविरहात् संभावयामः । भावकरणकर्तृव्युत्पत्त्या प्रमाणपदं प्रमितितत्साधनतदाश्रयेषु वर्तते । निःसंदिग्धा अबाधिता अनधिगतार्थाधिगतिश्च.... तत्साधनेन्द्रियकरणवान् तत्समवायिकारणं तु स्यादिति तर्काः । न चायं तथेति विपर्ययः । किन्तु पारमेश्वरं ज्ञानमस्मदादिविभ्रमान् आलम्बते न वा ? न वेति पक्षे सर्वविषयत्वानुपपत्तिः, तस्यैव तदविषयत्वात् । आलम्बत इति पक्षे तूपदर्शितविषयैतद्विभ्रमविषयत्वादस्मदादिज्ञानमिव विपरीतावगाहनादप्रमा । न विद्यते प्रमाणं प्रमा तत्साधनं तत्करणं यस्य सो(तद्) अप्रमाणम्, तस्य भावस्तत्त्वम्, तस्मात् । नन्वयुक्तमेतदुपदर्शिततर्काणामीश्वरमधिकृत्याश्रयासिद्धविपर्ययापर्यवसानेच्छापादकत्वेन तर्काभासतया अदूषणत्वात् । क्षित्यादिकर्म [अ]धिकृत्यानिष्टभ्रमेणेष्टापादनत्वेनाभासतया दूषक[7A]त्वविरहात् । यत्त्विष्टार्थानुभवसम्बन्धितदयोगव्यवच्छिन्नतदाश्रयतया परमेश्वरस्य प्रमात्वप्रमाणत्वप्रमातृत्वोपपत्तेर्विज्ञानस्य च यथावस्थितवस्त्ववगाहित्वेन मिथ्यात्वानुपपत्तेः सर्वं समञ्जसमिति तर्कापरिशुद्धिमपि निराकृतामवगम्य विपक्षे बाधकाभावादुपाधिसद्भावाद् व्याप्तिप्रसाधकप्रमाणाभावादिति संदिग्धव्यतिरेक्यप्रयोजकमप्रतीतव्याप्तिकं कार्यत्वमाप्तोक्तत्वं च स्वरूपासिद्धमित्येवंरूपदूषणान्तरेण बौद्धमीमांसकचार्वाकाः प्रत्यवतिष्ठन्ते – **तदिति** । वादिविप्रतिपत्तीरुक्त्वाऽप्याद्यचार्वाकविप्रतिपत्तिं वारयति – **तत्र नेति** । कार्यकारणभावानभ्युपगमे परबोधकवचनोच्चारणानुपपत्तेः । उपपत्तौ वा तत्स्वीकारापत्तेः । तस्माद् यथा यथा तन्निराकरणोपपन्नः तथा तथा तस्यैवापत्तिरिति दुरुत्तरं व्यसनम् । तस्मात् समस्तलोकयात्रातिरस्कारप्रवृत्तचार्वाकवराकविजृम्भितं न प्रमाणपद्धतिमध्यास्त इत्याह – **कल्प** इति । कल्पनं कल्पः, **नेति** प्रमाणशून्यकल्पनस्य स्वपरपक्षसाधकबाधकत्वानुपपत्तेरित्यर्थः । न च वयं स्वपरपक्षयोः साधनदूषणे ब्रु(ब्रू)मः । किन्तु भवन्तः समस्तविप्रतिपन्नपुरुषप्रतिबोधनाय मननसाधकपदयुगप्रतिपादकन्यायनिरूपणप्रवृत्ताः । प्रामाणिकं कार्यकारणभावं बोधयत्वित्यभिप्रायवति प्रत्यवस्थिते सुहृदभावेन प्रामाणिकं तत्त्वं दर्शयितुं प्रमाणमाह – **सापेक्षत्वादिति** ।

6. **सापेक्षत्वादनादित्वाद् वैचित्र्याद् विश्ववृत्तितः ।**
प्रत्यात्मनियमाद् भुक्तेरस्ति हेतुरलौकिकः ॥४॥

न ह्ययं संसारोऽनेकविधदुःखमयो निरपेक्षो भवितुमर्हति, तदा हि स्यादेव न स्यादेव वा, न तु कदाचित् स्यात् ॥४॥

6. यतः सापेक्षत्वाद् विवादस्य हेतुरस्त्यतो न साधनासिद्धिः । सहापेक्ष[7B]या वर्तत इति सापेक्षं कादाचित्कमित्यनेनैतस्मादनन्तरमिदं भवत्येतदभावे नेत्येवम[न]न्यथासिद्धं सर्वलोकसिद्धं प्रत्यक्षं कार्यकारणभावे प्रदर्शितम् । यद्वाऽनुमानमुपदर्शितम् – **सापेक्षत्वादि**ति । कादाचित्कत्वात् सर्वकालासत्त्वे सत्युत्तरकालसम्बन्धित्वात् पूर्वकालभाविनियतावधिसम्बन्धित्वं साध्यते । तथा च प्रयोगः – विवादाध्यासितं हेतुमत्, कादाचित्कत्वात्, न यदेवं यथा गगनं तावदत्र तथा । तस्माद्धेतु...कादाचित्कं न भवेदित्युभयत्र विपक्षे बाधकस्तर्कः । उभयवादि-सिद्धनिर्हेतुकत्वनिवृत्तिरूपं वा हेतुमत्त्वं सम्मुग्धलोकव्यवहारसिद्धं वा साध्यमिति.... कादाचित्कहेतुना हेतुमत्त्वं साध्यते सदातनहेतुना वा ? नाद्यः । कादाचित्कहेतोस्तत्त्वं तथाभूतहेतुजन्यत्वेन तथाभूतसामग्रीप्रभवत्वेन वा । अहेतुकत्वे च तद्वदेव कार्यमप्यहेतुकं कादाचित्कं स्यात् । सदातनसामग्रीप्रसूतत्वेन सदातनत्वापत्तौ तत्सापेक्षपदार्थ-स्यापि तथात्वसंपत्तौ कादाचित्क... । तृतीये तु पक्षविपक्षयोरेव वर्तमानत्वेन विरुद्धतापत्तेरित्यत्राह – **अनादित्वा-दि**ति । चरमपक्षयोरनभ्युपगमेन तत्पक्षोक्तदोषापाकरणे प्रथमपक्षस्वीकारे अनवस्थादोषस्यानादित्वं परिहारः । तदपसारितसकलकलङ्कं कादाचित्कत्वं सहेतुकत्वं समर्थमिति समर्थितम् । तथा च साध[8A]नाभावादित्यनेन मननसाधनप्रमाणयुगलमसिद्धमिति यदुक्तं तत् तावत् परिहृतमिदानीं तु समानमेव साधनय(म)स्तु कार्यजातस्य तच्चास्मदादिशक्यज्ञानमिति न तदर्थमुपदेशसंभवः । कार्यत्वं च सिद्धसाधनत्वेनाश्रयासिद्धमिति तत्र आह – **वैचित्र्यादि**ति । अनेन विभिन्नजातीयावलोक्यमानपदार्थसमनन्तरं तथाभूतं कार्यमुपलभ्यत इति प्रत्यक्षं प्रमाणमुपदर्शितं विचित्रसाद्व(ध)न इति । यद्वा विवादाध्यासितं विचित्रहेतुकं विचित्रत्वात्, न यदेवं न तदेवम्, यथैकरूपो घटः, तावदत्र तथा, तस्मात् तथा । अविचित्रहेतुकत्वे वैचित्र्यं न स्यादिति विपक्षे बाधक[म्] । ननु दृश्यमानविचित्रहेतुकं विचित्रमस्तु, तथा च पूर्वोक्तदोषतादवस्थ्यमित्यत आह - **विश्ववृत्तित** इति । इह 'विश्ववृत्ति'शब्देन दृष्टान्तदार्ष्टान्तिकोभयरूपा सर्वस्य पेक्षावतः प्रवृत्तिरभिमता । ततो लौकिको हेतुरस्ति । तथा च प्रयोगः - दृष्टा विश्वस्य ह प्रवृत्तिः फलवती, प्रेक्षावत्प्रवृत्तित्वात्, वणिग्-राजपुरुषप्रवृत्तिवत् इति । अतः परेण लोक्यमानसाधनं परलोकस्य स्वर्गापवर्गस्यास्ति । तथा च नोक्तदोषतादवस्थ्यम् । ननु दानादिकमेवास्मदादिपरिदृष्टं परलोकसाधनमस्तु, तथा च नालौकिको लोकस्यास्मदादेः परोक्षो हेतुरस्ति, अतो नोक्तदोषपरिहार इत्यत आह – **प्रत्यात्मे**ति । विमतिविषयः कार्यभोक्तृं(कृत्वं) विशेषगुणप्रेरितभूतकार्यत्वात्, स्वर्गादिवत् इति । न च बुद्ध्यादिभिः सिद्ध..... द्युत्पत्तेः पूर्वं तेषामसम्भवादिति । पक्षधर्मतावशादलौकिके आत्मन्यवस्थिताऽलौकिका-दृष्टसिद्धिरिति । तत्परिज्ञानायाधि[8B]ष्ठानाय वाऽतिरिक्तस्योपदेष्टुः कर्तुश्चाभ्युपगम.... । **न ह्ययमि**ति । नैकविधः कादाचित्कः, निरपेक्षो नियतपूर्वभाव्यवधिशून्यो ने(वे)ति । अन्यथासिद्धसंदिग्धव्यतिरेकित्व... प्रमाणयोः ।

7. **अकस्मादेव भवतीति चेत्, न –**

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च ।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥५॥

हेतुप्रतिषेधे भवनस्यानपेक्षत्वेन सर्वदा भवनम्, अविशेषात् । भवनप्रतिषेधे प्रागिव पश्चादपि अभवनम्, अविशेषात् । उत्पत्तेः पूर्वं स्वयमसतः स्वोत्पत्तावप्रभुत्वेन स्वस्मादिति पक्षानुपपत्तेः । पौर्वापर्यनियमश्च कार्यकारणभावः । न चैकं पूर्वमपरं च, तत्त्वस्य भेदाधिष्ठानत्वात् । अनुपाख्यस्य हेतुत्वे प्रागपि सत्त्वप्रसक्तौ पुनः सदातनत्वापत्तेः ।

7. स्वपक्ष... [**अकस्मा**]**देवे**ति । स्वपक्षसाधकप्रयोगश्च - कादाचित्को भावो निर्हेतुकः, भावत्वात्, सदातनभाववत् । सत्प्रतिपक्षत्वं तावत् ततः परिहरति – **ने**ति । भवतीति सत्तावचन.... । तथा च हेत्वभावे सत्त्वम् । अथ भवतीति उत्पत्तिवाची । तत्र नञसम्बधे(न्धे) भवननिषेधः । अथ हेतोर्भूतिनिषेधाद् विशेषनिषेधस्य च शेषाभ्यनुज्ञाविषयत्वादहेतुता.... च कार्यस्वरूपमवस्तु च । तदा स्वानुपाख्यविधिः । अथाव्युत्पन्न एवायमश्वकर्णादिशब्दवत् तदा स्वभाव[त एव भवति] । एवमकस्माद् भवती[ति] वचनेनाभिमतम् । सर्वत्र परीहारो **नैवमवधेरि**ति । नियतावधिसम्बन्धित्वेनैव प्रत्यक्षम् । उपलभ्यमानत्वादित्यभिप्रायः । नियतावधेर्विवादपदस्य कादाचित्कस्य वा तर्काबाधितप्रत्यक्षादिना प्रतीयमानत्वाद् नोक्तदोष इति समुदायार्थः । अमुमेवार्थं विपक्षे अनिष्टप्रदर्शनमुखेन विवृणोति – **हेतुप्रतिषेध** इति । भवनस्य सत्त्वस्याविशेषात् सदातनत्वप्रसङ्गात् । अनेन सदातनत्वं(त्व)प्रसङ्गः सदागतिसंत्रासतिरस्कृतविपरीतांशकप्रमाणमुक्तमिति दर्शयति । न हि मध्यवत् प्राक् पश्चाद् वा भवनमीक्षामहे । द्वितीयेऽप्यनिष्टमाह – **भवन**[9A]**प्रतिषेध** इति । भवनस्योत्पत्तेः प्रतिषेध इत्यर्थः । अभा(भ)वनाविशेषादित्यनेनापि सदातन्न(तनत्व)-असत्त्वप्रसङ्गमुखेन तिरस्कृतशङ्काहङ्कारो बाधः प्रदर्शितः । न हि प्राक् पश्चादिव मध्येऽप्यभवनमीक्षन्ते लौकिकपरीक्षका इत्यर्थः । तृतीयं पूर्वोक्तार्थप्रदर्शनेन निराकरोति – **उत्पत्तेरि**ति । न ह्यात्मन एव कश्चित् प्रभुः किन्तु अन्योन्यस्येति लौकिकव्यवस्था । नाप्यसत एव प्रभुत्वमित्यपि लौकिकम् । तथात्वे वा प्रागादिकालेऽपि सत्त्वप्रसङ्गः । न चैवमेवेति वाच्यम् । इदानीमिव तदानीमप्युपल[म्]भस्य दुर्वारत्वापत्तेः । न चास्त्येवोपलम्भ इति वाच्यम् । अनुपलम्भस्योभयवादिसिद्धत्वात् । ननु यदेव कार्यं तदेव कारणमस्तु को दोषः । न चैवंसति अस्माकमनिष्टं भवतां चेष्टं किञ्चित् सिध्यति । अत आह – **पौर्वे**ति । लोकसिद्ध इति शेषः । न हि पटसिद्धये पटमेवोपाददानाः किन्तु तत्पूर्वस्थिततन्तून् । अनुभूयन्ते तत्सिद्धये चासू...दिलोकव्यवस्थेत्यर्थः । न च तन्तुपटयोरैक्यमित्याह- **न चैकमि**ति । तत्त्वस्य पूर्वापरभावस्येत्यर्थः । चतुर्थकल्पमाशङ्कानिष्टप्रदर्शनेन निराकरोति । **अनुपाख्यस्ये**ति । न किञ्चिद्रूपस्येत्यर्थः । सदातनत्वप्रसङ्गोन्मूलित-[विपरीतशङ्का] प्रत्यक्षपरिदृश्यमानकादाचित्कत्वमभिमतमुपस्थापयतीत्यर्थः ।

8. **स्यादेतत् । नाकस्मादिति कारणनिषेधमात्रं वा, भवनप्रतिषेधो वा, स्वात्महेतुकत्वं वा, निरुपाख्यहेतुकत्वं वाऽभिधित्सितम्, अपि त्वनपेक्ष एव कश्चिन्नियतदेशवन्नियतकालस्वभाव इति ब्रूमः । न । निरवधित्वे अनियतावधिकत्वे वा कदाचित्कत्वव्याघातात् । न ह्युत्तरकालसिद्धित्वमात्रं कादाचित्कत्वम्, किन्तु प्रागसत्त्वे सति । सावधित्वे तु स एव प्राच्यो हेतुरित्युच्यते । अस्तु प्रागभाव एवावधिरिति चेत् न । अन्येषामपि तत्काले सत्त्वात् । अन्यथा तस्यैव निरूपणानुपपत्तेः । तथा च न तदेकावधित्वम्, अविशेषात् । इतरनिरपेक्षस्य प्रागभावस्यावधित्वे प्रागपि तदवधेः कार्यसत्त्वप्रसङ्गात् । सन्तु ये केचिदवधयः, न तु तेऽपेक्ष्यन्ते इति स्वभावार्थ इति चेत् । नापेक्ष्यन्ते इति कोऽर्थः ? किं न नियताः ? आहोस्विन्नियता अप्यनुपकारकाः ? प्रथमे धूमो दहनवद् गर्दभमप्यवधीकुर्यात्, नियामकाभावात् ।**

8. अथत्यत्र(अथास्त्यत्र) एवायमकस्मादिति पञ्चमं पक्षमाशङ्कते [9B] । **अभिधित्सितमि**ति प्रत्येकं बोद्धव्यम् । त[त्] किं तह्य(र्ह्य)नि(भि)मतमित्यत आह – **अपि त्वि**ति । **नियतदेशवदि**त्यहेतुकत्वे संप्रतिपन्नो दृष्टान्तः । अयमर्थः । यथाह्याकाशादेरापरमाण्वादेश्चाहेतुकत्वेऽप्यशेषदेशनियतदेशव्यापिता तथा नियत-

कालसंसर्गित्वमनियतकालसंसर्गित्वं च घटाद्याकाशादीनां च..... । अथवा पटस्य तन्तुदेशनियमे न तावत् तन्तूनां जनकत्वं प्रयोजकत्वम् । सत्यपि जनकत्वे वेमादीनां पटदेशत्वाभावाद... स्तथा कालनियमोऽप्यहेतुकः स्यादिति पूर्वोक्तार्थप्रदर्शनव्याजेन निराकरोति - **ने**ति । अत्रापि कादाचित्कत्वानुपपत्तिप्रसङ्गविघटितप्रतिपक्षशङ्का । प्रत्यक्षधियमा... कालसम्बन्धित्व(त्वं) कादाचित्कत्वम् । तत्त्व[नु]त्पन्नत्व(त्वे) निरवधित्वेऽपि गगनादिवद् भविष्यतीत्यत आह - **न ही**ति । लोकव्यवहारसिद्धमिति शेषः । न हि गगनसमानतया घटादिकमवलो-[कनीयं] किन्तु तद्वैलक्षण्येनेत्युभयसम्मतमित्यर्थः । ननु सावधित्वेन(ना)पि न हेतुमत्त्वस्वीकारोऽपर्यायत्वादन-योरित्यत आह — **सावधित्वे त्वि**ति । सावधित्वे पुनरभ्युपगम्यमाने हेतुमत्त्वमेव स्वीकृतं भवति । तस्यैव हेतुपदवाच्यतेन(त्वेन) लोकप्रसिद्धत्वादित्याह — **स एव प्राच्यो हेतुरित्युच्यते** लोकेनेति [10A] शेषः । न तूक्तनिर्वचनवशेन भावावधित्वमवगम्यते, किन्तु प्रागभावावधित्वमन्यथा साध्यसाधनत्वक्षतिप्रसङ्ग इति मन्यमानः शङ्कते — **अस्ति**वति । एवकारेण भावस्यावधित्वमपाकरोति । अभावसमानयोगक्षेमत्वाद् भावस्यापि तथात्व-मवसेयमित्यभिप्र(प्रा)यवान् परिहरति — **ने**ति । **अन्येषामपी**ति अन्वयव्यतिरेकवतामभाववदित्यर्थः । एतदेव निरूपणमुखेन स्पष्टयति — **अन्यथे**ति । अनिरूपितस्य च प्रतिपादयितुमशक्यत्वादिति भावः । भवत्वेवं ततः किमित्यत आह — **तथा चे**ति । अविशेषा[द्]भावस्यापि हेतुत्वम् । न वा अभावस्य नियामकाभावादित्यर्थः । ननूभयसाम्येऽप्यन्यवदस्य कारण.... यो ना(नो)भयकारणत्वव्यवस्था स्यादिति मन्यमानमनिष्टप्रसङ्गोपदर्शनेन बोधयति **इतरे**ति । अन्यथेदानीमपि न स्यादविशेषाद् विशेषे वा न भवदभिमतसिद्धिरिति तात्पर्यम् । नन्वस्तु भावः सत्तामात्रेण न तु कार्येणापेक्ष्यते, तथा च न हेतुव्यवहार इत्याह — **सन्त्वि**ति । सर्वलोकसाक्षिकमपि कारणत्वम[प]हनुवानं चार्वाक(कं) विकल्पद्वयं कृत्वा यथासङ्ख्यमनिष्टप्रसङ्गेष्टलाभप्रदर्शनेन बोधयति **ने**ति। नियतनिषेधमात्रमनियतावधित्वं वा अनियतत्वम्, उभयत्रानिष्टप्रसङ्गमाह — **प्रथमे**ति । यदि वह्निविधिरितरकारण-साकल्य(ल्यं) धूममुपजनयति तदेदमनिष्टमित्यर्थः। वह्निनिषेधमात्रे तु तदा(द)भावेऽपि स्यादिति बोद्धव्यम् । न च वाच्यं यो हि दहनस्य धूम(मं) प्रति पूर्वकालतयाऽवधिनियम(मः) प्रतिपद्यते स रासभ[10B]स्याऽवन्धि(धि)-त्वमनियमेनाङ्गीकुरुत एव... तुल्यानुपपत्तिप्रतिहतत्वात् । तथाहि किं धूमस्य दहनादहनाद् वा नियमेन परकालवर्तित्वं स्वभावोऽनियमेन वा ? नाद्यः, सदातनत्वापत्तेः । द्वितीयस्तु लोकमन... । न हि दहनमात्रादेव धूमः किन्तु दहनसामग्रीत इति लौकिकोऽनुभवः ।

9. **द्वितीये तु किमुपकारान्तरेण ? नियमस्यैवापेक्षार्थत्वात्, तस्यैव च कारणात्मत्वात्, ईदृशस्य च स्वभाववादस्येष्टत्वात् । नित्यस्वभावनियमवदेतत्, न ह्याकाशस्य तत्त्वमाकस्मिकमिति सर्वस्य किं न स्यादिति वक्तुमुचितमिति चेत् न । सर्वस्य भवतः स्वभावत्वानुपपत्तेः । न ह्येकमनेकस्वभावं नाम, व्याघातात् । नन्वेवमिहापि सर्वदा भवतः कादाचित्कत्वस्वभावव्याघात इति तुल्यः परिहारः ? न तुल्यः, निरवधित्वेऽनियतावधित्वे वा कादाचित्कत्वव्याघातात् । नियतावधित्वे हेतुवादाभ्युपगमात् ॥५॥**

9. **द्वितीये त्वि**ति । न ह्युपकारकव्याप्ता कारणता येन तदभावे न स्यात् किन्तु स्वरूपविशेषव्याप्ता, तन्निवृत्तावेव निवर्तते इत्यर्थः । ततो दहननिवृत्ताव्रि(वे)व [निवर्तते] धूमस्वरूपमित्यर्थः । **नियमस्यैवे**ति । अन्वयव्यतिरेकवज्जातीयस्यैवापेक्षापदवाच्यत्वेन लोकप्रसिद्धत्वादित्यर्थः । नन्वपेक्षणीय... इति न(म)न्यमानं

प्रत्याह - **तस्यैव चेति** । नियतावधेरे[व] कारणपदवाच्यत्वान्न त्वन्यस्येति लौकिकमिति तात्पर्यम् । नन्व(नू)पकारकं नियतमभिमन्यमाना एव स्वाभाविकत्वमातिष्ठन्ते चार्वाका न... विद इति शङ्कामपनयति – **इदृशस्य** चेति । चो यद्यर्थः । इदृशं यदि स्वाभाविकत्वं [तर्हि] वयमप्यनुमन्यामहे । नन्वन्यदप्रामाणिकमित्यर्थः । तदेवमन्यथासिद्धं संदिग्ध-व्यतिरेकौ प्रबन्ध... निराकृत्य चार्वाकाङ्गीकृतस्वपक्षसाधनपरपक्षसत्प्रतिपक्षदूषण-पक्षमाशङ्कते – **नित्ये**ति । अनेन दृष्टाता(न्ता)वष्ट[म्]भेन प्रयोगं सूचयति – कादाचित्कस्वभावनियमो निर्हेतुकः स्वभावनियमत्वान्नित्यस्वभावनियमवदिति । ये त्विमं ग्रन्थमबुद्ध्यमाना नियतदेशवन्नियतकालस्वभाव इत्यनेन पौन[11A]रुक्त्यमाहुस्ते कुबुद्धय एवेत्युपेक्षणीयाः । पूर्वापरग्रन्थयोः संदिग्धव्यतिरेकित्वप्रदर्शनविपरीत-प्रमाणोपदर्शनाभ्यां परस्परं विभिन्नार्थत्वात् । ननु च निर्हेतुकत्वे गगनवत् सदा सत्त्वप्रसङ्गः, तथा च प्रतितर्कप्रतिहतमुक्तसाधनं न सिद्धिदूषणयोः पर्याप्तमिति नैयाय(यि)कः कदाचित्.... तत्परिहाराभिप्रायेणाह – **नहीति** । आकाशस्येत्याकाशादेर्नित्यस्यैवेति यावत् तत्त्वं सदातम(न)त्वं नित्यानामेव धर्मो नान्येषामिति यथा तथैतदपीति तात्पर्यार्थः । अक्षरार्थस्तु यथाऽऽकाशमात्रस्य यो धर्मः [आकाश]त्वमात्मन एवात्मत्वमाकस्मिकमिति सर्वस्य ततोऽन्यस्यात्मानदेः(त्मादेः) शब्दाद्याश्रयत्वं किमिति न स्यात् [इति न] वक्तुमुचित[म्] प्रामाणिकत्वात् तथा निर्हेतुकत्वाविशेषेऽपि सदातनत्वमाकाशादीनां कादाचित्कत्वं घटादीनामेवेति, न त्वन्यस्य धर्मोऽन्यस्येति। यथाहुः -

> नित्यसत्त्वा भवन्त्येके, अनित्यसत्त्वाश्च केचना(न) ।
> विचित्राः केचिदित्यत्र तत्स्वभावो नियामकः ॥
>
> अग्निरुष्णो जलं शीतं समस्पर्शस्तथाऽनिलः ।
> केनेदं चित्रितं तस्मात् स्वभावात् तद्व्यवस्थितिः ॥

हेतुमत्त्वस्य प्रत्यक्षसिद्धतयाऽबाधितत्वेन कादाचित्कस्वभावेतरस्वभावनियमप्रयुक्तत्वेन वा नेदमनुमानं सिद्ध्युपालब्धो(सिद्ध्युपलब्ध्यो)रङ्गमित्याशयवान्निराकरोति – **ने**ति । यदाऽऽकाशस्याकस्मिकं तत्त्वमसाधारणो धर्मस्तद्यदि सत्त्वस्य काशकुशादेर्भवेत् तदाऽस्यैवेति निरस्यते । तदेकनियतः किल तस्यैवेत्युच्यते – **स्वभावत्वानुपपत्तेरि**त्यसाधारणधर्मत्वानुपपत्तेः सत्तादेरित्यर्थः । एतदेव कुत इत्यत आह – **न हीति** । एकमेकमात्रवृत्ति, अनेकस्व[11B]भावमनेकेषां स्वभावो भवति... तदा कादाचित्के त्वस्याहेतुकत्वे सदातन-त्वमप्यनाशङ्कनीयमेव कादाचित्कत्वस्वभावभङ्गप्रसङ्गादित्याशयवानाशङ्कते... तथाह - कादाचित्कत्वस्वभावसिद्धौ तद्विपरीतकल्पनायां व्याघातः स्यात्, तत्सिद्धिस्तु निरवधित्वे सावधित्वे सति वा । द्वितीयेऽप्यनियतावधित्वे नियतावधित्वे वा । तत्र प्रथममध्यमपक्षयोर्दूषणमाह । आद्ये पक्षे.... गपि सत्त्व(त्त्वे) पूर्वोक्तकादाचित्कत्वनिरुक्ति-व्याघातः । प्राङ(ग)सत्त्वे त्वनियतावधित्वाभ्युपगमव्याघातः । तृतीयमाशङ्क्य सम्प्रतिपत्तिमुत्तरमाह । नियतावधेरेव हेतुपदवाच्यतया लोके प्रसिद्धत्वान्न त्वन्यस्येति तात्पर्य[म्] । तथा च साध्यबाधे पूर्वोक्तं दूषणमित्यवधातव्यम्। तदेतत् सर्वसं(सर्वं स)कल[प्रा]ज्ञोक्तम् – **सापेक्षत्वादि**ति । सह कारणेनापेक्षया वर्तत इति सापेक्षम् । तथा च.... न्यथेति । अस्य प्रयोगः पूर्वमुक्त इत्यनुसन्धेयम् । इममेवार्थमभिप्रेत्य [**धर्म**]**कीर्ति**रप्याह –

> नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।
> अपेक्षातो हि भावानां [कादाचित्कत्व]सम्भवः ॥ [प्रमाणवार्तिक ३.३४] इति ।

10. **स्यादेतत् । उत्तरस्य पूर्वः पूर्वस्योत्तरो मध्यमस्योभयमवधिरस्तु, दर्शनस्य दुरपह्नवत्वात् । त्वयाप्येतदभ्युपगन्तव्यम् । न हि भाववदभावेऽप्युभयावधित्वमस्ति । तद्वद् भावेष्वप्यनुपलभ्यमानैकैक-कोटिषु स्यात् । न स्यात् अनादित्वात् ।**

प्रवाहोऽनादिमानेष न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥६॥

10. न तु सापेक्षत्वेऽपि कादाचित्कत्वमयुक्तम् । न खल्वनन्तातीतसमयसंसर्गिणी सामग्र्युपलभ्यते । ततो याऽनुपलब्धप्राक्कोटिका सैवानादिः । अतो[ऽ]योग्यतया पूर्वकोट्यज्ञानमिति चेत्, न, प्रागभावेऽपि प्राक्कोटिनिषेधानुपपत्तिप्राप्तेः । अतोऽनादिसामग्रीसापेक्षात्मलाभानां सर्वेषां सदातनत्वापत्तौ [12A] कादाचित्कत्वं सापेक्षनिरपेक्षाभ्यां व्यावृत्तं गन्धवत्त्वमिवासाधारणमित्याशयवानाह — **स्यादेतदि**ति । कुलालादिसामग्री, तत्कार्यो घटः, तदर्थक्रियोदकहरणभणां(कधरण-हरण-भरणां)त्रयः, तत उत्तरस्यार्थक्रियारूपस्य पूर्वो घटो अवधिः, पूर्वस्य च कुलालादिसामग्रीरूपस्योत्तरो घटः, न तु तत् सर्व[था] कर्ल्प(ल्प)नमनुपलब्धिबाधितत्वात्, मध्यमस्य घटस्य चोभयमवधिनि(र्नि)रूपकोऽस्तु । कुत इत्याह - **दर्शनस्ये**ति । दुरपह्नवत्वात् सर्वलोकसिद्धत्वेनेति शेषः । ननु भवतामेवमस्तु न त्वस्माकमित्यत आह - **त्वयाऽपी**ति । अनङ्गीकारे विपक्षे बाधकाभिप्रायेणाह — **न ही**ति । अन्यथा तत्राप्युभयावधित्वप्रसङ्गः इत्यभिप्रायः । यथा भावस्य प्रागभावः पूर्वः प्रध्वंसश्चोत्तरोऽवधिः । ननु प्रागभावप्रध्वंसयोः पूर्वोत्तरावधित्वं कि(किं) नू(नो)त्तरपूर्वावधित्वम् ? तत् कस्य हेतोः ? अनुपलभ्यमानत्वात् पूर्वोत्तरकोट्योः, तथा अनुपलभ्यमानपूर्वकोटिकेष्वस्तु । तथा चानादिसामग्री... कादाचित्कत्वं न सवे(हे)त । प्रकारान्तराभावादित्याशयवानाह — **तद्वदि**ति । तथा चोक्तदोषापत्तिरिति सत्यम् । सामग्रीणामनिश्चितपूर्व-कोटीनामनादि... भयेनापूर्वा सामग्रीपरम्परा परिकल्प्यते । प्रागभावे तु पूर्वकोटिकल्पनायां भावोन्मज्जनापत्तिबाधकम् । साधक(कं) च न किमप्यस्तीत्यतो नासा... त्कमनादित्वं स्मारयित्वा प्रथमपदेन व्याचष्टे — **अनादित्वादि**ति । एष कार्यकारणप्रवाहस्तत्तत्पूर्वसामग्रीरूपका[12B].... णतामभिमन्यमानो निराकर्तव्य इत्यभिप्रायात् द्वितीयपदमाह- **न विजाती**ति । विगतजातिः व्यक्तिमात्रम् । न तद्वान्..... शक्तिमानिति । विलक्षणजातीयेषु या एका शक्तिस्तद्वान् इति बोद्धव्यम् । तदेवं चार्वाकमुखेनैव प्रसङ्गाद् मीमांसामपि निराकृत्य तृणादौ परोक्तव्यभिचारं निराकर्तुमुत्तरार्धेन... इति । सामान्यविशेषाक्रान्तगोचरयोरन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे यत्नवता पुरुषेण भवितव्यमित्यर्थः ।

11. **प्रागभावो ह्युत्तरकालावधिरनादिः, एवं भावोऽपि घटादिः स्यात् । अनुपलभ्यमानप्राक्कोटिक-घटादिविषयं नेदमनिष्टमिति चेत् न । तावन्मात्रावधिस्वभावत्वे तदहर्वत् पूर्वेद्युरपि तमवधीकृत्य तदुत्तरस्य सत्त्वप्रसङ्गात्, अपेक्षणीयान्तराभावात् । एवं पूर्वपूर्वमपि । भावे, तदेव सदातनत्वम् । तदहरेवानेन भवितव्यमित्यस्य स्वभाव इति चेत् न । तस्याप्यहः पूर्वन्यायेन पूर्वमपि सत्त्वप्रसङ्गात् । तस्मात् तस्यापि तत्पूर्वकत्वमेवं तत्पूर्वस्यापीत्यनादित्वमेव ज्यायो, न त्वपूर्वानुत्पादे कस्यचिदपूर्वस्य सम्भव इति । तथापि व्यक्त्यपेक्षया नियमोऽस्तु, न जात्यपेक्षयेति चेत्, न, नियतजातीयस्वभावता-व्याघातात् । यदि हि यतःकुतश्चिद् भवन्नेव तज्जातीयस्वभावः स्यात्, सर्वस्य सर्वजातीयत्वमेक-जातीयत्वं वा स्यात् । एवं तज्जातीयेन यतःकुतश्चिद् भवितव्यमित्यस्य स्वभावः ? तदापि सर्वस्मात् सर्वजातीयमेकजातीयं वा स्यात् ।**

11. श्लोकं व्याचिख्यासुरनिष्टं तावदाह - **प्रागभाव** इति... यैव न पूर्वावधित्वं भवेदिति शेषः । नेदमनिष्टमिति मन्यमा[न]श्चार्वाक आह — **अनुपलभ्यमाने**ति । घटस्यादिर्घटजनिका सामग्री, अनुपलभ्यमान-प्राक्कोटिश्चासौ घटः ... । अनिष्टमेवेदमित्यभिप्रायवानाह - **ने**ति । अयमर्थः - यदि पूर्वकोट्यभ्युपगमस्तदा कार्यकारणरूपस्य प्रवाहस्यानादित्वं न भवेत् । तदन्तःपातिना केनचिददृष्टपूर्वकोटिना कोट्यन्तरानपेक्षत्वात् । ननु मा भूदनादिप्रवाहोऽदृष्टपूर्वकोटित्वेनानादिभावमात्राधीन एव भविष्यति । किं नश्छिन्नमित्यत आह - **तावन्मात्रावधी**ति । अदृष्टपूर्वकोटित्वेन नाभावमात्रावधित्वम् । भावत्वे वा **तदहर्वत्** इति । तस्मिन्नहनि यथासम्बन्ध(न्धः) तथा पूर्वेद्युरपि गतदिवे(व)सेऽपि । **तमि**त्यनादिभावम् । तदुत्तरस्यानादिभावोत्तरस्य सत्त्वं [13A]प्रसज्येतेति । एतेन दृष्टप्राक्कोटिकस्यापि तावन्मात्रावधिस्वभावत्वे अनादित्वं स्यादित्यप्युक्तं भवति । कुत इत्याह - **अपेक्षणीये**ति । तदवधिस्वभावत्वेऽपि तस्मिन्नेव दिने अनेन भावितव्यं यस्मिन्नध्यक्षधियमधिरूढ इत्येषोऽप्यस्य स्वभाव एवेत्याशयेन शङ्कते — **तदहरेवे**ति । ननु किं कालमात्रमभिप्रेतमवच्छिन्नो वा कालः । द्वितीयेऽपि कालावच्छेदका उपाधयोऽनाद्यनित्यप्रवाहरूपा वा । कालानादित्वे तन्मात्रावधेघ(र्घ)टस्याप्यनादित्व-प्रसङ्गात् । द्वितीयं त्विष्टमेवास्माभिः । अनाद्यनित्यप्रवाहसिद्धये दृष्टावध्यनुपलम्भेऽप्यवधेरवन्स्या(रवश्या)भ्युपग-न्तव्यत्वात् । तृतीये त्वनादिरूपादृष्टावधिमात्रावधित्वे तदुत्तरस्यापि दिवसस्यानादित्वप्रसङ्गो घटस्येवेत्याशयवानाह — **तस्यापी**ति । तस्याद्वा(स्याबा)धकवशात् पूर्वपूर्वकोटिस्वा(स्वी)कारो दुर्वारो गत्यन्तराभावादित्याशयवानुपसंहरति — **तस्मादि**ति । **ज्यायो** युक्तम्, सतर्कप्रमाणसिद्धत्वादित्यर्थः । ननु यदि वैयात्यात् परो ब्रूयात् - अपूर्वानुत्पाद-मन्तरेण कादाचित्कत्वं स्यादित्यत्राह - **न त्वि**ति । पूर्विकैव युक्तिरनुसन्धेयेत्यर्थः । दुष्टाभिप्राय एव गुडुजिह्मि(हवि)कया शङ्कते — **तस्यापी**ति । जात्यपेक्षया पराङ्गीकृतकारणत्वे निरस्ते व्यक्त्यपेक्षया सुतरामेव निरस्तं भवति । तथा च न कारणत्वव्यवस्थेति दुष्टाभिसन्धिः । अवान्तरकार्यस्वीकारादेव समस्तव्यभिचारतिरस्कार इति मत्वा अनो(न्या)ऽनिष्टप्रसङ्गमाह - **ने**ति । किं कार्यस्यैव स्वभावो यद् भिन्नजातीयेभ्योऽपि जायते जायमानस्यानेकजातीयंत्वावा(जातीयत्वं वा) । अथ जनकस्य यदि तदाप्येकजातीयत्वे सर्वजातीयकार्यजनकत्वं चे(वे)ति । तत्र प्रथमे दूषणमाह — **यदि ही**ति । तज्जातीयमनेकजातीयं [13B] वाऽभिमतमिति । अत एवास्येत्यग्रे द्वितीये दूषणमाह - **एवमि**ति । **तज्जातीयेन** सर्वैकजातीयेनेत्यर्थः । न च वाच्यं नित्यजातिप्रति-नियमवदि(वदनि)त्यजातिनियमोऽप्यस्त्विति प्रमाबलस्योभयत्रापि तुल्यत्वात् । तथाहि - यथा नित्यस्य जातिप्रतिनियम उपलम्भबलेन व्यवस्थाप्यते कार्यस्यापि यदि तथै[व] तदा तत्तज्जातीयजन्यतापि तथैव व्यवस्थाप्यताम् । अथ तत्तज्जातीयजन्यता नोपलम्भबलेन व्यवस्थाप्या नित्यजातिनियमोऽपि तर्हि न ह्यवतिष्ठते । किञ्च, नित्यजातिनियमस्य हेत्वनपेक्षत्वम् । व्यक्तिहेत्वनपेक्षव्यक्तिजातिप्रतिबद्ध मु(उ)पलम्भ[:] परमाण्वादाविति तात्पर्य[म्] ।

12. **कथं तर्हि तृणारणिमणिभ्यो भवन्नाशुशुक्षणिरेकजातीयः ? एकशक्तिमत्त्वादिति चेत् न । यदि हि विजातीयेष्वप्येकजातीयकार्यकारणशक्तिः समवेयात्, न कार्यात् कारणविशेषः क्वाप्य-नुमीयेत । कारणव्यावृत्त्या च न तज्जातीयस्यैव कार्यस्य व्यावृत्तिरवसीयेत । तदभावेऽपि तज्जातीय-शक्तिमतोऽन्यस्मादपि तदुत्पत्तिसम्भवात् । यावद्दर्शनं व्यवस्था भविष्यतीति चेत् न । निमित्तस्यादर्शनाद् दृष्टस्य चानिमित्तत्वात् । एतेन सूक्ष्मजातीयादिति निरस्तम् । अवह्नेरपि तत्सौक्ष्म्याद् धूमोत्पत्त्यापत्तेः । कार्यजातिभेदाभेदयोः समवायिभेदाभेदावेव तन्त्रम्, न निमित्तासमवायिनी इति चेत् न । तयोरकारण-**

त्वप्रसङ्गात् । न हि सति भावमात्रं तत्, किन्तु सत्येव भावः । न च जातिनियमे समवायिकारणमात्रं निबन्धनमपि तु सामग्री । अन्यथा द्रव्यगुणकर्मणामेकोपादानकत्वे विजातीयत्वं न स्यात् । न च कार्यद्रव्यस्यैषा रीतिरिति युक्तम् । आरब्धदुग्धैरेवावयवैर्दध्यारम्भदर्शनात् ।

12. ननु यद्येकजातीयकारणनियमात् कार्यनियम[स्त]र्हि भिन्नजातीयेभ्यः कारणेभ्यो नैकजातीयं कार्यं प्राप्तमित्याशङ्कते – **कथमि**ति । अत्र मीमांसकसमाधानं निराकर्तुमाशङ्कते – **एके**ति । कार्यमु(र्यानु)पलब्धि-लिङ्गभङ्गप्रसङ्गात् संत्रासापसारितमेकशक्तिकत्वं विचार्यमाणं न प्रमाणपद्धतिमध्यास्त इत्याशयवान् परिहरति – **ने**ति । अनुमानद्वयभङ्गं समाधित्सय[न्] शङ्कते – **यावदि**ति । यावति कार्यं दृश्यते तावत्येव शक्तिः कल्प(ल्प्य)ते, नान्यथेति नोक्तदोषावकाश इत्यर्थः । ननु किंनिमित्ते शक्तिः कल्प्यते ? दृष्टं वा कार्यदर्शनमेव वा शक्तिव्यवस्थापकम् । आद्यं निराकरोति – **न, निमित्तस्ये**ति । अन्वयव्यतिरेकवतोऽदर्शनादित्यर्थः । द्वितीयं निराकरोति – **दृष्टस्य चे**ति । तृणादेरन्योन्यव्यभिचारेणाहेतुत्वात् । अकारणेऽपि च शक्तिक[ल्प]नायां रासभादावपि दहनार्जनशक्तिकल्पनापत्तिरित्यर्थः । तृतीयोऽपि किमन्वय[14A]व्यतिरेकवति कार्यशक्ति(क्ति) कल्पयति तद्विपरीते वेति तुल्यन्यायतया निरस्तो नु(न) युक्त्यन्तरमपेक्ष्य(क्ष)त इत्यर्थः । न च सत्यपि तदपरकारणसाध(क)ल्ये तृणैकव्यतिरेके कार्यव्यतिरेकात् तस्य हेतुत्वम् । न चाशक्तस्य, दहनहेतुसाकल्ये रासभमात्रव्यतिरेके दहनव्यतिरेकाभावादेव च । यदे(दै)कविरहे फलविरहस्तत्र शक्तिकल्पनेनातिप्रसङ्गः । अन्यथा तृणप्रयोज्यजातिवद् रासभप्रयोज्यजातिभेदकल्पना इति प्रतिवाच्यम् । तन्नात्राव्यतिरेके कार्यव्यतिरेकहेतुत्ववत् तदेकविरहे कार्यार्ज(र्याजन)नादहेतुत्वप्रसक्तौ निर्णयोपायवैधुर्येणाहेतुत्वस्य निश्चितत्वादिति । इह ये केचिद् विधिनिषेध-योरन्यतररूपां जाति(तिं) तृणादिषु अभ्युपगम्य परस्परव्यभिचारं परिहरति । .... मीमांसक(काः) तुल्ययोगक्षेमतया निरस्ता इत्याशयवानाह - **एतेने**ति । ननु तृणादयो निमित्तभेदा न समवायिनो, न च निमित्तभेदाभेदौ कार्य-भेदाभेदौ प्रयोजयते अपि तु समवायिभेदाभेदौ । ततस्तद्भेदेऽपि किमनेनानिष्टमस्माकमापादितमिति । नैयायिकैके(क)-देशिमतमाशङ्कते – **कार्ये**ति । तदेतदनिष्टप्रदर्शनेन निराकरोति । ननु सति भावमात्रेण कारणत्वेनेदमनिष्टमिति भ्रमं निवारयति - **न ही**ति । किञ्च, समवायिमात्रभेदो न जातिवोद(जातिभेदे) निमित्तम्, तदभावेऽपि जाति[14B]भेददर्शनादित्याह - **न चे**ति । कार्यत्वेऽपि न कार्यमात्रस्यापि तु द्रव्यस्य सतो रीतिरेषा यत् समवायिभेदेन भिद्यत इति । न द्रव्यादिभिः समानोपादानैर्व्यभिचार इत्यत आह - **न चे**ति । अत्र हेतुमाह – **आरब्धे**ति। अन्यथा समवाय्यभेदे कार्यद्रव्यं दधिदुग्धरूपं न भिद्येतेत्यर्थः । क्षीरावयवा अम्लद्रव्यसम्पर्कवशाद् विनष्टाः कार्यद्रव्यान्तरमारभन्त इति लौकि[को]ऽनुभव इत्यर्थः । अथवा दुग्धारम्भकाः परमाणव एक(व) दध्यारभते(न्ते)....ने क्षीरमुपाददतो नियमेनेति । न च क्षीरावयवी दध्यारभत इत्युपपन्नं भिन्नमुपादानमिति वाच्यम् । दध्युपलम्भसमवाये(मये) दुग्धावयविनोऽनुपलब्धेः.... समवायिकारणोपलम्भं विरुणद्धि तन्तुपटादावपि तथात्वप्रसङ्गादिति निस्तरङ्गमे(निरस्तमे)तच्च । अत एव क्षीरं नष्टं दधि जातमिति सर्वजनप्रसिद्धिः । न च क्षीरावयवा अपि नोपलभ्यन्त एवेति वाच्यमिह, क्षीरेषु दधीति प्रत्ययस्य सर्वलोकसिद्धत्वात् 'तन्तुषु पटः' [इति] प्रत्ययवत्। तद्वव(तद्वदेव) ।

13. **एतेनाऽपोहवादे नियमो निरस्तः । "कार्यकारणभावाद् वा" [प्रमाणवार्तिक ३.३०] इत्यादिविप्लवप्रसङ्गात् । तस्मान्नियतजातीयतास्वभावभङ्गेन व्यक्त्यपेक्षयैव नियम इति । न । फूत्कारेण तृणादेरेव, निर्मन्थनेनारणेरेव, प्रतिफलिततरणिकिरणैर्मणेरेवेति प्रकारनियमवत्तेनैव व्यज्यमानस्य**

कार्यजातिभेदस्य भावात् । दृश्यते च पावकत्वाविशेषेऽपि प्रदीपः प्रासादोदरव्यापकमा-लोकमारभते, न तथा ज्वालाजालजटिलोऽपि दारुदहनो न तराञ्च कारीषः ।

यस्तु तं नाकलयेत्, स कार्यसामान्येन कारणमात्रमनुमियादिति किमनुपपन्नम् । एवं तर्हि धूमादावपि कश्चिदनुपलक्षणीयो विशेषः स्याद् यस्य दहनाऽपेक्षेति न धूमादिसामान्याद् वह्निसामान्यादिसिद्धिः ।

13. सूक्ष्मजातिवादिनामपि कार्यकारणनिवृत्तिभ्यां कार्यकारणनिवृत्त्यनुमानापाकरणेनैव बौद्धानामप्यनुमानगात्रभङ्ग इत्यतिदिशति — **एतेने**ति तृणादौ व्यभिचारेण । **नियमो**ऽविनाभावः । [15A] कथमित्यत आह - **कार्ये**ति। कारणभावासिद्धौ स्वभावस्याप्यसिद्धिरित्यर्थः । नात्र परमार्थतः कार्यकारणभावमङ्गीकरोति चार्वाकः किन्तु तत्र रसनबुद्ध्यैव गुडजिह्विकयोपसंहरति - **तस्मादि**ति । नियतया(जा)तिशक्तिव्यावृत्तिभंगे गत्यन्तराभावाद् व्यक्तीनामेव कारणत्वमुपेतव्यम् । तत्र चान्वयव्यतिरेकव्यभिचारादकारणत्व(त्वं) सुव्यक्तमिति तात्पर्यम् । तदेतदवान्तरजातिस्वीकारादेव समञ्जसमिति मन्यमानो निराकरोति — **ने**ति । प्रकारनियमः सहकारिनियमः । फूत्कारस्तृणादेरेव, निर्मथनमरणेरेवेत्यादि । तेनैव व्यज्यमानस्य प्रतिपाद्यमानस्येत्यर्थः । तथा च प्रयोगः - विवादाध्यासिता अग्नयो वह्नित्वावान्तरानेकजातिमन्तः, नियतसहकार्यनुप्रवेशेन जायमानत्वात् प्रदीपदारुदहनकारी[ष]वत् । अथवा प्रत्यक्षमुक्तं सास्नाकेशराद्यभिव्यञ्जकव्यक्तिगोत्वाश्वत्ववत् । विपक्षे च बाधकम् - यद्यवान्तरजातिविशेषसम्बन्धित्वं न स्यात् तदा [नियत]सहकार्यनुप्रवेशे[न] जायमानत्वं न स्यात् । कार्यजातिविशेषेण सहकारिनियमस्य व्याप्तत्वात् । व्यापकनिवृत्तौ च व्याप्यनिवृत्तेः सर्ववादीष्टत्वात् । न चाव्यपदेशत्वान्नास्ति विशेषः । [अ]नैकान्तिकत्वात् । सामान्यविशेषतो व्यपदेश्यस्यानुभूयमानस्येक्षुक्षीरगुडादिरसभेदस्य सत्त्वस्वीकारेण(णा)नैकान्तिकत्वात् । सामान्यतश्चासिद्धत्वादिति सर्वमवदातम् । न च दृष्टान्तः साध्यविकल इत्याह - **दृश्यते चे**ति । यथा तत्र तैलादिकारणविशेषव्यङ्ग्या जातिस्तथाऽत्रापीति नादृष्ट[15B][चरकल्पनमित्यर्थः किन्तु दुरूहत्वा]न्नैष विशेष [आपाततः स्फुरति] । तत्कथं तथाभूतात् कार्यात् तथाभूतकारणमनुमीयत इत्यत आह - **यस्तु तमि**ति । यथा प्रदीपादेर्यो विशेषं नाकलयति स न विशेषमनुमिमीते किन्तु पावकमात्रसंदर्शनेन तदनुकूलकारणमात्रम् । यस्तु विशेषमपि जानीते स विशेषमनुमिनोत्येव । तथाऽत्रापीत्यर्थः । यदि तृणादीनामनुपलक्षणीयकार्यगतविशेषं प्रति प्रयोजकत्व(त्वं) तदा धूमादावपि विशे[ष]स्वीकारे न धूमादिमात्राद् धूमध्वजानुमानमित्याशयवानाह — **एवमि**ति । एवं वह्निव्यतिरेकाद् न धूम[व्यतिरेको] गम्येत । वह्नेर्धूमगतविशेष एव प्रयोजकत्वादिति कार्य....पलब्धिरपि वराकी न प्रमाणमित्याशयवानाह — **एतेने**ति । व्याख्यातो निषेध्यतयेति शेषः। अनेन प्रकारेण कार्यानुपलब्धी विलीयेते अवतिष्ठते तु स्वभावः क्षणिकत्वादिसंसाधनपटीयानित्यत आह - **तथा चे**ति । विपक्षे बाधकप्रमाणप्रवेदनीयो हि स्वभावनियमो बौद्धैरभ्युपगम्यते । बाधकं च कार्यानुपलब्धी । ततस्तद्भङ्गे कथमनुपायः स्वभावः सेत्स्यति । न चास्माकमिव परेषामपि प्रकारान्तरमस्ति येन त्रितयभङ्गेऽपि अनुमानमात्र[म]वतिष्ठेत । कार्यानुपलम्भस्वभावाख्या हेतवस्तु य इति सद्य(साध्य)संदर्शनादिति तात्पर्यार्थः । तदेतत् सर्वरा(बी)जसामान्यमङ्कुरेऽप्रयोजकम्, तद्विशेषः [16A] कुर्वद्रूपत्वं प्रयोजकमिति वदतो बौद्धस्य दूषणम् नास्माकं कारणसामान्यविशेषयोः कार्यसामान्यविशेषौ [प्रति] प्रयोजकत्वादिति वदतामित्याशयवानाह — **ने**ति।

14. **एतेन व्यतिरेको व्याख्यातः । तथा च कार्यानुपलब्धिलिङ्गभङ्गे स्वभावस्याप्यसिद्धेर्गतमनुमानेनेति**

चेत् । प्रत्यक्षानुपलम्भगोचरो जातिभेदो न कार्यप्रयोजक इति वदतो वौद्धस्य शिरस्येष प्रहारः । अस्माकं तु यत्सामान्याक्रान्तयोर्ययोरन्वयव्यतिरेकवत्ता तयोस्तथैव हेतुहेतुमद्भावनिश्चयः । तथा चावान्तरविशेषसद्भावेऽपि न नो विरोधः । किं पुनस्तार्णादौ दहनसामान्यस्य प्रयोजकम् ? तृणादीनां विशेष एव नियतत्वादिति चेत्, न । तेजोमात्रोत्पत्तौ पवनो निमित्तम्, अवयवसंयोगोऽसमवायी, तेजोऽवयवाः समवायिनः । इयमेव सामग्री गुरुत्ववद्द्रव्यसहिता पिण्डितस्य । इयमेव तेजोगतमुद्भूतस्पर्शमपेक्ष्य दहनम्, तत्रापि जलं प्राप्य दिव्यम्, पार्थिवं प्राप्य भौमम्, उभयं प्राप्यौदर्यमारभत इति स्वयमूहनीयम् ॥६॥

14. **प्रत्यक्षानुपलम्भगोचरो** बीजत्वजातियुक्तं बीजं कार्येऽङ्कुरेऽप्रयोजकोऽकारणम्, किन्तु तद्विशेषः कुर्वद्रूपमिति। तथा अप्रामाणिककारणकुर्वद्रूपवदप्रामाणिक ए[व] कार्येविशेषे च.(कार्यविशेष इति) शङ्कायामनुमानत्रयभङ्ग इति बौद्धस्य प्रहारो दोष इत्यर्थः । एतच्च क्ष[ण]भङ्गे स्फुटीभविष्यति । न चास्माभिर्विशेषोऽप्रामाणिक एव स्वीक्रियते येन तथाशङ्कायामनुमानभङ्गः । यदि तृणादिवद्वह्निविशेषाद्धूमविशेषः स्यादित्युच्यते तदा नेदमनिष्टमित्याशयवानाह - **अस्माकं त्विति** । एवं हे... थे निस्तीर्णे सुमार्गे प्रश्नोत्तराभ्यां कोमलमाह - **किं पुनरिति** । एवं समर्थिते कारणतत्व(त्त्वे) तदायत्ता... ईश्वरसिद्धिः ।

15. **तथाप्येकमेकजातीयमेव वा किञ्चित् कारणमस्तु, कृतं विचित्रेण । दृश्यते ह्यविलक्षणमपि विलक्षणानेककार्यकारि । यथा प्रदीप एक एव तिमिरापहारी, वर्तिविकारकारी, रूपान्तरव्यवहारकारीति चेत्, न, वैचित्र्यात् कार्यस्य ।**

एकस्य न क्रमः क्वापि वैचित्र्यं च समस्य न ।
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥७॥

15. कारणस्यैकव्यक्तितयैकजातीयतया वाऽस्मदादिभिरपि द्रष्टुं शक्यत्वेन सिद्धसाधनादित्यभिप्रायेण शङ्कते - **तथापीति** । न चाविचित्रात् कारणाद् विचित्रकार्योदयो न दृष्टचर इत्यत आह - **दृश्यते हीति** । प्रदीपश्च(पे च) न स्वरूपसहकारिवैलक्षण्यमुपलभामहे इत्यभिप्रायः । परस्य द्वितीयपादाद्यपदेनोत्तरयति - **न वैचित्र्यादिति**। यद्येकमविलक्षणं [16B] कारणं न तदा क्रमि[कं] कार्यं भवेत् । दृश्यते च क्रमिकं कार्यं किञ्चिदिदानीं किञ्चिदुपरिष्टात् किञ्चित् तदुपरिष्टादित्यादि । एतत्सूचितं प्रत्यक्षमनुमानं वा पूर्वमेवोक्तमिति प्रतिसन्धेयम् । कालकृतवैचित्र्यं प्रमाणयित्वा जातिकृतवैचित्र्यं प्रमाणयति - **वैचित्र्यं चेति** । वः पुनरर्थे पुनः प्रकारान्तरेण वैचित्र्यमित्यर्थः । समस्यैकजातीयस्येत्यर्थः । ननु जातिसाम्येऽपि धर्मभेदाद् भेद इत्याशङ्कायामुक्तम् - **शक्तीति** । नाभिन्नो न भिन्नो नोभयमुक्तदोषापरिहाराभिमानासिद्धिविरोधे[ऽस्य] इति । नन्वदहनजनकस्यैव दहनेतरकार्यजनकत्वस्वभाव इत्याह — **स्वभाव** इति । दुरतिक्रमोऽशक्यातिक्रम इति यावत् । अदहनजनकात् स्वभावानुवृत्तिव्यावृत्तिभ्यां दहनाभिमतादहनप्रसङ्गदहनानुत्पादयोर्दुष्परिहरत्वात् । अतिरिक्तानुप्रवेशे सहकारिप्राप्तेरपह्नवानुपपत्तेरिति तात्पर्यम् ।

16. **न तावदेकस्मादनपेक्षादनेकम् । अक्रमात् क्रमवत्कार्यानुपपत्तेः । क्रमवत्तावत्कार्यकारणस्वभावत्वात् तस्य तत्तथा यौगपद्यवदिति चेत् । अयमपि क्षणभङ्गपरिहारो न तु सहकारिवादे, पूर्वपूर्वानपेक्षायां क्रमस्यैव व्याहतेः । क्रमनियमे त्वनपेक्षाऽनुपपत्तेः ।**

16. श्लोकपदं व्याचष्टे - **न तावदि**ति । अक्रमात् क्रमिकं सहकारिविधुरादित्यर्थः । अक्रममपि कारणं क्रमिककार्यार्जनशीलत्वात् क्रमिकं कार्यं करोत्येव ज्वालां नैकस्वभावोऽपि प्रदीप इव कार्ययौगपद्यं विपक्षे बाधकाभावादित्याशयेन शङ्कते — **क्रमवत् तावदि**ति । **तस्य** कारणस्य **तदि**ति कार्यम् तथेति क्रमवदित्यर्थः । तदेतेन प्रकारेण न सहकारिनिराकरणं कृतं किन्तु तदभ्युपगमतयेति [17A] चार्वाकवराक(कं) प्रतिपादयन्नाह — **अयमपी**ति । अयमर्थः । यदा बौद्धेनोक्तं भवति समर्थस्य विलम्बानुपपत्तेरुत्पत्त्यनन्तरकाले कारणान्तर[मनपेक्ष]णीयं तदोच्यते समर्थोऽपि न तवै(दै)व सर्वाणि कार्याणि कुरुते, क्रमवत् तावत् कार्यकरणशीलत्वादिति क्षणभङ्गे सङ्गच्छते परिहारः । क्रमवत् तावत् कार्यमपि न सहकारिणमनासाद्य किन्तु तदङ्गीकृत्येत्याशयवानाह — **न त्वि**ति । एतदेव स्पष्टयति — **पूर्वपूर्वे**ति । एककारणानन्तरमपरापरकार्योत्पादन(नं) हि क्रमः । पदार्थान्तरसहितस्य कार्यजनकत्वं चापेक्षा । लोकप्रसिद्धा चैषा । तत्र यदि क्रमस्तदाऽऽद्यकार्यसहितस्य द्वितीयकार्यजनकत्वात् तदपेक्षत्वमेवेति । अथाद्यकार्यसहितस्य कार्यजनकत्वं तदा युगपदेव कार्यद्वयमिति क्रमव्याकोप इत्यर्थः ।

17. **नाप्यनेकमविचित्रम् । यदि ह्यन्यूनमनतिरिक्तं वा दहनकारणमदहनस्यापि हेतुर्नासावदहनो दहनो वा स्यादुभयात्मको वा स्यात् । न चैवम् । शक्तिभेदादयमदोष इति चेत् न । धर्मिभेदाभेदाभ्यां तस्यानुपपत्तेः । असङ्कीर्णोभयजननस्वभावत्वादयमदोष इति चेत् । न । न हि स्वाधीनमस्यादहनत्वम्, अपि तु तज्जनकस्वभावाधीनम् । तथा च तदायत्तत्वाद् दहनस्यापि तत्त्वं केन वारणीयम् । न हि तस्मिन् जनयितव्ये नासौ तत्स्वभावः । तस्माद् विचित्रत्वात् कार्यस्य कारणेनापि विचित्रेण भवितव्यम् । न च तत् स्वभावतस्तथा । ततः सहकारिवैचित्र्यानुप्रवेशः । न तु क्षणोऽपि तदनपेक्षस्तथा भवितुमर्हतीति ॥७॥**

17. द्वितीयं पदं व्याख्यातुमुपक्रमते - **नापी**ति । तथाहि — तदेकजातीयं कारणं दहनैकस्वभाव-मदहनजनकम् अदहनैकस्वभावं वा दहनजनकं सङ्कीर्णमुभयजनकस्वभावं वा तथाभूतोभयजनकम् । प्रथमे दोषमाह - **नासावि**ति । असावदहनो न स्यात् कारणाभावादित्यर्थः । भवन् वा दहनो भवेदित्याह - **दहनो वा स्यादि**ति । इतरदहनवत् तत्कारणप्रसूतत्वादित्याशयः । दहनैकजनकशीलस्यादहनजनकत्वे व्याघातोऽप्युन्नेतव्य इति तात्पर्यम् । द्वितीयोऽपि यथाव्याख्यातवैपरीत्यफक्किकायोजनया निरसनीयः । नासौ दहनोऽदहनो वा स्यादिति कृत्वा अदहनमात्रजननशीलस्य दहनजनकत्वे व्याघातोऽपि पूर्ववद् द्रष्टव्यः । तृतीयेऽनिष्टमाह — **उभ**[17B]**यात्मक** इति । तृतीयपादव्याचिख्यासुः शङ्कते — **शक्ती**ति ।... दहनजनकस्यैव धर्मभेद-मुपादायादहनजनकत्वे पूर्वोक्तसमस्तानिष्टपरिहार इत्यर्थः । निराकरोति — **शक्तिभावा(भेदा)दि**ति । शक्तिभेदो न संभवति धर्मिणोऽभिन्नत्वात् । अभिन्नायाः शक्तेर्भेदो(दा)नुपपत्तेः । तद्भेदस्तु प्रतिज्ञातैकजातीयकारणत्व-व्याघातापत्तेरेवानुपपन्नः । भेदाभेदवादस्तु प्रमाणाभावव्याघाताभ्यामसम्भवी । तेनैव भेदो अभेदो वा भेदाभेदौ *वेत्यर्थः । ...दहनादहनजनकस्य दहनादहनजनकत्वम् । नापि सङ्कीर्णोभयजनकत्वमभिप्रेतम् किन्तु* विलक्षणानेकत्रयनकस्य(नेकजनकस्य) तथात्वमित्याशयवान् शङ्कते - **असङ्कीर्णो**ति । अयमदोषः [न दहनादहन]जनकत्वोभयात्मकत्वप्रसङ्ग इत्यर्थः । एतदपि सहकार्यसम्भवे न सम्भवतीत्याशयवान् परिहरति — **नेति** । एतदेवोपपादयति — **नही**ति । अस्यादहनत्वेनाभिमतस्यादहनत्वं न स्वाधीनम् । क...नजनकस्वभावाधीन-नत्वंन्यच्चेति(स्वभावाधीनत्वं जन्यस्येति) लोकसिद्धम् । एवं च तदेवेतरनिरपेक्षं यदि दहनकारणं स्यात् तदा

तस्यापि तत्त्वमदहन[त्वं] वाङ्मात्रेणा- शक्यमपाकर्तुम् । न हि दहने कर्तव्येऽसावदहनजनकस्वभावो न भवतीति परेषामभिमतमित्यर्थः । दहने जनयितव्ये तत्स्वभावानभ्युपगमे पुनरेकजातीयकारणानुपपत्तिः । स्वभावान्तरस्य दहनजनकत्वाभ्युपगमात् । स एवादहनजनकत्वस्वभावमतिक्रम्य स्वभावान्तरेण दहनं जनयति यत इत्यभिप्रायः । प्रकृतमुपसंहरन् प्रत्यक्षानु-मानप्रमाणमाह [18A] – **तस्मादिति** । ननु स्वरूपमेव विचित्रमस्तु कृतं सहकारिवैचित्र्येणेत्यत आह - **न चेति**। अविचित्रस्वरूपमेव प्रदीपमृदादि विचित्रतैलवर्तिविषय-कुलालतरुताल्यमहाप्रयत्नादीनासाद्य वर्तिविकारादिघटशरावादिकार्यमर्जयतीति सार्वजनीनमेतत् । न तु सहकारिवैचित्र्यानुप्रवेशमन्तरेणैव तथोत्पन्नक्षणमुपादाय कार्यवैचित्र्यमुपपादयिष्यत इत्यत आह – **न त्विति** । तदनपेक्षः सहकार्यसहितस्तथा विचित्रो नैवेत्यर्थः । बौद्धमतेऽपि सहोत्पन्नविचित्रसहकारित एव क्षणो विचित्रकार्यमर्जयति । अन्यथा विषयासन्निधावपि प्रदीपाद् विषयप्रकाशो दुर्वार इति तात्पर्यम् ।

18. **अस्तु दृष्टमेव सहकारिचक्रं किमपूर्वकल्पनयेति चेत् न । विश्ववृत्तितः ।**
विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा ।
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥८॥

यदि हि पूर्वपूर्वभूतपरिणतिपरम्परामात्रमेवोत्तरोत्तरनिबन्धनम्, न परलोकार्थी कश्चिदिष्टापूर्तयोः प्रवर्तेत, न हि निष्फले दुःखैकफले वा कश्चिदेकोऽपि प्रेक्षापूर्वकारी घटते, प्रागेव जगत् । लाभ-पूजाख्यात्यर्थमिति चेत् ? लाभादय एव किंनिबन्धनाः ? न हीयं प्रवृत्तिः स्वरूपत एव तद्धेतुः यतो वाऽनेन लब्धव्यम्, यो वैनं पूजयिष्यति । स किमर्थम् ? ख्यात्यर्थमनुरागार्थं च, जनो दातरि मानयितरि च रज्यते, जनानुरागप्रभवा हि सम्पद इति चेत् । न । नीतिनर्मसचिवेष्वेव तदर्थं दानादि-व्यवस्थापनात् । त्रैविद्यतपस्विनो धूर्तबका एवेति चेत् न । तेषां दृष्टसम्पदं प्रत्यनुपयोगात् । सुखार्थं तथा करोति इति चेत् न । नास्तिकैरपि तथाकरणप्रसङ्गात्, सम्भोगवत् । लोकव्यवहारसिद्धत्वादफलमपि क्रियते, वेदव्यवहारसिद्धत्वात् संध्योपासनवदिति चेत्, गुरुमतमेतन्न तु गुरोर्मतम्, ततो नेदमनवसर एव वक्तुमुचितम् । वृद्धैर्विप्रलब्धत्वाद् बालानामिति चेत् न । वृद्धानामपि प्रवृत्तेः । न च विप्रलम्भकाः स्वात्मानमपि विप्रलभन्ते । तेऽपि वृद्धतरैरित्येवमनादिरिति चेत् । न तर्हि विप्रलिप्सुः कश्चिदत्र यतः प्रतारणशङ्का स्यात् । इदं प्रथम एव कश्चिदनुष्ठायापि धूर्तः परानुष्ठापयतीति चेत् । किमसौ सर्वलोकोत्तर एव यः सर्वस्वदक्षिणया सर्वबन्धुपरित्यागेन सर्वसुखविमुखो ब्रह्मचर्येण तपसा श्रद्धया वा केवलपरवञ्चनकुतूहली यावज्जीवमात्मानमवसादयति, कथं चैनमेकं प्रेक्षाकारिणोऽप्यनुविदध्युः । केन वा चिह्नेनायमीदृशस्त्वया लोकोत्तरप्रज्ञेन प्रतारक इति निर्णीतः ? न ह्येतावतो दुःखराशेः प्रतारणसुखं गरीयः । यतः पाखण्डाभिमतेष्वप्येवं दृश्यते इति चेत् । न । हेतुदर्शनादर्शनाभ्यां विशेषात् । अनादौ चैवम्भूतेऽनुष्ठाने प्रतीयमाने प्रकारान्तरमाश्रित्यापि बहुवित्तव्ययायासोपदेशमात्रेण प्रतारणा स्यात्, न त्वनुष्ठानागोचरेण कर्मणा । अन्यथा प्रमाणविरोधमन्तरेण पाखण्डित्वप्रसिद्धिरपि न स्यात् ॥८॥

अस्तु दानाध्ययनादिरेव विचित्रो हेतुर्जगद्वैचित्र्यस्येति चेत् न । क्षणिकत्वात्, अपेक्षितस्य कालान्तरभावित्वात् ।

चिरध्वस्तं फलायालं न कर्मातिशयं विना ।
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि ॥९॥

तस्मादस्त्यतिशयः कश्चित् । ईदृशान्येवैतानि स्वहेतुबलायातानि येन नियतभोगसाधनानीति चेत् । तदिदममीषामतीन्द्रियं रूपं सहकारिभेदो वा ? न तावदैन्द्रियकस्यातीन्द्रियं रूपं व्याघातात् । द्वितीये त्वपूर्वसिद्धिः ॥९॥

18. नन्वेतावतापि विचित्रं कारणं दृश्यमेवातस्तदधिष्ठानेऽस्मदादिरेव भविष्यतीति सिद्धसाधनदूषणदूषितं मननसाधकमित्याशङ्कते — **यदि हीति** । **इष्टं** यागादि । **पूर्तं** खातादि । **न हीयमिति** । चिरायातीतायामेव त्यां-(तस्यां) लाभादीनामनुत्पादादिति शेषः । सुगमतरता । **न त्वनुष्ठानागोचरेणेति** । अयमर्थः । यदि हि वैदिक-व्यवहारापेक्षया कश्चिदपरोऽनादिर्व्यवहारः स्यात् तदाऽयमाधुनिको वैदिकव्यवहारः प्रतारणापरो व्यवतिष्ठेत यथा पिपासाशान्तये तोयपानेऽनादिसिद्धे अनादि(अन्नादि)भक्षणं पिपासोपशम[नम्] इष्यतीति प्रतारणेयं लोकसिद्धा त्वेवमस्ति । प्रमाणसिद्धमतिक्रम्य तद्विरुद्धमुपक्रममाणः पाषण्डपद्धतिमध्यास्ते न त्वन्यथेत्याशयवानाह — **अन्यथेति** । विश्वप्रवृत्त्यनुमितामुष्मिकफलस्य यागदानादि(दि)कमेव कारणत्वेनागमसिद्धतयाऽस्तु कृतमप्रामाणिकापूर्व-कल्पनया । तथा च न तदधिष्ठातृपुरुषविशेषसिद्धिरित्यादिसं[श]यवान् शङ्कते - **अस्त्विति** [18B] । **विचित्रो** नानास्वभावः, **जगद्वैचित्र्यस्य** स्वर्गादेरित्यर्थः । कालान्तरि(रे) क(फ)लसिद्ध्यन्यथानुपपत्तिप्रमाणसिद्धमपूर्व-मागमप्रामाण्यादेव कल्पितमतस्तदधिष्ठातृकल्पनमप्युपपन्नमित्याशयवान् परिहरति - **चिरध्वस्तं कर्म नातिशयम**पूर्वं **विना फलायालं** समर्थमिति । नन्वेतावताऽपूर्वं सिध्यतु तथाऽऽत्मनि न तु भूतेष्विति किमत्र नियामकमित्याह - **सम्भोग** इति । सम्यग्भोगो नियतो भोग इति । **निर्विशेषाणाम**पूर्वरूपविशेषशून्यानामात्म[नां] न संभवति । भूतानां [सा]धारणत्वात् । न च संस्कृतानामसाधारण्यं प्रमाणाभावेन तस्यासंभावितत्वात् । तेन तत्तदसाधारणा-त्मगतभोगान्यथानुपपत्तिप्रमाणमेव प्रत्यात्मगतापूर्वमावेदय[ति । **अतीन्द्रियं रूपम्** अतीन्द्रि]यस्वभावो वा **सहकारिभेदो**ऽतीन्द्रियसहकारिसम्प्र(प)त्तिर्वेत्यर्थः ।

19. **सिद्ध्यतु भूतधर्म एव गुरुत्वादिवदतीन्द्रियः । अवश्यं त्वयाऽप्येतदङ्गीकरणीयम् । कथमन्यथा मन्त्रादिभिः प्रतिबन्धः । तथाहि । करतलानलसंयोगाद् यादृशादेव दाहो दृष्टः तादृशादेव मन्त्रादिप्रतिबन्धे सति दाहो न जायते, असति तु जायते, तत्र न दृष्टवैगुण्यमुपलभामहे । नापि दृष्टसाद्गुण्येऽदृष्टवैगुण्यं संभावनीयम्, तस्यैतावन्मात्रार्थत्वात् । अन्यथा कर्मण्यपि विभागः कदाचिन्न जायेत । न च प्रतिबन्ध-काभावविशिष्टा सामग्री कारणम् । अभावस्याकारणत्वात् । तुच्छो ह्यसौ । प्रतिबन्धकोत्तम्भकप्रयोगकाले च तेन विनापि कार्योत्पत्तेः । प्राक्प्रध्वंसादिविकल्पेन चानियतहेतुकत्वापातात् । अकिञ्चित्करस्य प्रतिबन्धकत्वायोगात् । किञ्चित्करत्वे चातीन्द्रियशक्तेः स्वीकारात् । मन्त्रादिप्रयोगे चेतरेतराभावस्य सत्त्वेऽपि कार्यानुदयात् । अतोऽतीन्द्रियं किञ्चिद्दाहानुगुणमनुग्राहकमग्नेरुन्नीयते यस्यापकुर्वतां प्रतिबन्धक-त्वमुपपद्यते । यस्मिन्नविकले कार्यं जायते । यस्यैकजातीयत्वादनियतहेतुकत्वं निरस्यत इति । अत्रोच्यते —**

भावो यथा तथाऽभावः कारणं कार्यवन्मतः ।
प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः ॥१०॥

19. नन्वेतावताऽपि न पुरुषाश्रितातीन्द्रियसिद्धिर्भूतेष्वप्यतीन्द्रियधर्मस्वीकारवशेन प्रकृतापूर्वस्वीकारसंभवव्याजेनातीन्द्रियशक्तिवादं मीमांसकाभिमत...ति – **सिध्यत्विति** । तत्र कार्यान्यथानुपपत्तिरूपामर्थापत्तिं प्रमाणयति – **तथाहीति** । दृष्टादृष्टयोरन्यतरवैगुण्येनान्यथोपपत्तिं हृदि निधाय निराकरोति – **तत्रेति** । उभयवादिसिद्धप्रतिबन्धकाभावेनान्यथा(थो)पपत्तिभ्रमं निवारयति – **न चेति** । अकारणत्वमेव कुत इत्यत आह – **तुच्छो हीति** । तुच्छत्वं हि विधिरूपविरहितत्वमन्वयव्यतिरेकरहितत्वं वा । न त्वप्र(प्रा)मा।णकत्वमिति मन्तव्यम् । व्यतिरेकव्यभिचारमाह – **प्रतिबन्धकेति** । अन्वयव्यभिचारत्त्व(स्त्वे)कप्रतिबन्धकसम्भवे प्रतिबन्धकान्तराभावेऽपि कार्यानुपपत्तेर्बोद्धव्यः । [19A] सामान्येन व्यतिरेकव्यभिचारं प्रतिपाद्य विशेषतोऽपि व्यभिचारमाह – **प्रागिति** । प्राक्प्रध्वंसाद्यभावानां परस्परव्यभिचारचमत्कारवशेन कारणत्वनिश्चयोपायवैधुर्येणाकारणत्वनिश्चयात् कथं तेनान्यथोपपत्तिरित्यर्थः । न च तेषां भेदेऽप्येकोपाध्युपगृहीतानां कारणत्वनिश्चयो भविष्यतीति वाच्यमेकोपाधेरसंभवादिति भावः । अस्ति त(ता)वदुभयमतसिद्धं प्रतिबन्धकत्वम् । तच्च दृश्यमानसमस्तपदार्थापचयविरहेणानुपपद्यमानमदृश्यरूपापचयं करोतीत्यवर्जनीयमित्याशयवान् प्रतिबन्धकत्वान्यथानुपपत्तिरूपामर्थापत्तिमाह – **अकिञ्चिदिति** । प्रतिबन्धकाभावमात्रकारणवादिनं प्रत्यपरमपि दूषणमाह – **मन्त्रादीति** । अर्थापत्तिमन्यथोपपत्त्या निराकृत्याभिमतसाध्यमाह – **अतीन्द्रियमिति** । द्वितीयामर्थापत्तिमुपसंहरति – **यस्येति** । प्रथमामुपसंहरति – **यस्मिन्निति** । तृणारणिमणीनां कारणत्वमुभयाभिमतमनुपपद्यमानमतीन्द्रियं सामर्थ्यमावेदयतीति प्रदेशान्तरसिद्धमुपसंहरति – **यस्येति** । उपदर्शितप्रमाणमाभासीकर्तुं सिद्धान्तमुपक्रमते – **अत्रोच्यत** इति । अत्रेत्येतथि(तस्मिन्नि)त्यर्थः । येन प्रकारेण कारणत्वावधारणोपायेन भावः कारणं लोके सिद्धम् तेनैव प्रकारेणान्वयव्यतिरेकित्वेनाभावोऽपि कारणम् । यस्तु मन्यते तथात्वेऽपि भावकारणतां बाधयितुं लोकसिद्धनियमं 'कार्यवत् कारणे(णम्' इ)त्याह – **कार्यवन्मत** इति । यथा कार्योऽभावा(वो) नियतोत्तरकालत्वात् तथा कारणं नियतपूर्वभावित्वादिति लोकसिद्धमपदि(मपि) वर्जनीयमिति तात्पर्यम् । प्रथमार्थापत्तिं [19B] निरस्य द्वितीयां निराकर्तुमाह – **प्रतिबन्धो विसामग्री** सामग्र्यन्तरकारणविगमः प्रतिबन्धपदवाच्यो नान्य इत्युभयवादिसिद्धिमित्यर्थः । प्रतिबन्धहेतुः **प्रतिबन्धक** इत्यपि तथेत्याह – **तद्धेतुरिति** । तथा चान्यथोपपत्तिरित्यर्थः ।

20. **न ह्यभावस्याकारणत्वे प्रमाणमस्ति । न हि विधिरूपेणासौ तुच्छ इति स्वरूपेणापि तथा, निषेधरूपाभावे विधेरपि तुच्छत्वप्रसङ्गात् । कारणत्वस्य भावत्वेन व्याप्तवात् तन्निवृत्तौ तदपि निवर्तत इति चेत्, न, परिवर्तप्रसङ्गात् । अन्वयव्यतिरेकानुविधानस्य च कारणत्वनिश्चयहेतोर्भाववदभावेऽपि तुल्यत्वात् । अभावस्यावर्जनीयतया सन्निधिर्न तु हेतुत्वेनेति चेत्, तुल्यम् । प्रतियोगिनमुत्सारयतस्तस्यान्यप्रयुक्तः सन्निधिरिति चेत्, तुल्यम् । भावस्याभावोत्सारणं स्वरूपमेवेति चेदभावस्यापि भावोत्सारणं स्वरूपान्नातिरिच्ये । तस्माद् यथा भावस्यैव भावो जनक इति नियमोऽनुपपन्नः तथा भाव एव जनक इत्यपि । को ह्यनयोर्विशेषः ? प्रतिबन्धकोत्तम्भकप्रयोगकाले तु व्यभिचारस्तदा स्यात् यदि यादृशे सति कार्यानुदयस्तादृश एव सत्युत्पादः स्यात् । न त्वेवम्, तदापि प्रतिपक्षस्याभावात् । असत्प्रतिपक्षो हि प्रतिबन्धकाभिमतो मन्त्रः प्रतिपक्षः । स च तादृशो नास्त्येव । यस्त्वस्ति, नासौ प्रतिपक्षः । तथापि विशेष्ये सत्येव विशेषणमात्राभावस्तत्र स चोत्तम्भकमन्त्र एवेत्यन्यैव सामग्रीति चेत्, न, विशिष्टस्याप्यभावात् । न हि दण्डिनि सत्यदण्डानामन्येषां नाभावः, किन्तु दण्डाभावस्यैव केवलस्येति युक्तम् ।**

20. विवृणोति – **न हीति** । नन्वभावो न कारणम्, तुच्छत्वादिति प्रमाणमुक्तमिति चेत् । नालीकत्वस्यासिद्धत्वाद् भावनिषेधत्वस्याप्रयोजकत्वात् । अन्वयव्यतिरेकरहितत्वस्योपाधेर्विद्यमानत्वात् । **प्राभाकरं** प्रति तु प्रतिबन्धकाभाववद् व्यवहारगोचरसामग्र्या अकारणत्वमिति द्रष्टव्यम् । न चान्यनिषेधरूपत्वेनैवाकारणत्वमनैकान्तिकत्वादित्याशयवानाह – **न हीति** । स्वमतदार्ढ्येन शङ्कते – **कारणत्वस्ये**ति । न भावत्वस्य कारणव्यापकत्वमस्यासिद्धं लोकसिद्धं वेत्याशयवानाह – **ने**ति । लोकसिद्धातिक्रम उच्यते । [अति]क्रममनिष्टमाह – **परिवर्ते**ति । ननु न भावत्वमभावत्वं [वा] कारणत्वव्यापकं येन तन्निवृत्तावेव तत्व(स्य) निवृत्तिः । किं तर्हि ? नियतपूर्वकालभाविन एव कारणत्वं लोकसिद्धम्, तच्च भावस्यास्ति न त्वभावस्येति मन्यमानं प्रत्यभावस्यापि तदस्तीत्याह – **अन्वये**ति । भावसन्निधिः(धि)कारणत्वेनाभावसन्निधिस्त्ववर्जनीय आकाशसन्निधिवदिति मन्यमानः शङ्कते – **अभावस्ये**ति । न तु नित्यविभुत्वाभ्यामवर्जनीयः सन्निधिः, न च ते स्तः अभावस्य । तत्कथं तथात्वे सत्यप्यवर्जनीयत्वे भावस्याप्यवर्जनीयत्वमित्यभिप्रायेण परिहरति – **तुल्यमि**ति । विरोधिप्रोत्सारणप्रयुक्तः [20A] सन्निधिर्न कारणत्वे व्यवतिष्ठत इति मन्यमानः शङ्कते – **प्रतियोगिनमि**ति । भावसन्निधिरपि स्वभावप्रोत्सारणतया न कारणत्वे व्यवतिष्ठते इत्याशयवानाह – **तुल्यमि**ति । अथ भावस्याभावनिवृत्तिरूपत्वेन नाभावोत्सारकत्वमभेदात् तदाभावस्यापि भावनिवृत्तिरूपत्वेन [न] भावोत्सारकत्वमित्याशयकोत्तराभ्यामाह – **भावस्ये**ति । उक्तमर्थमुपसंहरति – **तस्मादि**ति । नियमोऽनुपपन्नः प्रमाणबाधितत्वादेवमपरोऽपि नियमोऽनुपपन्न इत्यर्थः । युगपद् मन्त्रपाठे व्यतिरेकव्यभिचारमपाकरोति – **प्रतिबन्धके**ति । तत्रापि प्रतिबन्धकाभावो न तु तत्सद्भाव इति कुतो व्यभिचार इति भावः । ननु प्रतिबन्धकोत्तम्भकप्रयोगे कथमभावः प्रतिबन्धकस्ये[त्या]ह – **यस्त्वि**ति । कार्यविरहोन्नेया हि प्रतिपक्षता कथं तदभावेऽस्तीत्युभयसम्मतमिति भावः । ननु प्रतिबन्धकोत्तम्भकप्रयोगविशेषप्रतिबन्धको मन्त्रे सत्येवोत्तम्भकमन्त्राभावस्य विशेषणस्व[भा]वो युगपन्मन्त्रपाठेन विशिष्टः । तथा च क्वचित् क्वचिदुभयभावाभावाभ्यां सामग्रीभेद इत्याशयवान् शङ्कते – **तथापी**ति । नात्रोभयसत्त्वासत्त्वयोर्दाहकारणत्वं येन सामग्रीभेदो भवेत्, किन्तु केवलस्तम्भकाभावस्य, स च सर्वत्रास्ति । तेनैव च रूपेण कारणत्वमतो नोक्तदोष इत्याशयवान् परिहरति – विशेषणविशेष्यमात्रसत्त्वे उभयासन्धेर(सत्त्वे च) विशिष्टस्याप्यभावस्तथा केवलस्तम्भकाभावत्वस्य सर्वत्राव्यभिचारात् कारणत्वमिति भावः । ननु विशिष्टमुभयस्वरूपम् [20B]... भावः शक्यो वक्तुमिति वादिनं लोकसिद्धदृष्टान्तेन प्रतिबोधयन्नाह – **न हीति** । 'हि'शब्दो यस्मादर्थो यतो लोकसिद्धमतोऽभ्युपगन्तव्यमेव विरोधाभावादिति समुदायार्थः । दण्डिनि दण्डयुक्ते अदण्डानां दण्डाभाव[व]तां नाभाव इति न, किन्तु अभाव एवेति । ननु दण्डाभावस्यैवाभाव इति लोकसिद्धमवर्जनीयमित्यक्षरार्थः ।

21. **यथा हि केवलदण्डसद्भाव उभयसद्भावे द्वयाभावे वा केवलपुरुषाभावः सर्वत्राविशिष्टः तथा केवलोत्तम्भकसद्भावे प्रतिबन्धकोत्तम्भकसद्भावे द्वयाभावे वा केवलप्रतिबन्धकाभावोऽविशिष्ट इत्यवधार्यताम् । अथैवंभूतसामग्रीत्रयमेव किं नेष्यते ? कार्यस्य तद्व्यभिचारात् जातिभेदकल्पनायां च प्रमाणाभावात् । यथोक्तनैवोपपत्तेः । भावे वा काममसावस्तु, का नो हानिः । प्राक्प्रध्वंसविकल्पोऽपि नानियतहेतुकत्वापादकः, यस्मिन् सति कार्यं न जायते तस्मिन्नसत्येव जायत इत्यत्र संसर्गाभावमात्रस्यैव प्रयोजकत्वात् ।**

21. पूर्वोक्तं समस्तं शिष्यहिततया दृष्टान्तदार्ष्टान्तिकव्याख्यानेन विशदयति – **यथा**हीति । **केवल**-

पुरुषाभाव इति । कैवल्यं दण्डाभावः, तद्युक्तः केवलः, तस्याभावः । दण्डमात्रोभयसद्भावेषूभयविशेषणविशेष्याभावैः केवलपुरुषाभावोऽविशिष्टः । यथेति दृष्टान्तं व्याख्याय प्रकृतमपि तुल्यतया व्याचष्टे तथेति । अत्र च कैवल्यमुत्तेजकाभावः, तद्युक्तः केवलः, स चासौ प्रतिबन्धकश्च, तस्याभावः । केवलोत्तम्भकसद्भाव-प्रतिबन्धकोत्तम्भकसद्भाव-द्वयाभावेषूभयविशेषणविशेष्यभावैरविशिष्ट इत्यर्थः । उक्तमर्थमबुध्यमानाः केचिद् नैयायिका यदूचिरे तदाशङ्क्ते - **अथैवम्भूते**ति । पर[स्प]रव्यभिचारिणामन्वयव्यतिरेकयोरशक्यग्रहत्वेनाकारणत्वादित्यभिप्रायवान् परिहरति - **कार्यस्ये**ति । तृणारणिन्यायं हृदि निधाय निराकरोति - **जाती**ति । ननु यथा तत्र जातिस्वीकारस्तथाऽत्रापि भविष्यति गत्यन्तराभावादित्यत आह — **यथोक्तेनैवे**ति । नन्विमं विशेषमजानानाः कथं परिहरिष्यन्तीति मन्यमानं प्रत्येकदेशिमतस्वीकारेऽपि नास्माकं दर्शनक्षतिरिति सुगमसमाधिमाह - **भावे वे**ति । सामान्यव्यभिचारमपाकृत्य विशेषव्यभिचारविशेषानभ्युपगमैकस्वीकाराभ्यामपाकरोति - **प्रागि**ति । एकरूपमुपदर्शयन्नेवाभाव[21A]मात्रकारणपक्षदोषमुन्मूलयति - **यस्मिनि**ति । केवलप्रतिबन्धके संसर्गिणि तस्मिंस्तथाभूते असत्येवेति । अत्रैकरूपमुपाधिमाह - **संसर्गे**ति । संसृज्यमानमन्त्राद्यभावत्वेन त्रयाणामुपसङ्ग्रह इत्यर्थः । तथाहि — न तावदत्र मन्त्रादिप्रयोगमात्रं प्रतिबन्धकम् । तस्मिन् सति त्रैलोक्यवर्तिवह्निप्रतिबन्धे क्वचिदपि कार्यं न भवेत्, न त्वेवं दृष्टमिष्टं वा । तस्माद् यो मन्त्रादिर्याव[द् व]ह्निव्यक्तिमुद्दिश्य प्रयुक्तः स तस्या एव व्यक्तेः कार्यं निवारयति, तेन जानीमः संसृज्यमानमन्त्रादौ कार्यानुपपत्तिस्तद्भावे तूत्पत्तिरित्यतो नोक्तदोषावकाशः । केचित् तूक्तमर्थमविद्वांसः संसर्गाभावेऽपि संसर्गप्रध्वंसादिविकल्पान् कृत्वा अनियतहेतुकत्वं तत्रापि संसर्गाभावस्वीकारेऽनवस्थेति वर्णयन्ति । तदसत् । उक्तो ह्यत्र संसृज्यमानाभावः कारणं न तु संसर्गाभावः, तत् कुतो विकल्पावकाशः कुतश्चानवस्थेति । न हि संसर्ग[:] प्रतिबन्धकः किन्तु संसृष्टो मन्त्रादिः । तथाहि - लोके क्वचित् संसर्गितया प्रतियोगी निषिध्यते 'तथेदमिह नास्ति' इति क्वचित्तु 'त(ता)दात्म्येन इदमिदं न भवति' इति । तत्र यः संसर्गितापन्नेन प्रतियोगिमा[न्] निरूप्यते संसर्गाभावः, तस्य च कारणत्वमिष्टमस्माभिः । अन्योन्याभावः व्यतिरिक्ताभावत्वं वा संसर्गाभावत्वमिति । न त्वेतत् सर्वं वयं नाधिगक्व(च्छा)म इति ।

22. **यस्तु संसर्गाभावतादात्म्यनिषेधयोर्विशेषमनाकलयन्नितरेतराभावेन प्रत्यवतिष्ठते स प्रतिबोधनीयः । तथाप्यभावेषु जातेरभावात् कथं त्रयाणामुपग्रहः स्यात्, अनुपगृहीतानां च कथं कारणत्वावधारणमिति चेत् । मा भूज्जातिः । न हि तदुपगृहीतानामेव व्यवहाराङ्गत्वम् । सर्वत्रोपाधिमद्व्यवहारविलोपप्रसङ्गात् । एतेन प्रतिबन्धके सत्यपि तज्जातीयान्यस्याभावसम्भवात् कार्योत्पादप्रसङ्गोऽनुत्पादे वा ततोऽप्यधिकं किञ्चिदपेक्षणीयमस्तीति निरस्तम् । यथा हि तज्जातीये सति कार्यं जायते अर्थादसति न जायत इति स्थिते तद्भावेऽपि तज्जातीयान्तराभावान्न भवितव्यं कार्येणेति न, तथैतदपि । अनुकूलवत् प्रतिकूलेऽपि सति तज्जातीयान्तराभावानामकिञ्चित्करत्वादिति । यत्त्वकिञ्चित्करस्येति । तदप्यसत् । सामग्रीवैकल्यं प्रतिबन्धपदार्थो मुख्यः, स चात्र मन्त्रादिरेव, न त्वसौ प्रतिबन्धकः । ततः किं तस्याकिञ्चित्करत्वेन । तत्प्रयोक्तारस्तु प्रतिबन्धारः । ते च किञ्चित्करा एवेति किमसमञ्जसम् ।**

22. पादप्रसारिकयाऽवतिष्ठमानस्य किञ्चिद् वक्तव्यमेवेत्यत आह - **यस्त्वि**ति । स प्रतिबोधनीयः । तादात्म्याभावविलक्षणसंसर्गाभावत्वव्युत्पादनेन त्वयाऽप्यभावचतुष्टयवादिषु त्रिष्वेकसंसर्गाभावत्वमङ्गीकर्तव्यम् अन्यथा

यत्रान्वयव्यतिरेकाभ्यां कारणत्वावसायस्तत्र का गतिः । [21B] तथाहि - बीजे सत्यङ्कुरो जायते तद्विरहे न जायते इत्यत्र यदि बीजप्रागभावो बीज[वि]रहो विवक्षितस्तदा बीजप्रध्वंसेऽपि जायेत, अथ बीजप्रध्वंसस्तदा बीजप्रागभावेऽपि भवेत् । अथ बीजात्यन्ताभावस्तदा बीजप्राग्भाव(गभाव)-प्रध्वंसयोरन्यतरसद्भावेऽपि स्यात् कार्यम् । न चैतद् दृष्टमिष्टं वा । अथ बीजाभावमात्रम् । तदा बीजान्योन्याभावेऽप्यङ्कुरोत्पत्तिर्न स्यात् । तदवश्यमिहानिच्छताऽपि बीजाभावानामन्योन्याभावव्यावृत्तसंसर्गाभावत्वमेकमनुसरणीयम् । तथा च नान्योन्याभावेनातिप्रसङ्ग इति भावः । तथा च प्रयोगः - प्रतिबन्धकाभावः कारणमन्वयव्यतिरेकित्वाद् भवेदिति तात्पर्य[म्] । न च वाच्यं मणिमन्त्राद्यभार्य(व)स्य न तावत् स्वरूपेण जनकत्वं किन्तु प्रतिपक्षाभावत्वेन । तत्र प्रतिपक्षत्वे निश्चिते तदभावत्वेन कारणत्वं निश्चेयम्, अभावस्य कारणत्वे निश्चिते सहकारिविरहरूपत्वेन मन्त्रादिप्रतिपक्षतानिरूपणमित्यन्योन्याश्रयदोषान्न प्रतिपक्षाभावस्य कारणत्वं निश्चीयत इति; यतो मन्त्रादिसन्निधेः कार्यादर्शननियमे प्रतिपक्षत्वमुन्नीयते, न तु सहकारिविरहत्वेन । तदभावेऽस्य मन्त्राद्यभावत्वेन वा रूपेणान्वयव्यतिरेकाभ्यां कारणत्वं विनिश्चीयते । किञ्च, अन्योन्याश्रये सति कारणत्वानिश्चयोऽस्तु न त्वकारणत्वनिश्चयः; तथा च कारणतासंदेहेऽप्यन्यथोपपत्तिरेवेति सर्वं सुस्थम् । जातिरेवोपसङ्ग्राहिका न तूपाधिरिति मन्वानः शङ्कते - **तथापी**ति । जातिवदुपाधिरपि क्वचित् सङ्ग्राहकः [22A] कथमन्यथोपाधिमद्व्यवहार इत्याशयवान् परिहरति — **मा भूदि**ति । अन्वयव्यभिचार[म]पाकर्तुं विशेषाभिधानाभिमानिनमुत्थाप्यातिदेशेन निराकरोति — **एतेने**ति । अतिदेशमेव विवरणव्याजेन विशदयति — **तथाही**ति । तज्जातीये बीजजातीये तद्भावेऽपि बीजभावेऽपि तज्जातीयान्तराभावात् तज्जातीयान्तराणामभाव(वा)त् न भवितव्यं कार्येणेति । यथेदमसङ्गतं तथैतदप्यशोभनमिति । उभयत्र हेतुमाह — **अनुकूलवदि**ति । अनुकूले बीजसद्भावे सति यथा तज्जातीयाभावो न तस्य कार्यं निषेधति तथा प्रतिकूलेऽपि कस्मिंश्चित् प्रतिबन्धके सति प्रतिबन्धाकान्तारा(प्रतिबन्धकान्तरा)भावोऽपि न कार्याभावमपनयति । अकिञ्चित्करत्वं निषेधविध्योरिति द्रष्टव्यम् । प्रतिबन्धकत्वान्यथानुपपत्तिप्रसूतामर्थापत्तिमपाकर्तुं पूर्वोक्तमुपन्यस्यति — **यत्त्वि**ति । किं प्रतिबन्ध एव प्रतिबन्धकस्तस्य किञ्चित्करत्वमथ प्रतिबन्धकारकः प्रतिबन्धकस्तस्य वा ? न तावदाद्यः, अनवस्थानात् प्रतिबन्धककर्तृत्वप्रसङ्गाच्च । द्वितीयस्त्विष्यत एवास्माभिरित्याशयवानाह — **तदप्यसत्** इति । अपि पूर्वार्थापत्तिसमुच्चये उभयसिद्धं निर्वचनमाह - **सामग्री**ति । **मुख्य** इति । प्रतिबन्धकस्य प्रतिबन्धकर्तृत्वोपाधित्वेन प्रतिबन्धवदस्य कारणं कारणविगमार्थत्वादित्यर्थः । यदि शक्तिरपनीयते तदापि सामग्र्यन्तर्गतकारणविगमः । अथाभावो निराक्रियते तथापि तदन्तर्गतकारणोपचय इति सामान्येनोभयसिद्धम् । अतोऽभावकारणत्वे सिद्धे स्वमते विशेषमाह - **स चे**ति । न च वाच्यं यः प्रतिबन्धकः स भावरूपापचयकारीति । यः प्रतिबन्धकः स [22B] दृश्यरूपापचयकारीत्यपि वक्तुं सुकरत्वान्न चैवमेवेति वाच्यम् । शक्तेरनपचयप्राप्तेः । तस्मार्ह(दर्ज)नमात्रमनावृत्य सामान्यपुरस्कारेणैव प्रवर्तितव्यमित्यन्यथोप[प]त्तिरिति भावः ।

23. **ये तु व्युत्पादयन्ति कार्यानुत्पाद एव प्रतिबन्ध इति तैः प्रतिबन्धमकुर्वन्त एव प्रतिबन्धका इत्युक्तं भवति । तथाहि कार्यस्यानुत्पादः प्रागभावो वा स्यात्, तस्य कालान्तरप्राप्तिर्वा ? न पूर्वः तस्यानुत्पाद्यत्वात् । न द्वितीयः कालस्य स्वरूपतोऽभेदात् । तदुपाधेस्तु मन्त्रमन्तरेणापि स्वकारणाधीनत्वात् । प्रागभावावच्छेदककालोपाधिस्तदपेक्ष इति चेत्, न, मन्त्रात् पूर्वमपि तस्य भावात् । तस्मात् सामग्रीतत्कार्ययोः पौर्वापर्यनियमात् तदभावयोरपि पूर्वापरभाव उपचर्यते । वस्तुतस्तु तुल्यकालत्वमेवेति नायं पन्थाः । न चेदेवम्, शक्तिस्वीकारेऽपि कः प्रतीकारः । तथाहि प्रतिबन्धकेन शक्तिर्वा विनाश्यते**

तद्धर्मो वा, धर्मान्तरं वा जन्यते, न जन्यते वा किमपि ? इति पक्षाः । तत्राकिञ्चित्करस्य प्रतिबन्धकत्वानुपपत्तेः । विपरीतधर्मान्तरजनने तदभावे सत्येव कार्यमित्यभावस्य कारणत्वस्वीकारः प्रागभावादिविकल्पावकाशश्च । तद्विनाशे तद्धर्मविनाशे वा पुनरुत्तम्भकेन तज्जननेऽनियतहेतुकत्वम्, पूर्वं स्वरूपोत्पादकादिदानीमुत्तम्भकादुत्पत्तेः । न च समानशक्तिकतया तुल्यजातीयत्वान्नैवमिति साम्प्रतम् । विजातीयेषु समानशक्तिनिषेधात् । न च प्रतिबन्धकशक्तिमेवोत्तम्भको विरुणद्धि, न तु भावशक्तिमुत्पादयतीति साम्प्रतम् । तदनुत्पादप्रसङ्गात् । कालविशेषात् तदुत्पादे तदेवानियतहेतुकत्वमिति ॥१०॥

23. एकदेशिमतं निराकर्तुमुपन्यस्यति – **ये त्विति** । निराकर[णं] स्पष्टयति - **तथाहीति** । प्रथमपक्षेऽनुत्पाद्यस्य जन्यत्वविरोधो जन्यत्वे वाऽनुत्पाद्यत्वस्वरूपक्षतिरिति तात्पर्यम् । द्वितीये स च कालश्चेत्यतोऽतिरिक्तस्य प्रमाणस्याभाव इत्यर्थः । न तु कालोपाधिः कालशब्दवाच्यः । तच्च(त्र) मन्त्र(न्त्रः) [किं] का(क)रोतीत्यत आह - **तदुपाधिरिति** । यद्यपि कालमात्रोपाधिर्मन्त्रमन्तरेणापि भवति तथापि प्रागभावावच्छेदकतदुपाधिर्मन्त्रमपेक्षिष्यत इत्याशङ्कते – **प्रागिति** । प्रागभावावच्छेदकश्च कालोपाधिश्चेति कर्मधारयः । एतदपि मन्त्रकार्यत्वेन निरस्यति – **नेति** । मन्त्रात् प्रागिति वदता तदकार्यत्वमुक्तम् । ननु यद्यनादित्वेन कार्याभावस्यानुत्पाद्यत्वं कथं तर्हि लोके कारणाभावात् कार्याभाव इति, निरुक्तिहेतुत्वाभावाच्च कथं पञ्चम्यपीति हृदि निधायोपचारेणोभयमुपसंहर[न्] समर्थयात(यति) । अवश्यमेवास्मदुक्तसमाधानमङ्गीकर्तव्यमन्यथा तवापि शक्तिस्वीकारे त्वदुक्तदोषप्रसङ्ग इत्याह - **न चेदेवमिति** । **पूर्वमिति** । येनैव हेतुना वस्तुस्वरूपमुत्पादिता(तं) प्राक् तेनैव ततोऽभिन्ना शक्तिरपीत्यर्थः । मीमांसका(क)व्युत्पादितं स्वमतं दार्ढ्येन परिहरति - **न चेति** । प्रकारान्तरेण परमतमाशङ्क्यानिष्टप्रदर्शनेन निषेधति – **न चेति** । पुनराशङ्क्य पूर्वोक्तदोषं स्मारयति - **कालेति** ।

24. **स्यादेतत् । मा भूत् सहजशक्तिः, आधेयशक्तिस्तु स्यात् । दृश्यते हि प्रोक्षणादिना व्रीह्यादेरभिसंस्कारः । कथमन्यथा कालान्तरे तादृशानामेव कार्यविशेषोपयोगः । न च मन्त्रादीनेव सहकारिणः प्राप्य ते कार्यकारिण इति साम्प्रतम् । तेषु चिरध्वस्तेष्वपि कार्योत्पादात् । नापि प्रध्वंससहायास्ते तथा । एवं हि यागादिप्रध्वंसा एव स्वर्गादीनुत्पादयन्तु, कृतमपूर्वकल्पनया । तेषामनन्तत्वादनन्तफलप्रवाहः प्रसज्यत इति चेत्, अपूर्वेऽपि कल्पिते तावानेव फलप्रवाह इति कुतः । अपूर्वस्वाभाव्यादिति चेत् तुल्यमिदमिहापि । तावतापि तत्प्रध्वंसो न विनश्यतीति विशेषः ।**

स्यादेतत् । उपलक्षणं प्रोक्षणादयः, न तु विशेषणम् । तथा चाविद्यमानैरपि तैरुपलक्षिता व्रीह्यादयस्तत्र तत्रोपयोक्ष्यन्ते यथा गुरुणा टीका कुरुणा क्षेत्रमिति चेत्, तदसत् । न हि स्वरूपव्यापारयोरभावेऽपि उपलक्षणस्य कारणत्वं कश्चिदिच्छति, अतिप्रसङ्गात् । व्यवहारमात्रं तु तज्ज्ञानसाध्यम्, न तु तत्साध्यम् । तज्ज्ञानमपि स्वकारणाधीनम्, न तु तेन निरन्वयध्वस्तेन जन्यते । अस्तु वा तत्राप्यतिशयकल्पना किं नश्छिन्नम् । यद्वा यागादेरप्युपलक्षणत्वमस्तु तदुपलक्षितः कालो यज्वा वा स्वर्गादि साधयिष्यति, कृतमपूर्वेण । न च देवदत्तस्य स्वगुणाऽऽकृष्टाः शरीरादयो भोगाय, तद्भोगसाधनत्वात्, स्रगादिवदित्यन्वयिबलादपूर्वसिद्धेर्नाविशेष इति साम्प्रतम् । इच्छाप्रयत्नज्ञानैर्यथायोगं सिद्धसाधनात् । न च तद्रहितानामपि भोग इति युक्तिमत् येन ततोऽप्यधिकं सिद्ध्येत् । नापि स्वगुणोत्पादिता इति साध्यार्थः, मनसाऽनैकान्तिकत्वात् । नापि कार्यत्वे सतीति विशेषणीयो हेतुः, तथासत्युपलक्षणैरेव

सिद्धसाधनात् । असतां तेषां कथमुत्पादकत्वमिति चेत्, तदेतदभिमन्त्रणादिष्वपि तुल्यम् । तस्माद् भावभूतमतिशयं जनयन्त एव प्रोक्षणादयः कालान्तरभाविने फलाय कल्पन्ते, प्रमाणतस्तदर्थमुपादीयमानत्वात्, यागकृषिचिकित्सावदिति । अन्यथा कृष्यादयो दुर्घटाः प्रसज्येरन् । बीजादीनामापरमाण्वन्तभङ्गात् तेषु चावान्तरजातेरभावान्नियतजातीयकार्यारम्भानुपपत्तेः ।

24. आस्तां [23A] तावत् सहजशक्तिराधेयशक्तिस्तु दुष्परिहरेत्याशयेन शङ्कते - **स्यादेतदि**ति । नत्वेषाऽपि प्रमाणाभावेनानुपपन्नैवेत्यतः प्रमाणमर्थापत्तिमाह - **दृश्यते हीति** । एतेन संस्कार्यकर्मता दर्शिता । 'व्रीहिन् प्रोक्षति' इत्यत्र कर्मत्वान्यथानुपपत्तिमाह । न च प्रकारान्तरेण कर्मत्वमुपपद्यत इति हृदयम् । कालान्तरे तथाभूतानामुपादानान्यथानुपपत्तिरूपमर्थापत्त्यन्तरं प्रमाणमाह - **कथमि**ति । अनन्तरार्थापत्तेरन्यथोपपत्तिमाशङ्क्य निराकरोति - **न चे**ति । पुनराशङ्क्यानिष्टमाह - **नापी**ति । 'प्रोक्षितैर्व्रीहिभिर्यजेत' इत्यत्र विशिष्टानामेव व्रीहीणामुपयोगदर्शनात् प्रोक्षणस्य च तावत्कालानवस्थानाद् विशिष्टत्वानुपपत्त्या तज्जनितसंस्कारव[त्]त्वेन विशिष्टत्वमित्यत्र विशेषणपक्षं विहायोपलक्षणतामुपादाय तद्व्यवहारो भविष्यतीत्याशङ्कते - **स्यादेतदि**ति । नात्र व्यवहारमात्रं येन तथाभूतैरेव किन्तु कारणत्वं कथं तर्ह्युपलक्षितत्वव्यवहारो भवेदित्यत आह - **व्यवहारमात्रमि**ति । ननु तज्ज्ञानमपि कथमित्यत आह - **तज्ज्ञानमपी**ति । ननु स्वकारणमपि तदेवेत्यत आह - **न त्वि**ति । निरन्वयध्वस्तेन अनुत्पादितव्यापारध्वस्तेनेत्यर्थः । अथवा तत्राप्यतिशयोऽस्त्वस्माकमनिष्टाभावादित्यत आह - **अस्त्वि**ति । उपलक्षणपक्षस्वीकारे अपरमप्यनिष्टमित्यत आह - **यद्वे**ति । अत्रादृष्टस्वीकारत्वा[त् तज्]जमनुमानमस्तीत्यभिमान(नं) परस्योत्थापयति - **न चे**ति । **स्वगुणाकृष्टा** इति । स्वगुणसहकारिण इति साध्यार्थः । स्वगुणोत्पादिता इति वा । आद्ये सिद्धसाधनमित्याह — **इच्छे**ति । द्वितीयमाशङ्क्य निराचष्टे - **नापी**ति । विशेषणमुपादायाशङ्क्य परिहरति - **नापी**ति । उपलक्षणैज(र्ज)न्मान्तरज्ञानादित्यर्थः । [23B] अयमभिप्रायो देवतोद्देशेन द्रव्यपरित्यागयन्तो(युक्तो) हि यागः । स्वद्रव्यस्य परस्थत्वापत्ति(प्ति)फलकश्च प्रयत्नो दानार्थः । यागादीनां च धर्मार्जनद्वारेण शरीरजनकत्वं साध्यं तत्र सिध्यति यागादिभिरेव स्वगुणैरू(रु)पलक्षणैः । शरीरादेर्भोगसाधनस्योत्पादना[त्] सिद्धसाधनमिति । असतामुत्पादकत्वं न दृष्टमित्याशङ्कते - **असतामि**ति । प्रकृतेऽपि तुल्यत्वेन परिहरति - **तदेतदि**ति । पूर्वोक्तमर्थं प्रमाणयन्नुपसंहरति - **तस्मादि**ति । ननु कृष्यादयो नैवमित्यत आह - **अन्यथे**ति ।

25. **अत्रोच्यते —**

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः ।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः ॥११॥

यथा हि देवताविशेषोद्देशेन हुताशने हविराहुतयः समन्त्राः प्रयुक्ताः पुरुषमभिसंस्कुर्वते, न वह्निं नापि देवताः; तथा व्रीह्याद्युद्देशेन प्रयुज्यमानः प्रोक्षणादिः पुरुषमेव संस्कुरुते, न तम् । यथा च कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जलमुचां सञ्चरणजलक्षरणरूपा क्रिया तथा व्रीह्यादीनां तत्तदुत्तरक्रियाविशेषाः । यथा चैकत्र कर्तृकर्मसाधनवैगुण्यात् फलाभावस्तथा परत्रापि । आगमिकत्वस्योभयत्रापि तुल्यत्वात् । न तर्हि बर्हिष इव व्रीह्यादेः पुनरुपयोगान्तरं स्यात्, उपयोगे वा तज्जातीयान्तरमप्युपादीयेत, अविशेषात् । न । विचित्रा ह्यभिसंस्काराः केचिद् व्याप्रियमाणोद्देश्यसहकारिण एव कार्ये उपयुज्यन्ते ।

किमत्र क्रियताम्, विधेर्दुर्लङ्घ्यत्वात् । यथा चाभिचारसंस्कारो यं देहमुद्दीश्य प्रयुक्तस्तदपेक्ष एव तत्सम्बद्धस्यैव दुःखमुपजनयति, नान्यस्य । न वा तदनपेक्षः । एवमभिमन्त्रणादिसंस्कारा अपि भवन्तो न मनागपि नोपयुज्यन्ते । कथं तर्हि व्रीह्यादीनां संस्कार्यकर्मतेति चेत्, प्रोक्षणादिफलसम्बन्धादेव ।

25. सित्त(द्ध)मुपक्रमते - **अत्रोच्यत** इति । किं(किम)त्र भावभूतमतिशयमुपजनयत एवेति यथाश्रुतः प्रतिज्ञार्थः व्रीह्यादेरेवेति विशेषितो वा ? आद्य(द्ये) सिद्धसाधनमनुमाने, अर्थापत्तावन्यथोपपत्तिरन्यसमवेतधर्मवशेनोपादाननियमोपपत्त्ये(त्त्या) । द्वितीये हविस्त्यागादिभिरनेकान्त इत्याशयवानाह — **संस्कार** इति । एव करोति । अन्यत्र संस्कारमपाकरोति । न तु संस्कार(रः) तस्येष्ट(ष्टः अ)न्व[य]विभावनेन । उक्तप्रमाणदूषणमाह । कृष्यादिदृष्टान्ते च नातिशयमातिष्ठामहे । ततः साध्यविकलतेत्याह - **स्वगुणा** इति । न त्वतीन्द्रियशक्तिमन्त इत्यभिप्रायः । यत्वो(यच्चो)पदर्शिताभिमतप्रमाणयोः सिद्धसाधनानैकान्तिकत्वे व्याघातव्याजेन दर्शयति - **यथाही**ति । व्रीहिसंस्कारपक्षे हि व्रीहिगतमत्वे(गतत्वे)न संस्कारस्य व्रीहिसहकारिता युज्यते, पुरुषसंस्कारपक्षे त्वसम्बद्धत्वात् कथं व्रीहिसहकारित्वमिति यदि कश्चिद् व(ब्रू)यात् तत्राह - **यथा चे**ति । संस्काराधारपुरुषसंयोगाद् व्रीहीणामस्ति संस्कारसम्बन्ध इत्यर्थः । ननु यदा पुरुषस्य पातकादिदुष्टत्वं भवति [24A] तदा कथं पुरुषस्य संस्कार इति । ततो दुष्टत्वाद् व्रीहीणां संस्कार एवास्त्वित्यत उक्तम् - **यथा चैकत्रे**ति । कर्तृवैगुण्ये न क्वचित् संस्कार उत्पद्यते तत्सा[द्]गुण्यस्यापि निमित्तत्वादित्यर्थः । नन्वेवं संस्कृतव्रीहीणामुत्तरक्रि[या]यास्तूपयोगो न स्याद् बर्हिष इवेत्याशङ्क्यते - **न तर्ही**ति । ननु 'व्रीहिभिर्यजेत' इति व्रीहेर्यागसाधनत्वेन विहितत्वादकृतसंस्कारस्यापि व्रीहेर्यागार्थं पुनरुपादानं भविष्यतीत्या(तीत्यत) अनिष्टमाह - **उपयोगे वे**ति । संस्कारमाहात्म्यम(मे)वेदं यदुद्देश्यसहकारी कार्ये उपयुज्यते न तु तदसहकारीत्याशयवान् परिहरति — **विधेरि**ति । 'प्रोक्षिता व्रीहयोऽभ्युदयाय घटन्ते' इति वाक्यशेषसहकृतस्य 'व्रीहिभिर्यजेत' इति वाक्यश्पे(स्ये)त्यर्थः । न केवलमनुल्लङ्घ्यविधिबलाद् व्याप्रियमाणोद्देश्यसहकारित्वं संस्काराणां किन्त्वन्यत्रापि व्याप्रियमाणोद्देश्यसहकारित्वसंदर्शनाच्चैवं कल्पनमित्याशयवानुभयसिद्धमुपदर्शयति - **यथा चे**ति । ननु परसमवेतक्रियाफलशालित्वं कर्मत्वं तच्चेह प्रोक्षणजनितक्रियाफलशालित्वं व्रीहीणामस्तीत्यतः कर्मत्वान्यथानुपपत्तिं प्रथममुक्त्वा शङ्कते - **कथमि**ति । प्रोक्षणजनितजलसंयोगाश्रयत्वेनैव कर्मत्वोपपत्तिरिति परिहरति - **प्रोक्षणादी**ति । न च तस्य प्रधानता दृष्टाननुकूलत्वादनीप्सितत्वं परमापूर्वानुकूलचेतनाश्रितधर्मार्जनद्वारेणैव तदुपपत्तेरिति भावः ।

26. **ननु यद्देशेन यत् क्रियते तत् तत्र किञ्चित्करम्, यथा पुत्रेष्टिपितृयज्ञौ । तथा चाभिमन्त्रणादयो व्रीह्याद्युद्देशेन प्रवृत्ता इत्यनुमानमिति चेत्, तन्न । हविस्त्यागादिभिरनैकान्तिकत्वात् । न हि ते कालान्तरभाविफलानुगुणं किञ्चिद् हुताशनादौ जनयन्ति । किं वा न दृष्टमिन्द्रियलिङ्गशब्दव्यापाराः प्रमेयोद्देशेन प्रवृत्ताः प्रमातर्येव किञ्चिज्जनयन्ति, न प्रमेय इति । कृषिचिकित्से अप्येवमेव स्यातामिति चेत्, न । दृष्टेनैव पाकजरूपादिभेदेनोपपत्तावदृष्टकल्पनायां प्रमाणाभावात् । तथा च लाक्षारसावसेको व्याख्यातः । अत एव बीजविशेषस्याऽऽपरमाण्वन्तभङ्गेऽपि परमाणूनामवान्तरजात्यभावेऽपि प्राचीनपाकजविशेषादेव विशिष्टाः परमाणवः, तं तं कार्यविशेषमारभन्ते । यथा हि कलमबीजं यवादेः, नरबीजं वानरादेः, गोक्षीरं माहिषादेर्जात्या व्यावर्तते, तथा तत्परमाणवोऽपि मूलभूताः पाकजैरेव व्यावर्तन्ते । न ह्यस्ति संभवी गोक्षीरं सुरभि मधुरं शीतम्, तत्परमाणवश्च विपरीताः । तस्मात् तथाभूताः**

पाकजा एव परमाणवो तथाभूतैरेव आद्यातिशयोऽन्त्यातिशयोऽङ्कुरादिर्वेति किमत्र शक्तिकल्पनया ? कल्पादावप्येवमेव । इदानीं बीजादिसन्निविष्टानामस्मदादिभिरुपसम्पादनं तदानीं तु विभक्तानामदृष्टादेव केवलाद् मिथः संसर्ग इति विशेषः । न च वाच्यमिदानीमपि तथैव किं न स्यात् ? यतः कृष्यादि-कर्मोच्छेदे तत्साध्यानां भोगानामुच्छेदप्रसङ्गात् । अव्यवस्थाभयाच्च अदृष्टानि कर्माणि दृष्टकर्मव्यवस्थयैव भोगसाधनानीत्युन्नीयते । तस्मात् पाकजविशेषैः संस्थानविशेषैश्च विशिष्टाः परमाणवः कार्यविशेष-मारभन्ते । ते च तेजोऽनिलतोयसंसर्गैर्विशेषः, ते च क्रियया, सा च नोदनाभिघातगुरुत्ववेगद्रवत्वादृष्ट-वदात्मसंयोगेभ्यो यथायथमिति न किञ्चिदनुपपन्नम् । निमित्तभेदाश्च पाके भवन्ति । तद् यथा हारीतमांसं हरिद्राजलावसिक्तं हरिद्राग्निप्लुष्टमुपयोगात् सद्यो व्यापादयति, दशरात्रोषितं कांस्ये घृतं चापि विषायते, ताम्रपात्रे पर्युषितं क्षीरमपि तिक्तायते इत्यादि ॥११॥

यत्र तर्हि तोये तेजसि वायौ वा पाकजो विशेषस्तत्र कथमुद्भवानुद्भवद्रवत्वकठिनत्वादयो विशेषाः ? कथं वा पार्थिवे प्रतिमादौ प्रतिष्ठाऽऽदिना संस्कृतेऽपि विशेषाभावात् पूजनादिना धर्मः, व्यतिक्रमे त्वधर्मोऽप्रतिष्ठिते तु न किञ्चित् ? न च तत्र यजमानधर्मेणान्यस्य साहायकमाचरणीयम् । अन्यधर्मस्यान्यं प्रत्यनुपयोगात्, उपयोगे वा साधारण्यप्रसङ्गात् ।

26. अभिमतमर्थमुक्त्वाऽप्यनैकान्तिकत्वं स्फुटयति - **नन्वि**ति । **पुत्रेष्टी**ति । ''वैश्वानरं द्वादशकपालं [चरुं] निर्वपेत् पुत्रे जाते'' [तै० सं० २.२.५.३] इति पुत्रजननिमित्तको यागः, यस्यायमर्थवादः ''यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव स तेजस्वी अन्नादः [24B] इन्द्रियाधी(धि)[पः] पशुमान् भवति'' [तै०सं० २.२.५.३] इति पितृयज्ञपितृश्राद्धादि । नन्वेवं तर्हि यागदृष्टान्तेन कृष्यादावप्यपूर्वनिर्माणमस्तु कृतमन्यथात्वेनेति शङ्कते — **कृषी**ति। प्रोक्षणादिवद् विशिष्टादृष्टनिर्माणकारणत्वेनैवानागतकार्यपर्याप्ते किं न स्यातामित्यर्थः । नात्रादृष्टकल्पनं दृष्टेनैव प्रकारेण संभवात् । संभ[वे]ऽप्यदृष्टकल्पनं भोजनादिविधावप्यदृष्टकल्पनमनिवार्यमित्याशयवान् परिहरति - **ने**ति। ननु च लाक्षारसावसिक्तबीजपूरबीजतरुकुसुमारुणिमा अनुपपद्यमान(ना) शक्तिमाक्षिपति । न चैष लाक्षारसावसेकोपार्जितबीजाधिष्ठानपाकजाव(जवि)शेषादुदेतुमर्हति । फलकाण्डादावपि प्रसङ्गात् । किञ्च, अयमपि विशेषो न तावत् प्रचुरतरमरुणिमानमाधातुं क्षमः, यथाह महाव्रतः —

कुसुमे बीजपूरादेर्यल्लाक्षाद्युपसेचने ।
शक्तिराधीयते तेन कारिता किं न पश्यसि ॥
न भिनत्ति कयापि मात्रया फलबीजाङ्कुरका[न्] उपलब्धवान् ।
यदयं निहितो रसस्त्वया तदनुपपन्नमिवावभासते ॥

अपि च —

किं वा सिञ्चसि बीजपूरकुसुमे लाक्षारसं तत्क्षणा-
देवासौ गलितो[ऽय]मिच्छति कथं पुष्पेषु दूरान्तरः ।
किं वाऽन्यत् क्रियतेऽपि चास्य किमसौ संभाव्यते विस्तरः
प्रत्यब्दं भवति द्रुमोऽयमरुणछत्रं वसन्तश्रियः ॥

किञ्च, क्षीरमिश्रत्रिफलावसिक्तापराजितालताभेदस्य कथं तद्विशेषानादधाने वनदेवताहासप्रकाशकमनीय-कुसुमार्जनं ललितं चालिनीलमलिनकान्तिमत्कुसुमनिर्माणम् ? तदिदमसार(रं) मलिनाविशेषाभिधानमानिना जल्पितम् - न तावत् कुसुमारुणिमानं प्रति शक्तिरुपादानकारणमवयविन एवोपादानरूपत्वात् । [25A] नाप्यसमवायि-कारण(णं) कार्याश्रयस्य रूपादेः कारणगुणपूर्वकतानियमात् । अन्यथा परमाण्वादावपि रूपाद्यसिद्धिप्रसङ्गात् । निमित्तं तु स्यात् । अत्र च कि(किं) कारणं(ण)विशेषार्जिता शक्तिरूप(रुप)वर्ण्यं(र्ण्य)ता(ते) मुत(उत) तज्जनितरूपादिर्वेति संशये क्रृप्त(दृष्ट)त्वाद् रूपादिरिति युज्यते । यदि च लाक्षारसावसेकजन्मविशेषस्तत्रासम-वायिकारणं स्यात् स्यादप्यस्य महाव्रतप्रलापस्यावकाशः । तस्माद् यथा प्रत्यब्दं नीलधवलादिनानाविधप्रसूनो-पचयो निर्गच्छदन्तर्वर्तिभाग एव विटपिनां तथात्रापीति । किन्तु चिरान्तरितान्वयव्यतिरेकिद्रव्यविशेषावसेक-कारणतानिर्वाहाय द्वारमात्रमुपवर्णनीयम् न तु शक्तिरिति हृदि निधाय सिद्धान्तसारमाह - **तथा चे**ति । आदिपदेन क्षीरमिश्रत्रिफलाजलसेको मन्तव्यः । अबीजादीनां परमाण्वन्तविभागेऽवान्तरजातेरभावाच्छाल्यादिजातीयकार्यानुपपत्त्या शक्तिकल्पनमित्यपि नादृष्टद्वारेणैवोपपत्तेरित्याह - **अत एवे**ति । आद्यातिशयो बीजस्योच्छूनत्वमन्त्यातिशय उच्छूनतरतमत्वादीति । ननु सकलकार्योपसंहारात्मकत्वात् प्रलयस्य कल्पादौ पात(क)ज्ज(ज)स्यापि विशेषस्या-भावात् कथं विचित्रकार्योत्पत्तिरिति शङ्कामपनेतुमाह - **कल्पादावि**ति । कार्यसामर्थो(र्थ्यो)न्नीतस्वभावस्य पाकजविशेषस्यादृष्टसंस्कारादिवत् प्रलयेऽप्यविनाश इति भावः । नन्वेवमविशेषे कथं कल्पादौ बीजादिसमवधानं कृषीवलादीनामभावादित्यत आह - **तदानीमि**ति । तदानीन्तनव्यवहारविशेषमविशेषमाशङ्कानिष्टप्रदर्शनेन व्य[व]स्थापयति - **न चे**ति । अव्यवस्थाभयाच्च भोगानियमप्रसङ्गमाह - **न चे**ति । ननु तथापि हारीतमांसं हरिद्राजलावसिक्तं हरिद्रानलप्लुष्टमुपयोगात् सद्यो व्यापादयतीत्युभयसिद्धम् । तत्र यदि हरिद्राजलावसेकादिभिर्न कश्चिदतिशयो जन्यते कथं तर्हि पूर्वरूपाविशेषाद् व्यापादयेत् । न च वाच्यं दृष्टेनैव पाकजभेदेनोपपत्तावदृष्ट-कल्पनाया अनुपपत्तिरिति तस्य लाक्षानलसंसाधितस्य व्यापादनेनानैकान्तादिति महाव्रतः । तत्राह- **निमित्तभेदाश्चे**ति । न वयं पाकजभेदमात्रं ब्रूमः किन्तु निमित्तभेदेनासादितमिति मन्वानो निमित्तभेदमाह — **तद् यथे**ति । ननु यत्र पाकजाविशेषस्तत्र मा भूदतिशयः यत्र तु नासौ तत्रातिशयस्वीकारः स्यादिति मन्यमानः शङ्कते — **यत्र तर्ही**ति । पाकजवन्त्य(वत्य)वान्तरविशेषपुरस्कारेण शङ्का - **कथं वे**ति । अत्रापि पुरुषसंस्कारगुणविशेषो भविष्यतित्य-(तीत्या)शङ्क्यानिमृ(मि)त्त(त्ता)नामदृष्टविशेषवशात् तद्विषयप्रतिष्ठादिना तद्विषयज्ञानोत्पाद(नं) पुरुष[26A]-वाचकोच्चारणेने(नै)व वाच्यपुरुषस्य स्वविषयविज्ञानवत् ।

27. **अत्रोच्यते —**

निमित्तभेदसंसर्गाद् उद्भवानुद्भवादयः ।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥१२॥

उपनायकादृष्टविशेषसहाया हि परमाणवो द्रव्यविशेषमारभन्ते । तेषां विशेषादुद्भवविशेषाः प्रादुर्भवन्ति । यथा स्वभावद्रवा अप्यापो निमित्तभेदप्रतिबद्धद्रवत्वाः कठिनं करकाद्यमारभन्त इत्यादि स्वयमूहनीयम् । प्रतिमाऽऽयस्तु तेन तेन विधिना सन्निधापितरुद्रोपेन्द्रमहेन्द्राद्यभिमानिदेवताभेदास्तत्र तत्राऽऽराधनीयतामासादयन्ति, आशीविषदष्टमूर्छितं राजशरीरमिव विषापनयनविधिनाऽऽपादितचैतन्यम् । सन्निधानं च तत्र तेषामहङ्काररममकारौ, चित्रादाविव स्वसादृश्यदर्शिनो राज्ञ इति नो दर्शनम् । अन्येषां

तु पूर्वपूर्वपूजितप्रत्यभिज्ञानविषयस्य प्रतिष्ठितप्रत्यभिज्ञानविषयस्य च तथात्वमवसेयम् । एतेनाभिमन्त्रित-पयःपल्लवादयो व्याख्याताः ॥१२॥

घटादिषु का वार्ता ? कुशलैवेति चेत्, न । न हि सामग्री दृष्टं विघटयति, नाप्यदृष्टम्, ज्ञापकत्वात्, नाप्यदृष्टमुत्पादयति, धर्मजनने सर्वदा विजयप्रसङ्गात् । विपर्यये सर्वदा भङ्गप्रसङ्गात् ।

अत्रोच्यते –

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम् ।
परीक्ष्यसमवेतस्य परीक्षाविधयो मताः ॥१३॥

27. पूर्वोत्तरार्थाभ्यां पूर्वोत्तरशङ्कामपनयति - **निमित्तेति** । देवता(ताः) सन्निधानेनाराधनीयता[25B]-मासादय[न्ति].....वशात् । मतान्तराभिप्रायेणोक्तम् - **प्रत्यभिज्ञानत** इति । पूर्वार्धं व्याख्याय उत्तरार्धं व्याख्या-तुमारभ्यते - [**प्रतिमा**]**दयस्त्वि**ति । ननु [देवतानां] त(ता)सां किं देहसन्निधिरात्मसन्निधिर्वा ? नाद्यः लोकान्तरवर्तित्वेन देवतानां देहसन्निधानस्याशक्यत्वात्, परमदेवतायास्तदसंभवाच्च । न द्वितीयः, आत्मसन्निधिः सर्वदा सर्वत्र सत्त्वेन (सत्त्वेन) प्रतिष्ठा[विधि]ना असाध्यत्वात् । देवतानां ज्ञाननिमा(र्मा)णमेव सन्निधिरिति । चेतननित्यज्ञानवदे(दे)वतापक्षे ज्ञानसन्निधिः सर्वत्र सत्त्वेन तदसाध्यता । अनित्यज्ञानदेवतापक्षे अव्यवहितगोचर-ज्ञानस्यात्मधात्वादिचेतनसन्निधानं देवतानाम् अनित्यज्ञानवती संगा(ज्ञा) चेत्यर्थः । नित्यज्ञानवतश्च तत्तदवच्छेदकसंपत्तिवशेन तदवच्छिन्नज्ञानं सन्निधानमिति मन्तव्यम् । अभिमन्त्रितपयःपल्लवादेर्विषाद्यपनया-न्यथानुपपत्त्याऽतीन्द्रियसंस्कारसिद्धिरस्त्विति कश्चित्, तत्राह – **एतेने**ति । अत्रापि गरुडाद्यभिमानिदेवतासन्निधिवशेन विषविगमोपपत्तेरित्यभिप्रायः । एतेनैतदपि निरस्तं यदुक्तं महाव्रतेन –

मृदमपि विषं कश्चिद् मन्त्रः करोति नियोजितः ।
सृजति तदासौ काञ्चिच्छक्तिं मृदोऽतिविमोहनीम् ॥

अत्रापि विषोल्बणनागसन्निधिवशेन मृदाद्यपि विषायते इति एतावति सुखे कुतस्तत्सर्वथाऽतीन्द्रियः धर्मस्वीकारः । तदेवमुक्तप्रकारेण निवारिताभिमानः पुनः काशकुशावलम्बनमातिष्ठमानो विषयान्तरप्रदर्शनेन कदाचिच्छ-क्तिर्भविष्यतीति मन्वानः शङ्कते – **घटादिष्वि**ति । पूर्वोक्ताभिप्रायेण परिहरति – **कुशले**ति । परिहारं परिहरति - **नेति** । उपपादयति - **न हीति** । नाप्यदृष्टं विघटयतीत्यनुषङ्गेन समन्वयः । सुगममन्यत् । तस्माद् यथाभूतार्थ-परिच्छेदिका शक्तिस्तुलादिष्वाधीयते विधिना, तेन यस्य विशुद्धत्वं तस्य तेन रूपेण परिच्छेदः क्रियतेऽविशुद्धस्य चाविशुद्धत्वेनेति पूर्वपक्षणै(क्षिणः) अभिमानः । अत्र च पूर्वोक्तप्रकारसंभवेऽपि प्रकारान्तरमाश्रित्य समाधिमुप-क्रमते - [26B] **जये**ति । जयभङ्गनिमित्तस्य परीक्षणीयपुरुषसमवेतस्यादृष्टस्य वृत्तिरभिव्यक्तिः कार्य[ज]न-नाभिमुख्यम्, तल्लाभाय केवलमित्येवकारार्थः ।

28. **यद्यपि धर्माद्यभिमानिदेवतासन्निधिरत्रापि क्रियते, ताश्च कर्मविभवानुरूपं लिङ्गमभिव्यञ्जयन्ती-त्यस्माकं सिद्धान्तः, तथापि परविप्रतिपत्तेरन्यथोच्यते । तेनापि हि विधिना तदेव जयस्य पराजयस्य वा निमित्तमभिव्यक्तं कार्यमुन्मीलयति । कर्मणश्चाभिव्यक्तिः सहकारिलाभ एव । तच्च सहकारि सोऽहमनेन विधिना तुलामधिरूढो योऽहं पापकारी निष्पापो वेति प्रत्यभिज्ञानम् । यदाहुः – ''तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुषः'' इति । अथवा प्रतिज्ञानुरूपां विशुद्धिमपेक्ष्य तेन धर्मो जन्यते**

निमित्ततो विधानाद् विजयफलश्रुतेश्च । अविशुद्धि चापेक्ष्याधर्मः । पराजयलक्षणानपेक्षितफलोपदर्शनेन फलतो निषेधात् ।

अथ शक्तिनिषेधे किं प्रमाणम् । न किञ्चित् । तत् किमस्त्येव ? बाढम् । न हि नो दर्शने शक्तिपदार्थ एव नास्ति । कोऽसौ तर्हि ? कारणत्वम् । किं तत् ? पूर्वकालनियतजातीयत्वम्, सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वेति । ततोऽधिकनिषेधे का वार्ता ? न काचित् । तत् किं विधिरेव ? सोऽपि नास्ति प्रमाणाभावात् । संदेहस्तर्हि ? कथमेवं भविष्यति, अनुपलब्धचरत्वात् । विवादस्तर्हि ? कुत्र ? अनुग्राहकत्वसाम्यात् सहकारिष्वपि शक्तिपदप्रयोगात् । सहकारिभेदे तत्रापि दहनादेरनुग्राहकोऽस्त्येव, यः प्रतिबन्धकैरपनीयत इति यदि, तदा न विवदामहे । अस्मदभिप्रेतस्य चाभावादेरनुग्राहकत्वमङ्गीकृत्य निःसाधना मीमांसका अपि न विप्रतिपत्तुमर्हन्ति । ततोऽभावादिरनुग्राहक इत्येके, नेत्यपरे, इति विवादकाष्ठायां व्युत्पादितं चैतस्यानुग्राहकत्वम् । किमपरमवशिष्यते यत्र प्रमाणमभिधानीयमित्यलमतिविस्तरेण ।

तथापि चेतन एवायं संस्क्रियते, न भूतानीति कुतो निर्णय इति चेत्, उच्यते । भोक्तृणां नित्यविभूनां सर्वदेहप्राप्तावविशिष्टायां विशिष्टैरपि भूतैर्नियामकाभावात् प्रतिनियतभोगासिद्धेः । न हि तच्छरीरं तन्मनस्तानीन्द्रियाणि विशिष्टान्यपि तस्यैवेति नियमः । नियामकाभावात् । तथा च साधारणविग्रहवत्त्वप्रसङ्गः । न च भूतधर्म एव कश्चिच्चेतनं प्रत्यसाधारणः । विपर्ययदर्शनात् । द्वित्वादिवदिति चेत्, न, तस्यापि शरीरादितुल्यतया पक्षत्वात् । नियतचेतनगुणोपग्रहेणैव तस्यापि नियमः, न तु तज्जन्यतामात्रेण, स्वयमविशेषात् ।

तथापि तज्जन्यतयैव नियमोपपत्तौ विपक्षे बाधकं किमिति चेत्, कार्यकारणभावभङ्गप्रसङ्गः । शरीरादीनां चेतनधर्मोपग्रहेणैव तद्धर्मजननोपलब्धेः । तद् यथा, इच्छोपग्रहेण प्रयत्नो ज्ञानोपग्रहेणेच्छादयः, तदुपग्रहेण सुखादय इत्यादि । प्रकृतेऽपि चेतनगता एव बुद्ध्यादयो नियामकाः स्युरिति चेत्, न । शरीरादेः प्राक् तेषामसत्त्वात् । तथा च निरतिशयाश्चेतनाः साधारणानि भूतानीति न भुक्तिनियम उपपद्यते ॥१३॥

एतेन साङ्ख्यमतमपास्तम् ।

28. पूर्वसमाधि(र्धि) स्मारयित्वा श्लोकं व्याचष्टे – **यद्यपी**ति । ननु च लोकपालार्थनो(लार्चना)धिवासनादिकर्मणां सहभावाभावा[त्] सहकारित्वं नोपपद्यत इत्यत आह - **तथे**ति । कर्मणामविद्यमानत्वेऽपि तद्विषयं ज्ञानं विद्यमानं सहकारि इत्यर्थः । पुरुष आत्मेत्यर्थः । पराभिप्रायोन्मूलनाय प्रकारान्तरमाश्रित्य समाधत्ते - **अथवे**ति । तेन तुलारोहणविधिनेत्यर्थः । ननु किमत्र प्रमाणं तेन धर्मो जन्यते । न हीदृशं विधिवाक्यमस्ति यद्विशुद्धस्य तुलारोहणे धर्मो भवतीत्यत आह - **निमित्तत** इति । यद्यपि साक्षाद् विधिवाक्यं नास्ति तथापि [मिथ्याभि]शस्ततानिमित्तकस्तुलारोहणविधिः प्रत(ती)यते । विशुद्धे च विजयफलश्रुतिरस्तीत्यतोऽवसीयते । परीक्ष(क्ष्य)स्याभिसंधिशुद्धिमपेक्ष्य तया सामग्र्या धर्मो जन्यते । ज(य)त्र तु मि(नि)त्यविधिर्नैमित्तिकविधिर्वा तत्र **प्राभाकर**विप्रतिपत्त्या मा भूत् व्याप्तिय(र्य)था 'यावज्जीवमग्निहोत्रं जुहुयात्' 'न कलञ्जं भक्षयेत्' इत्यादौ। नैमित्तिकेषु पुनरवश्यमपूर्वमिति । परविप्रतिपत्त्या व्याप्तेरिहापि वदन्नो तरणकामस्तुलामारोहणती(रोहेदि)ति

नैमित्तिकविधित्वात् पु(फ)लविधित्वा[द]दृष्टमनुमिमीमह इत्यर्थः । शेषं सुबोधम् । वादजल्पकथामाश्रित्य [27A] शक्तिवाद इति मन्वानः शक्तिनिषेधकप्रमाणं पृच्छति — **अथे**ति । अत्र चाभावस्याकारणत्वनिराकृतिरेव तत्कारणत्वसिद्धिरिति मन्वान आह - **व्युत्पादितं चैतदि**ति । वितण्डाकथामात्रनियमेन वाऽयं वादः प्रयोज्यः यद्बलेन भूतधर्मस्याभ्युपगमनीयतथा(या) प्रत्यवस्थितश्चार्वाकस्तद्बलविध्व(ध्वं)सेन निर्णयो मा भूत् त्वा(तवा)प्यात्मगत(त)धर्मसंसाधकबाधकप्रमाणमवश्यं स(सं)शयानः शङ्कते - **तथापी**ति। तत्र प्रत्यात्मनियतभोगान्यथानुपपत्त्या प्रत्यात्मगतधर्मसिद्धिरिति वक्तुं प्रथमं तावत् तदस्वीकारे वा(बा)धमस्तीत्याशयवान् परिहरति — **उच्यत** इति । विशिष्टैरपीत्यभ्युपगमेन द्रष्टव्यं पुनराश[ङ्]क्य नीलादिसाधारण्यदर्शनेन परिहरति — **न चे**ति । भूतधर्मस्यापि कस्यचिदसाधारण्यं दृष्टं तद्वददृष्टस्यापि भूतधर्मस्यासाधारण्यं भविष्यतीत्याशयेन शङ्कते - **द्वित्वे**ति । यथा शरीरादयो नियतचेतनधर्मजनितत्वेनेनिम(त्वेनेति) चेतनोपारिणा(चेतनोपग्रहणा)स्तथा द्वित्वादिकं न त्वन्यथेति मनोरथेन परिहरति - **ने**ति । न **तस्यापी**ति । पुनः शङ्कते — **तथापी**ति। बाधकमाह — **कार्ये**ति । कार्यकारणभावमेव प्रकटयति - **शरीरे**ति । ननु यथा शरीरादीनां चेतनगुणबुद्ध्यादिसहितानां नियतभोगसंपादकत्वं दृष्टोपेतानामिति दर्शितं तथा प्रकृतेऽपि बुद्ध्यादिरेवास्तु, कृतमपूर्वेणेत्याशयेन शङ्कते — **प्रकृतेऽपी**ति । न, शरीराद्युत्पत्तेः [प्राक्] बुद्ध्यादि न संभवत्यतस्तदतिरिक्तगुणसिद्धावात्मगत्य(ता)पूर्वासिद्धिरित्याशयेन परिहरति । अस्य प्रयोगः - देवदत्तादेः गुणोत्पादिताः शरीरादयो भोगाय कार्यत्वे सति तद्भोगसाधनत्वात् स्रगादिवत् [27B] इति । पूर्वमुक्तो द्रष्टव्यः । शरीरोत्पत्तेः प्राग् बुद्ध्याद्यसंभवेन तैः सिद्धासाधनमिति तात्पर्य[म्।] चेतनगतधर्मवशेन भोगनिय[म]समर्थनेनाचेतनधर्मनियामकत्वमयुक्तमित्यतिदेशेन निषेधति।

29. **एवं हि तत्, अकारणमकार्यः कूटस्थचैतन्यस्वरूपः पुरुषः । आदिकारणं प्रकृतिरचेतना परिणामिनी, ततो महदादिसर्गः । न हि चितिरेव विषयबन्धनस्वभावा, अनिर्मोक्षप्रसङ्गात् । नापि प्रकृतिरेव तदीयस्वभावा, तस्या अपि नित्यत्वेनानिर्मोक्षप्रसङ्गात् । नापि घटादिरेवाहत्य तदीयाः, दृष्टादृष्टत्वानुपपत्तेः । नापीन्द्रियमात्रप्रणालिकया, व्यासङ्गायोगात् । नापीन्द्रियमनोद्वारा, स्वप्नदशायां वराहव्याघ्राद्यभिमानिनो नरस्यापि नरत्वेनात्मोपधानायोगात् । नाप्यहङ्कारपर्यन्तव्यापारेण, सुषुप्त्यवस्थायां तद्व्यापारविरमेऽपि श्वासप्रयत्नसन्तानावस्थानात् । तद् यदेतास्ववस्थासु संव्यापारमेकमनुवर्तते, यदाश्रया चानुभववासना, तदन्तःकरणमुपारूढोऽर्थः पुरुषस्योपधानीभवति । भेदाग्रहाच्च निष्क्रियेऽपि तस्मिन् पुरुषे कर्तृत्वाभिमानस्तस्मिन्नचेतनेऽपि चेतनाभिमानः । तत्रैव कर्मवासना । पुरुषस्तु सर्वथा पुष्करपलाशवन्निर्लेपः ।**

29. नन्वे[व]मेतन्मतमिति कथमवगतमित्यतस्तन्मतं सम्यक् बोद्धव्यमिति शिष्यानुकम्पया तन्मतमुपन्यस्यति - **एवं हि तदि**ति । बुद्ध्यादीनां चेतनाश्रयत्वं न तावत् संयोगेन, असम्भवात्; नापि समवायेन अनयोः समवाय इति वदात्मनि बुद्धिरित्यपि न, तमन्तरेण सिद्धेः; नाध्यक्षमनुमानं वा तत्सत्त्वे प्रमाणमस्ति, तस्मात् तादात्म्यस्वीकारे तत्कार्यतया तस्यापि परिणामिस्वभावत्वेनानिर्मोक्षप्रसक्तेरित्याशयवानाह - **अकारणमिति** । अत एवाकार्योऽपि तयोस्तादात्म्याभ्युपगमादित्यभिप्रायः । ननु बुद्ध्याद्यकारणत्वे तस्य तत्स्वभावे न प्रमाणमस्तीत्यत आह - कूटस्थचैतन्येन रूप्यते निरूप्यते । बुद्धिग[त]चैतन्याभिमानान्यथानुपपत्त्या [तत्]स्वभावचे(श्चे)तनः कल्प्यत इत्याशयः । ननु तस्याकारणत्वेन कथं सर्ग इति हृदि निधाय स्वपक्षे कारणतद्धर्मतत्कर्मान् प्रतिपादयति - **आदी**ति । ननु किमर्थं महदादिसर्गोऽभ्युपगन्तव्या(यः) नित्यचैतन्यमेव विषयप्रकाशस्वरूपमस्त्विति अत आह

- **न हीति** । अयमर्थः – चितेर्हि विषयावच्छिन्नत्वं नित्यं हेतुसापेक्षं वा ? हेतुसापेक्षत्वे हेत्वन्तरमिन्द्रियादिकमङ्गीकर्तव्यम् । निरपेक्षत्वे वाऽमोक्षः पुंसः सर्वदा सोपाधित्वात् । ननु घटादिप्रतीतिरूपतया परिणतिस्वभावा प्रकृतिरेव विषयबन्धनस्वभावाऽस्त्वित्यत आह - **नापी**ति । [28A] अत्रापि [प्र]कृतेः साक्षाद्विषयप्रकाशस्वभावत्वे तस्याः सदातनत्वे पुनरप्यनिर्मोक्षः पुंसां प्रकृतेरुपरमाभाव(वे)न निरुपाधित्वानुपपत्तेरित्यभिप्रायः । ननु मा भूच्चितेर्विषयबन्धनत्वस्वभावः, विषयस्यैव तु कलशादेश्चैतन्यसम्बन्धित्वं स्वभावो भविष्यतीत्यत आह – **नापी**ति । आहत्य साक्षात् तदीयश्च तदीयः । असमर्थः - साक्षाद् वा विषयस्य चैतन्यसम्बन्धित्वं परम्परया वा । परम्परया चेद् वस्त्वन्तरमङ्गीकर्तव्यम् । साक्षात्पक्षे तु घटस्य यावत्सत्त्वमवभासप्रसङ्ग इति । न चैतदभ्युपगम्यते । कदाचिददृष्टत्वेन स्वीकारात् । अस्तु तर्हि इन्द्रियमात्रद्वारा किं मनोऽहङ्कारादिकल्पनया । तदकल्पने बाधकाभावादि[ति] हृदि निधाय कल्पने बाधकमाह - **नापी**ति । व्यासङ्गान्यथानुपपत्त्या मनोऽप्यस्त्वहङ्कारादिकल्पनं तु न युक्तमित्यत आह - **नापी**ति । यदीन्द्रियमनोभ्यामेव विषयाः सन्निधीयन्ते तदा शयानो [नरः] यथा वराहोऽहमिममर्थं प्रत्येमीत्यभिमन्यते तथा नरोऽहमेतमर्थं प्रत्येमीति नरत्वेनाप्यर्थो(प्यात्मो)पधानं भवेत् । अस्ति हि तत्र सन्निहितं नरत्वमस्ति चेन्द्रियसमानासो(चेन्द्रियमनसो)रपि व्यापारोऽन्यथाऽऽलोचनविकल्पयोरेवानुत्पादप्रसङ्गात् । तस्मादिन्द्रियमनोऽतिरिक्तोऽनियतविषयाभिमानव्यापारी स्वीकर्तव्यः । स एवाहङ्कार इत्युज्यते । अस्तु तर्हि अहङ्कारपर्यन्तसिद्धिर्बुद्धिसिद्धौ तु किमायासमित्यत आह - **नाप्यहङ्कारे**ति । पूर्वेषां व्यापाराभावेऽपि श्वासादिसद्भावात् [28B] परिकल्प्यते बुद्धिर्यद्व्यापारात् श्वासादिरित्यभिप्रायः । उपसंहृत्योक्तमर्थं स्फुटयति - **तद् यदेतास्वि**ति । जाग्रत्स्वप्नसुषुप्तिषु । अनुभववासना अनुभवरूपा वासनेत्यर्थः । उपारूढो ज्ञानद्वारा सम्बद्धोऽर्थो घटादिः पुरुषस्यात्मनः उपधानी[भवति] । उपधायको व्यवधायकः स्वरूपतिरोधायक इति यावत् यद्वशात् पुरुषः संसरतीति व्यवहारः । ननु यदि पुरुषो न कर्ता कथं तर्हि पुरुषः करोति कर्म फलं चोपभुङ्क्ते स्वकृतकर्मण इत्याह - **भेदाग्रहाच्चे**ति । बुद्धिसन्निधावकर्तरि च पुरुषे सति पुरुषकर्तृत्वादिप्रत्ययो बुद्धावुपजायमानो भ्रान्त इत्यर्थः । निष्क्रियेऽकर्तरीत्यर्थः । यथोक्तं **विन्ध्यवासिना** –

पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम् ।
मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा ॥
विविक्ते दृक्परिणतौ बुद्धौ भोगोऽस्य कल्प्यते । (पाठान्तर - कथ्यते)
प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोऽम्भसि ॥

यथोपाधिः स्फटिकमतद्रूपं स्वनिर्भासं स्वाकारं करोत्येवमयं पुरुषोऽविकृतस्वरूपोऽचेतनं मनः स्वनिर्भासं चेतनमिव करोति सान्निध्यात् । बुद्धिकर्तृसन्निधावात्मन्यतथाभूतेऽपि बुद्धौ पुरुषकर्तृत्वाभिमानः, यथा जपाकुसुमादिसन्निधौ स्फटिकरक्तत्वाभिमानो न तु वास्तवं रक्तत्वं कर्तृत्वं वा स्फटिकात्मनोरिति प्रथमश्लोकार्थः । विविक्ते दृग्विषयाकारपरिणतेन्द्रियाकारा परिणतिः यस्याः सा तथोक्तायां तस्यां बुद्धौ सत्यामस्यात्मनो भोगः कथ्यते । किंस्वरूपः प्रतिबिम्बोदयः ? न वास्तवः, यथा चन्द्रमसः [29A] प्रतिबिम्बोदयोऽकलुषात्मके अम्भसीत्युदाहरणम् । यथाहि चन्द्रमसी(सः) प्रतिविवंनमंभस्यैविवंनमभास्यैविव(प्रतिबिम्बमम्भस्येव बिम्बं नभस्येव, वि)शिष्टपरिणामोपरक्ताया बुद्धेरात्मनीति । वास्तवे हि भोगे पुरुषस्य पूर्वस्वरूपनिवृत्तौ स्वरूपान्तरापत्तिविकारः स्यात् । तथा चाचेतनत्वाद्यनेकदूषणमिति द्वितीयश्लोकार्थः । **ईश्वरकृष्णो**नाप्युक्तम् –

तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ [सां.का. २०]

यथाऽचेतनं बुद्धितत्त्वं चेतनसन्निधौ चेतनावत् तथाऽकर्तृरूपमात्मस्वरूप कर्तृसन्निधौ कर्तृरूपमाभाति न तु वास्तवमिति परमार्थः । ननु तथापि यदि बुद्धिरचेतना कथं तर्ह्ययं कर्ता चेतन इति प्रतीतिरित्यत आह – **तस्मिनिति** । अत्रापि भेदाग्रहादिनिमित्तम् । यथा भवतामेव शरीरे भेदाग्रहादचेतनेऽपि चेतनाभिमान इत्यर्थः । ननु यदि चेतनो न कर्ता भोक्ता वा क्व तर्हि कर्मापूर्वयोः संभव इत्यत आह – **तत्रैवे**ति । बुद्धितत्त्वे कर्मयमादिवासना, तज्जनितमपूर्वम् । पुरुषस्तर्हि कीदृश इत्यत आह - **पुरुषस्त्वि**ति । न कर्मफलाभ्यां लिप्यत इत्यर्थः ।

30. **आलोचनं व्यापार इन्द्रियाणां, विकल्पस्तु मनसः, अभिमानोऽहङ्कारस्य, कृत्यध्यवसायो बुद्धेः । सा हि बुद्धिरंशत्रयवती । पुरुषोपरागः, विषयोपरागः, व्यापारावेशश्चेत्यंशाः । भवति हि मयेदं कर्तव्यमिति । तत्र मयेति चेतनोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः । इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदो दर्पणस्येव निःश्वासाभिहतस्य मलिनिमा पारमार्थिकः । एतदुभयायत्तो व्यापारावेशोऽपि । तत्रैवंरूपव्यापारलक्षणाया बुद्धेर्विषयोपरागलक्षणं ज्ञानम् । तेन सह यः पुरुषोपरागस्यातात्त्विकस्य सम्बन्धो दर्पणप्रतिबिम्बितस्य मुखस्येव मलिनिमा, सोपलब्धिरिति । तदेवमष्टावपि धर्मादयो भावा बुद्धेरेव, तत्सामानाधिकरण्येनाध्यवसीयमानत्वात् । न च बुद्धिरेव स्वभावतश्चेतनेति युक्तम्, परिणामित्वात् । पुरुषस्य कूटस्थनित्यत्वादिति । तदेतदपि प्रागेव निरस्तम् ।**

तथाहि –

कर्तृधर्मा नियन्तारश्चेतिता च स एव नः ।
अन्यथाऽनपवर्गः स्यादसंसारोऽथवा ध्रुवम् ॥१४॥

30. इन्द्रियमनोऽहङ्कारबुद्धिनामसाधारणं व्यापारमाह - **आलोचनमि**त्यादि । ननु बुद्धेः कृत्यध्यवसायो व्यापार इति नोपपद्यते । कृतिविषयस्य घटादेर्बुद्धेर्जडत्वेन प्रतिभासासंभवात् । न चाप्रतिभा[स]त्वे कर्तव्ये करोमीत्यस्य(स्या) अवसाय उपपद्यते । न च कर्तव्येन सम्बन्धान्तरमस्ति बुद्धेरित्यत आह – **सा हीति**। अस्यार्थः - यस्माच्चेतनोपरागबलेन जडाया अपि बुद्धेरिन्द्रियप्रणालिकया [29B] व्यापारविषयस्य सम्बन्धेन प्रतिभानाद् व्यापारोत्पत्तिरित्यर्थः । अंशत्रयमाह - **पुरुषे**ति । दर्पणमुखयोरिव बुद्धिचेतनयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपरागः । नीलपदार्थेन्द्रियसन्निकर्षात् तत्स्वभावस्य बुद्धितत्त्वस्य नीलाकारपरिणतिभेदोत्पादः पारमार्थिको विषयोपरागः । विषयोपरागपुरुषोपरागाभ्यां कर्तव्यविषयस्य प्रतिभासात् तदधीनः करोमीत्यध्यवसायो व्यापारावेश इति । तृतीयं दर्शयितुमिति तमु(दु)दाहरणमाह - **भवति हीति** । सुगममितरत् । बुद्धिज्ञानयोर्भेदमाह – **तत्रैवमि**ति। विषयोपरागलक्ष[णाया बुद्धेः] विषयोपरागस्वरूपं [ज्ञानम्] । [विषय]उपरागस्तु विषयेन्द्रियसन्निकर्षे सति बुद्धेर्विषयाकारः परिणतिविशेषो 'अयं घटः' इत्यादिः । ज्ञानभेदमुक्त्वा उपलब्धिभेदमाह – **तेने**ति। तेन ज्ञानेन सह यः पुरुषोपरागस्य सम्बन्धः 'चेतनोऽहमिमं पश्यामि' इति एवमाकारः सा उपलब्धिरित्यर्थः। एतेन बुद्ध्यादिशब्दानां **कणभक्षाक्षचरणा**दिप्रसिद्धपर्यायत्वमपास्तं वेदितव्यम् । यथा बुद्धिधर्मो ज्ञानं तथेच्छाद्वेषप्रयत्नसुखदुःखधर्माधर्माः सर्व एव बुद्धावेव न त्वन्यत्रेत्याह – **तदेवमि**ति । संस्कारस्य

साङ्ख्यैरनभ्युपगमाद् ज्ञानस्यैव स्मृतिहेतोर[न]भिव्यक्तितयाऽनुवृत्तेरित्यभिप्रायः । प्रमाणमाह - तस्मात् **सामानाधिकरण्येनाध्यवसीयमानत्वादि**ति । यो यत्सामानाधिकरण्येनाध्यवसीयते स तस्यैव यथा 'श्लोक(शुक्लः) घटः' इति सामानाधिकरण्येन [30A] प्रतीयमानः शुक्लो गुणः घटस्यैवेति । तथा च बुद्धिसामानाधिकरण्येन प्रतीयन्ते सुखादय 'अहं सुखी दुःखी जाने यते इच्छामि द्वेष्मि' इत्यादि । ज्ञानाद्याधारत्वेन बुद्धेरेव चैतन्यमाशङ्क्य निराकरोति - **न चे**ति । पुरुषस्वरूपमुक्तमुपसंहरति - **पुरुषस्य चे**ति । तदेतत् प्रागेव परिहृतमित्याह — **तदेतदि**ति । शिष्यहिततया परिहारं स्पष्टयति - **कर्तृधर्मा** इति ।

31. **कृतिसामानाधिकरण्यव्यवस्थितास्तावद्धर्मादयो नियामका इति व्यवस्थितम् । चेतनोऽपि कर्तैव कृतिचैतन्ययोः सामानाधिकरण्येनानुभवात् । न चायं भ्रमः, बाधकाभावात् । परिणामित्वाद् घटादिवदिति बाधकमिति चेत्, न, कर्तृत्वेऽपि समानत्वात् । तथा च कृतिरपि भाविकी महतो न स्यात् । दृष्टत्वादयमदोष इति चेत्, तुल्यम् । अचेतनाकार्यत्वं बाधकम्, कार्यकारणयोस्तादात्म्यादिति चेत्, न, असिद्धेः । न हि कर्तुः कार्यत्वे प्रमाणमस्ति । प्रत्युत ''वीतरागजन्मादर्शनात्'' [न्यायसूत्र, ३.१.२५] इति न्यायादनादितैव सिद्ध्यति । यद् यच्च कार्ये रूपं दृश्यते तस्य तस्य कारणात्मकत्वे रागादयोऽपि प्रकृतौ स्वीकर्तव्याः स्युः, तथा च सैव बुद्धिर्न प्रकृतिः, भावाष्टकसम्पन्नत्वात् । स्थूलतामपहाय सूक्ष्मतया ते तत्र सन्तीति चेत्, चैतन्यमपि तथा भविष्यति । तथाप्यसिद्धो हेतुः, तथा सति घटादीनामपि चैतन्यप्रसङ्गः तादात्म्यादिति चेत् । रागादिमत्त्वप्रसङ्गोऽपि दुर्वारः । सौक्ष्म्यं च समानमिति । तस्माद् यज्जातीयात् कारणाद् यज्जातीयं कार्यं दृश्यते, तथाभूतात् तथाभूतमात्रमनुमातव्यम्, न तु यावद्धर्मकं कारणं तावद्धर्मकं कार्यं व्यभिचारादिति किमनेनाप्रस्तुतेन ?**

31. श्लोकं व्याचष्टे - **कृती**ति । कदाचित् कर्तृधर्माणां नियामकत्वे इष्टमेवेति परोऽनुमन्यते । तन्निवृत्त्यर्थं द्वितीयं पदं व्याचष्टे - **चेतनोऽपी**ति । अत्र चतुश्चै(कर्तुश्चै)तन्ये प्रमाणं प्रत्यक्षानुभवमाह - **कृतिचैतन्ययोरि**ति। अत्र च प्रत्यक्षं भ्रान्तमित्याशङ्क्य परिहरति - **न चाऽयमि**ति । विनाऽपि बाधकं भ्रान्तत्वप्रसङ्गे भ्रान्ताभ्रान्तव्यवस्थानुपपत्तेरित्याशयः । कर्तुश्चैतन्ये बाधकमाशङ्कते — **परिणामित्वादि**ति । 'कर्ता अचेतनः परिणामित्वाद् घटवत्' इत्यनुमानबाधितत्वाद् भ्रान्तं चैतन्यमित्यर्थः । परिणामित्वं बाधितमिति गूढाभिप्रायः परिहरति - **न कर्तृत्वेऽपी**ति । ज्ञानेच्छाप्रयत्नधारव(क)त्वमपि तर्हि परिणामित्वादेव न स्यादित्यर्थः । एवमस्तु किं नो बाध्यते इति । भ्रान्तं प्रतिपादयति — **तथा चे**ति । कृतिः प्रयत्न इत्यनर्थान्तरम् । **भाविकी**त्यनौपाधिकीत्यर्थः । न च साप्यौपाधिकीति [30B] वाच्यमपसिद्धान्तापत्तेरेव । तथा चेदमापन्नं महत्तत्त्वम(म्),परिणामित्वाद् घटवदेवेति । स्वीयाभिप्रायमुद्घाटयितुं परस्य मतमाह - **दृष्टत्वादि**ति । कृतेस्तदीयतया दृष्टत्वाद् बाधितत्वेनादोषः, अनुमानमत्र न प्रवर्तत इत्यर्थः । अभिप्रायमुद्घाटयति - **तुल्यमि**ति। अचैतन्येऽप्यनुमानप्रवृत्तिर्बाधितत्वस्य समानत्वादित्यर्थः । बाधकान्तरमाशङ्कते — **अचेतने**ति । अचेतनायाः प्रकृतेराद्यं कार्यं महदचेतनम् । न च कारणस्याचैतन्येऽपि कार्यचैतन्यं भविष्यतीति मन्यमानेनोक्तं - **तादात्म्यादि**ति। तथा च यदचेतनकार्यं तदचेतनं यथा घट इति मन्तव्यं परिहरति - **नासिद्धे**रिति । सुबोधमन्यत् । तथाप्यसिद्धो हेतुः 'अचेतनकार्यत्वात्' इत्यर्थः । सूक्ष्मचैतन्यसंभवेन चेतनकार्यत्वादिति । ननु यदि प्रकृतेश्चैतन्यमुपेयते तदिदमनिष्टमापद्यत इत्याशयवानाह - **तथा सती**ति । प्रकृतेश्चैतन्ये सतीत्यर्थः । तदिदमनिष्टम् - रागादिमत्त्वे-

ऽपीत्याह – **रागे**ति । सूक्ष्मरूपरागादिसंभवेऽपि प्रकृते(तेः) घटादौ न रागादिमत्त्वमिति यदि तदा सूक्ष्मरूपचैतन्य-संभवेऽपि [31A] न घटादिषु चैतन्यं भविष्यतीत्याशयवानाह – **सौक्ष्म्यं चे**ति । प्रकृतौ तावत् परमार्थतो न चैतन्यं नापि रागादिमत्त्वं तथापि तद्विकारे महत्तत्त्वे यथा रागादिसंभवस्तथा चैतन्यमपि स्याद्विरोधाभावादि-त्याशयवानुपसंहरति – **तस्मादि**ति । यज्जातीयं तज्जातीयाद्, यज्जातीयं पटजातीयं तज्जातीयात्, तथा भूतमात्रं पटजातीयमात्रमनुमीयते लोके । न पुनर्यावद्धर्मकं तन्तुधर्मकं तावद्धर्मकं कार्यं पटाख्यं व्यभिचारात् । लौकिक-परीक्षकाणां पटकारणेषु तन्तुषु तन्तुत्वं न तु कार्ये पटेऽपि तन्तुत्वमिति प्रतिपत्तिरिति भवति व्यभिचार इत्यर्थः ।

32. **यदि च बुद्धिर्नित्या, अनिर्मोक्षप्रसङ्गः, पुंसः सर्वदा सोपाधित्वे स्वरूपेणानवस्थानात् । अथ विलीयते, ततो नानादेर्विलय इत्यादिमत्त्वे तदनुत्पत्तिदशायां को नियन्ता ? प्रकृतेः साधारण्यात् तथा चासंसारः । पूर्वपूर्वबुद्धिवासनानुवृत्तेः साधारण्येऽप्यसाधारणीति चेत् । बुद्धिनिवृत्तावपि तद्धर्मवासना-ऽनुवृत्तिरित्यपदर्शनम् । सूक्ष्मत्वान्न दोष इति चेत् । मुक्तावपि पुनः प्रवृत्तिप्रसङ्गः । निरधिकारत्वा-न्नैवमिति चेत् । तर्हि साधिकारा प्रसुप्तस्वभावा बुद्धिरेव प्रकृतिरस्तु, कृतमन्तरा प्रकृत्यहङ्कारमनः-शब्दानामर्थान्तरकल्पनया । सैव हि तत्तद्व्यवहारगोचरा तेन तेन शब्देन व्यपदिश्यते शारीरवायुवदित्याग-मोऽपि सङ्गच्छते इत्यतोऽपि हेतुरसिद्धः । अधिकारनिवृत्त्या बुद्धेरप्रवृत्तिरपवर्गः, वासनायोगश्चाधिकारः, ततः संसारः । धर्मधर्मिणोरत्यन्तभेदे च कौटस्थ्याविरोधः । भेदश्च विरुद्धधर्माध्यासलक्षणो घटपटादिवत् प्रत्यक्षसिद्धः । न च सामानाधिकरण्यादभेदोऽपि, तद्धि समानशब्दवाच्यत्वम्, एकज्ञानगोचरत्वम्, एकाधिकरणत्वम्, आधाराधेयभावः, विशेष्यत्वम्, सम्बन्धमात्रं वा, भेद एव भेदेऽपि चोपपद्यमानं नाभेदं स्पृशतीति । तस्मात् सर्वमवदातम् ॥१४॥**

स्यादेतत् । नित्यविभुभोक्तृसद्भावे सर्वमेतदेवं स्यात्, स एव कुतः, भूतानामेव चेतनत्वात् । कायाकारपरिणतानि भूतानि तथा, अन्वयव्यतिरेकाभ्यां तथोपलब्धेः, कर्मज्ञानवासने तु सर्वत्र प्रतिभूतनियते अनुवर्तिष्येते, यतो भोगप्रतिसन्धाननियम इति चेत् । उच्यते –

नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात् ।
वासनासङ्क्रमो नास्ति न च गत्यन्तरं स्थिरे ॥१५॥

32. अन्यथेत्यादिपदान्तरं व्याचिख्यासुर्यद्युपबन्धेनाह – **यदि चे**ति । प(च)रमपदं व्याचिख्यासुराशङ्कते – **अथे**ति । ननु विलीयतां नाम बुद्धिरस्तु च प्रकृतेः साधारण्यं, तथापि विलीनमपूर्वबुद्धिवासनानुवर्तमाना (तथापि विलीनायां बुद्धावपि पूर्वबुद्धिवासनानुवर्तमाना) नियन्त्री भविष्यतीत्याशयवानाशङ्कते – **पूर्वे**ति । यदि वासना बुद्धिरेव तदा निवृत्तिः, कथमनुवृत्तिः ? ग्ध्वक्वा(पृथक्त्वे)ऽनुवृत्तिः, कथं तर्हि निवृत्तिः ?, निवृत्त्यनुवृत्त्योः परस्परविरुद्धत्वात् । अथ बुद्धिधर्मो वासनेति मतं तदा धर्मस्य धर्म्यतिरिक्तस्यानभ्युपगमेऽपसिद्धान्तात् स एव दोष इत्याशयवान् परिहरति – **बुद्धिनिवृत्तावपी**ति । अपदर्शनमपकृष्टदर्शनं मतमप्रमाणिकत्वाद् [31B] अभिन्नत्वाच्च । तथा च धर्मिनिवृत्तौ तदभिन्नस्य [धर्मस्य] निवृत्तिरेवेति भावः । स्थूलरूपनिवृत्तावपि सूक्ष्म-रूपानुवृत्तिरिति स्वदर्शनं समाधित्सुराशङ्कते – **सूक्ष्मत्वादि**ति । न कथञ्चिदपि अनुवृत्तिरभ्युपगत(गन्त)व्या, अभ्युपगमे वा मुक्तावपि सूक्ष्मतयाऽनुवृत्तौ पुनः संसारापत्तिरित्याशयवानाह – **मुक्ताविति** । ननु यावत्संसारं विलीनाया अपि बुद्धेर्वासनानुवृत्तिलक्षणोऽधिकारोऽभ्युपेयते, मुक्तौ वासनापि नास्तीति न पुनः प्रकृते(तेः)

[प्रवृत्ति]रित्याशयवानाशङ्कते – **निरधिकारत्वादि**ति । संसारसंभवोऽधिकारः प्रकृतिप्रकृत्वे(प्रवृत्तेः), तदसंभवस्त्वनधिकारः तस्मान्न प्रवर्तते । यद्येवमधिकारस्तदा किं प्रकृत्यादिकल्पनया ?; एवंभूताधिकारवशाद् बुद्धितत्त्वमेव ज्ञानाद्याश्रयभूतं प्रकृत्यादिपदवाच्यमस्त्वित्याशयवान् परिहरति – **तर्ही**ति । मरणेऽपि भाविसंसारसंभवः । प्रसुप्तस्वभावता(वेति) । नन्वेवं –

''दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः ।
भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः ॥
बौद्धा दशसहस्रं तु तिष्ठन्ति विगतज्वराः ।''

इत्यागमः कथं संगमनीय इत्याह - **सैव ही**ति । तत्र व्यापारयोगादादिकारणत्वाभिमानत्वे चेतनाधारत्वयोगात् तेन तेन शब्देन प्रकृत्यहङ्कारमनःशब्देन व्यपदिश्यते अभिधीयते इत्यर्थः । एकस्यामेव व्यापारयोगेनानेकशब्दाभिलप्यत्वमित्यत्र दृष्टान्तमाह [32A] – **शरीरवायुवदि**ति । यथैक एव शारीरो वायुरूर्ध्वाधोगत्यादियोगात् प्राणापानादिव्यपदेशभाग् भवति तथा बुद्धिरप्यनेकव्यापारयोगात् प्रकृत्यादिशब्दवाच्येत्यर्थः । **अतोऽपि हेतुरसिद्धो**ऽचेतनकार्यत्वादिति । न केवलं पूर्वोक्तप्रकारेणासिद्धो अतोऽपीत्यपिशब्दार्थः । पूर्वं हि [अ]काय(र्य)त्वेन वा अचेतनकार्यत्वमसिद्धमित्युक्तमत्र तु बुद्धेरेव प्रकृत्यादिपदवाच्यतया प्रकृतिकार्यत्वमसिद्धमिति मन्तव्यम् । नन्वेवमपि कस्यायमपवर्गः कथं च कस्य संसार इति हृदि निधायापवर्गसंसारौ यस्य यथा च तदुभयं दर्शयति – **अधिकारनिवृत्त्ये**ति । **बुद्धेरि**ति । स्वात्मीयराद्धान्तावलम्बनेनोक्तमस्मन्मते त्वात्मनो ज्ञानाद्याश्रयस्यैव लौकिके आत्मपदवाच्यत्वे न संज्ञाविसंवादोऽप्येकार्थतासिद्धे[रि]ति । अधिकारनिवृत्तिं स्फुटीकर्तुमधिकारप्रतियोगिनमाह – **वासने**ति । कर्मणा यागादिना जनिता धर्माधर्मरूपा वासना तद्योगः सम्बन्धो ज्ञानाद्याधारे, स च संसारहेतुः, तन्निवृत्तिश्चोपभोगेनानुत्पत्तिश्च साधनानुपादानेन सा चापवर्गहेतुरिति मन्तव्यम् । ननु आत्मनो ज्ञानाद्याश्रयत्वे ज्ञानादेश्च विकाररूपत्वात् तदभिन्नस्य विकारित्वे कौटस्थ्यविरोधि[ते]त्यत आह - **धर्मधर्मिणोरि**ति । तयोर्भेदे धर्मस्योत्पादविनाशाभ्यां न धर्मिण उत्पादविनाशाविति कौटस्थ्यमेवेत्यर्थः । ननु भेदो [धर्म]धर्मिणो न प्रामाणिकोऽभेदस्तु प्रमाणवानतो न दोषपरिहार इत्यत आह – **भेदश्चे**ति । प्रत्यक्षसिद्ध इत्यबाधितप्रत्यक्षसिद्ध इत्यर्थः । तथाहि उदयव्ययधर्मवत्तया [32B] अनुभूयमानाभ्यो बुद्धिभ्यो अनुदयव्ययधर्मकाम(कमा)त्मत्वमनुभूयमानमशक्यापह्नवम् । कथमन्यथा 'अहं जानामि, अहमज्ञासिषम्, अहं ज्ञास्यामि' इति वर्तमानातीतानागतज्ञानानुगमैकमहमास्पदमनुभूयत इति । अभेदोऽप्य[तो] भेद एवेति मतमाशङ्क्य निराकरोति – **न चे**ति । अभेदोऽपीत्यतः परमभेद एवेत्यपि द्रष्टव्यम् । अत्र परः प्रष्टव्यः 'किं सामानाधिकरण्यप्रतीतिरेवाभेदप्रतीतिरथ भेदे सामानाधिकरण्यव्यावृत्त्याऽभेदानुमानम् ?' आद्ये विपरीतकल्पनेयमायुष्मतामित्याह - **भेद एवे**ति । उक्तप्रकारसामानाधिकरण्य[प्रतीतिः] भेदमेवोल्लिखतीत्यर्थः । द्वितीये केवलव्यतिरेक्यनुमानमर्थापत्तिस्तथा चान्यथोपपन्नेत्याह - **भेदेऽपि** इति । न चातिप्रसङ्गः, स्वभावनियतत्वात् कार्यकारणवद् विषयविषयिवद् वा अभिधानाभिधेयवद् वेति शङ्कानिरासे सति उपसंहरति – **सर्वमि**ति । सर्वमिति । ननु सर्वमेतन्नित्यविभुरूपात्मसद्भाव उपपद्यते, एतदेव न सहामह इति पुनरपि चार्वाकमुत्थापयति । ननु यदि भूतचैतन्यगा(मा)स्थीयते तदापि स्यान्न [त]था, एतदस्तीत्यतो न चैतन्यं भूतेष्विति हृदि [कृ]त्वा विशेषयति - **काये**ति । न भूतमात्रे चैतन्यमातिष्ठामहे किन्तु तद्विशेषे काय इत्यत्र प्रमाणमाह – **अन्वये**ति । यद्यस्मिन् सति भवत्यसति न भवति तत् तस्य यथा घटरूपम् । शरीरे सति भवत्यसति न भवति चेतना, अतः शरीरस्येति [33A] जानीमः ।

तथा च प्रतीतिः 'शरीरं चेतनावत्, गौरोऽहं जानामि, कृशोऽहं दुःखी, स्थूलोऽहं सुखी' इत्यादि शरीरसामानाधिकरण्यप्रतीतिरेव शरीराधारां चेतनामुपदर्शयतीत्यर्थः । ननु यद्यनुभवितृ कर्तृ च शरीरं तर्हि तस्मिन् नष्टे कथमन्यस्यानुसंधातृत्व(त्वे) भोक्तृत्वे चातिप्रसङ्गो दुर्वार इत्यत आह — **कर्मज्ञानेति** । कर्मज्ञानाभ्यामुपजनिते वासनेऽदृष्टसंस्कारौ । तस्मान्नातिप्रसङ्ग इत्यर्थः । भोगप्रतिनियमो यत्कायसन्ताने [कर्म तत्कायसन्ताने] भोगः सुखदुःखसाक्षात्कारो नान्यत्रेत्येवमाकारः । प्रतिसन्धानप्रतिनियमोऽपि यत्कायसन्ताने संस्कारस्तत्कायसन्ताने स्मृतिर्नान्यत्रेत्येवमाकारः । यत् शरीरान्वयव्यतिरेकानुविधायि तत् शरीरकारणकमिति नियमो न तु शरीराश्रितमेव शरीरहेतुकं घटपटादिभिर्व्यभिचारात् । शरीरस्थूलगौरादिसामानाधिकरण्यं तु बाधकवशेन भ्रान्तमित्याशयवान् समाधत्ते — **उच्यत** इति । **नान्ये**त्यादि सुदृढप्रमाणावधृतमुभयसिद्धं चेत्यभिप्रायः । न चैकं भूतमपक्रमाद् विनश्वरत्वात् । न च वासनासङ्क्रमो अन्यवासना[ना]मन्यत्रासङ्क्रमनियमात्, सङ्क्रमे वाऽतिप्रसङ्गादित्यर्थः । न चोपादानधर्म उपादेये सङ्क्रामति । पूर्वशरीरस्योत्तरशरीरं प्रति अनुपादानत्वात् तथा च न भोगादिनियम इति रहस्यम् ।

33. **न हि भूतानां समुदायपर्यवसितं चैतन्यम् । प्रतिदिनं तस्यान्यत्वे पूर्वपूर्वदिवसानुभूतस्यास्मरणप्रसङ्गात् । नापि प्रत्येकपर्यवसितं करचरणाद्यवयवापाये तदनुभूतस्य स्मरणायोगात् । नापि मृगमदवासनेव वस्त्रादिषु संसर्गादन्यवासनाऽन्यत्र संक्रामति, मात्रानुभूतस्य गर्भस्थेन भ्रूणेन स्मरणप्रसङ्गात् । न चोपादानोपादेयभावनियमो गतिः । स्थिरपक्षे परमाणूनां तदभावात् । खण्डावयविनं प्रति च विच्छिन्नानामनुपादानत्वात् । पूर्वसिद्धस्य चावयविनो विनाशात् ॥१५॥**

अस्तु तर्हि क्षणभङ्गः । न चातिशयोऽप्यतिरिच्यते किन्तु सादृश्यतिरस्कृतत्वाद् द्रागेव न विकल्प्यते, कार्यदर्शनादध्यवसीयते अन्त्यातिशयवत् । तथा च भूतान्येव तथा तथोत्पद्यन्ते यथा यथा प्रतिसन्धाननियमादयोऽप्युपपद्यन्ते । क्षणिकत्वसिद्धावेवमेतत्, तदेव त्वन्यत्र विस्तरेण प्रतिषिद्धम् ।

33. एतदेव विवृणोति — **न हीति** । एतद्बाधकवशेन शरीर(रे) चैतन्यासंभवेऽचेतनत्वभूतत्वमूर्तत्वभूतस्वरूपादिमत्त्वे यो मृतदेहघटादिदृष्टान्तो पेवेभ्युसिद्धं(नैवोभयसिद्धः) वेदितव्यम्(व्यः) । ननु यदि स्थिरपक्षे न संभवत्युपादानोपादेयभा[वः] पूर्वोत्तरयोः शरीरयोस्तर्हि [33B] क्षणिकपक्षे संभविष्यत्यन्यथा स्थिर इत्यसङ्गतमित्यभिप्रायवानाह - **अस्तु तर्हीति** । ननु क्षणिकत्वे न तावदध्यक्षं प्रमाणं येन क्षणिकत्वात् का[रणं कार्यं] कूरात(कुर्यात्) । नीलमेतदितिवत् क्षणिकमेतदिति निश्चयविरहात् । नीलादिनिश्चयस्य च क्षणिकसाधारणत्वादन्यथा विर[हा]ऽविनिवृत्तिः, ज्ञानचा(धा)तुमारा(भावा)त् क्षणिकत्वसिद्धिः । तस्य प्रत्यक्षेण क्वचिदसिद्धौ व्याप्त्यसिद्धेः, असिद्धव्याप्तिकस्य लिङ्गत्वानुपपत्तेः । न च मानान्तरमभ्युपगम्यते परैर्यतः क्षणिकत्वं निश्चीयेत। न च प्रामाणिकं शंधा(शङ्का)मुपगन्तुम् । न च तेन प्रमाणव्यवहारः शक्योपादानस्तत्कथमुक्तम् 'अस्तु तर्हि क्षणभङ्गः' इति । उच्यते — विपक्षे क्रमयौगपद्यव्यावृत्तिरूपेण व्यापकानुपलम्भेनाधिगन्तव्य[ः] व्यतिरेकव्याप्तिकस्य प्रसङ्गतद्विपर्ययाभ्यां गृहीतान्वयव्याप्तेः सत्त्वस्य सत्त्वात् । प्रयोगस्तु — यत् सत् तत् क्षणिकम्, यथा घटः, संश्चामी [भावाः] । सत्त्वशब्देनार्थक्रियाकारित्वमभिमतं बौद्धस्य । तथोभयवादिसिद्धप्रमाणप्रमितेषु सिद्धम्। प्रसङ्गस्तु यद्ययं वर्तमानकालभाविकार्यकरणकालेऽतीतानागतकालभाविनीमप्यर्थक्रियां प्रति शक्तः स एवानुवर्तमानोऽनुवर्तिष्यमाणश्च ततः सदैव कुर्यात् सामग्रीवदिति । अथ तस्मिन् काले अजनकत्वम्, तस्य प्रत्यक्ष-

सिद्धमशक्यापह्नवमिति । अस्तु [34A] तर्हि व्यापकनिवृत्तेर्विपर्ययो यद्यदा यन्न करोति न तत् तदा तत्र समर्थम्, यथा शिलाशकलमङ्कुरे, न करोति च वर्तमानक्रियाकरणसमयेऽतीतानागतलक्षणामर्थक्रियामिति व्यापकानुपलब्धिः । भिन्नस्तु समर्थक्षणादसमर्थः क्षण इति । न च वाच्यं शक्तस्यापि सहकारिलाभालाभाभ्यां करणाकरणयोरुपपत्तेः, संदिग्धव्यतिरेकिणौ प्रसङ्गविपर्ययहेतु(तू), सत्त्वस्योपकारकानुपकारकसहकार्यपेक्षानुपपत्तेः । उपकारकापेक्षायामनवस्थानादनुपकारकापेक्षायामतिप्रसङ्गादिति निरन्तरग(त्व)मित्याशयवतोक्तम् - **अस्तु तर्ही**ति । यथाह **ज्ञानश्रीः** –

यत् सत् तत् क्षणिकं यथा जलधरः सन्तश्च भावा इमे
सत्ता शक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा च(न) सा ।
नाप्येकैव विधान्यदापि परकृन्नैव क्रिया वा भवेद्
द्वेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति ॥ [क्षणभङ्गाध्यायः]

एवं च सप्रमाणके क्षणभङ्गदर्शिते यः कश्चिदाशङ्कते – ननु यदि क्षणभङ्गपक्षे भावादर्थान्तरस्यातिशयः स्यात् तदा भावस्याकारकत्वप्रसङ्गः, अनतिरिक्तस्य तूत्पादेऽसा(स)मर्थाद् बीजात् समर्थस्य वैलक्षण्येन निश्चयः स्यादिति । तं प्रत्याह – **न चे**ति । समर्थस्वभावादिति शेषः । किमिति [भ]वद्भि[ः] न पूर्वबीजवैलक्षण्येनानुभूयते उत्तरबीजमित्यत आह – **किन्त्वि**ति । भिन्नस्वरूपमपि सादृश्यवशात् न तथात्वेनानुभूयते प्रदीपादिवदित्यर्थः । अत एव न प्रत्यभिज्ञानबाधाऽपि । **द्रागेवे**त्यापातत इत्यर्थः । न विकल्प्यते न निश्चीयते । तत् किमनिश्चेय एवातिशयो निश्चीयमानो वा? [अथ निश्चीयमानः] कथं निश्चेय इत्यत आह – **कार्ये**ति । उक्तप्रकारेण [34B] सहकार्यपेक्षानुपपत्तेः पूर्वापरकालयोः कार्यदर्शनादर्शनाभ्यामतिशयोऽवसीयत इति । प्रमाणमनुमानमुक्तमिति द्रष्टव्यम् । न चातिशयितबीजजनककारणानुपलब्धेरतिशयितबीजाभाव इति वाच्यम् । दृश्यादृश्यसमुदायस्यानुपलम्भेऽप्यभावानिर्णयात् । तथा चोक्तं परैः –

पाणिस्पर्शवतः क्षणस्य न भिदा भिन्नान्यकार(र्य)क्षणाद्
भेदो वेति मतद्वयेने(न) ति(वि)कल(लो) यस्यास्त्यसौ जित्वरः ।
तत्रैकस्य बलं निमित्तविगमानो(मात्त)त्कार्यमन्यस्य वै
सामग्री तु न सर्वथा क्षणसहाकार्य(र्या)नुगत्य(त्या)तते ॥

अन्त्यातिशयवदिति सामग्रीवदित्यर्थः । यथा कार्यैकसमधिगम्या सामग्री नाऽनुपलम्भेन शक्या निराकर्तुम् तथाऽतिशयोऽपि कार्यैकसमधिगम्यो नानुपलम्भेन शक्योऽपाकर्तुमित्यर्थः । परं च भोगप्रतिसन्धाननियम उपपद्यत इत्यत आह – **तथा चे**ति । कार्यातिरिक्तोपकारमकुर्वाणस्य सहकुर्वतः सहकारिणोऽपेक्षोभयसिद्धेति । तथाभूतसहकारिसं[नि]ध्यसन्निधिभ्यांमप(भ्याम)क्षणिकस्यैव क्रमयौगपद्याभ्यां सर्वक्रियाकरणाकरणयोरुपपत्तेर्व्यापकानुपलब्धेरसिद्धेर्व्यतिरेकव्याप्त्यसिद्धौ प्रसङ्गतद्विपर्य[य]योश्च सहकार्यपेक्षासमर्थनेन संदिग्धव्यतिरेकित्वादन्वयमनोरथस्याप्यसिद्धेः सत्त्वमप्रतीतव्याप्तिकतया न क्षणिकत्वधियमाधातुमुत्सहत इत्याद्यन्यत्र विस्तरेणोक्तमित्यभिप्राये(य)वान् ज्ञना(ज्ञान)कामा[ना]स्वा(श्वा)स्योत्तरयति – **क्षणिकत्वे**ति ।

34. **अपि च –**

न वैजात्यं विना तत् स्यान्न तस्मिन्ननुमा भवेत् ।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥१६॥

न हि करणाकरणयोस्तज्जातीयस्य सतः सहकारिलाभालाभौ तन्त्रमित्यभ्युपगमे क्षणिकत्व-सिद्धिः । तथैकव्यक्तावप्यविरोधात्, तद्वा तादृग्वेति न कश्चिद् विशेष इति न्यायात् । ततस्तावनादृत्य वैजात्यमप्रामाणिकमेवाभ्युपेयम् । एवं च कारणवत् कार्येऽपि किञ्चिद् वैजात्यं स्याद् यस्य कारणापेक्षा न तु दृष्टजातीयस्येति शङ्कया न तदुत्पत्तिसिद्धिः । दृष्टजातीयमाकस्मिकं स्यादिति चेत्, न । तत्रापि किञ्चिदन्यदेव प्रयोजकं भविष्यतीत्यविरोधात् । न कार्यस्य विशेषस्तत्प्रयुक्ततयोपलभ्यते, नापि कार्यसामान्यस्यान्यत् प्रयोजकं दृश्यत इति चेत् । तत् किं कारणस्य विशेषः स्वगतस्तत्प्रयोजक-तयोपलब्धः ? कारणसामान्यस्य वान्यत् प्रयोज्यान्तरं दृश्यते ? यतो विवक्षितसिद्धिः स्यात् । शङ्का तूभयत्रापि सुलभेति । कार्यजन्माजन्मभ्यामुन्नीयत इति चेत् । न । सहकारिलाभालाभाभ्यामेवोपपत्तेः । उन्नीयतां वा, कार्येषु शङ्किष्यते, निषेधकाभावात् । न हि धूमस्य विशेषं दहनप्रयोज्यं प्रतिषेद्धुं स्वभावानुपलब्धिः प्रभवति, कार्यैकनिश्चेयस्य तदनुपलब्धेरेवानिश्चयोपपत्तेः । कार्यस्य चातीन्द्रियस्यापि सम्भवात् । अत एवानुपलब्ध्यन्तरमपि निरवकाशमिति ।

34. किमिह किमपि न वक्तव्यम् । तथा च न शिष्यमतिविवर्धनम् । अतः शिष्येऽत्र बोध्यया (शिष्याणां प्रबोधाय) संक्षेपव(पेण) सिद्धान्तसारमाह - **अपि चेति** । असमन्व(र्थ)जातीयस्यान्यस्वभावेन [35A] प्रकृतकार्यसिद्धिः । **तद्वा तादृग्वेति** न कश्चिद् विशेषस्ततोऽन्यदसमर्थमुपेतव्यम्, तथानुपलब्धिबाधित-मशक्यमुपगन्तुमित्याह - **न वैजात्यमिति** । कुर्वद्रूपत्वं विना न तत् क्षणिकत्वं स्यात् । अभ्युपेयत एव वैजात्यं क्षणिकवादिना । ततस्तमेवानिष्टतया किमित्युच्यत इत्यत आह — **न तस्मिन्निति** । तस्मिन् वैजात्ये प्रमाणबाधितेऽभ्युपगम्यमाने कारणवत् कार्यमपि तथाभूत[म्] । वैजात्योपगमेऽनुमानमात्रं न भवेत् । मा भूदनुमानमिति हृदि निधायोक्तम् — **विना तेनेति** । तेनानुमानेन विना तत्सिद्धिः क्षणिकत्वसिद्धिः । ननु नानुमानात् क्षणिकत्वसिद्धिः किन्तु प्रत्यक्षादेव भविष्यतीत्याह — न च नीलनिश्चय(ये) क्षणिकत्वनिश्चयोऽपीत्यर्थः । अतिसंक्षिप्तमतिविशदं सिद्धान्तसारं गृहीतम् । विवृण्वन् प्रथमपदं विश[द]यति — **न हीति** । कार्यजन्माजन्मनोस्तज्जातीयस्य पूर्वजात्यविशिष्टजातीयस्य सहकारि[लाभा]लाभाविति यथाक्रमम् । तन्त्रं प्रधानमुपयोगीति यावत् । साजात्येऽपि क्षणिकत्वमस्तु को दोष इत्यत आह — **तथैकेति** । यदि पूर्वव्यक्तित उत्तरव्यक्तिरविशिष्टा सहकारिमध्यनिविष्टा कार्यजननी स्वीक्रियेत तर्हि पूर्वैव व्यक्तिरनुवर्तमाना या सहकारिवैधुर्यात् सर्वं कार्यं नाकार्षीदधुना तु सहकारिप्राप्तौ करोतीत्यभ्युपगम्यतां विरोधाभावादित्यत आह — **व्यक्तावप्य-विरोधादिति**। पूर्वस्यामेवेत्यर्थः । **तादृग्वेति**। तज्जातीयं वै[35B]जात्यशून्यमन्यदित्यर्थः । [का]र[णं] विनाऽत्रं(त्र) तु तत् क्वचिदुपयुज्यत इत्यभिप्रायः। ननु भवत्वेवं तथापि किमिति हृदि निधाय द्वितीयप(पा)दं योजयितुं सहसा[म्] आह — **तत** इति । तस्मात् कारणात् तौ सहकारिलाभालाभौ प्रमाणसिद्धावुभयाभिमतावनादृत्य, अनादरत्वाद् उपेक्षेति यावत् सुबोधमितरत्। **एवमिति** वारिताभिमानस्तदुत्पत्तिसमर्थनार्थमाशङ्कते — **दृष्टजातीयमिति**। धूमजातीयं वह्निं विना यदि भवति तदा कारणं विना भवतः कार्यस्याकस्मिकत्वं भवेत्, तथा च कादाचित्कत्वविहतिरित्यभिप्रायः । तदेतत् परिहरति - **नेति** । कारणं विना भवतः कार्यस्यैव दोषो न तु वह्निं विना भवतः, तं विना भवतां घटादीनामनाकस्मिकत्वदर्शनादित्यर्थः । अस्मदभिमतं परः स्वयमेवाभिदधात्वित्याशयेन स्वमतसमानरूपं परमतमाशङ्कते - **न कार्यस्येति** । धूमस्य विशेषः कारणप्रयुक्तया वह्निप्रयुक्तया तत्साध्यबाधेति यावत् । कार्यसामान्यस्य धूमजातीयस्यान्यत्प्रयोजकमुत्पादकमित्यर्थः । यदि च

कार्यस्य विशेषकारणप्रयुक्तया कार्यसामान्यस्यान्य[त्कारणान्तर]प्रयोजकतयाऽनुपलब्धे(ब्धि)बाधितत्वान्नाभ्युपगम्यते तर्हि कारणस्यापि विशेषकार्यप्रयोजकतया कारणसामान्यस्यान्यत्कार्यान्तरप्रयोज्यतयाऽनुपलब्धिबाधितत्वान्नाभ्युपगन्तव्यम् इति स्वाभिप्रायमुद्घाटयति – **तत्किमिति**। अथ न निश्चयेनि(नो)च्यते त[त्] किन्तु शङ्का क्रियते, सा चाशक्यपरिहारेति [36A] यदि तदा कार्य(र्या)पेक्षे(क्षा)पि सा तद्यै(थै)वेत्याह – **शङ्का त्विति** । न शङ्क्यते नाप्यध्यक्षतो निश्चीयते, किं तर्हि ? अनुमीयते तत्, तदा न शङ्का सा अस्यामित्याशयवाननुमानं प्रमाणयति - **कार्येति** । यदि यः प्रागजनकः स एवोत्तरत्रानुवर्तते [तदा] कथं ततः कार्यजन्म उत्तरकाले, कार्यजनकस्य वा पूर्वमेवि(व) भावे कथं पूर्वमजननम् । तस्मात् पूर्वोत्तरकालयोरजननजननाभ्यामवसीयते पूर्वोत्तरकालाया(लयोः) भाववैलक्षण्यमित्यर्थः । कारणसंभवेऽप्यजननं कदाचित्, कदाचित् तु जननं सहकारिविरहाविरहाभ्यामेवाननुकूलानुकूलाभ्यामुपायसिद्धाभ्यामुपपन्न[म्] । न तदतिरिक्तकुर्वद्रूपत्वजातिवेशोऽयमुपस्थापयतीत्याशयवान् बौद्धमतमुन्मूलयति – **नेति** । एतेन कार्यबलमन्यथासिद्धं सन् न सौगतमतमनुधावतीत्युक्तं भवति । प्रौढिवादेन त्वाह – **उन्नीयतामिति** । **निषेधकाभावादिति** साधकाभाववद् बाध[क]स्याप्यभावादित्यभिप्रायः । न तु बाधकाभावः सिद्धः, अनुपलब्धेरेव बाधिकायाः सत्त्वादिति मन्यमानं प्रत्याह - **न हीति** । अयोग(ग्य)मेव तदतो नानुपलब्धिर्बाधिकेत्यर्थः । यदि योग्यं तदा कारण इव [प्र]माणान्तरतोऽपि निश्चेयमिति हृदि निधाय प्रमाणान्तरस्याप्ययोग्यत्वं संभावयति – **कार्यैकेति** । तदनुपलब्ध्य(ब्ध्यै)वेत्यर्थः । कार्यानुपलब्ध्या हि कारणसत्ता न निश्चीयते, न त्वसत्तानिश्चयो व्यभिचारादित्यभिप्रायः । ननु कार्यानुपलब्धेः कथमित्यत आह – **कार्यस्य चेति** । न हि कार्यमैन्द्रियकमेवेति नियम इति भावः । ननु स्वभावानुपलब्धिकार्यानुपलब्ध्योर्निषेधिकयोर[36B]भावेऽप्यनुपलब्ध्यन्तरमेव निषेधकं संभविष्यतीत्यत आह – **अत एवेति** ।

35. **एवं विधिरूपयोर्व्यावृत्तिरूपयोर्वा जात्योर्विरोधे सति न समावेशः, समाविष्टयोश्च परापरभावनियमः, अन्यूनानतिरिक्तवृत्तिजातिद्वयकल्पनायां प्रमाणाभावात् । व्यावर्त्यभेदाभावेन विरोधानवकाशे भेदानुपपत्तेः । परस्परपरिहारवत्योश्च समावेशे गोत्वाश्वत्वयोरपि तथाभावप्रसङ्गात् । सामग्रीविरोधान्नैवमिति चेत्, कुत एतत् ? परस्परपरिहारेण सर्वदा व्यवस्थितेरिति चेत्, नेदमप्यध्यक्षम् । एकदेशसमावेशेन तु सामग्रीसमावेशोऽप्युन्नीयते । यावत् तत्कार्ययोः परस्परपरिहृतिस्वभावत्वादिति चेत्, तर्हि कम्पशिंशपयोः परस्परपरिहारवत्योर्न समावेशः स्यात् । दृश्यते तावदिदमिति चेत् । गोत्वाश्वत्वयोरपि न दृश्यते इति का प्रत्याशा ? तथा च गतमनुपलब्धिलिङ्गेनापि । क्वचिदपि विरोधासिद्धेः । ततो विपक्षे बाधकाभावात् स्वभावहेतुरप्यपास्तः ।**

35. यदा [निरा]कृते स्वभावकार्यानुपलब्ध्योरुक्तप्रकारेणा(ण) निषेधसामर्थ्यं(र्थ्ये) तद(दा)ऽनुपलब्ध्यन्तरस्यापि व्यापकविरुद्धोपलब्ध्यादेस्तादात्म्यात् तदुत्पत्तिनियममुपादाय प्रवृत्तस्य कैव [क]था निषेधसामर्थ्य इत्यर्थः । एवं तावत् प्रमाणाभावेन वैजात्यं नास्तीत्युक्तं संभावनाप्यनिष्टोपदर्शनशरप्रहारविदारितमर्मतया संजातनिर्वाणेत्यप्युक्तम्, अधुना त्वभ्युप[गमे] [बाधिका] युक्ति[:] परापरभावानुपपत्तिरप्यवान्तरजातिप्रशान्तिमातनोतीत्याशयवानाह-**एवमिति** । वक्ष्यमाणाभिप्रायेणेत्यर्थः । **विधिरूपयो**रिति स्वमतबलेन । **व्यावृत्ती**त्यादि बौद्धमतेनोक्तमतो न विरोधः । **न समावेशः** एकस्यां व्यक्तौ । **समाविष्टयो**रित्यत्राप्येकस्यामिति मतं(मन्त)व्यमिति नियमः । प्रमाणसिद्धत्वादित्यभिप्रायः । न त्वेकत्र सामान्यद्वयं परिवर्तमानमन्यथाऽपि भविष्यति बाधका-

भावादिति मन्यमानं प्रति बाधकमाह – **अन्यूने**ति । कल्पने न किञ्चित् साधकमस्ति, शयंसवेन (संशयत्वेन) बाधकम्, पर्यायशब्दोच्छेदप्रसङ्ग इति भावः । यथा वृक्षत्व-शिंशपत्वयोर्व्यावृत्त्यभेदोद् (व्यावर्त्यभेदाद्) [व्यावृत्तीनाम् अपोहानां] विरोधे भेदव्यवस्था लोके वृक्षत्वस्यावृक्षमात्रं व्यावर्त्यं शिंशपात्वस्य तु वृक्षविशेषोऽपि पनसादि व्यावर्त्यो न तथा बुद्धित्वज्ञानत्वादीनामस्ति व्यावर्त्यभेदोऽबुद्धिमात्राऽज्ञानमात्रादीनां सर्वत्र व्यावृत्तानामभेदादिति प्रमाणसिद्धं सर्वलोकसिद्धं च न शक्यमपह्नोतुमित्याशयवान् प्रकृति(त)भेदे प्रमाणाभावमेव व्युत्पादयति – **व्यावर्त्ये**ति । ननु सुवर्णत्वकलश[त्व]योरेकव्यक्तिसमावेशस्तावदनुभवसिद्धः । सुवर्णकलश इति प्रतीतेः सर्वजन[37A]सिद्धत्वात् । न च तत्र परापरभावसंभवः । सुवर्णत्वकलशत्वयोः पूर्वापरत्वेना(त्वे मा)र्दघट-सौवर्णत्रयो(र्णघटयो)र्घटत्वसुवर्णत्वानुपपत्तेः । तस्मात् परापरभावेनैवैकव्यक्तिसमाविष्टं सामान्यद्वयमिति न वैशेषिक-समवायसिद्धिः । नानवबोधात् । तयोर्घटत्वानभ्युपगमेनैव सर्वस्य सुस्थत्वात् । घटव्यवहारस्तत्संस्थानसमावेशाद् भाक्तः । एवमन्यत्रापि बोध्यमिति । तस्माद्यु(दु)क्तं **नियम** इति । तदनु प्रकृतेऽपि शालित्वाङ्कुरत्वयोः कुर्व-द्रूपत्वयोः परापरभावनियमे अशाल(ले)रङ्कुराजनकत्वप्रसङ्गः शालिमात्रनियतत्वात् तस्य, वैजात्यशालित्वयोस्त-थात्वे कुशूलस्थस्य शालेरशालित्वप्रसङ्गो वैजात्यविरहात् । न च वाच्यं यथा [उत्]क[र्ष]त्वापरसामान्यतीव्रादि-(व्रत्वाद्) अपरतीव्रत्वमन्यदेवानन्यगतिकत्वात् तथा शालित्वापरवैजात्या(द)परवैजात्यमन्यदेवेति । तत्र तीव्रत्वादेः सामान्यविशेषस्य प्रमाणसिद्धतया तथाऽभिधातुं शक्यत्वादत्राप्रामाणिकत्वेन तथा व्यवस्थापयितुमशक्यत्वादिति निरुपद्रवमेतत् । अत एव प्रथमतोऽप्रामाणिकत्वमुक्तमिति रहस्यम् । ननु मा भूदन्यूनानतिरिक्तव्यक्तिवृत्ति सामान्यद्वयमुक्तयुक्तेर्विरुद्धयोस्तु समावेशो भविष्यतीत्याशङ्क्य बाधकमाह – **परस्परे**ति । गोत्वाभिव्यञ्जक-व्यक्त्युत्पादकसामग्र्योर्विरोधादसमावेशः शङ्कते – **सामग्री**ति । सामग्र्योरेव विरोध इति । प्रमाणमस्तीत्याशयवान् परिहरति – **कुत एतदि**ति । परः सामग्रीविरोधे प्रमाणमाह – **परस्परपरिहारेणे**ति स्थिते सामग्र्योरिति शेषः । प्रयुक्तमेतद् यद्यत्रापि प्रमाणं भवेत् तन्नास्तीत्याह – **नेदमि**ति । अस्मदाद्यध्यक्षमित्यर्थः । न हि सामग्री परस्परपरि[37B]हारेणैव वर्तत इति असर्वज्ञविज्ञप्तिगोचरं साक्षादित्युभ[य]सिद्धमित्यर्थः । सामग्री तावत् परस्परपरिहारेणैव वर्तत इति नाध्यक्षमित्युक्तमिदानीं तु तथाविधजात्यभिव्यञ्जकव्यक्तिसमावेशवशेन सामग्रीसमावेश एव कदाचित् कल्प्यत इत्याशयवानाह – **एकदेशे**ति । 'तु'शब्दः पुनरर्थे इति । पुनः संभाव्यते यावदित्यर्थः । नाध्यक्षप्रसादप्राप्तः सामग्रीविरोधः किन्तु परस्परपरिहृतस्वभावकार्यसंदर्शनबलोन्नीत इति मन्यमानः शङ्कते – **कार्ययोरि**ति । न तावत् कदाचित् क्वचित् परस्परपरिहारसंदर्शनेन सर्वत्रासमावेशव्यवस्थितिः । कम्पशिंशपयोः कदाचित् क्वचित् असमाविष्टयोरपि क्वचित् परस्परपरिहारसंदर्शनेन [न] सर्वत्रासमावेशव्यवस्थितिः । कम्पशिंशपयोः कदाचित् क्वचिदसमाविष्टयोरपि क्वचित् कदाचिदसमावेशप्रसङ्गादित्याह – **तर्ही**ति । दर्शनादर्शनविशेषपुरुषसंस्कारस्य [समावेशा]समावेशनिबन्धनत्वान्नैवमित्याह – **दृश्यत** इति । परस्परपरिहारस्थितयोरपि क्वचित् समावेशदर्शने-नान्यत्र तथाभूतयोरपि समावेशशङ्कादुष्परिहार(रे)त्याशयवानाह- **गोत्वे**ति । अस्तु तथाभूतयोः समावेशः किं नो बाध्यत इति मन्यमानं प्रत्याह - **तथा चे**ति । कार्यानुमानेन वहुत(बाधित)मिति प्रागुक्तमधुना त्वे(त्वने)नापि गतमित्यर्थः । कुत इत्यत आह - **क्वचिदपी**ति । अयमाशयः - अनुपलब्धिरसद्व्यवहारयोग्यतां प्रतिबन्ध-बलेन गमयतीति बौद्धैरभ्युपगम्यते । प्रतिबन्धश्चानुपलब्धेः सद्व्यवहारविरोधित्वेन । यदि च विरुद्धयोरपि समावेशः स्यात् तदाऽनुपलभ्यमानस्यापि सद्व्यवहारयोग्यत्वसमावेशसंभावनायाम[38A]नुपलब्धेरसद्व्यवहार-योग्यत्वाया(ग्यतया) प्रतिबन्धसिद्धौ नानुपलब्धिरपि लिङ्गं स्यादिति बौद्धभाषयैवोदाहरणं प्रकृते यथा – इह

गोत्वमश्वत्वादिति । विरुद्धस्वभावोपलब्धिरनुपलब्धेर्गोत्वविरुद्धाश्वत्वोपलब्धिर्गोत्वानुपलब्धि(ब्धे)रित्यर्थः । इयं च गोत्वाश्वत्वयोर्विरोधे सति प्रमाणम्, न त्वन्यथा; तयोश्च क्वचिदसमावेशेऽप्यन्यत्र समावेशशङ्कायां विरोधस्य पराह[त]त्वादिति । एवं विपक्षे बाधकप्रमाणानुपलब्धिप्रपञ्चान्यतमवेदनीयः स्वभावहेतुस्तदभावे न भवेदित्याह - **तत** इति ।

36. **नन्वस्ति तत् । तथाहि । वृक्षजनकपत्रकाण्डाद्यन्तर्भूता शिंशपासामग्री, सा वृक्षमतिपत्य भवन्ती स्वकारणमेवातिपतेत् । एवं शाखादिमन्मात्रानुबन्धी वृक्षव्यवहारः तद्विशेषानुबन्धी च शिंशपाव्यवहारः, स कथं तमतिपत्याऽऽत्मानमासादयेदिति चेत् । एवं तर्हि शिंशपासामग्र्यन्तर्भूता चलनसामग्री, ततस्तामतिपत्य चलनादिरूपता भवन्ती स्वकारणमेवातिपतेत् । तथा शाखादिमद्विशेषानुबन्धी शिंशपाव्यवहारस्तद्विशेषानुबन्धी च चलनव्यवहारः । स कथं तमतिपत्यात्मानमासादयेदिति । तुल्यम् । नोदनाद्यागन्तुकनिबन्धनं चलत्वम्, न तु तद्विशेषमात्राधीनमिति चेत् । यदि नोदनादयः स्वभावभूतास्ततस्तद्विशेषा एव, अथास्वभावभूतास्ततः सहकारिण एव, ततस्तानासाद्य निर्विशेषैव शिंशपा चलनस्वभावानारभते इति, तथा च कुतः क्षणिकत्वसिद्धिः ? स्वभावभूता एवागन्तुकसहकार्यनुप्रवेशाद् भवन्तीति चेत् । एवं तर्हि वृक्षसामग्र्यामागन्तुकसहकार्यनुप्रवेशादेव शिंशपाऽपि जायते इति न कश्चिद्विशेषः । एवमेतत्, किन्तु शिंशपाजनकास्तरुसामग्रीमुपादायैव, चलनजनकास्तु न तामेव किन्तु मूर्तमात्रम्, तथा दर्शनादिति चेत् । मैवम् । कम्पजनकाः शिंशपाजनकविशेषा अपि सन्तस्तानतिपतन्ति, न तु वृक्षजनकविशेषाः शिंशपाजनकास्तानिति नियामकाभावात् । शिंशपाजनकास्तद्विशेषा एव कम्पकारिणस्तु न तथा, किन्त्वागन्तवः सहकारिण इति चेत् । एवं तर्हि तानासाद्य सदृशरूपा अपि केचित् कम्पकारिणोऽनासादितसहकारिणस्तु न तथा, तथा च तद्वा तादृग्वेति न कश्चिद् विशेषः स्यात् । तस्माद् विरुद्धयोरसमावेश एव, समाविष्टयोश्च परापरभाव एव । अनेवम्भूतानां द्रव्यगुणकर्मादिभावेन उपाधित्वमात्रम् । तेषां तु विरुद्धानां न समावेशो व्यक्तिभेदात् । जातीनां च भिन्नाश्रयत्वात् । तथा च कुतः क्षणिकत्वम् ? वैजात्याभ्युपगमे च कुतोऽनुमानवार्ता ? मा भूदनुमानमिति चेत्, न । तेन हि विना न तत् सिद्ध्येत् । न हि क्षणिकत्वे प्रत्यक्षमस्ति । तथा निश्चयाभावात्, गृहीतनिश्चित एवार्थे तस्य प्रामाण्यात्, अन्यथाऽतिप्रसङ्गात् ।**

36. ननु मा भूदनुपलब्धिर्बाधिका तर्कस्तु भविष्यति भवत्पक्ष इत्याशयवान् शङ्कते - **न वे(नन्वि)**ति। तद्बाधकमन्यादृशमित्यर्थः । एतदेव दर्शयति - **तथा हीति** । शिंशपया वृक्षे साध्ये वृक्षं विनाऽपि भविष्यतीति शङ्कापनोदकबाधकमुक्त्वा वृक्षव्यवहारे साध्ये वृक्षव्यवहाराभावेऽपि शिंशपाव्यवहारो भविष्यतीति शङ्काप्रोत्सारकं बाधकमाह - **एवमिति** । तदेवं बाधकं यथा — दृष्टं कम्प-शिंशपयोरपि समानि(मि)त्याशयवानाह — **एवं तर्हीति** । न शिंशपासामग्र्यन्तर्भूता चलनादिसामग्री येन तद्विरहे न स्यात् । किं तर्हि ? तद्व्यतिरिक्तैवेत्याशयवान् परिहारमाह - **नोदनेति** । एवं ब्रुवाणः परः प्रत्यवतिष्ठते — नोदनादयो हि कम्पशिंशपाविशेषास्तद्विशेषजनका वा सदृशरूपेषूपादानकारणेषु सत्सु संभूयकार्यकारिणो वा ? न तावत् प्रथमद्वितीयावित्याह - **यदीति** । तथा च तथाभूतानामेव [शिंशपाव्यभिचारे] शिंशपापि वृक्षं व्यभिचरेदिति भावः । तृतीयमाशङ्क्यनिराचष्टे — **अथान्यस्वभावेति** । भावस्य सत्त्वैकस्वभावत्वेऽपि कार्यकारणयोः सहकारि[लाभा]लाभप्रयुक्तत्वात् सामर्थ्या-

सामर्थ्यविरुद्धधर्मसंसर्गात् सिद्धौ सत्त्वस्यागृहीतव्याप्तिगृहीतव्याप्तिकत्वान्न ततः क्षणिकत्वं सेत्स्यतीत्याशयेनोपसंहरति – **तथा चे**ति । परमनेकविधयुक्तिमर्मभेदिशरप्रहारविनाशितक्षणिकत्वास्थितौ पुनरुज्जीवनप्रत्याशया यथाकथञ्चनाशङ्कते – **स्वभावभूता** इति । योऽयं स उपसर्पणकारणवशान्नोदनादिलक्षणो[38B]ऽतिशयो नासौ तादृशाना(नां) पूर्वमाशी(सी)द् येन स्थिरपक्षसमानतया प्रागपि प्रसह्य का(क)रणमापद्येताकरणे वा सहकारिविरहप्रयोजक(के) वेति शङ्कार्थः । यथा शिंशपास्वभावभूता आगन्तुकसहकार्यनुप्रवेशान्नोदनादयो जायमानाः शिंशपापरिहारेणान्यत्रापि जायते तथा वृक्षस्वभावभूता शिंशपाप्यागन्तुकसहकारिवशेन संजायमानाऽन्यत्रापि संजायेतेति गूढाभिसन्धिर्गूढजिह्मिकयाऽनुकूलवदाह- **एवं तर्ही**ति । अभिसन्धिमविद्वान् आह – **एवमेतदि**ति । विशेषमनोरथेनाह – **किन्त्वि**ति । **न तामेवे**ति शिंशपासामग्रीमेवेत्यर्थः । अभिसन्धिमुद्घाटयति – **कम्पजनका** इति । शिंशपाजनकानां कारणानां विशेषाः कम्पजनकाः । **तानि**ति शिंशपाजनकानिति । ननु वृक्षजनकविशेषा इति । वृक्षजनकानां कारणानां विशेषा ये शिंशपाजनकास्ते, तानिति वृक्षजनकविशेषानिति । अतिपतन्तीत्यनुवर्तनीयम् । एवं निवारिताभिमानस्तत्त्वबुभुत्सया प्रामाणिकरूपोपादानेन प्रत्यवतिष्ठते – **शिंशपे**ति । **तद्विशेषा एवे**ति वृक्षजनकविशेषा एवेत्यर्थः । प्रामाणिकमार्गप्रवृत्तस्य प्रामाणिकमेवोत्तरं देयमित्याशयवानाह – **एवं तर्ही**ति । एतावत्प्रबन्धेन करणाकरणयोः सहकारिलाभालाभौ तत्र(न्त्र)मिति यत् प्रतिज्ञातं तत् समाहितं वेदितव्यम् । वैजात्यनिराकरणबीजं प्रकारान्तरेणोपक्रान्तमपि समर्थितमित्युपसंहरति – **तस्मादि**ति । ननु नीलमुत्पलं गच्छतीत्यादौ नीलत्वादेरेकव्यक्तिसमावेशदर्शनेन विरुद्धत्वा[द्] न च परापरभावसम्भवः । नीलत्वस्य परत्वे रक्ते उत्पलत्वं न स्यादुत्पलत्वस्य चापरत्वे तत्परिहारेण उत्पले नीलत्वं न स्यात् तत् कथमेवा[यं] नियम इत्यत आह – **अनेवमि**ति । येषां न विरोधे(धो) न च परापरभावस्त अनेवम्भूतास्तेषां द्रव्यमुत्पलो गुणो नीलः कर्म गच्छतीति स्वरूपेणोपाधित्वमात्रं न सामान्यरूपतयेत्यर्थः । नीलगुणयोगान्नीलमुत्पलं न तु नीलत्वयोगात्, एवं द्रव्यसम्बन्धान्नीलं द्रव्यं न तु द्रव्यत्वसम्बन्धात्, एवं गतियोगाद् गच्छतीति न तु गतित्वयोगादित्यर्थः । तर्हि नीलत्वादिजातेः कथमत्र व्यवस्थेत्यत आह – **तेषां त्वि**ति । [39A] तेषां सामान्यानां विरुद्धानां गोत्वाश्वत्वादिवन्न समावेशः एकत्र । कुतः ? व्यक्तिभेदात् । व्यञ्जकभेदादाश्रयभेदादित्यर्थः । एतदेव विशदयति – **जातीनां चे**ति । द्रव्यगुणकर्मव्यक्तिगतत्वेन नीलत्वादिजातीनां नैकाधिकरणत्वमस्तीत्यर्थः । प्रमाणाभावेन परापरभावानुपपत्त्या च वैजात्यासत्त्वे सत्याह – **तथा चे**ति । अप्रमाणकवैजात्यस्वीकारमाशङ्क्य व्युत्पादितानुमानभङ्गमाह – **वैजात्ये**ति । अनुमानाभावे न क्षणिकत्वसिद्धिरिति व्याख्या[यां] तृतीयपादस्य शङ्कोत्तराभ्यामाह – **मा भूदि**ति । चतुर्थपादं व्याख्यातुमुपक्रमते – **न ही**ति । नीलमेतदिति वत् क्षणिकमेतदिति निश्चयाभावादित्यर्थः । मा भून्निश्चयस्तथाप्यध्यक्षं भविष्यति । तत एव प्रकृतसिद्धेरित्यत आह – **गृहीते**ति । **तस्ये**ति निर्विकल्पकस्य प्रामाण्याभ्युपगमादित्यर्थः । तथानभ्युपगमे बाधकमाह – **अन्यथे**ति ।

37. **ननु वर्तमानः क्षणोऽध्यक्षगोचरः । न चासौ पूर्वापरवर्तमानक्षणात्मा । ततो वर्तमानत्वनिश्चय एव भेदनिश्चय इति चेत् । किमत्र तदभिमतमायुष्मतः ? यदि धर्म्येव नीलादिर्न किञ्चिदनुपपन्नम् । तस्य स्थैर्यास्थैर्यसाधारण्यात् । अथ धर्मः । तद्भेदनिश्चयेऽपि धर्मिणः किमायातम् ? तस्य ततोऽन्यत्वात् । वर्तमानावर्तमानत्वमेकस्य विरुद्धमिति चेत् । यदि सदसत्त्वं तत्, तन्न । अनभ्युपगमात् । ताद्रूप्येणैव प्रत्यभिज्ञानात् । सदसत्सम्बन्धश्चेत्, किमसङ्गतम् ? ज्ञानवत् तदुपपत्तेः । क्रमेणानेकसम्बन्ध एकस्यानुपपन्न इति चेत् । न । उपसर्पणप्रत्ययक्रमेणैव तस्याप्युपपत्तेः । प्रत्यभिज्ञानमप्रमाणमिति चेत् । अस्ति**

तावदतो निरूपणीयम्, क्षणप्रत्ययस्तु भ्रान्तोऽपि नास्तीति विशेषः ॥१६॥

स्यादेतत् । मा भूद् अध्यक्षमनुमानं वा क्षणिकत्वे, तथापि सन्देहोऽस्तु । एतावताऽपि सिद्धं समीहितं चार्वाकस्येति चेत् । उच्यते –

स्थैर्यदृष्ट्योर्न सन्देहो न प्रामाण्ये विरोधतः ।
एकतानिश्चयो येन क्षणे तेन स्थिरे मतः ॥१७॥

न हि स्थिरे तद्दर्शने वा स्वरसवाही सन्देहः । प्रत्यभिज्ञानस्य दुरपह्नवत्वात् । नापि तत्प्रामाण्ये, स हि न तावत् सार्वत्रिको व्याघातात् । तथाहि । प्रामाण्यासिद्धौ सन्देहोऽपि न सिद्ध्येत्, तत्सिद्धौ वा तदपि सिद्ध्येत् । निश्चयस्य तदधीनत्वात् । कोटिद्वयस्य चादृष्टस्यानुपस्थाने कः सन्देहार्थः ? तद्दर्शने च कथं सर्वथा तदसिद्धिः ? एतेनाप्रामाणिकस्तद्व्यवहार इति निरस्तम् । सर्वथा प्रामाण्यासिद्धौ तस्याप्यसिद्धेः । प्रकृते प्रामाण्यसन्देहो लूनपुनर्जातकेशादौ व्यभिचारदर्शनादिति चेत् । न एकत्वनिश्चयस्य त्वयाऽपीष्टत्वात् । अनिष्टौ वा न किञ्चित् सिद्ध्येत् । सिद्ध्यतु यत्र विरुद्धधर्मविरह इति चेत्, तेनैव स्थिरत्वमपि निश्चीयते । स इह सन्दिह्यत इति चेत्, तुल्यमेतत् क्वचिन्निश्चयोऽपि कथञ्चिदिति चेत्, समः समाधिः ॥१७॥

नन्वेतत् कारणत्वं यदि स्वभावो भावस्य नीलादिवत् तदा सर्वसाधारणं स्यात् । न हि नीलं किञ्चित् प्रत्यनीलम् । अथौपाधिकं, तदा उपाधेरपि स्वाभाविकत्वे तथात्वप्रसङ्गः । औपाधिकत्वे त्वनवस्था । अथासाधारणत्वमप्यस्य स्वभाव एव, तत उत्पत्तेरारभ्य कुर्यात्, स्थिरस्यैकस्वभावत्वादिति चेत् । उच्यते –

हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तु सत् ।
तद्युक्तं तत्र तच्छक्तमिति साधारणं न किम् ॥१८॥

37. ननु घटोऽयमिति अनुभवस्तावदस्ति, स च घटप्रतिधर्मिणमयमिति वर्तमानं धर्ममवगाहमानोऽनुभूयते, वर्तमानत्वनिश्चय एव क्षणिकत्वनिश्चयः, तथा चासङ्गतमुक्तमध्यक्षमित्यादीत्याशयवानाह – **नन्विति** । तदेतद् विकल्प्य निराकरोति - **यदीति** । पुनरप्याशङ्का(क्य) निराकरोति - **वर्तमानेति** । पुनराशङ्क्य निराकरोति - **क्रमेणेति** । **तादूप्येणेत्यादि** यदुक्तं तदाक्षिपति – **प्रत्यभिज्ञानमिति** । विरुद्धधर्मविरहविषयप्रत्यभिज्ञानस्य विशेषकत्वादित्यभिप्रायेण परिहरति - **अस्तीति** । निरूपणमुक्तमेवेति मन्तव्यमनिरूपितविशेषप्रत्यभिज्ञानवत् क्षणप्रत्ययोऽपि भविष्यतीत्यत आह - **क्षणप्रत्ययस्त्विति** । तदनेन प्रत्यभिज्ञानेन प्रत्यभिज्ञाप्रत्यक्षं स्थैर्यसाधक-मिति स्वपक्षे एमाणमुक्तमिति मन्तव्यम् । [39B] एवं बौद्धे पराजिते पुनश्चार्वाकः स्वप्रौढिमालम्ब्य क्षणिकत्वं-(त्व)संदेहेन स्वप[क्ष]सिद्धिं समीहमानः पराभिप्रायमबुध्यमानश्च शङ्कते - **स्यादेतदिति** । एतद् विकल्प्य पराभिमानमुन्मूलयति – **उच्यत** इति । तथाहि संदेहो भवन् स्थैर्ये वा तद्दर्शने वा प्रामाण्ये वा, तृतीयेऽपि प्रामाण्यमात्रे वा प्रत्यभिज्ञानप्रामाण्ये वा । तत्र न प्रथमद्वितीयावित्याह - **स्थैर्यदृष्ट्योर्नेति** । अत्र यद्यपि वादिविप्रतिपत्त्या आहार्यः संदेहोऽस्त्येव तथापि न स्व(स्वा)रसिकः स्थैर्यतद्दर्शनयोरेवोपलम्भादित्यभिप्रायः । न तृतीयः संदेहस्यैवानुपपत्तेरित्याह – **न प्रामाण्य** इति । चतुर्थे तूत्तरम् - **एकतेति** । येन विरुद्धधर्मसंसर्गविरहेण क्षणे तेन विरुद्धधर्मसंसर्गविरहेण स्थिरे एकतानिश्चयो मत इत्यर्थः । **न हीत्यादि समाधिरित्यन्तं** विवरणं

सुबोध[म्]। एवं व्युत्पादिते कारणतत्त्वे पुनर्दूषणदृष्टिरसंस्पृष्टतत्त्वः प्रकारान्तरेण कारणं निराचष्टे - **नन्विति**। स्वाभाविकत्वे नीलादिवत् सर्वसाधारणता प्रसज्यते। औपाधिकत्वे तूपाधि(धे)रपि [स्वाभाविका]स्वाभाविकत्वाभ्यां सर्वसाधारण्यानवस्थयोरन्यतरप्रसङ्गः। यथा कारणत्वं स्वाभाविकं तथा कञ्चित् प्रति सर्वमित्यपि स्वभाव इति शङ्कते – **अथेति**। एवंस्वभावत्वे सर्वदा कुर्यात् स्वभावस्येतरानपेक्षत्वादिति मनोरथेन परिहरति **तत** इति। यद्येपेतस्य(यद्यपि तस्य) कारणत्वं स्वाभाविकमसाधारणं च तथापि सहकारिविरहाविरहाभ्यां कारणकथम-(कारणत्वम)कारणत्वं च प्रमाणमशक्यापह्नवमिति। नोत्पत्तेरारभ्यैव कार्योत्पादकत्वमित्यभिप्रायेण परिहरति – **उच्यत** इति।

38. **सर्वसाधारणनीलादिवैधर्म्येण काल्पनिकत्वं कार्यकारणभावस्य व्युत्पादयता नीलादि पारमार्थिकमेवाभ्युपगन्तव्यम्। अन्यथा तद्वैधर्म्येण हेतुफलभावस्यापारमार्थिकत्वानुपपत्तेः। न च कार्यकारणभावस्यापारमार्थिकत्वे नीलादि पारमार्थिकं भवितुमर्हति, नित्यत्वप्रसङ्गात्। तस्मादस्य पारमार्थिकत्वेऽपरमपि तथा, न वोभयमपीति। कथमेकमनेकं परस्परविरुद्धं कार्यं कुर्यात्, तत्स्वभावत्वादिति यदि, तदोत्पतेरारभ्य कुर्यादविशेषादित्यपि न युक्तम्। तत्तत्सहकारिसाचिव्ये तत्तत् कार्यं करोतीति स्वभावव्यवस्थापनात्। इदं च साधारणमेव, सर्वैरेव तथोपलम्भात्। न हि नीलादेरप्यन्यत् साधारण्यमिति ॥१८॥**

स्यादेतत्। अस्तु स्थिरम्, तथापि नित्यविभोर्न कारणत्वमुपपद्यते। तथा ह्यन्वयव्यतिरेकाभ्यां कारणत्वमवधार्यते, नान्वयमात्रेण। अतिप्रसङ्गात्। न च नित्यविभूनां व्यतिरेकसम्भवः। न च सोपाधेरसावस्त्येवेति साम्प्रतम्, तथाभूतस्योपाधिसम्बन्धेऽप्यनधिकारात्। जनितो हि तेन स तस्य स्यात्, नित्यो वा ? न प्रथमः, पूर्ववत्। नापि द्वितीयः पूर्ववदेव। तथापि चोपाधेरेव व्यतिरेको न तस्य, अविशेषात्। तद्वत इति चेत्। न। स चोपाधिश्चेत्यतोऽन्यस्यातद्वत्पदार्थस्याभावात्, भावे वा, स एव कारणं स्यात्।

अत्रोच्यते –

पूर्वभावो हि हेतुत्वं मीयते येन केनचित्।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि ॥१९॥

38. हेतुरु(रू)पशक्तिमनङ्गीकृत्य [न] नीलादि परमार्थसत्। तदपि हि कस्यचित् कार्यं कस्यचित् कारणमित्येवं प्रतीयते न [40A] त्वन्यथेति सर्वज्ञ(ज्ञा)नसिद्धं तत्त्वेन तथात्वेनाबाधितम्। सिद्धः कार्यकारण-भावः। साधितं चेद् वैदर्म्यदृष्टान्तानिश्चयात् कथमस्य पक्षः सिद्ध्येत। न च नीलादि मि(नि)त्यं तन्त(ल्ल)-क्षणविरहादिति पूर्वार्धविवेचनम्। उत्तरार्धविवेचनं तु तत्सहकारियुक्तं कारणं **तत्र** कार्ये समुत्पादयितव्ये **शक्तं** निर्वर्तकम्। सर्वैरेव तथा प्रतीयत इति साधारणमेव। नीलादेरपि साधारण्यमिदमेव यत् सर्वैरिन्द्रियसन्नि-कर्षादिमद्भिर्नीलादित्वेन प्रतीयमानत्वम्, न त्वन्यत्। न हि तदपि सर्वस्य हेतुरिति तवापि सम्मतमिति। **तस्मादस्येति** नीलादेरित्यर्थः। **अपरमपि** कार्यकारणरूपत्वमपि। **तथा** पारमार्थिकमित्यर्थः। **न वोभयमपीति**। पारमार्थिकमित्यर्थः। न त्वेतावतापि कारणत्वावधारणोपायान्वयव्यतिरेकयोरात्मादावसंभवेता(संभवाद् आ)त्मादेर्न कारणत्वनिश्चयः, तदनिश्चये च कथं तथाव्यवहारस्तत्रेत्याशयवानाशङ्कते – **स्यादेतदिति**। न त्वन्वय-

व्यतिरेकोऽपि भविष्यत्यात्मादेरित्यत आह – **न चे**ति । नित्यत्वेन कालतो विभुत्वेन च देशतो व्यतिरेको नास्तीत्यर्थः । ननु यद्यपि केवलस्य न व्यतिरेकस्तथाप्युपहितस्यासौ भविष्यतीत्याशङ्क्य परिहरति - **सोपाधेरसावि**ति । **असावि**ति व्यतिरेक इत्यर्थः । **अनधिकारा**दित्ययोग्यत्वादित्यर्थः । अनधिकारमेव विकल्प्य बोधयति - **जनितो हीति** । द्वितीयेऽपि व्यापको[ऽव्यापको] वेति मन्तव्यम् । प्रथमे दोषमाह - **पूर्ववदि**ति । उपाधिजननं प्रति व्यतिरेकविरहस्तुल्य इत्यर्थः । द्वितीयस्य प्रथमे दोषमाह - **पूर्ववदेवे**ति । नित्योपाधिर्यदि व्यापकत्वं तदा पूर्ववद् व्यतिरेकविरह इत्यर्थः । अव्यापकपक्षे दोषमाह - **तथापि चे**ति । शङ्कते – **तद्वत** इति । एतदपि [40B] विकल्प्य निराकरोति – **ने**ति । नान्वयव्यतिरेकौ कारणत्वं तावावे(तावेव) वा तन्निश्चयो येन नाकाशादेः कारणत्वं, किं तर्हि ? अन्यदेव कारणत्वम् । तत्रास्ति प्रकृत इत्यभिप्रायेण सिद्धान्तमुपक्रमते – **अत्रोच्यत** इत्यादि । 'हि'शब्देन नियतत्वं दर्शयति । **मीयते** निश्चीयते । **येन केनचिदिति** न त्वन्वयव्यतिरेकाभ्यामेवेति तात्पर्यम् । कारणत्वं व्युत्पाद्य प्रकृतेऽपि तदस्तीत्यत आह – **व्यापकस्यापी**ति । **हेतुत्वमि**ति समन्वयः । कथं तन्निश्चेयमित्युपायान्तरमाह - **धर्मिधी**रिति ।

39. **भवेदेवं यद्यन्वयव्यतिरेकावेव कारणत्वम् । किन्तु कार्यान्नियतः पूर्वभावः । स च क्वचिदन्वयव्यतिरेकाभ्यामवसीयते, क्वचिद् धर्मिग्राहकात् प्रमाणात् । अन्यथा कार्यात् कारणानुमानं क्वापि न स्यात् । तेन तस्यानुविधानानुपलम्भात् । उपलम्भे वा कार्यलिङ्गानवकाशात्, प्रत्यक्षत एव तत्सिद्धेः । तज्जातीयानुविधानदर्शनात् सिद्धिरन्यत्रापि न वार्यते । तथापि वस्तुगत्यानुविहितान्वयव्यतिरेकमेव कार्यात् कारणं सिद्ध्येत्, अन्यत्र तथा दर्शनादिति चेत्, न । बाधेन सङ्कोचात् । विपक्षे बाधकाभावेन चाव्याप्तेः । दर्शनमात्रेण चोत्कर्षसमत्वात् । अस्य चेश्वरे विस्तरो वक्ष्यते । सर्वव्यापकानां सर्वान् प्रत्यन्वयमात्राविशेषे कारणत्वप्रसङ्गो बाधकमिति चेत् । न । अन्वयव्यतिरेकवज्जातीयतया विपक्षे बाधकेन च विशेषेऽनतिप्रसङ्गात् । तथा हि कार्यं समवायिकारणवद् दृष्टमित्यदृष्टाश्रयमपि तज्जातीयकारणकम्, आश्रयाभावे किं प्रत्यासन्नमसमवायिकारणं स्यात्, तदभावे निमित्तमपि किमुपकुर्यात्·? तथा चानुत्पत्तिः सततोत्पत्तिर्वा सर्वत्रोत्पत्तिर्वा स्यात् । एवमपि निमित्तस्य सामर्थ्यादेव नियतदेशोत्पादे स एव देशोऽवश्यापेक्षणीयः स्यात् । तथा च सामान्यतो देशसिद्धावितरपृथिव्यादिबाधे तदतिरिक्तसिद्धि को वारयेत् । एवमसमवायिनिमित्ते चोहनीये ॥१९॥**

इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो
मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता ।
देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात् साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम ॥२०॥

इति न्यायकुसुमाञ्जलौ प्रथमः स्तबकः ॥

39. आत्मादिग्राहकात् प्रमाणात्, अन्यथा तेषामेवाप्रतीतौ बुद्ध्यादिभिः कार्यैः समवायिकारणतयाऽऽत्मादयो गम्यन्ते, न त्वन्यथेति विवृणोति - **भवेदेवमि**ति । नियतपूर्वभावश्च सहकारिसाकल्यप्रयुक्तकार्यवत्त्वं सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वा । एतच्च सकलकारणसाधारणम् । न हि सहकारिसाकल्यवैकल्याभ्यां कार्य[साकल्य]वैकल्ये वेति क्वचिद् दृष्टमिष्टं वेति । उपायानियत[त्व]माह- **स चे**ति । एवमनभ्युपगमे

बाधकमाह - **अन्यथे**ति । **अन्यत्रापी**ति । बुद्ध्यादौ कारणतयाऽऽत्मादिरपि सिध्यतीत्यर्थः । अत्रापि समवायिकारणजातीयानुविधानस्य तुल्यत्वात् । **बाधकेने**ति । बाधकेन सङ्कोचादनुविहितान्वयव्यतिरेकमेव कारणमिति व्याप्तेरिति शेषः । अन्ययव्यतिरेकविकलस्यापि कारणत्वे न किञ्चिद् बाधकमिति न व्याप्तिरित्याह - **विपक्ष** इति । अनुविहितान्वयव्यतिरेकमेव कारणमिति विशेषव्याप्तेरभाव इत्यर्थः । यत् तूक्तमन्यत्र तथादर्शनादिति तत्राह - **दर्शनमात्रेण चे**ति । यथा 'शब्दोऽनित्यः कृतकत्वाद् घटवत्' इत्युक्ते यदि घटसाधर्म्यात् कृतकत्वादनित्यस्तत एव तर्हि [41A] रूपवानपि स्यादिति रूपवत्त्वमुत्कर्षयत उत्कर्षसम उत्तरं जातिरित्यर्थः । ननु **'बाधकाभावेन चाव्य(व्या)प्तेः'** इत्ययुक्तमुक्तं बाधकस्य सत्त्वादित्याशङ्कते - **सर्वे**ति । अन्वयमात्रेण कारणत्वे सर्वकार्यं प्रति कारणत्वप्रसङ्गोऽन्वयमात्रस्याविशिष्टत्वादिति । नान्वयमात्रेण कारणत्वमात्मादेर्येनोक्तदोषः । किन्त्वन्वयव्यतिरेकवज्जातीयत्वेनान्यस्य समवायित्वबाधितस्याकारणत्वे ज्ञानादिकार्यानुत्पत्तिप्रसंगवशेन च विशेष(षे)त्काति(ऽनति)प्रसंग इत्यत आह - **नान्वये**ति । रूपादिकार्यं प्रति घटाद्यन्वयव्यतिरेकवद् दृष्टम्, तज्जातीयश्चात्मा ज्ञानसुखादिकं प्रति समवायिकारणजातीय इति यावत् । अथवा अन्वयव्यतिरेकवति [कारणे] सहकारिवैधुर्या[वैधुर्या]भ्यां [कार्यकरणा]करणे दृष्टे । तद्वत्त्वं वाऽन्वयव्यतिरेकवज्जातीयत्वमभिमतम्, न वै तदन्यत्र नातिप्रसङ्ग इति । अन्वयव्यतिरेकवज्जातीयत्वं बाधकं वेत्युभयं विवृणोति - **तथाही**ति । ननु निमित्तवशादेव कार्यनिष्पत्तिर्भविष्यति कृतं समवायिनेत्याशङ्क्य परिहरति — **एवमपी**ति । नियतो देशो दिश्यतेऽस्मिन्निति व्युत्पत्त्या आधार एवेति । नन्वेतावता समवायिकारणं सिध्यतु आत्मा तु कुतस्त्य इत्यत आह — **तथा च सामान्यत** इति । 'इच्छादयः पृथिव्याद्याश्रिता न भवन्ति, मानसप्रत्यक्षत्वात्, ये तु तदाश्रिता न ते मानसप्रत्यक्षा, यथा रूपादयः' इत्यनेन पृथिव्याद्याश्रितत्वं बाधितम्, सामान्यतोदृष्टानुमानपूर्वककेवलव्यतिरेकानुमानादष्टद्रव्यातिरिक्तं द्रव्यं सिद्धम्, न कोऽपि बाधयेदित्यर्थः । तथा च प्रयोगः - इच्छादयोऽष्टद्रव्यातिरिक्तद्रव्याश्रिताः, अष्टद्रव्यावृत्तित्वे सति कार्यत्वाद् गुणत्वाद् वा, न यदेवं न तदेवं यथा रूपमिति । **एवमसमवायिनी**ति [41B] । ऊहनीयं बाधकमित्यर्थः । यथा समवायिकारणत्वे तन्नित्यत्वे च सततोत्पादप्रसङ्गः । तथाऽसमवायिकारणत्वे इन्द्रियार्थसन्निकर्षं विनापि आत्ममनःसन्निकर्षाद् ज्ञानोत्पत्तिप्रसङ्गः । निमित्तमात्रादुत्पत्तौ आत्ममनःसन्निकर्षं विनापीन्द्रियार्थसन्निकर्षादुत्पत्तिप्रसङ्ग इति । एव[म]समवायि निमित्तं चेति पाठे तद्बाधक[व]शात्तसमवायिकारण(णं) निमित्तकारणं चोहनीयमित्यर्थः । यद्यपि दृष्टमपि कारणं समर्थितमनेकप्रकारं तथापि स्वर्गापवर्गहेतुभूतमिति प्रधानतया अदृष्टम् । परिच्छेदार्थमुपसंहरन् 'परमात्मा मे मनसि स्थिरो भवतु' इति प्रार्थयमान आह — **इत्येषे**ति । **असमा** विचित्रा **मायेति** माध्यमिकैः । **प्रकृतिरि**ति साङ्ख्यैः । **अविद्ये**ति वेदान्तिभिरुक्ता । शेषं सुबोधमिति ॥

श्रीवामेश्वरध्वजविरचिते कुसुमाञ्जलिनिबन्धे प्रथमः परिच्छेदः समाप्तः ।

★

द्वितीयः स्तबकः

॥ ॐ नमः शिवाय ॥

40. **तदेवं सामान्यतः सिद्धेऽलौकिके हेतौ तत्साधनेनावश्यं भवितव्यम् । न च तच्छक्यमस्मदादिभिर्द्रष्टुम् । न चादृष्टेन व्यवहारः । ततो लोकोत्तरः सर्वानुभावी सम्भाव्यते । ननु नित्यनिर्दोषवेदद्वारको योगकर्मसिद्धसर्वज्ञद्वारको वा धर्मसम्प्रदायः स्यात्, किं परमेश्वरकल्पनयेति चेत् । अत्रोच्यते –**

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात् ।
तदन्यस्मिन्ननाश्वासान्न विधान्तरसम्भवः ॥१॥

40. मिथ्याज्ञानतमिस्रमुद्रितदृशः संसारदुःखाकुलान्
लोकान् दर्शयितुं सुमार्गमभितो न्यायागमैर्व्यञ्जितम् ।
श्रीवामध्वजनामधेयमुनिना विद्यावतामर्चिता
टीकेयं कुसुमाञ्जलेर्विरचिता चेतश्चमत्कारिणी ॥१॥
वामध्वजेन रचिता जगतां हिताय
न्यायप्रबन्धकुसुमाञ्जलिसञ्ज्ञकस्य ।
श्रीशैलराशिरुपमन्युहिताय चारु-
टीकां लिलेख परमार्द्रमना सुमैत्र्या ॥२॥

आप्तोक्तत्वकृतत्वलक्षणपदद्वन्द्वे यदीयेऽन्यथा-
सिद्ध्यादीनभिधाय कार्यनिवये(हे) हत्वापि तत्कर्तृताम् ।
मीमांसामतमाश्रिता अपि सदा यस्य प्रकारान्तरै-
स्त(स्तै)स्तैः कुर्युरुपास्ति[रेव] निखिलव्यक्तिं तमीशं नुमः ॥

[42A] प्रथमविप्रतिपत्तिं निराकृत्य विस्तरतो निराकार्यद्वितीयविप्रतिपत्तिमुत्थापयितुं भूमिरचनां करोति - **तदेवमि**ति । नन्वस्मदादिभिरेवैतद् दृष्टं भविष्यतीत्यत आह - **न चे**ति । अतीन्द्रियत्वेन साक्षाद् द्रष्टुमशक्यमित्यर्थः । मा भूद् दर्शनं तस्य किं नो बाध्यत इत्याह - **न चे**ति । व्यवहार एवंभूतस्य फलस्यैवंभूतं साधनमित्येवमाकारः । अदृष्टस्याचेतनत्वे न चेतनसाक्षात्कारत्(रः) ज्ञानमन्तरेण चेतनाधिष्ठानरूपं चेति । तस्माल्लोकोत्तर अस्मदादिविलक्षणः सर्वानुभावी समस्तवस्तुसाक्षात्कारवान् संभाव्यते । साध्य-साधनभावोपदेष्ट(ष्टृ)त्वेन परमाण्वाद्यचेतनकारणानामधिष्ठानत्वेन चैतदुभयम् । न तथाविधपुरुषमन्तरेणान्यथा संभवतीति पूर्वोक्तविप्रतिपत्तिविवरणव्याजेनाह - **नन्वि**ति । नित्यनिर्दोषचोदनसाध्यसाधनभावप्रतिपादनात् पुरुषदोषानां(णां) तदसंभवेनासंभवात् प्रामाण्यस्य

स्वतस्त्वान्नोपदेशसिद्धिरिति तात्पर्यम् । उपलक्षणं चैतद् **धर्मसम्प्रदाय** इति । तृणादिकाय(र्य)सम्प्रदायोऽप्यस्मदादिभिरेवादृष्टद्वारा शक्यसम्पादन इत्यपि द्रष्टव्या(व्यम्) । नित्यनिर्दोषवेदद्वारक इत्युपलक्षण[म्] अस्मदाद्यदृष्टद्वारक इत्यपि मन्तव्यम् । अनित्यत्वेऽपि वेदानां नेश्वरपूर्वकत्वं । किं तर्हि । तदितरानित्यसर्वज्ञपूर्वकत्वमिति सर्वं सुस्थमित्याशयवान् पक्षान्तरमाह - **योगे**ति । योगेन । योगश्चित्तवृत्तिनिरोधः, तत्कर्मभिरहिंसादिभिर्यमैः, शौच-सन्तोष-तपः-स्वाध्यायादिभिर्नियमैर्ये सिद्धाः सर्वज्ञास्तत्त्वोपदेष्टारः कर्तारश्चेत्यर्थः । भेवेदेवं यदि स्वतः प्रामाण्यम् अचेतनानां स्वतः प्रवृत्तिश्च स्यात्, नोभयमित्याशयवान् सिद्धान्तमाह - **अत्रोच्यत** इति । **प्रमाया** इत्यस्मदादिप्रमाया इत्यर्थः । प्रमायाः सामान्येन [42B] पारतन्त्र्यप्रतिपादनेनाक्षजप्रमाया अपि पारतन्त्र्यं सिद्धं भवति इति मत्वे(त्वा) स्थानेन प्रमात्वस्य पारतन्त्र्यमुपक्रान्तं वेदिव्यम् । अन्यथा प्रत्यक्षादिप्रमायाः पारतन्त्र्यव्युत्पादनमत्र कृतोपयोगि स्यात् । नन्वस्मिदादिप्रत्यक्षप्रमायाः पारतन्त्र्येऽपि नेश्वरसिद्धिस्तदन्तरेणैवादुष्टचक्षुरादिजन्यत्वात् । प्रवृत्तिसामर्थ्यादिना च ज्ञाये(य)मानत्वात् । वात्य(क्य)जप्रमायाः पुनर्वक्तृयथार्थज्ञानाद्धां(ज्ञा)नोत्पत्तिकत्वादाप्तप्रणीतवाक्यजत्वेन ज्ञायमानत्वाद् चेतनपुरुषसंभवेनेश्वरसिद्धिरिति प्रकृतत्वादिति । अथवा प्रमायाः वेदवात्म(क्य)जप्रमायाः परतन्त्रत्वं पराधीनत्वं लौकिकवात्म(क्य)जप्रमावदिति [बोद्]धव्यं । उपलक्षणं चैतत् **प्रमाया** इति । तृणादिकार्यस्यापि परतन्त्रकर्तृत्वं धात(तृ)त्वनि(मि)त्यपि बोद्धव्यम् । न चास्मदादीनां क्षित्यादिकर्तृत्वं संभवति । उपाददाननाशविज्ञत्वेऽपि प्रकृतकार्योपादाना[न]भिज्ञत्वमिति कर्तृविशेषसिद्धिरिति । ननु परतः प्रामाण्येऽपि वेदानां नित्यत्वेऽपि कर्त्रभावेऽपि न(म)हाजनपरिग्रहात् प्रामाण्यमवधार्यम्, तदुपदिष्टेष्टापूर्तसाधने प्रचुरतरवित्तव्ययायाससाध्येऽपि प्रेक्षावत्प्रवृत्तिरुपपद्यत इति परमा[त्म]नोऽभव्यमुन्मूलयन्नाह — **सर्गे**ति । उत्पत्तिविनाशसंभवाद् वेदस्य महाजनानां च, तथा च कस्य केन परिग्रह इत्यर्थः । ननु पौरुषेयत्वेऽपि वेदानामनित्यसर्वज्ञपुरुषपूर्वकत्वमस्तु, तथा च नेश्वरसिद्धिरिति हृदि निधायाह - **तदन्यस्मिन्नि**ति । ततो महेश्वरादन्यस्मिननित्यसर्वज्ञ इत्यर्थः । न च बहुवित्तव्यया[या]ससाध्यामुष्मिकैकफलज्योतिष्टोमादिषु प्रेक्षावतः प्रवर्तन्त इति युक्तम् । **अनाश्वासात्** । अनाश्वासश्च [43A] तेषामनित्यचेतनादित्वेन दृष्टनिखिलानादिविविधसाधनवशतया विपर्यासविप्रलिप्साशङ्काकलङ्कितत्वेनाप्तत्वानिश्चयादिति । क्षित्यादिकार्यस्याप्युत्पादनाशसंभवादन्येन कर्तुमशक्यत्वाच्च न विधातुः प्रकृतवेदकार्यकर्तुर्महेश्वरस्यासंभव इत्यर्थः ।

41. **तथाहि । प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वे सति तद्विशेषत्वात् अप्रमावत् । यदि च तावन्मात्राधीना भवेदप्रमापि प्रमैव भवेत् । अस्ति हि तत्र ज्ञानहेतुः । अन्यथा ज्ञानमपि सा न स्यात् । ज्ञानत्वेऽप्यतिरिक्तदोषानुप्रवेशादप्रमेति चेत् । एवं तर्हि दोषाभावमधिकमासाद्य प्रमापि जायेत नियमेन तदपेक्षणात् ; अस्तु दोषाभावोऽधिको, भावस्तु नेष्यते इति चेत् । भवेदप्येवम्, यदि नियमेन दोषैर्भाव्यरूपैरेव भवितव्यम्, न त्वेवम् । विशेषादर्शनादेरभावस्यापि दोषत्वात् । कथमन्यथा ततः संशयविपर्ययौ । ततस्तदभावो भाव एवेति कथं स नेष्यते ।**

41. संग्रहवाक्यं विवृण्वन् विप्रतिपन्नं प्रति प्रमाणतः परतः प्रामाण्यं साधयति — **तथाही**ति । **प्रमे**ति धर्मनिर्देशः, स्वतस्त्वपरतस्त्वविवादाध्यासिता प्रमा धर्मित्वेन इष्टव्या तेन नाश्रयासिद्धिः । प्रसिद्धसिसाधयिषितधर्मप्रदर्शनेनाप्रसिद्धविशेषणत्वमपाकरोति — **ज्ञाने**ति । हेत्वधीनत्वे ज्ञानहेत्वधीनत्वे च साध्ये सिद्धसाधनं स्यादतो ज्ञानहेत्वतिरिक्तहेत्वधीनेति साध्ये अतिरिक्तस्यावर्जनीयतया अन्यप्रयुक्ततया वा सनि(न्नि)धिर्न हेतुतयेति

पुनरपि सिद्धसाधनतापनोदार्थ**मतिरिक्तहेत्वधीने**ति । न चात्रापि सिद्धसाधनं विवादनिवृत्तिप्रसङ्गात् । न ह्येतद-तिरिक्तं परतस्त्वमाद्रियामहे । न च ज्ञानहेत्वतिरिक्तहेत्वधीनत्वे घटादिवदज्ञानत्वप्रसङ्गपुरस्कृतज्ञानत्वानुमितज्ञानहेतौ तदतिरिक्तहेतुत्वं बाधितमिति वाच्यम् । ज्ञानहेत्वनुवृत्तावेवातिरिक्तहेतुप्रवेशे प्रमोत्पद्यत इति साध्यस्य विवक्षितत्वान्न तु तद्व्यावृत्तौ येन बाधकावकाशः । ननु किं ज्ञानशब्देन प्रमा विवक्षिता अप्रमा वा ज्ञानमात्रं वा ? नान्तिमः । प्रमा-अप्रमाव्यतिरिक्तज्ञानानभ्युपगमेन तद्धेतोरनिरूपितंणात(रनिरूपणात्) । न प्रथमो बाधात् । न हि प्रमा प्रमारूपज्ञानहेत्वतिरिक्तहेत्वधीनेति नैयायिकानामभ्युपगमः । प्रमा हि प्रमाहेत्वधीना न तदतिरिक्तहेत्वधीनेति सर्वजनसिद्धम् । [43B] न द्वितीयो बाधात् सिद्धसाधनाच्च । अप्रमाहेत्वनुवृत्तौ तदतिरिक्तानुप्रवेशस्यासंभावित-त्वेन बाधात्, संभवे चात्र प्रमाविशेषः प्रमाणः स्यात् । ज्ञानाज्ञानहेत्वनुवृत्तादिनातिरिक्तहेत्वनुप्रवेशाद् ज्ञानविशेष-वदिति । न चैवमेवास्तीति वाच्यम् । तस्याः सत्यप्रमापरिहारेण प्रमा न भवेत् । अन्यथा ज्ञानपरिहारेणापि प्रमा स्यात् । न चेदं दृष्टमिष्टं वेति । अप्रमाहेतुनिवृत्तौ तु तदतिरिक्तदोषाभावाभ्युपगमात् सिद्धसाधनम् । मैवं ज्ञानशब्देन न प्रमा अप्रमा वा विवक्षिता येन तत्पक्षदोषावकाशः । किं नु ज्ञानमात्रण् ? ननु तदपि नास्तीयुक्तम् । मैवमस्ति तावदुभयाभिमतज्ञानत्वाभिव्यञ्जकत्वाभावकार्यप्रवणव्यक्तिस्तयोनि(र्नि)यमान्न कारणमपि सामान्यतो निरूपितमस्ति तदपेक्षयैव विवादः । अन्यथा विवादस्याप्यनुपपत्तेः । सामान्यानभ्युपगमे च ज्ञा[न]विशेषः प्रमा अप्रमा वेति सामान्यविशेषभावानुपपत्तेः । न हि वृक्षानभ्युपगमे वृक्षशिंशपयोः सामान्यविशेषभावो लोके इत्याशयेनोक्तम् - **ज्ञानहेत्वि**ति । धर्मिसाध्यधर्मयुक्ता वाकाङ्क्षा । क्रमेण साधनधर्ममाह - **कार्यत्व** इति । ननु तद्विशेषो ज्ञानविशेषः । अत्र किम् ? ज्ञानं च विशेषः च ? अथ ज्ञानस्य विशेषः ? द्वितीयेऽपि किं ज्ञानत्वस्याज्ञानत्वस्य वा ? तत्र प्रथमेऽनैकान्तः, ज्ञानस्य ज्ञानहेत्वतिरिक्तहेतुजन्यत्वस्वीकारात् । द्वितीयेऽप्येवमेव । तृतीये तु किं प्रमात्वं वा उभयवर्तमानोऽन्यो वा ? नाद्यः, असाधारणत्वात् । न द्वितीयः, असिद्धेः । न तृतीयो ज्ञानत्वात् विशेषस्योभयगामिनो उपलब्धिबाधितत्वेनासिद्धेरिति । नानवबोधात् । [44A] ज्ञानव्यक्तिर्विशेषो ज्ञानत्वसामान्यापेक्षयाऽनुभवत्वं तदालीढत्वं ज्ञानविशेषत्वमिति नोक्तदोषावकाश इत्यर्थः । एवमपीश्वरज्ञानमुक्त-साधनधर्मवदिति तद् व्यवच्छदार्थं **कार्यत्वे सती**ति सर्वं सुस्थम् । एतेन प्रमा परतो ज्ञायते इत्यस्याप्ययमेवार्थ इति मन्तव्यम् । इदमेव परतस्त्वदृष्टान्तेऽप्युभयसिद्धमित्याशयवान् दृष्टान्तमाह – **अप्रमावदि**ति । ग्रन्थत्वाद् न्यूनत्वमदोषः, प्रयोगकाले च पञ्चावयववाक्यं विधेयम् । यत्तु स्मृत्यादिभिरनेकान्त इति व्युत्पादितं, कथमने-कान्तमिति न बुद्ध्यामहे । यदि स्मृतिज्ञा(र्ज्ञा)नमात्रहेतोरेवा(वो)त्पद्यते तदा विवेचितहेतोः स्मृतावभावान्न विपक्षसंसर्ग इति । अथ ज्ञानहेत्वतिरिक्तहेतुसंस्कारजन्या, तदापि सपक्षत्वाद् विवेचितहेतुत्वसंभवेऽपि नोक्तदोष इति परिभावनीयं रूचि(रि)भिरिति । तस्माग्नि(न्नि)रस्तसमस्तक्षुद्रोपद्रवसाधनं विवेचकानां चेतश्चमत्कारि । अविवेचकानां पुनरसत्प्रलांपा उपेक्षणीयाः । विपक्षे बाधकमाह – **यदि त्वि**ति । ज्ञानमात्रहेतुः प्रमाहेतुस्तदा ज्ञानवदप्रमा भवेत् प्रमेति बाधकम् । ज्ञानहेतुमात्रा(त्रा)धीनत्वेन प्रमात्वं व्याप्तं कथं तदभावे भवेत्, अतिरिक्त-संभवमात्रार्थभावादिति । नेदं बाधकम् । तथा च विपक्षे बाधकाभावात् प्रतिबन्धसिद्धिरिति मन्वानः शङ्कते – **ज्ञाने**ति । अनयैव रीत्या प्रमाऽपि परत इति मन्वानः परिहरति – **एवमि**ति । अप्रमाप्रमयोर्दोषतदभावानु-विधाननियमस्य तुल्यत्वात् विवेचनवैचित्र्यं क्वोपयुज्यत इत्यर्थः । एवं परतस्त्वे व्युत्पादितेऽपि यदि कश्चिदाह – [44B] ज्ञानहेत्वतिरिक्तो भावभूतो नास्तीति न परतस्त्वम्, तथारसिद्धसाधनेनमिति(तथाऽसिद्धसाधनमिति) तदा तं प्रति वक्तव्यम् – दोषातिरिक्तोऽधिको नेष्यत इति न परतस्त्वं प्रमाया आपा(आया)ति यद्यपि तथापि

वैयात्येन प्रत्यवतिष्ठते - **अस्त्विति** । वैयात्यमृजु मार्गेण निवारयति — **भवेदिति** ।

42. **स्यादेत् । शब्दे तावद् विप्रलिप्सादयो भावा एव दोषाः । ततस्तदभावे स्वत एव शाब्दी प्रमेति चेत्, न । अनुमानादौ लिङ्गविपर्यासादीनां भावानामपि दोषत्वे तदभावमात्रेण प्रमाऽनुत्पत्तेः । अन्यत्र यथा तथाऽस्तु, शब्दे तु विप्रलिप्साद्यभावे वक्तृगुणापेक्षा नास्तीति चेत्, न । गुणाभावे तदप्रामाण्यस्य वक्तृदोषापेक्षा नास्तीति विपर्ययस्यापि सुवचत्वात् । अप्रामाण्यं प्रति दोषाणामन्वयव्यतिरेकौ स्त इति चेत्, न । प्रामाण्यं प्रत्यपि गुणानां तयोः सत्त्वात् । पौरुषेयविषये इयमस्तु व्यवस्था, अपौरुषेये तु दोषनिवृत्त्यैव प्रामाण्यमिति चेत्, न । गुणनिवृत्त्याऽप्रामाण्यस्यापि सम्भवात् । तस्या अप्रामाण्यं प्रति सामर्थ्यं नोपलब्धमिति चेत् । दोषनिवृत्तेः प्रामाण्यं प्रति क्व सामर्थ्यमुपलब्धम् ? लोकवचसीति चेत् । तुल्यम् । तदप्रामाण्ये दोषा एव कारणम्, गुणनिवृत्तिस्त्ववर्जनीयसिद्धसन्निधिरिति चेत् । प्रामाण्यं प्रति गुणेष्वपि तुल्यमेतत् । गुणानां दोषोत्सारणप्रयुक्तः सन्निधिरिति चेत्, दोषाणामपि गुणोत्सारणप्रयुक्त इत्यस्तु । निःस्वभावत्वमेवमपौरुषेयस्य वेदस्य स्यादिति चेत्, आत्मानमुपालभस्व । तस्माद् यथा द्वेषरागाभावाविनाभावेऽपि रागद्वेषयोरनुविधाननियमात् प्रवृत्तिनिवृत्तिप्रयत्नयो रागद्वेषकारणकत्वम्, न तु निवृत्तिप्रयत्नो द्वेषहेतुकः, प्रवृत्तिप्रयत्नस्तु सत्यपि रागानुविधाने द्वेषाभावहेतुक इति विभागो युज्यते, विशेषाभावात्, तथा प्रकृतेऽपि ।**

42. नन्वन्यत्र प्रमाणादस्त्वयं नियमः प्रकृतप्रमाणे तु शब्दाख्ये नियम एव विप्रतिपत्त्यादीनां दोषाणां भावरूपत्वादित्याशय(वा)न् शङ्कते - **स्यादेतदिति** । यदि गुणव्यतिरिक्तकारणसद्भावे दोषाभावमात्रेण प्रमा ते तदा अनुमाऽपि यथार्थलिंगज्ञानरूपगुणाभावे आत्मसन्निकर्षादेः दोषरूपलिङ्गविपर्यासाभावे प्रमोत्पद्येताविशेषादिति परिहरति — **न, अनुमानेति** । यद्यप्यन्यत्र गुणाभावेन ल(च) न प्रमोत्पद्यते तथापि शब्दे दोषाभावे वक्तृगुणापेक्षा न भविष्यतीति मन्वानः पुनः शङ्कते — **अन्य[त्रे]ति** । ननु वक्तृगुणापेक्षा नास्तीति कुतः ? किं गुणानां प्रमां प्रत्यन्वयव्यतिरेक(का)भावात् अन्वयव्यतिरेकभावेऽप्युपकाराभावात् [वा]? नाद्यः, असिद्धत्वात् । नापि द्वितीयः, नियमस्यैव सर्वत्रोपकारार्थत्वात् । अनुपकारेणानपेक्षायामुपकारेऽप्युपकारान्तरापेक्षायामनवस्थातः । एवं तभ्यु(एवमभ्यु)पगमेऽप्रामाण्यमपि परतो न स्यादित्याशयवान् समाधत्ते — **न, गुणाभाव** इति । तथा चाप्रामाण्यमपि दोषमतिरिक्तमपेक्षत इति । स्वत एव [न] भवेदिति तात्पर्या[र्थः]। अप्रामाण्यं परतस्तत्रास्तु दोषाणामपेक्षे(क्षणादि)ति शङ्कते - **अप्रामाण्यं प्रतीति** । [दोषाणां] नोपकारार्थत्वात्, अनुपकारेणानपेक्ष(क्षा)यामुपकारेऽप्युपकारान्तरापेक्षयाऽनवस्थितेः । एवमनभ्युपगमेऽप्रामाण्यमनया [45A] परिहरति — **न गुणनिवृत्त्येति**। प्रमाणसिद्धगुणत्वनिवृत्तेरप्रामाण्य(ण्यं) प्रति शङ्कान्ताभ्यामादर्शयति — **तस्येति** । अत्र गुणाभावस्य प्रमां प्रत्यवर्जनीयतया सनि(न्नि)धीनां हेतुतयेति शङ्कते — **तदप्रामाण्य** इति । तुल्यत्वेन परिहरति - **नेति**। तयोरित्यन्वयव्यतिरेकयोरित्यर्थः । स्वदर्शनश्रद्धया पुनः शङ्कते — **पौरुषेयेति** । प्रमाणसिद्धं न प्रामाण्ये उपयुज्यते इति यदि तदा दोषसन्निधिरपि तथा नाप्रामाण्ये उपयुज्यत इति शङ्कोत्तराभ्यामादर्शयति — **गुणानामिति** । ननु यदि प्रामाण्यकारणं गुणा अप्रामाण्यकारणं च दोषास्तदा वेदे दोषाति(दोषाभावात्) प्रामाण्येऽपि [गुणाभावादप्रामाण्यसम्भवः], तर्हि गुणा एव कारणं दोषाभावस्तु वर्जनीय इत्याशयवान् परिहरति - **प्रामाण्यमिति** । गुणसन्निधिरन्यत्रोपक्षीणो(णा) [तत्]पूर्वकत्वाभावात् नाप्रामाण्यं गुणपूर्वकत्वाभावाच्च न

प्रामाण्यं वेत्ययुक्तमापन्नमित्याह - **निःस्वभावत्वमिति** । तदयं दोषोऽपौस(रु)वे(षे)यत्वाभ्यु[प]गमप्रवृत्तानां भवतां नास्माकमित्याह - **आत्मानमिति** । यथाह **भूषणः** –

शब्दे प्रमाणता तावद् वक्त्रधीनेति निश्चिता ।
तदभावोऽपि सर्वत्र गुणवद्वक्त्रभावतः ॥
प्रामाण्यं विद्यते नेति पौरुषेयेषु युज्यते ।
वेदे वक्तुरभावे च तद्वार्तापि हि दुर्लभा ॥ [भूषण, परिच्छेद ३, पृ. ३९७]

तस्माद् यथा गुणाभावमात्रेण नाप्रामाण्यं किन्तु दोषसद्भावेन तथा दोषाभावमात्रेण न प्रामाण्यं किन्तु गुणसद्भावेनेत्यकाम्येनास्यापतितमुक्तमप्युपादेयमन्यथात्राप्यभावसद्भावे रा(भा)वानुविधानस्य हेतुत्वं न स्यादित्यु[प]संहारव्याजेन दर्शयति – **तस्मादिति** ।

43. **तथापि वेदानामपौरुषेयत्वे सिद्धे अपेतवक्तृदोषत्वादेव प्रामाण्यं सेत्स्यति, ततः सिद्धे प्रामाण्ये गुणाभावेऽपि तदिति दोषाभाव एव हेतुरकारणं गुणा इति चेत्, न । अपेतवक्तृगुणत्वेन सत्प्रतिपक्षत्वप्रसङ्गात् । स्वत एव प्रामाण्यनिश्चयः, किन्तु अप्रामाण्यशङ्कामात्रमनेनापनीयते दोषनिबन्धनत्वात् तस्य तदभावेऽभावात्, अतो नेदमनुमानवत् सत्प्रतिपक्षसाधनीकर्तुमुचितमिति चेत् । न । गुणनिवृत्तिनिबन्धनायाः शङ्कायाः सुलभत्वात् । तस्याः केवलाया अप्रामाण्यं प्रत्यनङ्गत्वान्न शङ्केति चेत् दोषनिवृत्तेरपि केवलायाः प्रामाण्यं प्रत्यनङ्गत्वान्न तया शङ्कानिवृत्तिरिति तुल्यमिति ।**

43. ननु तत्र रागद्वेषभावकारणकत्वे निवृत्तिप्रवृत्त्योरुपेक्षणीयज्ञानादावपि ते स्यातामिति बाधकवशेन रागद्वेषयोस्तथा[45B]विधोभयप्रवृत्तिनिदानत्वं तत्कथमयं प्रतिबदि(न्दी)ग्रहः । रागाभावस्यानिष्टसाधनता ज्ञानसहितस्य निवृत्तिप्रयत्नकारणत्वात् । द्वेषाभावस्यापीष्टसाधनता ज्ञानसहायस्य प्रवृत्तिप्रयत्नकारणत्वात् । उपेक्षणीयज्ञाने चानिष्टेष्टसाधनता ज्ञानस्याभावादिति निराकुलः प्रतिबन्दिः(न्धिः) । ननु यद्यप्यन्यत्र गुणानुविधानमस्ति तथापि वैदित्साः(क्याः) प्रतीतेः प्रामाण्यमुभयसिद्धमपौरुषेयत्वं च वेदानां विचारान्तरेण साधितम्, तस्माद् गुणाभावेऽपि दोषनिवृत्तिमात्रप्रयुक्तमेव प्रामाण्यं वेदवाक्यजायाः प्रमाणया(प्रमाया) इति, गुणानो(नां) प्रामाण्यानुविहितान्वयव्यतिरेकित्वमेव नास्तीति मन्वानः पुनः शङ्कते – **तथापीति** । अपेतवक्तृदोषतत्सा(षत्वा)दुत्पन्नं प्रामाण्यम् अपेतवक्तृदोषवाक्यजज्ञानत्वेन च ज्ञायत इत्यपि प्रसङ्गागतमवर्जनीयमिति रहस्यम् । **तदिति** प्रामाण्यम् । दोषाभाव एव हेतुरुत्पत्तौ ज्ञप्तौ चेत्यर्थः । अकारणं गुणा इत्यत्राप्युत्पत्तौ [ज्ञप्तौ] चेति मन्तव्यम् । भवेदेवं यद्यपौरुषेयत्वं वेदानां सिद्धं भवति । न चापौरुषेयत्वं सिद्धम् । गुणवश्यप्रामाण्यशङ्कया विचारान्तरस्याप्याभासत्वशङ्कायां निश्चायकत्वा(त्व)वियो[ग इति] आशयेन परिहरति – **नेति** । उत्पत्तिपक्षे अपेतवक्तृगुणत्वे लौकिकवाक्यवदप्रामाण्यमापद्येतेति सत्प्रतिपक्षत्वं वेदितव्यम् । ज्ञप्तिपक्षे तु यथा अपेतवक्तृदोषत्वेन प्रामाण्यं ज्ञायते तथा अपेतवक्तृगुणत्वेनाप्रामाण्यमपि ज्ञायेतेति प्रसिद्धमेव सत्प्रतिपक्षत्वं विशेषाभावादिति मन्तव्यम् । यथा प्रामाण्यसहभाव्यपेतवक्तृदोषत्वं तथा अ[46A]प्रामाण्यसहभाव्यपेतवक्तृगुणत्वमपीति प्रसङ्गात् । ज्ञप्तिपक्षं कक्षीकृत्य न सत्प्रतिपक्षत्वमिति मनोरथेन स्वदर्शनश्रद्धया परः शङ्कते - **स्वत एवेति** । ज्ञानग्राहकादेवेत्यर्थः । किमर्थं तर्हि अपेतवक्तृदोषत्वानुसरणमिति हृदि निधायाह – **किन्त्विति** । **अप्रामाण्यशङ्कामात्रमिति** । मात्रशब्देन तु प्रामाण्यमपि निश्चीयत इत्युक्तं भवति । **अनेनेति** दोषाभावेनेत्यर्थः । **तस्येति** अप्रामाण्यस्य । **तद्भा(दभा)वे**

दोषाभाव इत्यर्थः। किमतो यद्येवमित्यत आह - **अतो नेदमिति** । यदि प्रामाण्यनिश्चायकमनुमानं क्रियते - वेदाः प्रमाणम्, अपेतवक्तृदोषत्वात् तथाविधलौकिकवाक्यवदिति - तदा वेदाः न प्रमाणम् अपेतवक्तृगुणत्वात् तथाविधलौकिकवाक्यविदिति युज्यते । न चैवं किन्त्वप्रामाण्यशङ्का निराक्रियते । तत्र च न सत्प्रतिपक्षावकाश इत्यभिप्रायः। यद्यप्रामाण्यशङ्कानिराकरणाय प्रयोगस्तदा सत्प्रतिपक्षत्वं शङ्कानिवारणवत् शङ्काका(क)रणेऽपि न्यायस्य [स]मानत्वादित्याशयेन परिहरति – **नेति** । अथ चाभ्युपगमवादो वस्तुशङ्कानिवारणमपि न निश्चयमन्तरेण, निश्चयैकफलादाशप्रणत्वात्[1] तत्त्वनिश्चयफलस्यापीति सर्वजनसिद्धमपि स्वपक्षजातितया नावबुद्ध्यत इति । किमत्र ब्रूमः ? बोध(दोष)सहितगुणनिवृत्तेरेवाप्रामाण्यशङ्कापादकत्वं न तु गुण[नि]वृत्तिमात्रस्येति यदि तदा गुणसहित-दोषनिवृत्तेरेवाप्रामाण्यशङ्कापसारकत्वं न तु दोषविनिवृत्तिमात्रस्येति शङ्कोत्तराभ्यामादर्शयति – **तस्या** इति । एतेन विपक्षे बाधकमुक्तम् । समस्तशङ्कापसारणेन निरात(श)ङ्कमेवे[46B]ति दर्शितम् । एवं प्रमा परतो ज्ञायते । अनुभवत्वे सति कार्यत्वात्, कार्यत्वे सत्यनुभवत्वाद् वेत्यपि दु(दृ)ष्टव्यापारम् । प्रमा परतो ज्ञायते [स्वत]स्त्वे उपपद्यमानबाधकत्वादप्रमावत् । न चेदमसिद्ध[म्] । अप्रमाया अपि प्रमात्वं प्रसङ्गरूपबाधकस्य विपरा(री)त-त्वादिति । एतेनाभूत्वा भावित्वात् इत्यादि यथाश्रुतमनैकान्तिकमेवेति न साधनम् । अनुभवविशेषणप्रक्षेपेण तु तदपि मनोहरमिति रहस्यम् । एवं प्रमाया वक्तृगुणाधीनत्वं लाभत्वसमर्थनेन वक्तृसिद्धावितरवक्तृसंभवेनेश्वररूप-वक्तृसंसिद्धिरिति दर्शितम् ।

44. **एवं प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् । यदि तु स्वतो ज्ञायेत, कदाचिदपि प्रामाण्यसंशयो न स्यात्, ज्ञानत्वसंशयवत् । निश्चिते तदनवकाशात् । न हि साधकबाधकप्रमाणाभावमवधूय समानधर्मादिदर्शनादेवासौ, तथा सति तदनुच्छेदप्रसङ्गात् । अथ प्रमाणवदप्रमाणेऽपि तत्प्रत्ययदर्शनाद् विशेषादर्शनाद् भवति शङ्केत्यभिप्रायः, तत् किं प्रमाणज्ञानोपलम्भेऽपि न तत्प्रामाण्यमुपलब्धं प्रमाणज्ञानमेव वा नोपलब्धम् ? आद्ये कथं स्वतः प्रामाण्यग्रहः, प्रत्ययप्रतीतावपि तदप्रतीतेः, द्वितीये कथं तत्र शङ्का, धर्मिण एवानुपलब्धेरिति । यदपि झटिति प्रचुरतरसमर्थप्रवृत्त्य-न्यथानुपपत्त्या स्वतः प्रामाण्यमुच्यते, तदपि नास्ति । अन्यथैवोपपत्तेः । झटिति प्रवृत्तिर्हि झटिति तत्कारणोपनिपातमन्तरेणानुपपद्यमाना तमाक्षिपेत्, प्रचुरप्रवृत्तिरपि स्वकारणप्राचुर्यम्, इच्छा च प्रवृत्तेः कारणम्, तत्कारणमपीष्टाभ्युपायताज्ञानम्, तदपि तज्जातीयत्वलिङ्गानुभवप्रभवम्, सोऽपीन्द्रियसन्नि-कर्षादिजन्मा, न तु प्रामाण्यग्रहस्य क्वचिदप्युपयोगः । उपयोगे वा स्वत एवेति कुत एतत् ? ततः समर्थप्रवृत्तिप्राचुर्यमपि प्रामाण्यप्राचुर्यात् तद्ग्रहणप्राचुर्याद् वा । स्वतस्त्वं तु तस्य क्वोपयुज्यते । न हि पिपासूनां झटिति प्रचुरा समर्था च प्रवृत्तिरम्भसीति पिपासोपशमनशक्तिस्तस्य प्रत्यक्षा स्यात् ।**

44. संप्रति प्रमामात्रज्ञप्तेरपि परतस्त्वसमर्थनेनाभिमतप्रमाया अपि तथात्वसिद्धावाप्तपुरुष ईश्वरः सिद्ध्यतीत्याशयेन विप्रतिपन्नं प्रति ज्ञप्तेरपि परतस्त्वं प्रमाणतः साधयति - **एवमिति** । प्रमा परतो ज्ञायते। ज्ञानज्ञापककारके वक्त्रतिरिक्तकारकाद् ज्ञायते । हेतुरनभ्यासदशायां सांशयिकत्वादिति । ज्ञानग्रहणकालेऽप्रमाणं प्रमाणं वेति संशयाक्रान्तत्वादिति । अन्यथा[ऽप्रमा]प्रमात्वयोरन्यतरग्रहे सांशयि[क]त्वं दृष्टान्तदार्ष्टान्तिकयोरसिद्धं स्यादिति तत्परिहारार्थमनभ्यासदशायामिति । अनभ्यासदशायामित्यनेन ज्ञानग्रहणकालमुपदर्शयति । अत्रापि

1. अस्पष्टम् ।

विपक्षे बाधकमाह - **यदि त्वि**ति । **कदाचिदपी**ति प्रमात्वग्रहोत्तरकालमिव पूर्वमपीत्यर्थः । न तु प्रामाण्य-प्रतीतावपि । प्रत्यन्व(क्ष)समानधर्मदर्शनकारणतः संशयो भवन्न वार्यत इत्यत आह - **न हि साधके**ति । ननु प्रामाण्ये प्रतीतेऽप्यप्रामाण्यावच्छेदका [अ]प्रामाण्यप्रतीतेऽपि प्रामाण्यावच्छेदका [अ]प्रामाण्यावच्छेदककारणदोषा वा वादि[ना] विशेषानुपलम्भात् [47A] साधकबाधकप्रमाणाभावे एव पुरोवर्तिरजतप्रतीतौ तद्विशेषानुपलम्भ इवेति युक्तः संशय इत्याशयवान् शङ्कते - **अथे**ति । तत्र विकल्पनीयं प्रामाण्ये प्रतीतेऽपि किमा[भा]स-साधारणतया अथाभासव्यावृत्त्या ? आद्यः परलोकार्थे प्रवृत्त्यनङ्गत्वान्नोपादेयः । द्वितीयोऽपि तथाभूतनिश्चयस्य विशेषधर्ममुपादायैवात्मलाभान्न युक्त इति हृदि निधायान्यथा विकल्प्य निराचष्टे – **तत् किमि**ति । परेषामत्र स्वतस्त्वसाधनमाभासीकर्तुमुपन्यस्यति - **यदपी**ति । तथा चार्थापत्त्या बाध-प्रतिरोधयोरन्यतरदोषकलुषितं परत-स्त्वसाधकमित्यभिप्रायः । तमिममभिप्रायमुन्मूलयितुमर्थापत्तिं दूषयति – **तदपी**ति । अन्यथोपपादनं च सुव्यक्तमेव । एवमनङ्गीकुर्वाणं प्रत्यनिष्टमाह – **न ही**ति । न ह्यविलम्ब इति न लिङ्गानपेक्षा । तथासति पिपासोपशमनशक्त्य-नुभवस्याप्यलैङ्गिकत्वप्रसङ्ग इत्यर्थः । अस्ति तावत् प्रामाण्यग्रहपूर्विका झटिति समर्थप्रवृत्तिः । सा च परतः-पक्षे न भवितुमर्हत्यनवस्थापराहतत्वादिति ।

45. **स्यादेतत् । प्रामाण्यग्रहे सति सर्वमेतदुपपद्यते । स च स्वतो यदि न स्यात् न स्यादेव; परतःपक्षस्यानवस्थादुःस्थत्वादिति चेत्, न, तदग्रहेऽप्यर्थसन्देहादपि सर्वस्योपपत्तेः । न चानवस्थाऽपि, प्रामाण्यस्यावश्यज्ञेयत्वानभ्युपगमात् । अन्यथा स्वतःपक्षेऽपि सा स्यात् । लिङ्गं निश्चितमेव निश्चायकम्, ततस्तन्निश्चयार्थमवश्यं लिङ्गान्तरापेक्षायामनवस्थेति चेत् । तत् किमनुपपद्यमानोऽर्थोऽनिश्चित एव स्वोपपादकमाक्षिपति, येनानवस्था न स्यात् । प्रत्यक्षेण तस्य निश्चयात् तस्य च सत्तयैव निश्चायकत्वा-न्नैवमिति चेत् । ममापि प्रत्यक्षेण लिङ्गनिश्चयात् तस्य च सत्तयैव निश्चायकत्वान्नैवमिति तुल्यम् । लिङ्गज्ञानस्य प्रामाण्यानिश्चये कथं तन्निश्चयः स्यादिति चेत् । अनुपपद्यमानार्थज्ञानस्य प्रामाण्यानिश्चये कथं तन्निश्चय इति तुल्यम् । न हि निश्चयेन स्वप्रामाण्यनिश्चयेन वा विषयं निश्चाययति प्रत्यक्षम्, अपि तु स्वसत्तयेत्युक्तमिति चेत् । तुल्यम् । तथापि यदि तल्लिङ्गाभासः स्यात् तदा का वार्तेति चेत् । अनुपपद्यमानोऽप्यर्थो यद्याभासः स्यात् तदा का वार्तेति तुल्यम् । सोऽपि प्रामाण्यमाक्षिपतीत्युत्सर्गः । स च क्वचिद् बाधकेनापोद्यत इति चेत् । लिङ्गेऽप्येवमिति तुल्यम् । तर्हि प्रामाण्यानुमानेऽपि शङ्का तदवस्थैवेति निष्फलः प्रयास इति चेत् । एतदपि तादृगेव । अनुपपद्यमानोऽर्थ एवासौ तथाविधः कश्चिद् यः स्वप्नेऽपि नाभासः स्यात् ततो नाशङ्केति चेत् । लिङ्गेऽप्येवमिति समः समाधिः । कः पुनरसावर्थो यः स्वप्नेऽपि नाभासः स्यात् यदनुपलम्भे विभ्रमावकाशो यादृगुपलम्भे च तद्बाधव्यवस्था । अन्यथा हि तथाभूतस्यापि व्यभिचारे साऽपि न स्यात् । मा भूदिति चेत्, न, भवितव्यं हि तत्त्वा-तत्त्वविभागेन । अन्यथा व्याघातात् । कथं हि नियामकनिःशेषविशेषोपलम्भेऽपि विपरीतारोपः ? तथाभावे वा तदतिरिक्तविशेषानुपलम्भे कथं बाधकम् । तदभावे त्वबाधस्य कथं भ्रान्तत्वमिति ।**

45. स्वदर्शनशक्त्या परोक्तमवधार्य पुनरपि परतस्त्वं शङ्कते – **स्यादेतदि**ति । झटिति प्रवृत्त्यादिक-मित्यर्थः । नन्वस्त्वेवं तथापि स्वतस्त्वे किमायात[म्] इत्यत आह - **स चे**ति । सुबोधम् । न तावत् सर्वत्र प्रामाण्यग्रह उपयुज्यते । संदेहादपि समर्थप्रवृत्त्युपपत्तेर्दृष्टे विषय इत्याह – **ने**ति **सर्वस्ये**ति । दृष्टे झटिति

प्रवृत्त्यादिकमित्यर्थः । न तु प्रवृत्तेः पूर्वमपि कष्टामि(दृष्टेऽपि) प्रामाण्यमवसीयते । तत्र प्रामाण्यावधारकस्य प्रामाण्यानवधारणे तथापि(तस्यापि) निश्चायकत्वाभावात् । अवधारणे वा अनवस्थानादिति हृदि निधायाह - **न चानवस्थापी**ति । अनवस्था हि फलविज्ञानमाश्रित्य वोच्यते प्रमासाधकतमविज्ञानं वाश्रित्य ? प्रथमेऽपि किमवस्य(श्य)ज्ञेयत्वोपगमेन अन्यथा वा ? द्वितीयेऽपि किं गृहीतप्रामाण्यमेव निश्चायकं पक्षेऽगृहीतप्रामाण्यं वेति ? [47B] तत्र न प्रथम इत्याह — **प्रामाण्यस्ये**ति । अभ्युपगमे वा अर्थापत्त्यापि तत्परिच्छेदे अनवस्थायाः दुष्परिहरत्वेन विषयान्तरसञ्चारो न स्यात् । अस्ति च विषयान्तरसञ्चारः सर्वजनसिद्धस्तेन जानीमो नावश्यं ज्ञेयमिति । अन्यथा वेति पक्षेऽनवस्थावकाशः । द्वितीयमु[त्]स्थाप्य समानदोषतया समानपरिहारतया च परिहरति — **लिङ्गमि**ति । मतमपी[ति] । लक्षणसहचरितलक्ष्यविज्ञानजातीयत्वं हि प्रवृत्तेः प्राक्काल-भाविप्रामाण्यावधारणलिङ्गं तथाप्रवृत्तस्य फलनिर्भासविजातीयत्वं वा तदुभयमपि मनसि व(न) वेद्यत इत्यर्थः । लिङ्गेऽप्येवमिति । स्वस्थावस्थस्य फलनिर्भासिज्ञानजातीयं गन्धसहचरितपृथिवीजातीयं वा कदाचिद् व्यभिचरतीति शङ्का(ङ्क)या वाभिभूयते स्वकरचरणादिज्ञानवत् । विप्रतिपत्तौ तु तत्प्रामाण्यमपि संशयमध्याहार्य परत एव प्रतिपाद्यत इत्यास्तामतिविस्तरः । उक्तम् विशेषसमर्थनार्थमेव बाधितबाधकव्यवहारसमर्थनपरैरभ्युपगतं प्रपे(त्य)-क्षपूर्वकमादर्शयति — **यदनुपलम्भ** इति । यस्य विशेषस्य शुक्तित्वादेरनुपलम्भे लोके विभ्रमो [मि]थ्याज्ञानं 'शुक्तौ रजतम्' इति भवति । **यादृगुपलम्भे** इति शुक्तिकात्वादेरुपलम्भे । **तद्बाधव्यवस्था** तस्य विभ्रमस्य बाधा व्यवतिष्ठते लोके सविशेष इति । अयमाशयः । 'नेदं रजतम्' इति बाधकप्रत्ययस्य संशयादिभिः विधुरीकृतस्य प्रत्ययान्तरव्यावृत्तः कश्चिद् बाधो यैः परैरपि । तस्मात् दृष्टं यदुत्पन्नमित्यादिभिः वचोभिरु(र्य)त् कीर्त्यते सो अस्ति न वा ? नास्ति चेत् कथं प्रथमस्य बाधकमिदमविशेषात् । अस्ति चेत् स न तावज्जातिकृतो विशेषः कश्चित् अनुभूयते नाप्येकाकारकृतस्ततो गत्यन्तराभावाद् विषयविशेषादेव चेष्टव्यः । स च 'विभ्रमविरोधिस्वभावः' इत्यादिशब्दैरेव निगद्यते । एवमनभ्युपगमे लोकव्यवहारविलोप इत्याह — **अन्यथे**ति **साऽपी**ति । साऽपि बाधकव्यवस्थापि [48A] न स्यादिति । कथम् ? बाधकस्य व्यभिचारिजातीयत्वेन बाध्यबाधकयोरविशेषात् बाधकत्वमेव न स्यादित्यर्थः । भिन्नलोकमर्यादस्तत्त्वमप्रतिपद्यमानः शङ्कते — **मा भूदि**ति । बाधकव्यवच्छेदकै-रित्यनुषज्यते । लोकमर्यादातिक्रमे साधनदूषणनियतप्रयोगानुपपत्तौ वा न किञ्चित् दुष्टं वा विवाद्यत इत्याशयवान् परिहरति - **ने**ति । बाध[व्य]वस्था मा भूदिति वक्तव्यं हियत्ये (हीयते) । भवितव्यं सकललोकसिद्धेन तथातत्त्वव्यवस्थाविभागेन । न तु विना बाधकव्यवस्थां तत्त्वेतरव्यवस्था भविष्यत्यत आह — **अन्यथे**ति । बाधकव्यवस्थां विना तत्त्वातत्त्वविभागव्याघातः । न तत्त्वमतत्त्वं हि योग्यबाधाबाधाभ्यां [विना] व्यवस्थितं लोके । विशेषानुपलम्भे विभ्रमावकाशो न त्वन्यथेति दर्शयति - **कथं तर्ही**ति । अयमाशयः । यदि हि नियामकविशेषोपलम्भेऽपि विपरीतारोपः स्यात् तदा तस्य विपरीतरूपत्वं बाधकं विना वा निश्चेतव्यम् बाधकेन वा ? नाद्यः सर्वस्यारोपत्वप्रसङ्गात् । न द्वितीयः बाधकाभिमतस्य बाधकत्वेऽबाधकत्वप्रसङ्गो बाधितत्वेऽत्र कथमशेषविशेषानुपलम्भे समारोपसंभव इति रहस्यम् । एवं प्रामाण्यं परतो ज्ञायते । स्वतस्त्वे उपपद्यमान-बाधकत्वसंभवे सति जायमानत्वाद् वा अप्रमावदिति । न चेदमसिद्धम् । प्रामाण्यसंशयविरहरूपप्रसङ्गस्य बाधकस्योपदर्शितत्वादिति । [48B]

46. **स्यादेतत् । परतः प्रामाण्येऽपि नित्यत्वाद् वेदानामनपेक्षत्वम्, महाजनपरिग्रहाच्च प्रामाण्यमिति को विरोधः ? न । उभयस्याप्यसिद्धेः । न हि वर्णा एव तावन्नित्याः । तथाहि । इदानीं श्रुतपूर्वो**

गकारो नास्ति, निवृत्तः कोलाहल इति प्रत्यक्षेणैव शब्दध्वंसः प्रतीयते । न हि शब्द एवान्यत्र गतः । अमूर्तत्वात् । नाप्यावृतः । तत एव सम्बन्धविच्छेदानुपपत्तेः । नाप्यनवहितः श्रोता । अवधानेऽप्यनुपलब्धेः । नाऽपीन्द्रियं दुष्टम्, शब्दान्तरोपलब्धेः । नाऽपि सहकार्यन्तराभावः । अन्वयव्यतिरेकवत्स्तस्यासिद्धेः । नाप्यतीन्द्रियम् । तत्कल्पनायां प्रमाणाभावात् । अन्यथा घटादावपि तत्कल्पनाप्रसङ्गात् । न च शब्दस्य नित्यत्वसिद्धौ तत्कल्पनेति युक्तम् । निराकरिष्यमाणत्वात् । ये त्वेकदेशिनो नैवमिच्छन्ति तान् प्रत्युच्यते । विवादाध्यासितः शब्दप्रध्वंसः इन्द्रियग्राह्यः, ऐन्द्रियकाभावत्वात्, घटाभाववत् । नैतदेवम्, इन्द्रियासन्निकृष्टत्वादतीन्द्रियाधारत्वाद् वेति चेत्, न । इदं ह्युपाध्युद्भावनं वा स्यात्, व्यापकानुपलब्ध्या सत्प्रतिपक्षत्वं वा ? न प्रथमः, स्वरूपयोग्यतां प्रति सहकारियोग्यताया अनुपाधित्वात्, तस्यास्तामपेक्ष्यैव सर्वदा व्यवस्थितेः, नाप्यैन्द्रियकाधारत्वप्रयुक्तमभावस्य प्रत्यक्षत्वम्, धर्माद्यभावस्यापि तथात्वप्रसङ्गात् । अत एव नोभयप्रयुक्तम् । नापि द्वितीयः, प्रथमस्यासिद्धेः । अस्ति हि श्रोत्रशब्दाभावयोः स्वाभाविको विशेषणविशेष्यभावः । विशेष्यस्यातीन्द्रियत्वात् कथमैन्द्रियकविशिष्टज्ञानविषयत्वम्, तथा विशेष्यमव्यवस्थापयतश्च कथं विशेषणत्वमिति चेत्, न, तथा विशेष्यव्यवस्थापनायाः फलत्वात् । न तु तदेव विशेषणत्वम्, आत्माश्रयप्रसङ्गात् । विशेषणभावेन समवायाभावयोर्ग्रहणम्, तथाग्रहणमेव च विशेषणत्वमिति ।

46. अस्तु प्रामाण्यमुत्पत्तौ ज्ञप्तौ च परतः तथापि यत्र वक्ता सम्भवति तत्र तदधीनत्वमस्तु, वेदे तु तदसम्भवात् तमन्तरेणान्यस्माद् ज्ञायते चेति स्वमतश्रद्धया शङ्कते - **स्यादेतदिति** । तदेतत् कूटस्थनित्यत्वं वा विवक्षितं परं तत्र पुरुषपराधीनतया प्रवाह(हा)विच्छेदमात्रं वा ? तत्राद्यं निषेधति - **सर्गप्रलयसंभवेति** । सर्गप्रलयसंभवेन उभयस्य नित्यत्वस्य महाजनपरिग्रहस्य चासिद्धेरित्यर्थः । वर्णमात्रस्यानित्यत्वं व्युत्पादनेन तद्विशेषा[नां] वेदानां सुतरामनित्यत्वं सिद्ध्यतीत्याशयेन वर्णमात्रस्यानित्यत्वं साधयितुमाह – **न हीति** । अत्र वर्णप्रध्वंसे प्रत्यक्षं प्रमाणमाह – **तथाहीति** । प्रत्यक्षस्यानन्यथासिद्धत्वं दर्शयति – **तत एवेति** । अमूर्तत्वादित्यर्थः । [इन्द्रिय]सम्बन्धविच्छेदो ह्यावरणम् । शब्दस्य चासौ विभुद्रव्यत्वाद् वा आकाशगुणत्वादशक्यसम्पादनमित्यर्थः । तदेवमावरणासम्भवे समवहिते ज्ञातरि इन्द्रियेऽदूषिते सहकारिसंभवे यः प्रतीतो न प्रतीयते तस्य प्रध्वंसः प्रत्यक्षत उपलभ्यत इति समुदायार्थः । एवमुक्ते ये नैयायिकैकदेशिनो अभाव इन्द्रियसम्बन्धविशेषणतया ग्रहीतव्यो न त्वन्यथेति मन्यमानाः शब्दप्रध्वंसो न प्रत्यक्ष इति वर्णयन्ति तान् प्रमाणतः प्रबोधयति – **ये त्विति**। शब्द[49A]प्रध्वंसमात्रपक्षीकरणेऽस्मच्छब्दस्यापि प्रध्वंसः तथा स्यात् तथा चांशे बाधक [इ]त्यत उक्तं – **विवादेति** । विवादाध्यासितः श्रूयमाणशब्दप्रध्वंस इत्यर्थः । हेतुः - **ऐन्द्रियकेति** । ऐन्द्रियकस्याभावत्वादित्यर्थः । नन्वैन्द्रियकस्य घटादिव्यक्तिरूपस्य परमाणोरभावो न प्रत्यक्षस्ततस्तेनानैकाधि(कान्ति)कम् । अथ मनःपरमाणौ घटरूपसंसर्गस्याभावः । स चातीन्द्रिय इत्यनैकान्तिकम् । न हि शब्दसंसर्गस्य गगनेऽभावः । सोऽप्यतीन्द्रिय इत्यस्याप्यैन्द्रियकाभावत्वमसिद्धम् । मैवम् । ऐन्द्रियकाभावत्वमैन्द्रियकप्रध्वंसत्वं विवक्षितम् । न च घटरूपस्य परमाणौ प्रध्वंस इति नानैकान्तिकम् । न त्वेतदपि द्व्य[णु]के त्र्यणुकप्रध्वंसेनानैकान्तिक[म्] । न हि द्व्यणुकाश्रयस्त्र्यणुकध्वंस इति कस्यचिदिन्द्रियगोचर इति अनुभूयत एतत्त्र्यणुकध्वंसः । यथैते जालान्तरे सूर्यमरीचिनिचयसञ्चारिणस्त्र्यसरेणवो नष्टा इति । परा(र)स्य च नैवं प्रतिपन्नमिति चेत्, न, एतावतापि व्यभिचा[रा]रोहात् तस्याशक्यत्वात् । न द्व्यणुकगतत्वेनानुभूयत इति चेत्, न, द्व्यणुकस्यातीन्द्रियत्वात् सम्बन्धो

नानुभूयते । विनाशस्वभावानुभवस्तु केन वार्यते । श्रुतपूर्वो गकारो विनष्ट इति ज्ञानम् इन्द्रियकारणकम् अनन्यथासिद्धेन्द्रियानुविधायित्वात् घटोऽयमिति ज्ञानवदिति वा प्रयोगो द्रष्टव्यः । नैयायिकैकदेशिमते [49B] मानबाधप्रतिबाधनाभ्यां व्याप्यत्वासिद्धिसत्प्रतिपक्षत्वं दूषणमाह – **नैतदेवमिति** । यथा वाऽनेन सत्प्रतिपक्षत्वं वेदितव्यम् – शब्दप्रध्वंसो नेन्द्रियग्राह्यः, इन्द्रियासन्निकृष्टत्वात् अनुमीयमानपदार्थवदिति । अभावत्वे सति इन्द्रियाधारत्वात् आद्यशब्दप्रध्वंसवदिति । इन्द्रियसन्निकृष्टप्रयुक्तं प्रत्यक्षत्वं वेन्द्रियाधारत्वप्रयुक्तं वा अभावप्रत्यक्षत्वमिति व्यतिरेकेण व्याप्यत्वासिद्धत्वमूहनीयम् । इममेवाभिप्रायं परस्परं विकल्प्य दूषयति । इदमुन्नेयमुपाध्युद्भावनं वा । व्यतिरेकेण व्यापकानुपलब्ध्या प्रत्यक्षत्वव्यापकं न त्विन्द्रियसन्निकृष्टमैन्द्रियकाधारत्वानुपलब्ध्या यथा श्रुतेन सत्प्रतिपक्षत्वम् । प्रथममुपाधिं तल्लक्षणविरहेण निराकरोति – **न प्रथम** इति । स्वरूपयोग्यतां प्रत्यक्षोपहितविषयस्वरूपसम्पत्तिं प्रति सहकारियोग्यतायाः सहकारिसम्पत्तेरिन्द्रियसन्निकर्षस्यानुपाधित्वात् । कथमनुपाधित्वमित्यत आह - **तस्या** इति । तस्याः प्रत्यक्षतायाः, तामिन्द्रियसन्निकर्षयोग्यतामित्यर्थः । तथा च पक्षे वर्तमानत्वेनोपन्यस्तसाधनव्यापकत्वेनानुपाधित्वमिति तात्पर्यम् । अन्ये तु स्वरूपयोग्यतालक्षणं साध्यं प्रति सहकारियोग्यता नोपाधिरिति बुद्ध्यमानाः साध्याव्यापकत्वमिति वर्णयन्ति । एवं च परिभाव्यं विपश्चिद्भिर्यदुक्तं तद् ग्राह्यं नेतरम् । [50A] द्वितीयमुपाधिं व्यभिचारेण निरस्यति – **नापीति** । न त्विन्द्रियसन्निकृष्टत्वं विशिष्टमेतदेवोपाधिरस्त्वित्यत आह – **अत एवेति** । धर्माद्यभावस्य प्रत्यक्षत्वप्रसङ्गादेवेत्यर्थः । एवमुपाधिपक्षं व्युदस्य सत्प्रतिपक्षत्वमाशङ्कितम् यत् तत् परिहर्तुं प्रथमस्यासिद्धिमाह – **नापि द्वितीय** इति । नापि सत्प्रतिपक्षत्वमिति पक्ष इत्यर्थः । **प्रथमस्येति**। इन्द्रियसन्निकृष्टत्वादित्यस्येत्यर्थः । एवमुपाधिपक्षे असिद्धिमेव व्युत्पादयति - **अस्ति हीति** । एतेन प्रकृतसाधनमिन्द्रियसन्निकर्षमुपपादयता साधनव्यापकत्वमुपाधिपक्षे व्यञ्जितव्यम् । ननु विशेषणत्वमभावस्य, तत् तदा स्यात् यदि शब्दप्रध्वंसज्ञाने श्रोत्रमवभासेत । न त्वेवम् । श्रोत्रस्यातीन्द्रियत्वेन प्रत्यक्षज्ञानविषयत्वविरोधात् । अतो न प्रध्वंसस्य तद्विशेषणत्वम् । स्वसम्बन्धी विशेषः अन्यतो व्यावृत्तबुद्धिजननविरहादन्यतो व्यावृत्तबुद्धिविषयत्वविरहाच्च न श्रोत्रस्य विशेष्यत्वमित्याशयवान् विशेषणविशेष्यभावमसहमानः शङ्कते – **विशेष्यस्येति** । तथा विशेष्यमितरव्यावृत्तविशेष्यमित्यर्थः । यद्यपि श्रोत्रमतीन्द्रियं तथापि शब्दोपलब्धिलिङ्गादितया श्रोत्रज्ञानसहकारिश्रोत्र(मनः)प्रसूतविशिष्टज्ञानविषयो भवति परमाण्वा(ण्व)नुमितिसहकारिवत् । न प्रस्तुतानुमिति[50B]विषया(यः) परोक्षविशिष्टवेदनविषयपरमाणुवत् । तत्र विशेष्यग्रहणमत(तो) विशेषणग्रहणमिति तु वैधर्म्यमितरग्रहणमात्रस्याविशेषादिति तु व्यक्तमित्याशयवानुपसंहरति – **नेति** । यत्तूक्तम् - 'तथा विशेष्यमव्यवस्थापयतः' इत्यादि तत्राह - **तथेति** । यदि तथैव विशेषण(णं) स्यात् तदाऽऽत्माश्रयदोष इति तमि(मे)व [वि]वृणोति - **विशेषणत्वमिति** ।

47. तस्मात् सम्बन्धान्तरमन्तरेण तदुपश्लिष्टस्वभावत्वमेव हि तयोः । सैव च विशिष्टप्रत्ययजननयोग्यता विशेषणतेत्युच्यते । सा चात्र दुर्निवारा, प्रतियोग्यधिकरणेन स्वभावत एवाभावस्य मिलितत्वात् । तथापि तया तथैव प्रतीतिः कर्तव्येति चेत्, न । गृह्यमाणविशेष्यत्वावच्छिन्नत्वाद् व्याप्तेः । अन्यथा संयुक्तसमवायेन रूपादौ विशिष्टविकल्पधीजननदर्शनाद् गन्धादावपि तथात्वप्रसङ्गात् । तथापि नेन्द्रियविशेषणतया कस्यचिद् ग्रहणं दृष्टम्, अपि त्विन्द्रियसम्बद्धविशेषणतया, सा चातो निवर्तत इति चेत्, न । अस्य प्रतिबन्धस्य इन्द्रियसन्निकृष्टार्थप्रतिसम्बन्धिविषयत्वात् । अन्यथा संयुक्तसमवायेन गन्धादावुपलब्धिदर्शनात् समवायेनादर्शनात् शब्दस्याग्रहणप्रसङ्गात् । नाप्यभावत्वे सत्यतीन्द्रि-

याधारत्वात् सत्प्रतिपक्षत्वम्, योग्यताविरहप्रयुक्तत्वाद् व्याप्तेः । न चातीन्द्रियाधारत्वमेव तस्य योग्यताविरहः । तद्विपर्ययस्यैव योग्यतात्वापत्तेः । न चैवमेव, धर्मादिप्रध्वंसग्रहणप्रसङ्गात् । दृश्याधारत्वं दृश्यप्रतियोगिता चेति द्वयमप्यस्य योग्यतेति चेत्, न । उभयनिरूपणीयत्वनियमानभ्युपगमात् । प्रतियोगिमात्रनिरूपणीयो ह्यभावः । अन्यथेह भूतले घटो नास्तीत्येषाऽपि प्रतीतिः प्रत्यक्षा न स्यात् । संयोगो ह्यत्र निषिद्ध्यते, तदभावश्च भूतलवद् घटेऽपि वर्तते, तत्र यदि प्रत्यक्षतया भूतलस्योपयोगः, घटस्यापि तथैव स्यादविशेषात् । अथ घटस्यान्यथोपयोगः, भूतलस्याप्यन्यथैव स्यादविशेषात् । कथमन्यथेति चेत् । प्रतियोगिनिरूपणार्थमभावसन्निकर्षार्थं च । तत्र प्रतियोगिनिरूपणं स्मरणलक्षण-मनुपलभ्यमानेनापीति, न तदर्थमध्यक्षगोचरत्वमपेक्षणीयमन्यतरस्यापि; कुत उभयस्य । सन्निकर्षस्तु, भूतलघटसंयोगाभावस्येन्द्रियेण साक्षान्नास्ति, येनास्ति तेनापि यदीन्द्रियं न सन्निकृष्येत, कथमिव तं गमयेत् ।

47. ननु तथापि कथं सम्बन्धमन्तरेण विशेषणत्वमिति शङ्कामुपसंहरन्नेवापनयति - **तस्मादिति** । तयोरभावसमवाययोरित्यर्थः । कथं तर्हि विशेषणतेत्यत आह – **सैव चेति** । न तु या विशिष्टप्रत्ययजननयोग्यता सा सम्बन्धविशेषणतया विशिष्टप्रतीतिमुत्पादयन्ती दृष्टेति । प्रकृतेऽपि सम्बन्धविशेषणतयैव प्रतीतिं जनयेदित्याशङ्कते – **तथापीति** । न विशेषणमात्रमेवं किन्तु गृह्यमाणविशेष्यविशेषणमित्याह – **नेति** । एवमभ्युपगमे अन्यत्रापि कथं प्रतीकार इत्याह - **अन्यथेति** । रूपादिः सम्बद्धविशेषणतया गृह्यते न तु गन्धादिः तदाश्रयाग्रहेऽपि गन्धस्य प्रतीर्ति(तिः) । तत्रापि सुल[भ]मेतत् गुणस्य सम्बद्धविशेषणतया ग्रहणमन्यत्र दृष्टमन्यत्रापि तथा स्यादिति । ननु तथापि सर्वस्य विशेषणस्येन्द्रियसम्बद्धविशेषणतया ग्रहणं दृष्टं नेन्द्रियविशेषणतयेति मन्वानः शङ्कते – **तथापीति** । तद्विशेषणं तदेवमिति न नियमः किन्तु [51A] विशेषणविशेष्ये इत्याह - **तस्येति** । इन्द्रियसन्निकृष्टोऽर्थो घटादिः, तस्य प्रतिसम्बन्धी द्वितीयः सम्बन्धी यः स तथेति त्वयाप्येवमेव स्वीकरणीयमन्यथा गुणानां संयुक्तसमवायेन ग्रहणदर्शनात् तदभावे शब्दस्याग्रहणप्रसङ्ग इत्याह – **अन्यथेति** । तदेवमुपाधिलक्षणविरहेणोपाधिं निराकृत्य प्रथमस्यासिद्धिप्रदर्शनेन सत्प्रतिपक्षत्वमपाकृत्य द्वितीयस्य सत्प्रतिपक्षत्वाशङ्कां निराकरोति – **नापीति** । तदेतदुपाधिसम्बन्धिना तुल्यबलमतो न प्रतिसाधनमित्यर्थः । ननु न दृश्याधारतामात्रयोग्यता किन्तु दृश्यप्रति-योगितासहिता । न चैतद्धर्मादिप्रध्वंसस्यास्ति । तत् कथमसौ प्रत्यक्षः स्यादित्याशयवान् शङ्कते – **दृश्येति** । तदुक्तं शास्त्रे – सद्ध्यामभावो निरूप्यते नैकेन सतेति । अपि च, न सामान्यतः शब्दो नास्तीति प्रतिषेद्धुं शक्यते । आत्मा नास्तीतिवद् व्याघातापत्तेः । अत एवाहाचार्यः आत्मपरीक्षायां 'किन्नु गेहे चत्वरे वा चैत्रो निषिध्यते' इति । तथा च क्वचित् कस्यचिदभावः, न चेयं क्वचित्ता देशभेदमनाकलय्य प्रत्येतुमपि शक्या । ततो दृश्याधारत्वमपि दृश्यप्रतियोगित्वमिवोन्नेयमिति सिद्धम् । तदेतन्निकरोति – **नोभयमिति** । एतेनैव दृश्याधारत्वदृश्यप्रतियोगित्वोभयप्रयुक्तत्वेनाप्रयोजकत्वमध्य(प्य)पास्तमिति । ऐन्द्रियकत्वसाध्यसामान्याव्यापक-त्वेनानुपाधित्वादिति पक्षे किं बाधकमित्यत आह – **अन्यथेति** । यद्युभाभ्यां प्रत्यक्षाभ्यामेवाभावः प्रत्यक्षीक्रियते इत्यर्थः । ननु भूतलमात्र[मत्रा]धारः तच्च दृश्यमेवेति किमसङ्गतमित्यत आह – **संयोगो हीति** । **अथ घटस्य(स्या)न्यथेति** [51B] । अप्रत्यक्षतया भूतलस्यापि तथैवेति । अन्यथैवेन्द्रियसन्निकर्षार्थतयैवेत्यर्थः । एतदेव प्रश्नपूर्वकं विभज्यते – **कथमिति** । प्र[ति]योगिनिरूपणार्थमिति व्याख्यायाभावसन्निकर्षार्थं चेति व्याचष्टे - **सन्निकर्षस्त्विति** । **येनेति** अर्थे[ने]त्यर्थः ।

48. न चोपलब्धोपलभ्यमानाभ्यामेवेन्द्रियं सन्निकृष्यते । इतरेतराश्रयप्रसङ्गात् । तस्मात् सन्निकर्षे सति योग्यत्वाद् भूतलमप्युपलभ्यते, न तु तस्योपलभ्यमानत्वमभावोपलब्धेरङ्गमिति युक्तमुत्पश्यामः । प्रकृते तु न प्रतियोगिनिरूपणार्थं तदुपयोगः । तस्य संयोगवदाधारानिरूप्यत्वात् । नापि सन्निकर्षार्थम्, तदभावस्य साक्षादिन्द्रियसन्निकर्षादिति । न चेदेवम्, कुत एषा प्रतीतिरिदानीं श्रुतपूर्वः शब्दो नास्तीति । अनुमानादिति चेत्, न । शब्दस्यैव पक्षीकरणे हेतोरनाश्रयत्वात् । अनित्यत्वमात्रसाधने अभावस्य नियतकालत्वासिद्धेः । आकाशस्य पक्षत्वे तद्वत्तयाऽनुपलभ्यमानत्वस्य हेतोरनैकान्तिकत्वात् । शब्दसद्भावकालेऽपि तस्य सत्त्वात् । एवं कालपक्षेऽपि दोषात् । अहमिदानीं निःशब्दश्रोत्रवान्, शब्दोपलब्धिरहितत्वात्, बधिरवदिति चेत्, न । दृष्टान्तस्य साध्यविकलत्वात् व्याहतत्वाच्च । बधिरश्च श्रोत्रवांश्चेति व्याहतम् । तस्यापि च श्रवसो निःशब्दत्वे प्रमाणं नास्ति । अनुपभोग्यस्य उत्पादवैयर्थ्ये प्रमाणमिति चेत्, न । आद्यादिशब्दवदुपपत्तेः । तेषां शब्दान्तरारम्भं प्रत्युपयोगोऽन्त्यस्य न तथेति चेत्, न । अन्त्यत्वासिद्धेः । सर्वेषां चोत्पादवतां प्रयोजनतदभावयोरस्मादृशैरनाकलनात् । सुषुप्त्यवस्थायां श्वासप्रश्वासप्रयोजनवच्च तदुपपत्तेः । आरम्भे हि सति प्रयोजनमवश्यमिति व्याप्तेः । न त्वापाततः प्रयोजनानुपलम्भमात्रेणारम्भनिवृत्तिः । तथा सति कर्णशष्कुल्यवच्छेदोत्पाद एव नभसस्तं प्रति निवर्तेत । बधिरस्य तेनानुपयोगात् । विवादकाले बधिरकर्णः शब्दवान्, योग्यदेशस्यानावृतकर्णशष्कुलीसुषिरत्वात् तदितरकर्णशष्कुलीसुषिरवदिति । निःशब्दाः पणववीणावेणवः तदेकज्ञानसंसर्गयोग्यत्वे सति तदनुपलम्भेऽप्युपलभ्यमानत्वात् । यद् यदेकज्ञानसंसर्गयोग्यस्य अनुपलम्भेऽप्युपलभ्यते तत् तदभाववत् यथा अघटं भूतलमिति चेत्, न । एकज्ञानसंसर्गयोग्यत्वाभावात्, शब्दस्य श्रौत्रत्वाद् वीणादीनां चाक्षुषत्वात् । अभिमानमात्रादिति चेत्, न, तथापि शब्दप्रध्वंसस्यातद्देशत्वात् अत्यन्ताभावस्य च कालानियमात् ।

48. ननु यदि संयोगाभावप्रतीतौ सन्निकर्षमात्रार्थं भूतलस्योपयोगः स्यात् ततो नियमेन भूतलोपलम्भो न स्याद् यथा गन्धतदभावयोरन्यतरग्रहे दृश्योपलम्भः । तस्मान्न सन्निकर्षवदस्योपलब्धिरभावोपलब्धौ सत्यां सन्निकर्षो न त्वन्यथेति । **न चे**ति । तत्र चोपलब्धेनेन्द्रियसन्निकर्षपक्ष(क्षे) सुव्यक्तमितरेतराश्रयत्वम् । उपलभ्यमानेनेत्यत्र तु किमुपलब्धिसम्बन्धिना भूतलेनेत्यभिहितं सन्निहितभूतलोपलम्भकारणेन वा ? प्रथमे पूर्ववदितरेतराश्रयत्वात् । द्वितीये त्वेकसामग्रीप्रस्तु(सू)तत्वेनाभावप्रतीत्यङ्गत्वमशक्यवर्जनत्वादित्युपसंहारव्याजेनाह **तस्मादि**ति । ननु एवमेव प्रकृतेऽपि भविष्यतीत्यत आह – **प्रकृते त्वि**ति । तदुपयोगोऽधिकरणोपयोगः । **तस्ये**ति प्रतियोगिनः शब्दस्येत्यर्थः । **तदभावस्ये**ति सद्भावस्येत्यर्थः । विशेषणत्वादभावानामिति भावः । अवश्यं चैवंप्रकारोऽभ्युपगन्तव्यो गत्यन्तराभावादित्यत आह – **न चेदेवमि**ति । परो गत्यन्तरमाशङ्कते – **अनुमानादि**ति । अनुपलभ्यमानत्वाल्लिङ्गादित्यर्थः । ननु शब्दसद्भावकाले प्रध्वंसो नास्ति न चानुपलभ्यमानत्वमपि । तदभावकाले वा धर्मिणो अभावात् कश्चिन्नाश्रयहेतु(तुः) प्रध्वंसं साधयेदित्याशयवानाह [52A] – **न शब्दस्यैवे**ति । अथोपलभ्यमान एव शब्दः पक्षः, अनित्यत्वं च साध्यम्, हेतुश्च 'जातिमत्त्वे सति अस्मदादिबाह्यकरणप्रत्यक्षत्वात्' इत्यादि भविष्यतीत्यत आह - **अनित्यत्वे**ति । शब्दपक्षीकरणपक्षे दूषणमभिधायाकाशकालपक्षीकरण अनैकान्तिकत्वं दूषणमाह – **आकाशस्ये**ति । आत्मपक्षीकरणमाशङ्क्य साध्यविकलत्व-दृष्टान्तव्याघाताभ्यामपाकरोति - **अहमि**ति । व्याघातं व्याख्याय साध्यविकलत्वं दृष्टान्तस्योक्तं विवृणोति – **तस्यापी**ति । ननु यदि शब्दः स्याद् बधिरश्रवसि

तदेष उपभुज्येत, न चोपभुज्यते, तस्मान्नास्तीत्याशयवानाशङ्कते – **अनुपभोगे(ग्ये)**ति। तदेत[द]नैकान्तिकत्वं न(च) परिहरति – **नाद्ये**ति । आद्यानां शब्दानामनुपभोग्यानामप्युत्पादः स्वीक्रियते । तथा तथाऽनुपलभोग्य(पभोग्य)स्याप्युत्पादो भविष्यतीत्यर्थः । उपभोग्यशब्दारम्भकत्वेन परम्परयोपभोग्य(पयोग)त्वान्नोक्तदोषः। प्रकृतस्य तु न परम्परयाऽप्युपयोग इति मन्यमानः पुनः शङ्कते – **तेषामि**ति । प्रकृतस्याप्युत्पादसम्भवेनात्यन्ता(नान्त्यत्वा)सिद्ध्याऽनुपभोग्यत्वासिद्धिरित्याशयवान् परिहरति – **नान्ये**ति(**नान्त्यत्वे**ति) । बधिरश्रवसो निःशब्दत्वे प्रमाणाभावमुक्त्वा शब्दसद्भावे प्रमाणमस्तीति प्रतिपादयति – **विवादे**ति । यदा देशनिवासिभिः श्रोत्रवद्भिरुपलभ्यते शब्दस्तदा तत्रेत्यर्थः । अन्यदा अन्यत्र न निःशब्दत्वमस्माभिरभ्युपेयते । धर्म्यन्तरमुपादाय प्रमाणान्तरमाशङ्कते – **निःशब्दे**त्यादीति । 'शब्दवती वीणा' इत्येकज्ञानेन शब्दो वीणा च विषयीक्रियत इत्यनुभवसिद्धमशक्यापह्नवमिति । अत्र च निःशब्दा इति किं शब्दप्रध्वंससहिता इति साध्यार्थः किं वा शब्दसमवायित्वविरहिणः ? तत्राप्यसिद्धिबाधाभ्यां यथाक्रमं नाद्य इत्याह – **न, एके**ति । **अतद्देशत्वा**दिति । तथा च बाध इत्याशयः । द्वितीये सिद्धसाधनमित्यभिप्रायवान् नियतकालप्रतीत्यनुपपत्तिमाह [52B] – **अत्यन्ते**ति ।

49. स्यादेतत् । शब्दवदाकाशोपाधयो हि भेर्यादयः । तेन तेषु विधीयमानः शब्द आकाश एव विहितो भवति । प्रतिषिद्ध्यमानश्च तत्रैव प्रतिषिद्धो भवति । शरीरे सुखादिवदिति चेत्, न । तत्र सोपाधावात्मनि प्रत्यक्षसिद्धे सुखादिनिषेधस्यापि प्रत्यक्षसिद्धत्वात् । न चैवमिहापि, तदुपहितस्य नभसोऽप्रत्यक्षत्वात् । उपाधयस्तावत् प्रत्यक्षा इति चेत्, न । तैरभावानिरूपणात् । निरूपणे वा प्रत्यक्षेणापि ग्रहणप्रसङ्गात् । न चैवं सति पारमार्थिकाधिकरणनिरूपणीयत्वमभावस्य । न च तेऽपि प्रत्यक्षसिद्धाः । सर्वत्र शब्दकारणव्यवधानेऽप्युलब्धस्य शब्दस्य नास्तिताप्रतीतेः । आनुमानिकैस्तैस्तथाव्यवहार इति चेत्, न । हेतोस्तद्वत्तयाऽनुपलभ्यमानत्वस्यानैकान्तिकत्वात् । अभावप्रतीतिकाले संदिग्धाश्रयत्वाच्च । उपलभ्यमानविशेष्यत्वपक्षे चासिद्धेः । इन्द्रियव्यवधानाच्छब्दलिङ्गस्य चानुपलम्भात् । अपि च नष्टाश्रयाणां द्रव्यगुणकर्मणां नाशोपलम्भः कथम् ? न कथञ्चिदिति चेदाश्रयनाशात् कार्यनाश इति कुत एतत् ? अनुमानतस्तथोपलम्भादिति चेत्, न । तुल्यन्यायेनोक्तोत्तरत्वात् । तन्तुषु नष्टेष्वपि यदि पटो न नश्येत्, तद्वदेवोपलभ्येतेति चेत् । एतस्य तर्कस्यानुग्राह्यमभिधीयताम् । यदेवोपलभ्यते न तत् कार्यपरम्परावत्, योग्यस्य तथानुपलभ्यमानत्वे सति उपलभ्यमानत्वादिति चेत्, न । तन्त्वयवानां पटानाधारत्वे साध्ये सिद्धसाधनात् । पटध्वंसवत्त्वे साध्ये बाधितत्वात् । तस्य स्वप्रतियोगिकारणमात्रदेशत्वात् ।

49. शब्दा अन्योन्याभाववत् इत्यात्रापि सिद्धसाध्यता बोद्धव्या । उपाधौ विधिनिषेधावुपाधिमति भवत इति द्रष्टव्यमिति मन्वानः शङ्कते – **स्यादेतदि**ति । न्य(न) अन्यत्र तौ क्रियमाणावन्यत्र क्वापि किन्तु तत्रैवेति नियम इत्याशयवान् परिहरति – **न तत्रे**ति । अन्यत्राप्युपाधिमति निषेधो भविष्यति, न चैवम्, कुतः ? इत्यत आह – **उपहितस्ये**ति । अनुमानस्य चोक्तक्रमेण प्रवृत्त्यनुपपत्तेः । प्रतिषेध्य(षिद्ध्य)मानः इत्यस्यैवार्थस्यासिद्धौ दूरे उपाधिमति प्रतिषेधसिद्धिरिति भावः । उपाधिप्रत्यक्षत्वमाशङ्क्यानुमानानुपपत्तिमाह – **उपाधय** इति । **प्रत्यक्षेणापी**ति दृश्याधारत्वदृश्यप्रतियोगिकत्वयोः सभावा(संभवा)दिति ह्[द]यम् । यदि च तेष्वभावनिरूपणमा-

स्थीयते तदा दूषणान्तरमपीत्याह – **न चैवमिति** । प्रतियोग्यधिकरणमिति हि प्रसिद्धिर्न त्वन्यथा । प्रकृते तु तथा नास्तीत्यर्थः । न त्वत्र एवंभूतमधिकरणमुपादाय नियमं ब्रूमः, किन्त्वन्यादृशमेवेत्यतो नेदमनिष्टमस्माकमित्यत आह – **न च तेऽपीति** । तथा च प्रत्यक्षेण 'ध्वस्तः शब्दः' इति प्रतीत्यनुदयप्रसङ्ग इति शब्दलिङ्गमितैरुपाधिभिरानुमानिकशब्दध्वंसव्यापारो भविष्यतीत्याशङ्कते – **आनुमानिकैरिति** । परिहरति – **न हेतोरिति** । सशब्दा अपि वीणा कदाचिच्छब्दवत्तया नोपलभ्यते । स(श)ब्दा हि तत्र श्रोत्रेणौवोपलभ्यते(न्ते) न तु वीणा, तस्या अश्रोत्र(श्रौत)त्वादित्यर्थः । अनैकान्तिकत्वमुक्त्वा प्रकारान्तरमाश्रित्य संदिग्धाश्रयत्वमाह – **अभावेति** । यदा शब्देनानुमिता वीणा तदा अनैकान्तिकत्वम् । यदा तु शब्देनापि नानुमीयते व्यवधानादिभावे न प्रत्यक्षा तदा किं विद्यमानैव वीणा नोपलभ्यते आहोस्विदविद्यमानेति संदिग्धाश्रयत्वमित्यर्थः । अथ संदिग्धाश्रयत्वपरिहारार्थम् उपलभ्यमानैव वीणा [53A] पक्षी क्रियत इत्यत आह – **उपलभ्यमानेति** । असिद्धेराश्रयासिद्धेरित्यर्थः । यदा हि लातारिकुञ्जावरिभाव(वा)दिवीणाध्वनिश्च न्नो(नो)पलभ्यते तदा तावत् प्रत्यक्षेण वीणोपलब्धिनास्ति व्यवहितत्वात् । नाप्यनुमानेन लिङ्गाभावात् । नाप्याप्तवचनात् तस्याप्यभावादेवेति । यदि च प्रतियोग्याश्रयेणैव निरूप्यते अभावस्तदा आश्रयनाशेन निरूप्येत [त]थापि निरूप्यते चाश्रयनाशोऽपीत्युभयवादिसिद्ध इत्याशयवानाह – **इति चेन्न, तुल्यन्यायेनेति** । स्वरूपेणाकाशादीनां पक्षत्वे आश्रयासिद्धानैकान्तिकयोरित्युक्तत्वेनेत्यर्थः । न तत् कार्यपरम्परावदिति । किं तन्त्ववयवानां पटानाधारत्वं साध्यमथ पटप्रध्वंसाधारत्वम् ? उभयथापि सिद्धसाधनबाधाभ्यां यथाक्रममनुपपन्नमित्याह – **नेति** ।

50. ये पटध्वंसवन्तस्तन्तवस्तदभाववन्त एते अंशव इति साध्यमिति चेत्, न तन्तुनाशोत्तरकालं पटनाशात् तद्वत्तानुपपत्तेः । योग्यतामात्रसाधने च पटध्वंसासिद्धेः । तस्य नाशानाशयोः समानत्वात् । अनन्यगतिकतया विशिष्टनिषेधे कृते विशेषणानामप्यभावः प्रतीतो भवति । गुणक्रियावत्पटाधारास्तन्तवो न सन्ति स्वावयवेष्विति हि प्रत्यय इति चेत्, तथापि गुणकर्मणां पटस्य च प्रध्वंसः किमधिकरणः प्रतीयते इति वक्तव्यम् । अंश्वधिकरण एवेति चेत्, भ्रान्तिस्तर्हीयम् । तस्यातद्देशत्वात् । आश्रयावच्छेदकतया तेषामपि अदूरविप्रकर्षेण तद्देशत्वम्, एवम्भूतेनापि देशेन तन्निरूपणम्, योग्यताया अव्यभिचारादिति चेत् । न तर्हि प्रतियोगिसमवायिदेशेनैव प्रध्वंसनिरूपणमिति नियमः, प्रकारान्तरेणापि निरूपणात् । तस्माद् यस्य यावती ग्रहणसामग्री तं विहाय तस्यां सत्यां तदभावो यत्र क्वचिन्निरूप्यो देशे काले वा । इयांस्तु विशेषः । सा सती चेत्, प्रत्यक्षेण, असत्येव ज्ञाता चेत्, अनुमानादिनेति स्थितिः ।

50. पूर्वोक्तदोषभिया पटध्वंसविशिष्टतन्तुप्रध्वंसवत्त्वमंशूनामाशङ्क्य प्रकारान्तरेण बाध-सिद्धसाधनमाह – **ये** इति । यत्र हि विशिष्टनिषेधे सति विशेष्यसिद्धौ प्रमाणान्तरगतिरस्ति तत्र विशेषणमात्रपर्यवसायी निषेधः यथा 'न प्रतीचीशिराः शयीत' इति । यत्र तु विशेष्यसिद्धौ गत्यन्तरं प्रमाणान्तरं नास्ति तत्र विशिष्टमेव निषिध्यते यथा 'न जीर्णमलवद्वासा(सः) स्नातकः' इत्यत्र जीर्णवत्तामलवत्ताविशिष्टवासो निषिध्यते एवं प्रकृते इति । गुणक्रियावत्पटाधारतन्तुनिषेधे सति गुणकर्मपटानामपि निषेध इत्याशयवान् शङ्कते – **अनन्येति** । अन्यस्य विशेष्यस्य सिद्धौ गतिः प्रमाणान्तरसद्भावोऽन्यगतिः, न तथेत्यनन्यगतिरित्यर्थः । अत्र बाध इति हृदि निधाय प्रश्नद्वारेण परिहरति – **तथापीति** । प्रतियोग्यधिकरणाभिप्रायेण [53B] परोऽप्युन्नयति – **अंश्विति** । पूर्वं हृदिस्थितं बाधं प्रकटयति – **भ्रान्तीति** । नात्र प्रतियोगिदेशेन निरूपणं येनोक्तदोषः किन्तु यथाकथञ्चिद्देशता तथा च न बाध्या(धा)दिरित्याशङ्कते – **आश्रयेति** । गुणक्रियावत्पटाश्रयतन्त्ववच्छेदकानामंशूनाम्, तेषां तद्देशत्वं

गुणक्रियापटध्वंसदेशत्वं न त्वयमदेशत्वम् । नन्वयमदेश एवेति पुनरपि बाध इति चेतसि निधायाह - **एवमिति**। अनेन क्रमेणास्मदभिमतप्रतियोगिनात्र निरूपणीयत्वमेव सिद्धं न भवदभिमतप्रतियोग्यधिकरणनिरूपणीयत्वमित्याशयवान् परिहरति – **न तर्हीति** । एतदेवोपसंहरति – **तस्मादिति** । **यस्येति** भावस्य । **तमिति** ग्राह्यं तदविनाभूतेन्द्रियसन्निकर्षेणेत्यर्थः । **यत्र क्वचिदिति** तदेतत्प्रतियोगिसमवायिनि देश इति निरस्तम् । प्रमाणसिद्धदेशनियमवत् प्रमाणनियमोऽप्युभयसिद्ध इत्याशयवानाह - **इयांस्त्विति** । सतीत्वं योग्यानुपलम्भसहकृतत्वम् । असतीत्वमयोग्यानुपलम्भसहकृतत्वम् । योग्यानुपलम्भसहकृतलोचनेन घटाद्यभावग्रहणमिति प्रत्यक्षेण, देशान्तरस्थितदेवकुलादौ योग्यानुपलम्भाभावादनुमानेनाभावग्रहणमित्युभयसिद्धमित्यर्थः। आदिग्रहणादाप्तवचनेनापि यथा 'इह प्रदेशेऽग्निर्नास्ति' इति । स्थितिर्व्यवस्थितिरविरोधात् प्रामाणिकत्वाच्चेति ।

51. एतेन 'सद्ध्यामभावो निरूप्यते' इत्यादिशास्त्रविरोधः परिहृतो वेदितव्यः । उभयनिरूपणीयप्रतियोगिविषयत्वादनुमानविषयत्वाच्च । अन्यथा आश्रयासिद्धिप्रसङ्गात् । तत्रापि न ग्रहणे नियमः, ज्ञानमात्रं तु विवक्षितम्, तावन्मात्रस्यैव तदुपयोगात्, क्वचिद् ग्रहणस्य सामग्रीसम्पातायातत्वात् । यदि चाधिकरणग्रहे शास्त्रस्य निर्भरः स्यात्, 'वह्नेर्दाह्यं विनाश्यानुविनाशवत् तद्विनाशः' [न्यायसूत्र, ४.१.२७] इति नोदाहरेत्, असिद्धत्वात् । न हि वह्निविनाशस्तदवयवपरम्परास्वेव निरूप्यः । तासामनिरूपणात् । नाऽप्यन्यत्र गमनाभावादिना पारिशेष्यादनुमेयः । हेतोरेव निरूपयितुमशक्यत्वात् । आश्रयानुपलब्धेः । नापि निमित्तविनाशात् सर्वमिदमेकवारेण सेत्स्यति इति युक्तम् । तस्यानैकान्तिकत्वात् । तेजसा विशेषितत्वादयमदोष इति चेत्, न । व्याप्त्यसिद्धेः । न हीन्धनविनाशात् तेजोद्रव्यमवश्यं विनश्यतीति क्वचित् सिद्धम्, प्रत्यक्षवृत्तेरनभ्युपगमात् । तस्माद् यत्त्यागेनान्यत्र गमनं न सम्भाव्यते तेन निमित्तादिनाऽपि देशेन प्रध्वंसो निरूप्यते इत्यकामेनापि स्वीकरणीयम्, गत्यन्तराभावात् । अत एव तमसः प्रत्यक्षत्वेऽप्यभावत्वमामनन्त्याचार्याः । एतेन शब्दप्रागभावो व्याख्यातः । एवं स्थिते अनुमानमप्युच्यते । शब्दोऽनित्यः उत्पत्तिधर्मकत्वात् घटवत् । न चेदं प्रत्यभिज्ञानबाधितम् । तस्य ज्वालादिप्रत्यभिज्ञानेनाविशेषात् । नैवमबाधितस्य तस्य स्वतः प्रमाणत्वादिति चेत्, तुल्यम् । ज्वालायां तन्नास्ति, विरुद्धधर्माध्यासेन बाधितत्वात्, अन्यथा वेदव्यवहारविलोपप्रसङ्गो निमित्ताभावात्, आकस्मिकत्वे वा अतिप्रसङ्ग इति चेत्, तुल्यम् । शब्देऽपि तीव्रतीव्रतरत्वमन्दमन्दतरत्वादेर्भावात् तदिह न स्वाभाविकमिति चेत्, न । स्वाभाविकत्वावधारणन्यायस्य तत्र तत्र सिद्धस्यात्रापि तुल्यत्वात् । न ह्यपां शैत्यद्रवत्वे स्वाभाविके तेजसो वा औष्ण्यभास्वरत्वे इत्यत्रान्यत् प्रमाणमस्ति प्रत्यक्षाद् विना । तत्तथैव युज्यते, अन्यस्योपाधेरनुपलम्भान्नियमेन तद्गतत्वेन चोपलम्भादिति चेत्, तुल्यमेतत् । तथाप्यतीन्द्रियान्यधर्मत्वशङ्का स्यादिति चेत्, एतदपि तादृगेव । तत् किं यद्गतत्वेन यदुपलभ्यते तस्यैव स धर्मः । नन्वेवं पीतः शङ्खः, रक्तः स्फटिकः, नीलः पट इत्यपि तथा स्यादविशेषात् । न । पीतत्वादीनामन्यधर्मत्वस्थितौ शङ्खादीनां च तद्विरुद्धधर्मत्वे स्थिते जपाकुसुमाद्यन्वयव्यतिरेकानुविधानाच्च बाधेन भ्रान्तत्वावधारणात्, न चेह तारतारतरत्वादेरन्यधर्मत्वस्थितिः । नापि शुकसारिकादिगकाराणां तद्विरुद्धधर्मत्वं नाप्यन्यस्य तद्धर्मिणोऽन्वयव्यतिरेकावनुविधत्ते ।

51. क्वचित् शास्त्रस्य विशेषणनिष्ठत्वाद् विरोधोऽपि नास्तीत्याह – **एतेने**ति । विशेषणनिष्ठतामाह - **उभये**ति । उभाभ्यां संयोगिभ्यां संयोगो निरूप्यते, तेन तदभावोऽपि तयोरेवेति । व्यापकनिवृत्त्या लिङ्गेन व्याप्यनिवृत्तिर्यत्र तत्राश्रयग्रहणमुपयुज्यते, तदग्रहे आश्रयासिद्धिरित्याह – **अन्यथे**ति । [54A] आश्रयग्रहणपक्षेऽपि न प्रत्यक्षेणैवेति किन्तु येनकेनचिदिति वर्णितं प्रकृतोपयोगादित्याह - **तत्रापी**ति । एवं चेत् 'इह भूतले घटो नास्ति' इत्यत्र कथं प्रत्यक्षेणैव भूतलग्रहणमित्यत आह - **क्वचिदि**ति । आश्रयग्रहणनियमाभावश्च सूत्रकारस्य सम्मत इत्याशयवानाह - **यदि चे**ति । **असिद्धत्वादि**ति । अत्र दृष्टान्ततयोपात्तस्य वह्निविनाशस्याप्रतीतेरित्यर्थः । असिद्धिमेव व्युत्पादयति - **न ही**ति । **हेतोरेवे**ति । आश्रयाप्रसिद्ध्या अनुपलभ्यमानत्वादित्यस्य हेतुत्वेना-निरूपणादित्यर्थः । प्रकारान्तरमाशङ्क्य परिहरति - **नापी**ति । न च निमित्तनाशोऽप्यसिद्धः, इन्धनविनाशस्याङ्गारेषु प्रत्यक्षसिद्धत्वात्, ततोऽन्यत्र गमनाभावः तत्प्रध्वंसश्चेति सर्वमित्यर्थः । अनियममु[प]सहरति - **तस्मादि**ति । **अत एवे**ति । यत एवानियमो अत एव तमस प्रत्यक्षत्वमभावस्येति एवं सो(सू)र्यमणौ । गकारो नास्ति अनुत्पन्ना(त्ति)काला(ले) इति प्रत्यक्षेणैव शब्दप्रागभावः प्रतीयत इत्याशयवानाह – **एतेन** इति । **व्याख्यात** इति । प्रत्यक्षतयेति शेषः । एवं प्रत्यक्षेणानित्यत्वे साधिते प्रमाणसम्प्लव(वात्) कारणानुमानेनाप्येवमि[त्यनि]त्यत्वं साधयति – **एवमि**ति । प्रत्यभिज्ञानबाधमाशङ्क्य तदयथार्थत्वेन निरनुयोज्यानुयोगाभिप्रायेण परिहरति – **न चेदमि**ति । नेदमयथार्थं येनाबाधकमित्याशङ्कते – **नैवमि**ति । **स्वत** इति स्वयमित्यर्थः । तर्हि ज्वालाप्रत्य-भिज्ञानमप्येवमिति प्रमाणमिति तद्भेदग्राहिप्रमाणमास्कन्दत्येवेति मन्यमानः परिहरति - **तुल्यमि**ति । अथ दृढतरप्रमाणसमधिगतभेदविषयतया तदप्रमाणम्, प्रकृतेऽप्येवमिति शङ्कोत्तराभ्यामाह – **ज्वालायामि**ति । ननु तत्र प्रमाणभेदो वा भेदकस्वरूपभेदावभासो वाऽस्ति । शब्दे तु न परिमाणादिकमिति यदि कश्चिद् ब्रूयात् तत्र विरुद्धधर्मसंसर्गमाह - [54B] **शब्देऽपी**ति । तीव्रो गकारो मन्दो गकार इति तीव्रत्वमन्दत्वादेर्धर्मभेदस्य शब्देऽपि सत्त्वात्, उपलक्षणं चैतत् । धर्मभेदादयं गौ अशुक्लोऽयं च शुक्ल इति वदयं पकारो मन्दोऽयं च तीव्र इति धर्मभेदावगाहिनी प्रतीतिरप्यस्तीति तुल्यमित्यर्थः । पारमार्थिकविरुद्धधर्मसम्पर्को भेदको न तु विपरीत इत्याशङ्क्याह - **तदिहे**ति । तदेतदन्यत्र स्वाभाविकत्वसाधकयुक्तितुल्यतया न भवदभिमतं तु [सं]गच्छती-त्याशयेनान्यत्र सिद्धं न्यायसमानत्वं संदर्शयन् परिहरति – **ने**ति । उक्तविशेषमनाकलय्य पुनः शङ्कते - **तत् किमि**ति । उक्तविशेषविभावनेन परिहरति – **ने**ति । **अन्यधर्मत्वस्थितिः** । शब्दं विहायान्यस्य सन्निहितस्य कस्यचित् तारतारतरत्वादयो धर्मा इति न व्यवस्थितिरिति यतस्तद्विरुद्धधर्मत्वमिति । **तद्धर्मिण** इति तीव्रत्वादि-धर्मिण इत्यर्थः ।

52. तथापि शङ्का स्यादिति चेत् । एवमियं सर्वत्र ? तथा च न क्वचित् कुतश्चित् सिद्ध्येत् । न चैतच्छङ्कितुमपि शक्यते । अप्रतीते संस्काराभावात् । संस्कारानुपनीतस्य चारोपयितुमशक्यत्वात् । न च ध्वनिधर्मा एव गृह्यन्ते । स्पर्शाद्यनन्तर्भावेन भावेषु त्वगादीनामव्यापारात् । न च श्रवणेनैव तद्ग्रहणम् । अवायवीयत्वेन तस्य वायुधर्मागाहकत्वात् चक्षुर्वत् तारतारतरत्वादयो वा न वायुधर्माः श्रावणत्वात् कादिवत् । वायुर्वा न श्रवणग्राह्यधर्मा मूर्तत्वात् पृथिवीवत् । यदि च नैवं कादीनामपि वायवीयत्वप्रसङ्गः । ततः किम् ? अवयविगुणत्वेऽनित्यत्वम्, परमाणुगुणत्वेऽग्रहणम्, द्वयमप्येतदनिष्टं भवतः । अवश्यं च श्रवसा ग्राह्यजातीयगुणवता भवितव्यम्, बहिरिन्द्रियत्वाद् घ्राणादिवत् । सन्तु ध्वनयोऽपि नाभसाः, तथा च तद्धर्मग्रहणं श्रवसोपपत्स्यत इति चेत्, न । तारस्तारतरो वाऽयं गकार

इत्यत्र ध्वनीनामस्फुरणात् । न च व्यक्त्या विना सामान्यस्फुरणम् । कारणाभावात् । व्यक्तिस्फुरण-सामग्रीनिविष्टा हि जातिस्फुरणसामग्री । कुत एतत् ? अन्वयव्यतिरेकाभ्यां तथाऽवगमात् । ऐन्द्रिय-केष्वेव घटादिषु सामान्यग्रहणात्, अतीन्द्रियेषु च मनःप्रभृतिष्वग्रहणात् । स्वरूपयोग्यतैव तत्र निमित्तम्, अकारणं व्यक्तियोग्यतेति चेत् । एवं तर्हि सत्ताद्रव्यत्वपार्थिवत्वादीनां स्वरूपयोग्यत्वे परमाण्वादिष्वपि ग्रहणप्रसङ्गः । अयोग्यत्वे घटादिष्वपि तदनुपलम्भापत्तिरिति दुरुत्तरं व्यसनम् । तस्माद् व्यक्तिग्रहण-योग्यताऽन्तर्गतैव जातिग्रहणयोग्यतेति तदनुपलम्भे जातेरनुपलम्भ एव । तथा च न तारत्वादीनामा-रोपसम्भव इति स्वाभाविकत्वस्थितौ विरुद्धधर्माध्यासेन भेदस्य पारमार्थिकत्वात् प्रत्यभिज्ञानमप्रमाणमिति न तेन बाधः ।

52. चार्वाकवराकमतमालम्ब्य शङ्कते — **तथापी**ति । तन्मतावलम्बने समंगतं(असंगतिः) मीमांसकस्या-नुमानस्वीकाररतस्येत्यभिप्रायवान् परिहरति — **एवमियमि**ति । शङ्का हि - किं यः कश्चिदुपाधिर्भविष्यति इत्युपाधिशङ्का प्रमाणनिश्चितोपाधिशङ्का वा ? आद्ये सार्वत्रिकत्वप्रसङ्गेन न किञ्चित् कुतश्चित् क्वाप्यनुमीयेते-त्याशयवानाह - **तथा चे**ति । द्वितीये **न चैतदि**ति । ननु ध्वनिधर्मास्तीव्रत्वादयो ध्वनिष्वप्रतिभासमानेष्वपि स्मर्यमाणा एवारोप्यन्त इत्यत आह — **न चे**ति । ध्वनयो हि वायवीयाः, नान्ये । तथा च त्वगादिभिरग्रहात् धर्माणां तीव्रत्वादीनां सामान्यानामग्रहणमिति नारोपयितुं शक्यते । अग्रहः कथमित्यत आह — **स्पर्शे**ति । मा भूत् त्वचा ग्रहणं श्रोत्रेणैव ग्रहणं भविष्यतीत्याशङ्क्य अवायवीयत्वेन वायुधर्मग्राहकत्वं निषेधयति — **न चे**ति। श्रोत्रं न वायुधर्मग्राहकमवायवीयत्वात् चक्षुर्वदिति प्रयोगः । अवायवीयस्य [55A] वायुधर्मग्राहकत्वे को विरोधः । न हि यदिन्द्रियवत्प्रकृतिकं तत् तद्गुणस्यैव ग्राहकमिति नियमोऽस्ति । तैजसेन चक्षुषा नीलाद्यग्रहणप्रसङ्गा-दिति चेत्, न नियमानवबोधात् । यो गुणो येन बाह्येन्द्रियेण गृह्यते तदिन्द्रियं तज्जातीयगुणवदिति नियमः । अतो यदि तारतारतरत्वादयो वायुगुणा श्रोत्रेण गृह्यन्ते ततः श्रोत्रमपि तद्गुणवदिति वायवीयत्वं तस्यापाद्यतति-(पद्येतेति)। विपक्षे बाधकात् प्रतिबन्धसिद्धिरिति सुस्थित[म्] । नादव[त्] श्रोत्रस्य वायुधर्मग्राहकत्वे वायवीयत्वप्रसङ्गलक्षणतर्कपुरस्कारेण प्रमाणं दर्शयित्वा श्रोत्रेण नभःप्रकृतिकेन तीव्रत्वादीनां वायुधर्मत्वे अग्रहणप्रसङ्गपुरस्कारेण प्रमाणं दर्शयति — **तारे**ति । प्रमाणान्तरेणापि वायवीयत्वं निराकरोति - **वायुत्वे**ति। सर्वत्र विपक्षे बाधकाभावमाशङ्क्य निराकरोति - **यदि चे**ति । श्रोत्रस्य नभःप्रकृतिकत्वमाह — **अवश्यं चे**ति। ध्वनीनां वायवीयत्वे उक्तदोषः न तु नाभसत्व इति मन्यमानः शङ्कते — **सन्त्वि**ति । ध्वनयो हि नाभसाः विभुद्रव्यसमवायिकारणत्वात् गुणा एवेति तद्धर्मास्तारतरत्वादयः सामान्यरूपा गकारादिषु प्रतिभासमानेषु न प्रतिभासेरन् । प्रतिभासते च प्रतिभासमानेषु गकारादिष्वित्याशयवानाह - **ने**ति । **ध्वनीनामि**ति । तारतरत्वादि-सामान्यसमवायिनीनां व्यक्तीनामित्यर्थः । ननु व्यक्तिप्रतिभासो न भविष्यति भविष्यति च जातिप्रतिभास इत्यत आह — **न चे**ति। कुत इत्यत आह — **कारणाभावादि**ति । यदि तु कश्चिद् वैयात्यानशपातनवनुगादिषु[१] प्रतिभासमानेषु तारइत्यनेन(ना)कारेण तारत्वसामान्यविशिष्टे[षु] ध्वनिरपि प्रतिभाति । 'रक्तः पटः' इत्यत्र सवु-क्त(?संयुक्त)द्रव्यददिभि(?व्यं तदिति)[२] तं प्रति वक्तव्यम् । किं वक्तव्यम् ? 'तारो गकारः' इत्यत्र धर्मद्वय(यं) तत् प्रतिभासते न वा ? न प्रथमो गत्व-तारत्वसामान्ययोरबाधिता[55B]सामानाधिकरण्यानुभवविरोधात्। द्वितीये तु नभोजन्य(न्या)तिरिक्ताकारसिद्धौ प्रमाणाभावः । न चैवं रक्तः पट इत्यत्रापि धर्मद्वयानवभासादारो-

१-२. भ्रष्टः पाठः ।

पानुपपत्तिस्तत्र वैयधिकरण्येनापि तदनुभावाद् रक्तं महारजनादितत्सम्बन्धात् शुक्लोऽपि पटो रक्त इति प्रतीतेः सर्वजनसिद्धत्वादिति निरवद्यमेतत् । तत्र च यद्यपि सर्वत्रैव तथापि प्रकृतानुरोधात् प्रत्यक्षे तावत् व्यक्तिग्रहण-सामग्रीं विना न जातिसामग्रीति प्रमाणसिद्धमिति स्फुटयति – **व्यक्ती**ति । परमतमाशङ्क्यानिष्टप्रदर्शनेनोक्तमेव नियममुपसंहरति – **स्वरूपे**ति । न च परमाणुष्वगृह्यमाणेषु सत्ता स्वरूपेण गृह्यते न च बहुत्वेन तेषामती-न्द्रियत्वादिति वाच्य[म्] । परमाणूनामिन्द्रियप्रत्यासत्तौ सत्यां स्वरूपेण ग्रहणस्य प्रसञ्ज[त]त्वात् । अस्याभ्यु-पगमे ति(तु) घटाद्यग्रहेऽपि घटत्वादिग्रहस्य दुर्वारत्वादिति व्यक्तमुक्तसि(मि)ति । न च यथा अरुणत्वसामान्या-धिष्ठानोऽरुणिमा स्फटिके समारोप्यते तथा तारत्वादिधर्माधिष्ठानभूता नाभसा ध्वनयो गकारे समारोप्यन्त इति वाच्या(च्यम्) । अरुणत्वाश्रयजपाकुसुमवत् ता[रा]द्याश्रयाभिमतध्वनीनामप्रतिपत्तेः बाधकाभावेन चारोपानुपपत्तेः । न हि तथाभूतधर्माधिष्ठानत्वेन परिस्फुरति । गकारे बाधकमस्ति । न चासति बाधके औपाधिकत्वं संभवतीति । निरूपद्रवमिति । विरुद्धधर्मसंसर्गासिद्धिरिति रहस्यम् । एवमुपक्रान्ततज्ज्वालाप्रत्यभिज्ञानसमानतामुपपाद्योपसंहरति - **तथा चे**ति । एवमबाधिते बाधाभिधानं निरनुयोज्यानुयोगो वेदितव्याः(व्यः) । [56A]

53. नापि सत्प्रतिपक्षत्वम् । मिथो विरुद्धयोर्वास्तवतुल्यबलत्वाभावात् । एकस्यान्यतमाङ्ग-वैकल्यचिन्तायामस्य वैकल्ये तस्यैवोद्भाव्यत्वात्, अवैकल्ये त्वदीयेनैव विकलेन भवितव्यमिति हीनस्य न सत्प्रतिपक्षत्वम् । तथापि नित्यः शब्दोऽद्रव्यद्रव्यत्वादित्यत्रापि साधनदशायां किञ्चिद् वाच्यमिति चेदसिद्धिः । द्रव्यं शब्दः साक्षात्सम्बन्धेन गृह्यमाणत्वाद् घटवदिति सिद्ध्यतीति चेत्, न । एतस्याप्यसिद्धेः । न हि श्रोत्रगुणत्वे द्रव्यत्वे वाऽसिद्धे साक्षात्सम्बन्धे शब्दस्य प्रमाणमस्ति । परिशेषोऽस्ति । तथाहि । सदाद्यभेदेन सामान्यादित्रयव्यावृत्तौ मूर्तद्रव्यसमवायनिषेधेन कर्मत्वनिषेधाद् द्रव्यगुणत्वपरिशेषे संयोग-समवाययोरन्यतरः सम्बन्ध इति चेत्, न । बाधकबलेन परिशेषे द्रव्यत्वस्यापि निषेधाद् लिङ्गग्राहक-प्रमाणबाधापत्तेः । बाधके सत्यपि वा द्रव्यत्वाप्रतिषेधे कर्मत्वादीनामप्यप्रतिषेधप्रसक्तौ परिशेषासिद्धेः, तस्मादेकदेशपरिशेषो न प्रमाणम्, सन्देहसङ्कोचमात्रहेतुत्वात् । अथ द्रव्यत्वे किं बाधकम् ? उच्यते - शब्दो न द्रव्यम्, बहिरिन्द्रियव्यवस्थाहेतुत्वात्, रूपादिवदिति परिशेषाद् गुणत्वेन समवायिसिद्धौ लिङ्गग्राहकप्रमाणबाधितत्वाद् नाव्यवहितसम्बन्धग्राह्यत्वेन द्रव्यत्वसिद्धिः । न चासिद्धेन सत्प्रतिपक्षत्वम्, असिद्धस्य हीनबलत्वात् । ननु शब्दस्तावदश्रोत्रगुणो नैवेति त्वयैव साधितं प्रबन्धेन । न च श्रोत्रगुणः, तेन गृह्यमाणत्वात्, यद् येनेन्द्रियेण गृह्यते नासौ तस्य गुणः, यथा गृह्यमाणो गन्धादिः । श्रोत्रं वा न स्वगुणग्राहकम्, इन्द्रियत्वाद् घ्राणवदिति न गुणत्वसिद्धिरिति चेत् । ततः किम् ? न चैतदपि । घ्राणादिसमवेतगन्धाद्यग्रहे स्वगुणत्वस्याऽप्रयोजकत्वात् । अयोग्यत्वं हि तत्रोपाधिः । अन्यथा सुखादिर्ना-त्मगुणः, तेन गृह्यमाणत्वाद् रूपादिवत् । न वा तेन गृह्यते तत्समवेतत्वाददृष्टवत् । आत्मा वा न तद्ग्राहकः, तदाश्रयत्वात्, गन्धाद्याश्रयघटादिवदित्याद्यपि शङ्कित । तस्मात् स्वगुणः परगुणो वाऽयोग्यो न गृह्यते, गृह्यते तु योग्यो योग्येन, तत् किमत्रानुपपन्नम् ।

53. सत्प्रतिपक्षत्वमाशङ्क्य समुन्मूलयति - **नापी**ति । वास्तवाभिमानिकतुल्यबलत्वानुपपत्तेर्न प्रतिरोधः इति पूर्ववद् विज्ञेयम् । **अस्य वैकल्य** इति । शब्दानित्यत्वसाधनस्य । **तस्यैवे**ति वैकल्यदोषस्येति यावत्। वाच्यत्वात् प्रतिपादनीयत्वादित्य(ति प)क्षः । अवैकल्ये शब्दानित्यत्वसाधनस्य । **त्वदीयेनैवे**ति । प्रतिपक्ष-

त्वेनाभिमतेनेत्यर्थः । विकलेन हीनेनेत्यर्थः । वास्तवं तुल्यबलत्वं निरस्याभिमानिकमुपन्यस्य निराकरोति – **तथापी**ति । अपि साधनदशायामपीत्यत्र बोद्धव्यः । न केवलं सत्प्रतिपक्षदूषणपक्षे साधनदशायामपीत्यर्थः । **अद्रव्यद्रव्यत्वादि**ति । द्रव्यत्वादित्युच्यमाने घटेनानैकान्तो भवेत् तन्निवृत्त्यर्थमद्रव्येति । न विद्यते द्रव्यं समवायि यस्य तदद्रव्यम् । एतावन्मात्रे च प्रागभावेनानैकान्तिकमत उभयपदोपादान[म्] । अद्रव्यं च तद् द्रव्यं चेति कर्मधारयः । परमाणुश्च दृष्टान्तो बोद्धव्यः । हीनबलस्य न प्रतिरोधकत्वं न च साधकत्वमित्याशयवानाह – **असिद्धिरि**ति । विशेषणविशेष्ययोरसिद्धिरित्यर्थः । विशेष्यसिद्धौ प्रमाणमाह – **द्रव्यमि**ति । शब्दो द्रव्यमित्यर्थः । एतदपि द्रव्यत्व[गुणत्व]योरन्यतरासिद्धावसिद्धत्वेनाप्रमाणमित्याशयवानाह – **ने**ति । न च साक्षात् सम्बन्धेन गृह्यमाणत्वमु[56B]भयसिद्धमन्यथाऽपसिद्धान्तप्रसङ्गादिति वाच्यम् । शब्दस्य गुणत्वानभ्युपगमे तस्य प्रत्येतुमशक्यत्वादिति विवक्षितत्वादित्याशयवानाह – **न हीति** । नन्वस्ति द्रव्यत्वगुणत्वयोरन्यतरसाधकः परिशेष इत्याह – **परिशेष** इति । सत्तादे(द्य)भेदः सत्तायोगित्वम् । अपरसामान्यवत्त्वं च शब्देन सामान्यतमवत् सत्तायोगित्वार(त्) परसामान्यवत्त्वाद् वा द्रव्यादिवत् । न कर्म मूर्तद्रव्यासमवायात् बुद्धिवदिति । एवमपि बाधितत्वेन द्रव्यत्वेन द्रव्यत्वसाधनमप्रमाणमित्याह - **ने**ति । इतरत्र तन्निषेधे द्रव्यगुणत्वसिद्धौ लिङ्गग्राहकप्रमाणबाध इत्यर्थः । अथ द्रव्यत्वनिवेक(निषेधक)सम्भवेऽपि नाद्रव्यसिद्धिस्तदा तेनैव न्यायेन कर्मत्वनिषेधेऽसिद्धिः पूर्वोक्तैवेत्याशयवानाह – **बाधके सत्यपी**ति । अथैकदेशपरिशेषादेव द्रव्यत्वादिसंभावनेति हृदि निधायोपसंहरति – **तस्मादि**ति । मात्रार्थस्त्वेकदेशपरिशेषो न सर्वत्र । प्रहृतसंदेहवत्त्वेन हेतुरपि । अथ नैकत्र संरो(दे)ह(हः) । यत्र बाधकं तत्र संशयोच्छित्तिना(र्ना)न्यत्र, स्वविषयमात्रप्रवृत्तत्वाद् बाधकस्येत्यर्थ । द्रव्यत्वे किमपि न बाधकमस्तीत्याशयवान् पृच्छति - **अथे**ति । अस्तीहापि बाधकमित्याशयवानाह – **उच्यत** इति। ननु द्रव्यत्वस्यासिद्धौ [57A] किं नश्छिन्नमित्यत आह – **न चे**ति । अभिमतं सत्प्रतिपक्षत्वमनित्यत्वानुमानस्य न स्यादिति छिन्नमित्यर्थः । उपलक्षणं चैतत् । न सत्प्रतिपक्षत्वं साधनत्वमप्यसिद्धे भवतीत्यपि द्रष्टव्यम् । ननु यथा द्रव्यत्वे बाधकसंभवान्न तत्सिद्धिस्तथा गुणत्वे बाधकसंभवान्न गुणत्वसिद्धिः ततो न लिङ्गग्राहकमानबाधक इति मन्वानो गुणत्वेऽपि बाधमाशङ्कते – **नन्वि**ति । नन्वेवमपि गुणत्वानभ्युपगमे द्रव्यत्वासिद्धौ च साक्षात्सम्बन्धेन ग्रहणत्वे न किञ्चित् प्रमाणमुक्तं स्यादित्याशयवानाह – **ततः किमि**ति । अद्य प्रमाणस्य विपक्षे बाधकभावेनावगतप्रतिबन्धत्वादित्युक्ते यदि विपक्षबाधकबुद्ध्याभिदध्या[त्] ध्वदि(नि)त्वगुणः स्यात् तदाऽनेन ग्रहणं न स्यादिति हृदि निधायायोग्यत्वोपाधिप्रयुक्तत्वेन तस्य गुणस्याप्रयोजकत्वप्रदर्शनेनोन्मूलितप्रतिबन्धेनाबाधकत्वाव्यतिरेकव्याप्तौ च तदुपाधिप्रयुक्तत्वेन प्रतिबन्धो(न्धा)सिद्धत्वमिति परिहरति – **न चैतदपी**ति । तथा चेन्द्रियग्राह्यत्वप्रयुक्तमिन्द्रियागुणत्वमिति । न । किं तर्हि ? अनाश्रिततया अबाधितप्रमाया(याः) प्रतीयमानत्वप्रयुक्तमिति द्रष्टव्यम् । द्वितीयेऽपि प्रयोगेऽयोग्यगुणेन्द्रियत्वप्रयुक्तं स्वगुणाग्राहकत्वम् न त्वीन्द्रियत्वप्रयुक्तमिति द्रष्टव्यमिति । एवमनभ्युपगमे बाधकमप्याह - **अन्यथे**ति । उक्तं सर्वमुपसंहरति – **तस्मादि**ति।

54. अवश्यं च श्रोत्रेण विशेषगुणग्राहिणा भवितव्यम् । इन्द्रियत्वात् । अन्यथा तन्निर्माणवैयर्थ्यात् तदन्यस्येन्द्रियान्तरेणैव ग्रहणात् । न च द्रव्यविशेषग्रहणे तदुपयोगः । विशेषणयोग्यतामाश्रित्यैवेन्द्रियस्य द्रव्यग्राहकत्वात्, न द्रव्यस्वरूपयोग्यतामात्रेण । अन्यथा चान्द्रमसं तेजः स्वरूपेण योग्यमिति तदप्युपलभ्येत । आत्मा वा मनोग्राह्य इति सुषुप्त्यवस्थायामप्युपलभ्येत । अनुद्भूतरूपेऽपि वा चक्षुः प्रवर्तेत, तस्माद् गुणयोग्यतामेव पुरस्कृत्येन्द्रियाणि द्रव्यमुपाददते, नातोऽन्यथेति स्थितिः । अत एव

नाकाशादयश्चाक्षुषाः । अस्तु तर्हि शब्दो नित्यः, नित्याकाशैकगुणत्वात्, तद्गतपरममहत्परिमाणवदिति प्रत्यनुमानमिति चेत्, न । अकार्यत्वस्योपाधेर्विद्यमानत्वात् । अन्यथा आत्मविशेषगुणा नित्याः, तदेकगुणत्वात्, तद्गतपरममहत्त्ववदित्यपि स्यात् । अस्य प्रत्यक्षबाधितत्वादहेतुत्वमिति चेत्, न । निरुपाधेर्बाधानवकाशात् । स्वभावप्रतिबद्धस्य च तत्परित्यागे स्वभावपरित्यागप्रसङ्गात् । तस्माद् बाधेन वोपाधिरुन्नीयते, अन्यथा वेति न कश्चिद् विशेषः । एतेन श्रावणत्वाच्छब्दत्ववदित्यपि परास्तम् । अत्रापि तस्यैवोपाधित्वात् । अन्यथा गन्धरूपरसस्पर्शा अपि नित्याः प्रसज्येरन् । घ्राणाद्येकैकेन्द्रियग्राह्यत्वाद् गन्धत्वादिवदित्यपि प्रयोगसौकर्यात् । विरोधव्यभिचारावसम्भावितावेवात्रेत्यसिद्धिरवशिष्यते । सापि नास्ति । तथाहि । शब्दस्तावत् पूर्वोक्तन्यायेन स्वाभाविकतीव्रमन्दतरतमादिभावेन प्रकर्षनिकर्षवानुपलभ्यते । इयं च प्रकर्षनिकर्षवत्ता कारणभेदानुविधायिनी सर्वत्रोपलब्धा । अकारणका हि नित्याः प्रकर्षवन्त एव भवन्ति, यथा आकाशादयः । निकृष्ट एव वा यथा परमाण्वादयः । न तु किञ्चिदतिशयानाः कुतश्चिदपकृष्यन्ते । तदियं नित्येभ्यो व्यावर्तमाना कारणवत्सु च भवन्ती जायमानतामादायैव विश्राम्यतीति प्रतिबन्धसिद्धौ प्रयुज्यते, शब्दो जायते, प्रकर्षनिकर्षाभ्यामुपेतत्वान्माधुर्यादिवत् । अन्यथा नियामकमन्तरेण भवन्ती नित्येष्वपि सा स्यात् । नियमहेतोरभावात् । शब्दादन्यत्रेयं गतिरिति चेत्, न, साध्यधर्मिणं विहायेति प्रत्यवस्थानस्य सर्वानुमानसुलभत्वात् । न चेद् व्यञ्जकतारतम्याद् व्यङ्गनीयतारतम्यम्, अस्वाभाविकत्वप्रसङ्गात् । व्यवस्थितं च स्वाभाविकत्वम् । न च व्यञ्जकोत्पादकाभ्यामन्यस्यानुविधानमस्ति । न च स्वाभाविकत्वौपाधिकत्वाभ्यामन्यः प्रकारः सम्भवति ।

54. परकीयं बाधकमपाकृत्य शब्दस्य श्रोत्रगुणत्वसाधकं प्रमा[णमा]ह - **अवश्यं चे**ति । [57B]विपक्षे बाधकमाह - **अन्यथे**ति । द्रव्यविशेषग्रह एव उपयोगमाशङ्क्य निराकरोति । तत्रापि विपक्षे बाधकान्याह - **अन्यथे**ति । व्युत्पादितमर्थमुपसंहरति - **तस्मादि**ति । न च तारत्वादिगुणपुरस्कारादेव सर्वं समञ्जसमिति वाच्यम्, तारत्वादीनामन्यधर्मत्वस्वीकारेण तद्गुणत्वानभ्युपगमात् । किञ्च, तीव्रं सुखं मन्दं सुखं तीव्रं दुःखं मन्दं चेति । तारत्वादीनां गुणगतत्वेनावगमात् सामान्यरूपत्वमिति सर्ववादिसिद्धमिति निरुपद्रवमेतदिति । एवं भट्टमते स्वपक्षसाधनप्रतिरोधपक्षसाधनप्रतिरोधपक्षमाशङ्क्य निराकृत्य च प्राभाकरमतमाशङ्क्यते — **तर्ही**ति । अनेकगुणेन संयोगादिना व्यभिचारो मा भूदिति । एवं गुणं प्रत्यनुमानमिति स्वपक्षप्रतिरोधयोरन्यतरपर्यवसितमित्यर्थः । एतदप्युपाधिसंभवेनासिद्धव्याप्तिकतया न सिद्धिप्रतिरोधयोर[व]ग[म]मित्याशयवानाह — **ने**ति । एवमभ्युपगमे बाधकप्रमाणमाह - **अन्यथे**ति । अत्र प्रमाणमाशङ्क्यते — **अस्ये**ति । बाधेनाप्युपाधिरुन्नीयत इति । यदि प्रकृतेऽपि बाधकस्योक्तत्वादुपाधिसंभवो दुर्वार इत्याशयवान् परिहारमाह — **ने**ति । उपसंहरति — **तस्मादि**ति । प्रत्यक्षबाधकस्य बुद्ध्यादाविव शब्दनित्यत्वसाधनेऽपि समानत्वादित्यर्थः । **अन्यथे**ति । प्रत्यक्षबाधमुपक्रम्य स्वातन्त्र्येणेत्यर्थः । अपरमपि नित्यत्वानुमानमतिदेशे निराकरोति — **एतेने**ति । अतिदेशार्थं स्मारयति — [58A] **अत्रापी**ति । तस्यैवाकार्यत्वस्येत्यर्थः । पवे[एते]न शब्दो नित्यो गन्धव्यतिरिक्तत्वे निरवयव[त्व]-भूतविशेषगुणत्वादाप्यपरमाणुरू[पो]पाधिवदित्यादीनि नित्यत्वसाधनानि निरस्तानीति । अकार्यत्वस्योपाधिर्दुष्परिहरत्वादिति । परसंभावितबाधाप्रतिरोधनिराकरणे विरोधव्यभिचारासम्भवेऽसिद्धिर्मूर्धाभिषिक्त्र निरस्यत इत्याह — **सापी**ति । यद्यपि प्रागसत उत्तरकालसम्बन्धः प्रागभावोपलक्षितस्वरूप(पं) वा प्रागभावावच्छिन्ना सत्ता वा उत्पत्तिः । सा धर्मो यस्येत्युत्पत्तिधर्मकः घटादिम(व)च्छब्दोऽपि प्रत्यक्षसिद्धस्तथाऽप्यनुमानेनाप्युत्पत्तिधर्मकत्वे(त्वं) शब्दे साध्यत

इति मन्वानो भूमिरचनां करोति - **तथाहीति** । **पूर्वोक्तन्यायेति** । अन्यस्योपाधेरनुपलम्भे[न] वर्हु(तद्वत)त्वेन चोपलम्भेनेत्यर्थः । तीव्रमन्दादिरूपप्रकर्ष[निकर्ष]ता नित्येभ्यो व्यावृत्तेत्याह - **इयं चेति** । पर[म]महत्प[रिमाण]-परमाणुपरिमाणरूपप्रकर्षप्रदर्शनव्याजेनाह – **अकारणका हीति** । उक्तमर्थमुपसंहृत्य प्रयोगमाह – **तदिति** । तस्मादित्यर्थः । तीर्थादिधर्मोपेतत्वादिति अन्वयो बोद्धव्यः । **माधुर्यादिव[दि]ति** यथा तीव्रस्तीव्रतरो मन्दो मन्दतरो मधुरो रस इत्यर्थः । विपक्षे बाधकमाह - **अन्यथेति** । साध्येतरत्वमुपाधिमाशङ्क्य बाधव्यतिरेकेण तथात्वेऽतिप्रसङ्गापादा(द)नेन परिहरति – **शब्दादिति** । [58B] तथा च सर्वानुमानोच्छेद इति तात्पर्यम् । असिद्धिमाशङ्क्य पूर्वोक्तप्रमाणदार्ढ्यात् परिहरति – **न चेति** । व्यञ्जकानुविधाननिरासे उत्पादकानुविधानेन भवितव्यम् । अन्यस्यासंभवादित्याशयवानाह – **न चेति** । औपाधिकत्वनिषेधात् स्वाभाविकत्वमेव प्रकारान्तरस्या-भावादित्याह - **न चेति** ।

55. स्यादेतत् । तथाप्युत्पत्तेर्नित्यत्वेन को विरोधो येन प्रतिबन्धसिद्धिः स्यात् ? असिद्धे च तस्मिन् भवतां व्यापकत्वासिद्धोऽस्माकमप्रयोजकः । सौगतानां सन्दिग्धविपक्षवृत्तिरयमुपक्रान्तो हेतुरिति चेत्, न । इदं ह्युत्पत्तिमत्त्वं विनाशकारणसन्निधिविरुद्धेभ्यो नित्येभ्यः स्वव्यापकनिवृत्तौ निवर्तमानं विनाशकसन्निधिमति विनाशिनि विश्राम्यतीति । विनाशकारणसन्निधानेनावश्यं जायमानस्य भवितव्यमिति कुतो निर्णीतमिति चेत्, न । तदसन्निधानं हि न तावदाकाशादेरिव स्वभावविरोधात् । उत्पत्तिविनाशयोः संसर्गदर्शनात् । अविरुद्धयोरसन्निधिस्तु देशविप्रकर्षाद् हिमवद्विन्ध्ययोरिव स्यात् । देशयोरपि विप्रकर्षो विरोधाद् वा हेत्वभावाद् वा ? पूर्वोक्तादेव न प्रथमः । द्वितीयस्तु पटकुङ्कुमयोरिव स्यात् । यदि हि कुङ्कुमसमागमादर्वागिव प्रध्वंसकसंसर्गादर्वागेव पटो विनश्येत् । यथा हि विनाशकारणं विना न विनाशः तथा यदि कुङ्कुमसमागमं विना न विनाशः पटस्येति स्यात् कस्तयोः संसर्गं वारयेत् । तस्मादविरुद्धयोरसंसर्गः कालविप्रकर्षनियमेन व्याप्तः, स चातो निवर्तमानः स्वव्याप्यमुपादाय निवर्तत इति प्रतिबन्धसिद्धिः । स्यादेतत् । यद्येवमस्थिरः शब्दः कथमर्थेन सङ्गतिरस्योपलभ्यते इति चेत् । यथैवार्थस्यास्थिरस्य तेन । जातिरेव पदार्थः, न व्यक्तिरिति चेत्, न, शब्दात् तदलाभप्रसङ्गात् । आक्षेपत इति चेत्, कः खल्वयमाक्षेपो नाम? न तावदनुमानम् । अनन्ताभिः सह सङ्गतिवदविनाभाव-स्यापि ग्रहीतुमशक्यत्वात् । शक्यते वा, सङ्गतेरपि तथैव सुग्रहत्वात् । व्यक्तिमात्ररूपेणाऽविनाभाव इति चेत्, न । व्यक्तित्वस्य सामान्यस्याभावात् । भावे वा तदाक्षेपेऽपि विशेषानाक्षेपात् । वाच्यत्वमपि वा तथैवास्तु, किमाक्षेपेण ? सङ्गतेरविरोधादिति । अर्थापत्तिराक्षेप इति चेत्, न, व्यक्त्या विना किमनुपपन्नम् । जातिरिति चेत्, न, तन्नाशानुत्पाददशायामपि सत्त्वात् । तथापि न व्यक्तिमात्रं विनेति चेत्, न । मात्रार्थभावात् । व्यक्तिज्ञानमन्तरेण जातिज्ञानमनुपपन्नमिति चेत् न । तदभावेऽप्युत्पादात् । व्यक्तिविषयतां विना जातिविषयता तस्यानुपपन्नेति चेत्, न । एवं तर्हि एकज्ञानगोचरतायां किमनुपपन्नं किं प्रतिपादयेदिति । जातीनामन्वयानुपपत्त्या व्यक्तिरवसीयते इति चेत्, न, परस्पराश्रयप्रसङ्गात् ।

55. विपक्षे बाधकाभावेन मूलहेतोस्तत्तद्दर्शनसिद्धभाषया असाधकत्वनिषेधा(धं) स्वा(स्वय)माशङ्क्य विपक्षे बाधकदर्शनेन परिहरति – **स्यादेतदिति** । उत्पत्तेर्व्यापकं कारणम् । नित्यत्वे च कारणाभावादुत्पत्तिरेव न स्यात् । साधिता च सा प्रत्यक्षानुमानाभ्याम्, अतस्तदिति तात्पर्यम् । पुनराशङ्क्य यथासंभवं विकल्प्य

निराकरोति - **विनाशेति** । **पू[र्वो]क्तादेव(वे)ति** । उत्पत्तिविनाशयोः संसर्गदर्शनादेवेत्यर्थः । ननु यथा विनाशसंसर्गनियमः पटस्य तथा कुंकुमसंसर्गनियमोऽपि । कस्मात् ? तस्यापि दु(उ)भयसंसर्गेण कारणाधीनत्वस्येति । यत्रापि तुल्यत्वात् तत्रापि न चेदयं नियमो ध्वंसकसंसर्गनियमोऽपि न स्यादि[त्य]विशेषादित्यत आह - **यथा हीति** । उपसंहरति - **तस्मादिति** । एवं शब्दोऽनित्यः कार्यो वा जातिमत्त्वे सति अस्मदादिबहिरिन्द्रियप्रत्यक्षत्वात् घटवदिति द्रष्टव्यम् । प्राभाकरं प्रत्यनीश्वरविभूविशेषगुणत्वात् बुद्धिवदिति प्रयोक्तव्यम् । नन्वनित्यत्वे [59A] वर्णानां सङ्गतिग्रहानुपपत्तेः । उपपत्तौ वा गृहीतसङ्गतिकनाशे अगृहीतसङ्गतिकार्थप्रतीतेतेरनुपपत्तेरर्थप्रतीत्यन्यथानुपपत्त्या नित्यत्वमिति । तथा चार्थापत्त्या बाधः प्रतिरोधो वेति हृदि निधाय शङ्क्यते — **स्यादेतदिति** । वर्णानामनित्यत्वेऽपि तज्जातीनां नित्यत्वात् तज्जातिमत्त्वेन सङ्गतेरुपपत्तिरर्थप्रतिपत्त्युपपत्तेरर्थापत्तेरन्यथोपपन्नतया नोक्तदोषावकाश इत्याशयवान् परिहरति — **यथार्थस्यैवेति** । उक्तमर्थम् । तत्तत्परापादितशङ्कापसारणेन विशदयति — **जातिरेवेति** । **तदलाभ** इति व्यक्तेरलाभ इत्यर्थः । शङ्कते — **आक्षेपत** इति । विकल्प्य निराकरोति । **कः खल्विति** । सुगममितरत् । पुनः शङ्कते - **अर्थापत्तिरिति** । एतदप्यनुपपद्यमानार्थासम्भवेन निराकरोति — **व्यक्तेरनित्यभावेऽपीति**[1] । व्यक्तिज्ञानाभावेऽपि जातिज्ञानस्योत्पादाभ्युपगमात् केवलजातिपदार्थवादिभिरिति सहृदयम् । जातिपदाद् वा (इव) व्यक्तिवे(प)दान(द)पि[2] जातिज्ञानमुत्पद्यत इति । न चोभयं सिद्धम् । ननु मा भूत् प्रतीतिपर्यवसानं 'गङ्गायां घोषः' इतिवज्जातिप्रतीत्यपर्यवसानाद् व्यक्तिलाभ इत्याशयवान् शङ्कते — **व्यक्तिविषयतामिति** । एतदस्याभ्युपगमेनैव तवानिष्टमिति परिहरति - **नेति** । अपि च गोपदस्य व्यक्तिविषयतायां किमनुपपन्नम् । समानानां भावः सामान्यं तत् कथं प्रतीयते भवत्पक्षे? प्रत्यक्षेणेति चेत् । अस्त्वेदं सामान्यमित्यस्मिन् पक्षे सम्बन्धिनिरपेक्षजातिस्वरूपवाचिनां तु गवादिपदानां किमसमञ्जसमिति । [59B] अस्ति तावत् 'गौस्तिष्ठति' 'गौर्निषण्णा' इत्यादावन्वयः । स च जातावनुपपद्यमानो व्यक्तिमाक्षिपतीत्यर्थापत्तिराक्षेप इति शङ्कते — **जातीनामिति** । परिहरति - **नेति** । प्रतीतस्यानुपपत्तिराक्षिपतीत्यत्र दृष्टम् न त्वन्यथेति। न चात्र व्यक्तिमप्रतीत्यान्वयः प्रत्येतुं शक्यते इति । तमप्रतीत्य द्योक्षेणैव(आक्षेपेणैव) प्रतीतौ चेतरेतराश्रयत्वम् । तथाहि अन्वयप्रतीतौ व्यक्त्याक्षेपो व्यक्त्याक्षेपे चान्वयप्रतीतिः । तथा च नानुपपद्यमानं किञ्चिदस्तीति तात्पर्यम् ।

56. स्यादेतत् । प्रतिबन्धं विनापि पक्षधर्मताबलाद् यथा लिङ्गं विशेषे पर्यवस्यति तथा सङ्गतिं विनापि शब्दः शक्तिविशेषाद् विशेषे पर्यवस्यति, स एवाक्षेप इत्युच्यते इति चेत्, न तावत् प्रतीतिः क्रमेण । अपेक्षणीयाभावेन विरम्य व्यापारायोगात् । जातिप्रत्यायनमपेक्षते इति चेत्, कृतं तर्हि शब्दशक्तिकल्पनया । तावतैव तत्सिद्धेः । ओमिति चेत्, न । व्यक्त्यनालम्बनाया जातिप्रतीतेरसम्भवादित्युक्तत्वात् । प्रमाणान्तरापातप्रसङ्गाच्च । स्मरणं तदित्ययमदोष इति चेत्, न । अननुभूतान्वयप्रसङ्गात् । अस्त्वेकैव प्रतीतिरिति चेत्, कृतं तर्हि शक्तिभेदकल्पनया । एवं च यथा सामान्यविषया शक्तिरेकैव तद्वति पर्यवस्यति, तथा सामान्याश्रया सङ्गतिस्तद्वति पर्यवस्येदिति । न च नित्या अपि वर्णाः स्वरानुपूर्व्यादिहीनाः पदार्थैः सङ्गम्यन्ते, न तद्विशिष्टत्वमपि तेषां नित्यम्, तस्मात् तत्तज्जातीयक्रोडनिविष्टा एव पदार्थाः पदानि च संबध्यन्ते नातोऽन्यथेति, नैतदनुरोधेनापि शब्दस्य नित्यत्वमाशङ्क-

१. मुद्रितमूले प्रतीकमिदं नास्ति ।

२. पाठः भ्रष्टः ।

नीयमीति । यदा च वर्णा एव न नित्यास्तदा कैव कथा पुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां पदानाम्, कुतस्तरां च तत्समूहरचनाविशेषस्वभावस्य वाक्यस्य, कुतस्तमां तत्समूहस्य वेदस्य । परतन्त्रपुरुषपरम्पराधीनतया प्रवाहाविच्छेदमेव नित्यतां ब्रूम इति चेत् । एतदपि नास्ति । सर्गप्रलयसम्भवात् । अहोरात्रस्याहोरात्रपूर्वकत्वनियमात्, कर्मणां विषमविपाकसमयतया युगपद् वृत्तिनिरोधानुपपत्तेर्वर्णादिव्यवस्थानुपपत्तेः, समयानुपलब्धौ शाब्दव्यवहारविलोपप्रसङ्गात्, घटादिसम्प्रदायभङ्गप्रसङ्गाच्च कथमेवमिति चेत्, उच्यते –

वर्षादिवद् भवोपाधिर्वृत्तिरोधः सुषुप्तिवत् ।
उद्भिद्वृश्चिकवद् वर्णा मायावत् समयादयः ॥२॥

56. ननु यथा लिङ्गं साध्यविशेषणाव्याप्तमपि पक्षधर्मतारूपसहकारिवशेन विशेषबोधकं तथा शब्दोऽपि सङ्गति(तिं) विन(ना) सहकारिविशेषाद् विशेषव्यक्तिबोधक इत्येष एवाक्षेप इति शङ्कते - **स्यादेतदिति** । तदेतदपि विकल्प्य निराकरोति - **न तावदिति** । जातिप्रत्य(त्या)यनेनैवेत्यर्थः । **तत्सिद्धेः** व्यक्तिज्ञानसिद्धेरित्यर्थः । मा भूदतिरिक्तसहकारिमात्रमेव विपक्षितां(तं) तच्च जातिप्रत्यायनमेवास्तीति मन्वानः शङ्कते - **ओमिति चेदिति** । उपपादितमेकज्ञानगोचरत्वं जातिव्यक्त्योरित्याशयवान् परिहरति - **व्यक्तीति** । यदि च सङ्केतवशप्रसूतजातिज्ञानापेक्षः शब्दो व्यक्तिज्ञानमाधत्ते तदा अनिष्टमाह - **प्रमाणान्तरप्रसङ्गादिति** । जातिज्ञानसहितस्य शब्दस्य व्यक्तिप्रमाकरणत्वादित्यर्थः । न च शाब्द एवायम् । शब्दविज्ञान असन्निकृष्टेऽर्थे बुद्धिरिति लक्षणसामान्यादिति वाच्यम् । तदेकसहकार्याकाङ्क्षाद्यनपेक्षत्वात् । अन्यथाप्यु(थापि) वाक्यावगतलिङ्गस्य लिङ्गिप्रत्ययोऽपि [60A] शाब्द एव स्यादिति । अनुपदेन जात्यभिधानानन्तरं तत्सहचरितोपलब्ध्या व्यक्तिः स्मर्यते न तु प्रमीयत इति । न तत्साधनस्य प्रमाणान्तरत्वमाशङ्कते - **स्मरणं तदिति** । **अयमिति** प्रमाणान्तरप्रसङ्ग इत्यर्थः । एतदपि न युक्तमिति निराकरोति - **नेति** । अनुभूय(त)व्यक्तिस्मरणेनान्वयस(सं)भवेऽप्यननुभूताभिर्व्यक्तिभिरस्मर्यमाणतया अनन्वयप्रसङ्गादित्यर्थः । प्रतीतिक्षममने[क]धा विकल्प्य निराकरोति - **अस्त्विति** । व्यक्तिविषयैकप्रतीतिस्वीकारे शक्तिभेदो व्यर्थ इत्याह - **कृतं तर्हीति** । ननु मा भूद् शक्तिभेदकल्पनम्, व(अ)स्तु चैकमेव सामर्थ्यम्, तावच्च प्रत्ययोऽप्येकः तथापि कथं प्रकृतसिद्धिरित्याह - **एवं चेति** । अयमर्थः । यथा घटत्वसामान्यविषया घटशब्दस्य वाचिका शक्तिर्व्यक्तावपि पर्यवस्यति न तु पृथक् व्यक्तौ वाचिका शक्तिरङ्गीक्रियते प्रकारान्तरेण व्यक्तेन लार्भस्य(व्यक्तेर्लाभस्य) व्युत्पादितत्वात् तथा घटशब्दसामान्याश्रितैव वाचिका शक्तिर्घटशब्देऽपि बाधकव्यवहारमातनोतु न तु घटशब्दव्यक्तेरपि पृथग्वाचकत्वमङ्गीकर्तव्यमित्यर्थः । एवमनित्यत्वे वर्णानामपसारितसकलदूषणप्रत्यक्ष[60B]मनुमानं चोक्तं सम्प्रति वर्णनित्यतामभ्युपेत्यापि पदानित्यतया सङ्गतार्थविशेषमादर्शयति - **न चेति** । तथाहि वर्णानामानुपूर्व्या पूर्वपश्चिमभावो नित्यत्व(त्वाद्) विभुत्वाद् वा अनित्येति कथमभिव्यक्तिः, तदभिव्यक्तिश्च विवक्षाजनितप्रयत्नप्रेरितकोष्ठ्यवायुकण्ठाद्यभिघातरूपत्वात् तज्जनितज्ञानरूपत्वाद् वा अनित्येति कथमभिव्यक्तस्य पदस्य नित्यत्वमिति । एतदेवाह - **न चेति** । तद्विशिष्टत्वमपि विशेषणसम्बन्धो वा तज्जनितधर्मो वेत्यर्थः । अभिमतमर्थमुपसंहरति - **तस्मादिति** । धर्मो(वर्ण)नित्यत्वेऽपि पदस्यानित्यता व्यक्त्यनित्यतासम्भवः । यदा तु वर्णानामनित्यता तदा सुतरामेव वाक्यानामित्याह - **यदा चेति** । तदेवं नित्यतां वर्णानामुत्पादव्ययरूपसर्गप्रलय(यौ) व्याख्याय निराकृत्य संप्रति प्रवाहाविच्छेदरूपनित्यतामाशङ्क्य समस्तलोक-

संग्राप्रल(सर्गप्रलय)प्रदर्शनेन निराचष्टे – **परतन्त्रेति** । एवमुक्ते सर्गप्रलयावनङ्गीकुर्वाणो मीमांसकः स्वपक्षप्रमाणमाह - **अहोरात्रस्येति** । प्रयोगस्तु - विवादाध्यासितमहोरात्रम्(म)व्यवहिताहोरात्रपूर्वकम् अहोरात्रत्वादद्यतनाहोरात्रवदिति । यदि च नैव स्यादहोरात्रेण स्कमाधेते[१] निरू(रु)पाधिसम्बन्धेन स्यात् । [61A] अत एव नियमादित्युक्तं न तु तथा दर्शनादिति । प्रयोगान्तरमाह - **कर्मणामिति** । विवादाध्यासितानि कर्माणि न युगपन्निरुद्धवृत्तीनि विषमविपाकसमयकर्मत्वादिदानीमुपभुक्तोपभुज्यमानोपभोक्तव्यकर्मवदिति । प्रयोगान्तरं सूचयति - **वर्णादीति** । विवादाध्यासिता ब्राह्मणा बाह्मणसन्ततिजन्मानः ब्राह्मणत्वादिदानींतनब्राह्मणवदिति ब्राह्मणमातापितृनिरपेक्षत्वे तु ब्राह्मणजातीयस्य सर्वमेव ब्राह्मणजातीयं स्यादिति । प्रयोगान्तरं सूचयति - **समयेति** । विवादाध्यासितः शाब्दव्यवहारः वृद्धव्यवहारपूर्वकः शाब्दव्यवहारत्वादिदानींतनशाब्दव्यवहारवदिति । न चैतदेवं कार्यकारणभङ्गे शाब्दव्यवहाराभावप्रसङ्गः । अपरमपि प्रयोगं सूचयति घटपटेति । विवादाध्यासितं घटपटादिनिर्माणं तथाभूतादर्शविज्ञप्तिसापेक्षं घटपटादिनिर्माणत्वादिदानींतनघटपटादिनिर्माणवदिति । अनन्तरप्रयोगत्रये च यथाश्रुतेनानिष्टप्रसङ्गो बोद्धव्यः । एवं स्वपक्षसाधकं परपक्षबाधकं यत् प्रमाणमुक्तं परेण तदाभासीकर्तुमाह - **उच्यत** इति। अत्रोक्ते(क्त)हेतूनां धर्मिप्रतीत्यप्रतीतिभ्यां बाधाश्रयासिद्धी [सा]धारणं(णे) दूषण(णे), न साधारणम्(णानि) यथाक्रमम् - अप्रयोजकत्वम्, अनैकान्तिकत्वम्, अप्रयोजकत्वम्, सिद्धसाधनम्, [अप्रयोजकत्वं] चेति हृदि निधाय **वर्षादिवदित्याह** ।

57. तत्पूर्वकत्वमात्रे सिद्धसाधनात्, अनन्तरतत्पूर्वकत्वे अप्रयोजकत्वात्, वर्षादिदिनपूर्वकतद्दिननियमभङ्गवदुपपत्तेः । राश्यादिविशेषसंसर्गरूपकालोपाधिप्रयुक्तं हि तत् । तदभाव एव व्यावृत्तेः । तथेहापि सर्गानुवृत्तिनिमित्तब्रह्माण्डस्थितिरूपकालोपाधिनिबन्धनत्वात् तस्य तदभाव एव व्यावृत्तौ को दोषः । न च तदनुत्पन्नमनश्वरं वा अवयवित्वात् । वृत्तिनिरोधस्यापि सुषुप्त्यवस्थावदुपपत्तेः । न ह्यनियतविपाकसमयानि कर्माणीति तदानीं कृत्स्नान्येव भोगविमुखानि । न ह्यचेतयतः कश्चिद् भोगो नाम, विरोधात् । कस्तर्हि तदानीं शरीरस्योपयोगः ? तं प्रति न कश्चित् । तर्हि किमर्थमनुवर्तते ? उत्तरभोगार्थम्, चक्षुरादिवत् । प्राणिति किमर्थम् ? श्वासप्रश्वाससन्तानेनायुषोऽवस्थाभेदार्थम्, तेन भोगविशेषसिद्धेः । एकस्यैव तत् कथञ्चिदुपपद्यते, न तु विश्वस्येति चेत् । अनन्ततया, अनियतविपाकसमयतया, उपमर्द्योपमर्दकस्वभावतया च कर्मणां विश्वस्यैकस्य वा को विशेषो येन तन्न भवेत्। भवति च सर्वस्यैव सुष्वापः । क्रमेण, न तु युगपदिति चेत्, न, कारणक्रमायत्तत्वात् कार्यक्रमस्य । न च स्वहेतुबलायातैः कारणैः क्रमेणैव भवितव्यम्, अनियतत्वादेव, सर्वग्रासवत् । ग्रहाणां ह्यन्यदा समागमानियमेऽपि तथा कदाचित् स्यात् । यथा कलाद्यनियमेऽपि सर्वमण्डलोपरागः स्यात् । त्रिदोषसन्निपातवद् वा । यथा हि वातपित्तश्लेष्मणां चयप्रकोपप्रशमक्रमानियमेऽपि एकदा सन्निपातः स्यात् तदा देहसंहारः, तथा कालानलसंहारपवनमहार्णवानां सन्निपाते ब्रह्माण्डदेहप्रलयावस्थायां युगपदेव भोगरहिताश्चेतनाः स्युरिति को विरोधः ? तथापि विदेहाः कर्मिण इति दुर्घटमिति चेत् । किमत्र दुर्घटम् ? भोगनिरोधवच्छरीरेन्द्रियविषयनिमित्तनिरोधादेव तदुपपत्तेः । वृश्चिकतण्डुलीयकादिवत् वर्णादिव्यवस्थाप्युपपद्यते । यथा हि वृश्चिकपूर्वकत्वेऽपि वृश्चिकस्य गोमयादाद्यः, तण्डुलीयक-

---

१. भ्रष्टः पाठः ।

पूर्वतकत्वेऽपि तण्डुलीयकस्य तण्डुलकणादाद्यः, वह्निपूर्वकत्वेऽपि वह्नेररणेराद्यः, एवं क्षीरदधिघृत-तैलकदलीकाण्डादयः । तथा मानुषपशुगोब्राह्मणपूर्वकत्वेऽपि तेषां प्राथमिकास्तत्तत्कर्मोप-निबद्धभूतभेदहेतुका एव, स एव हेतुः सर्वत्रानुगत इति सर्वेषां तत्सान्तानिकानां समानजातीयत्वमिति किमसङ्गतम् ? गतं तर्हि गोपूर्वकोऽयं गोत्वादित्यादिना । न गतम्, योनिजेष्वेव व्यवस्थापनात्, मानसास्त्वन्यथाऽपीति । गोमयवृश्चिकादिवद् इदानीमपि किं न स्यादिति चेत्, न । कालविशेषनियत-त्वात् कार्यविशेषाणाम्, न हि वर्षासु गोमयाच्छालूक इति हेमन्ते किं न स्यात् । समयोऽप्येकेनैव मायाविनेव व्युत्पाद्यव्युत्पादकभावावस्थितनानाकायाधिष्ठानाद् व्यवहारत एव सुकरः । यथा हि मायावी सूत्रसञ्चाराधिष्ठितं दारुपुत्रकमिदमानयेति प्रयुङ्क्ते, स च दारुपुत्रकस्तथा करोति तदा चेतनव्यवहारादिवत् तद्दर्शी बालो व्युत्पद्यते, तथेहापि स्यात् । क्रियाव्युत्पत्तिरपि तत एव कुलालकुविन्दादीनाम् । सर्गादावेव किं प्रमाणमिति चेत् । विश्वसन्तानोऽयं दृश्यसन्तानशून्यैः समवायिभिरारब्धः । सन्तान-त्वादारणेयसन्तानवत् । वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयसन्तानान्तराः, नित्यत्वे सति तदारम्भकत्वात् प्रदीपपरमाणुवदित्यादि । अवयवानामावापोद्वापादुत्पत्तिविनाशौ च स्याताम्, सन्तानाविच्छेदश्चेति को विरोध इति चेत्, न, एवं तर्हि घटादिसन्तानाविच्छेदोऽपि स्यात्, विपर्ययस्तु दृश्यते ।

57. परानभिमतपक्षं सिद्धसाधनेन निराकृत्याभिमतपद(क्ष)मुत्थाप्या[61B]प्रयोजकत्वमाह - **तत्पूर्व-कत्वमात्र** इति । **वर्षादिदिने**ति । यथा वर्षादिदिनपूर्वकत्वे साध्ये बाधकवशेन तद्व्यतिरिक्तवर्षादिदिनत्वोपाधि-वशाद् व्याप्तिभङ्गस्तथेहापि अहोरात्रस्याव्यवहिताहोरात्रपूर्वकत्वा(त्व)स्येति सम्बन्धः । द्वितीये साधने अनैका-न्तिकमाह - **वृत्तिनिरोधस्ये**ति । सुषुप्तावस्थायां युगपन्निरुद्धवृत्तीनि कर्माणि विषमविपाकसमयानि चेति व्यभिचार इति तात्पर्यम् । तृतीयसाधनेऽप्रयोजकत्वमाह - **वृश्चिके**ति । अत्रापि बाधवशेन मानसब्राह्मणत्वादिकमुपाधिरि-त्याशयः । चतुर्थसाधने सिद्धसाधनं विवृणोति - **समयोऽपी**ति । अत्र च परमेश्वर एव वृद्धः, तद्व्यवहारपूर्वक-त्वमिष्टमेवेत्यर्थः । अन्तिमसाधनेऽप्रयोजकत्वमाह - **तत एवे**ति । अत्रापि बाधवशादनन्तरभाविपटादिनिर्माणत्व-प्रयुक्तसाध्यसम्बन्धित्वमिति रहस्यमिति । एवं निवारितं प्रतिपक्षसाधनं न बाधप्रतिरोधयोरुपयुज्यत इति । परमते दूषितेऽपि परः पृच्छति - **सर्गादावेवे**ति । अत्र चागमानां बहुनां सम्भवेऽपि न्यायरुचितया प्रत्ययविशिष्टसृष्टि-प्रतिपादकमनुमानद्वयमाह - **विश्वे**ति । ननु विश्वसन्तान इत्यत्र विश्वशब्देन कार्यमात्रपक्षीकरणे क्रमारब्धदहन-पवनसन्तानन्यायेनारम्भेऽपि प्रलयासिद्धेः सिद्धसाधनात् । एकदेति विशेषणे क्रमारब्धदहनपवनसन्तानेन व्यभिचारात् । एकदारम्भहेतुसाकल्ये सतीति विशेषणासिद्धेः । एकदापीति । यदी(दि) सर्वकार्याणां युगपदुत्पत्तौ [62A] व्याप्तिसंदेहादिति चेत् । नैवम् विश्वशब्देन ब्रह्माण्डं सन्तानशब्देन च तदारम्भकद्व्यणुकादिपरम्पराया विवक्षितत्वात् । एवमप्यंश्रयासिद्धिरिति चेत् । न, आगमसिद्धत्वात् ब्रह्माण्डस्य । स्मरति च भगवान् न्य(व्या)सः -

निष्प्रभेऽस्मिन्निरालोके सर्वतस्तमसावृते ।
बृहदण्डमभूदेकं जगतो बीजमक्षयम् ॥

भूगोड(ल)कमात्रपुडो(पिण्)डो नासाविति चेत्, स एव तर्हि तथैव पक्ष इति कृतं विवादेन । **समवायिभिरारब्ध** इति साध्ये प्रलयासिद्धौ सिद्धसाधनं भवेदतो विशिनष्टे - **दृश्यसन्तानशून्यै**रिति । अनेन

प्रलयपूर्वकत्वमाह । कार्यपरम्पराशून्यैरित्यर्थः । सन्तानत्वं चावयवावयविप्रवाहत्वम् । एवं द्वितीयेऽपि नाश्रयासिद्धिरित्यपि बोद्धव्यम् । तदारम्भकत्वादित्युक्ते तन्तुभिः पूर्वमनुत्पादितपटैः सम्प्रत्युत्पादितपटैरनेकान्तः स्यादित्यत उक्तम् - **नित्ये**ति । एतावन्मात्रं च गगनादिभिरनैकान्तिकं भवेत्, तं निवृत्त्यर्थं विशेषणपदम् । प्रदीपपरमाणूनां च तैजसत्वेनारब्धतेजोजाति(ती)यत्वेन दृष्टान्तोपपत्तेः । ननु संदिग्धव्यभिचारित्वादुभयमपि न साधनम् । न च सन्तानस्य कार्यविशेषस्य भावतया विनाना(शोऽ)वश्यंभावनियमात् सदेहस्य(सन्तानस्य) इति वाच्यम् । [62B] सन्तानाविच्छेदेऽप्युत्पत्तिविनाशयोरन्यथोपपादयितुं शक्यत्वादित्याशयवानाह - **अवयवानामि**ति । आवापोद्वापौ उपगमापगमौ प्रकर्षापकर्षाविति यावत् । यदि च न कार्यस्यात्यन्तमुच्छेदस्तदोभयाभिमतघटाद्युच्छेदोऽपि न स्यादिति बाधकमाशङ्कते - **ने**ति । **एवमि**ति । सन्तानस्यात्यन्तोच्छेदात् साधनत्व इत्यर्थः । विपर्ययस्त्विति अत्यन्तोच्छेद इत्यर्थः ।

58. कर्त्रादिभोगविशेषसम्पादनप्रयुक्तोऽसाविति चेत्, न । द्व्यणुकेषु तदभावात् । तथा च तदवयवानामपगमाभावेऽनादित्वप्रसङ्गे द्व्यणुकत्वव्याघातः । तस्माद् यत्कार्यं यन्निबन्धनस्थिति, तदपगमे तन्निवृत्तिः, यद् यद्धेतुकं तदुपगमे तस्योत्पत्तिः । न च कार्यस्य स्थितिनिबन्धनं नित्यमेव । नित्यस्थितिप्रसङ्गात् । न च नित्य एव हेतुः, अकादाचित्कत्वप्रसङ्गात् । तदतिनिस्तरङ्गमेतत् । ईदृश्यां च वस्तुस्थितौ भोगोऽपि कर्मभिरेवमेव वस्तुस्वभावानतिक्रमेण सम्पादनीय इति द्व्यणुकवत् पिपीलिकाण्डादेर्ब्रह्माण्डपर्यन्तस्यापि विश्वस्येयमेव गतिरिति प्रतिबन्धसिद्धिः । तथा च ब्रह्माण्डे परमाणुसाद्भवितरि परमाणुषु च स्वतन्त्रेषु पृथगासीनेषु तदन्तःपातिनः प्राणिगणाः क्व वर्तन्ताम् ? कुपितकपिकपोलान्तर्गतोदुम्बरमशकसमूहवत्, दवदहनदह्यमानदारूदरविघूर्णमानघुणसङ्घातवत्, प्रलयपवनोल्लासनीयौर्वानलनिपातिपोतसांयात्रिकसार्थवत् वेति ॥

अपि च

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥३॥

58. अत्र पर उपाधिमाह - **कर्त्रे**ति । न सन्तानप्रयुक्तो घटाद्यत्यन्तोच्छेदः किन्तूक्तविशेषप्रयुक्त इत्यर्थः । साध्याव्यापकत्वेन परिहरति - **ने**ति । **तदभावाद्** भोगविशेषसम्पादकत्वस्योपाधेरभावादुपाधिमतो अत्यन्तोच्छेदस्याप्यभावप्रसङ्गः । न चात्राप्यत्यन्तानुच्छेदेऽप्यवयवावापोद्वापाभ्यामेवोत्पत्तिविनाशौ स्यातामिति वाच्यम् । तयोरप्यत्राभावादित्याह - **तथा चे**ति । **अनादित्वप्रसङ्ग** इति । अयमर्थः । भोगविशेषसम्पादनप्रयुक्ते हि नाशेन भवितव्यम् । न हि द्व्यणुकनाशः कमपि भोगं जनयति । तथा च विनाशिनो भावस्य नित्यत्वेन व्याप्तत्वाद् द्व्यणुकस्यानादित्वप्रसङ्ग इति । तस्मादेव दोषवशेन कार्यस्रोतापरनाम्नः सन्तानस्यात्यन्तोच्छेद(दे)न स्वाभाविकप्रतिबन्धोऽभ्युपेय इति भावः । [63A] वस्तुस्वभावश्च तदुच्छेदवतामेव सन्तानानां प्रतिबन्धो न भवेद् यदि तदा सन्तानस्यावस्थानहेतुकं नित्यहेतुकं वा स्यात् । द्वयोरप्यनुपपत्तेर्नित्यावस्थानप्रसङ्गात् । भोगविशेषसम्पादनप्रयुक्ते हि नाशे द्व्यणुकत्वव्याघात इत्युक्तमित्युपसंहारव्याजेनाह - **तस्मादि**त्यादि । यदि पुनः कार्यस्य स्थितिनिबन्धनं नित्यत्वं स्यात् ततः कार्यस्य नित्यावस्थानस्वभावत्वप्रसङ्गः कर्मभिर्भोगभेदोपपादन[त]यापि नास्यात्यन्तोच्छेदः शक्यः । न हि परमेश्वरोऽपि वस्तुस्वभावं विपर्यासयितुमीष्टे किमुत कर्माणीति । तथा च कर्त्रादिभोगविशेषो-

त्पादनप्रयुक्त उच्छेद इति न वाच्यम् । वाच्यं चेद् वस्तुस्थितिरियमीदृश्यनित्यहेतुनिबन्धनाऽवश्यमनुसरणीयेत्याशयवानाह- **ईदृश्यामि**ति । [63B] अनित्यहेतुनिबन्धनायां कार्यस्थितौ कर्मभिः सम्पादनीयो भोगोऽप्येवमेव स्यादिति योजनेति । वस्तुस्वभावश्च तदुच्छेदवतामेव सन्तानानां भोगसाधनत्वं न तूच्छेदरहितानामन्यथा एकस्यैव घटसन्तानस्य नानापुरुषाधिष्ठितादृष्टोपक्षयात् क्रमेणैव भोगजनकत्वानुच्छेदप्रसङ्गात् । नन्वेवमपि ब्रह्माण्डावयविना एकस्य भूगोड(ल)कस्य च तदुपविष्टकारणद्व्यणुकादिकार्यस्तोममात्रस्य चात्यन्तोच्छेदः सिद्ध्यति । तनुतरुगिरिसागरादीनामिति कुतः प्रलयः इति हृदि निधाय तेषामपि विनाशे प्रमाणमस्तीति संसूचनार्थं दृष्टान्तत्रयमाह **– तथा चे**ति । **प्राणिगणा** इति । तदन्तर्वर्तिकार्यमात्रोपलक्षणपरम् । **क्व वर्तन्ताम्** ? तदन्तर्वर्तिकार्यमात्रेति निवर्तत एवेति प्रतिज्ञार्थः । महाद्रव्यान्तरेण निहन्यमानाधारत्वात् कपिकपोलान्तर्गतोदुम्बरमशकसमूहवत्, महादहनदह्यमानाश्रयत्वात् दवदहनेत्यादिवत्, महापवनक्षुभितबहलजलनिधिविलीयमानाश्रयत्वात् प्रबलपवनेत्यादिवदिति [64A] प्रयोगाः । एवं तावत् सर्वस्य प्रलये वेदप्रलय इति दर्शितम् । सम्प्रति वेदह्रासः संदर्शनेनानुमेय इत्याशयवानाह - **अपि चे**ति ।

59. पूर्वं हि मानस्यः प्रजाः समभवन्, ततोऽपत्यैकप्रयोजनमैथुनसम्भवाः, ततः कामावर्जनीयसन्निधिजन्मानः, इदानीं देशकालाद्यव्यवस्थया पशुधर्मादेव भूयिष्ठाः ।

पूर्वं चरुप्रभृतिषु संस्काराः समाधायिषत, ततः क्षेत्रप्रभृतिषु, ततो गर्भादितः, इदानीं तु जातेषु लौकिकव्यवहारमाश्रित्य ।

पूर्वं सहस्रशाखः समस्तो वेदोऽध्यगायि, ततो व्यस्तः, ततः षडङ्ग एकः, इदानीं तु क्वचिदेका शाखेति ।

पूर्वम् ऋतवृत्तयो ब्राह्मणाः प्राद्योतिषत, ततोऽमृतवृत्तयः, संप्रति मृतप्रमृतसत्यानृतकुसीदपाशुपाल्यश्ववृत्तयो भूयांसः ।

पूर्वं दुःखेन ब्राह्मणैरतिथयोऽलभ्यन्त, ततः क्षत्रियातिथयोऽपि संवृत्ताः, ततो वैश्यावेशिनोऽपि, संप्रति शूद्रान्नभोजिनोऽपि ।

पूर्वममृतभुजः, ततो विघसभुजः, ततोऽन्नभुजः, संप्रत्यघभुज एव ।

**पूर्वं चतुष्याद् धर्म आसीत्, ततस्तनूयमाने तपसि त्रिपात्, ततो म्लायति ज्ञाने द्विपात्, संप्रति जीर्यति यज्ञे दानैकपात्, सोऽपि पादो दुरागतादिविपादिकाशतदुःस्थोऽश्रद्धामलकलङ्कितः कामक्रोधादिकण्टकशतजर्जरः प्रत्यहमपचीयमानवीर्यतया इतस्ततः स्खलन्निवोपलभ्यते । इदानीमिव सर्वत्र दृष्टान्ताधिकमिष्यते इति चेत्, न । स्मृत्यनुष्ठानानुमितानां शाखानामुच्छेददर्शनात् । स्वातन्त्र्येण स्मृतीनामाचारस्य च प्रामाण्यानभ्युपगमात् । मन्वादीनामतीन्द्रियार्थदर्शने प्रमाणाभावात् । आचारात् स्मृतिः स्मृतेश्चाचार इत्यनादिताऽभ्युपगमे अन्धपरम्पराप्रसङ्गात् । आसंसारमनाम्नातस्य च वेदत्वव्याघातेनानुमानायोगात् । उत्पत्तितोऽभिव्यक्ततोऽभिप्रायतो वाऽनवच्छिन्नवर्णमात्रस्य निरर्थकत्वात् । यदि च शिष्टाचारत्वादिदं हितसाधनं कर्तव्यं वेत्यनुमितं किं वेदानुमानेन, तदर्थस्यानुमानत एव सिद्धेः । न च धर्मवेदनत्वादिदमेवानुमानमनुमेयो वेदः । प्रत्यक्षसिद्धत्वात् । अशब्दत्वाच्च ।

59. जन्मादिह्रासप्रतिपादनेन वेदह्रासदर्शनवशेन श्रूयमाणवेदस्याप्युच्छेदोऽनुमातव्य इति मन्वानो जन्मादि-ह्रासमुदाहरणेन स्फुटयति - **पूर्वं हीति** । **समाधायिषतेति** सम्यगाहिता इत्यर्थः । **सहस्त्रशाख** इत्यादिना वेदह्रासो दर्शितस्तथा तेन दृष्टान्तेन श्रूयमाणवेदा उच्छेदमुपयास्यन्ति वेदत्वाद् वाक्यत्वाद् वा उच्छिन्नशाखवेदवदिति प्रयोगा द्रष्टव्याः । **ऋतं** सत्यम्, तद्वृत्तयः । अथवा -

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
[मृतं तु याचितं] भैक्ष्यं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता [तां तु] परिवर्जयेत् ॥

कुसीदं कलान्तरम् । **पाशुपाल्यं** गोरक्षादिः । **श्ववृत्तिः** सेवा । **अमृतं** देवानां हुतं यज्ञशेषः । **विघसः** अतिथि-भुक्तशेष इति । **अघभुज** इति । भुञ्जन्ते ते त्वघं पापाः पचन्ति ये स्वकारणात् । **चतुष्पादिति** । तपोज्ञानमिज्यादानानि चत्वारः पादः । **दुरागतं** दुष्टादुपायात् स्वबलादन्याक्षोपायादेरागतं धनम् । **विपादिका** पादरोगः । उक्तमर्थमसहमानो मीमांसकः शङ्कते - **इदानीमिति** । यथेदानीं दृश्यते तथा पूर्वमग्रे च, न तु पूर्वदृष्टोऽधुनोच्छिन्नस्तथाऽग्रेऽप्युच्छेत्स्यति । तथा च साध्यविकल इत्यभिसन्धि निराकरोति - **नेति** । [64B] ननु स्मृतेराचारस्य वा किमर्थं वेदमूलत्वमास्थीयत इत्यत आह - **स्वातन्त्र्येणेति** । ननु तेऽप्यतीन्द्रियार्थद्रष्टारो भविष्यन्तीत्यत आह - **मन्वादीनामिति** । प्रमाणाभावादित्यनाश्वासादिति भावः । ननु मा भूदेषामतीन्द्रियार्थ-द्रष्टृत्वे समाश्वासः । भूयोभूयः स्वदृष्टशिष्टाचारपरिचयात् स्मृतिप्रणयनम्, ततः पुनरिदानीं शिष्टाचारपरम्परा भविष्यतीति किमनेनोक्तं(क्ते)न शेषानुमानेनेत्याशङ्क्याप्रमाणमूलतया परिहरति - **अन्धपरम्परेति** । उभयोरप्य-प्रमाणमूलत्वेनाव्यवस्थापकत्वात् । प्राभाकरास्तु नित्यमाचारलिङ्गानुमेयं पठितमेव संसारे सहस्त्रशाखं वेदमनुमन्यन्ते न त्वपठितमुच्छिन्नशाखम्, तदुत्थाप्य व्याघातेन दूषयति - **आसंसारमिति** । व्याघातमेव विशदयति - **उत्पत्तित** इति । तथाहि विविधधर्मवेदनाद् वेदः, ज्ञातस्य च तस्य तद्वेदकत्वम्, ज्ञान(त)[स्य] चोत्पन्नस्य वा यथाऽस्मद्दर्शने, अभिव्यक्तस्य च यथा त्वन्मते, उभयमते वा यथाभिप्रायस्य, उभयं त्रितयमप्यनुपपन्नम्, नानभ्युपगमात् । ततस्त्रिभिरपि प्रकारैरनवच्छेदाद् वर्णमात्रं स्यात् । तच्च कचटतपादिवदनर्थकत्वं(नर्थकं) वेदत्वमिति भावः । नन्वस्य नित्यानुमेयस्य मा भूतामुत्पत्त्यभिव्यक्ती, अत एव नाभिप्रायाव्यवच्छेदोऽपि, अनुत्पन्नानभिव्यक्तया(यो)रभिप्रायानारोहात् । तदेभिस्त्रितयैरनवच्छेदो नित्यानुमेयस्य नु [65A] दूषणम् सत्तामात्रं तु शिष्टाचारानुमितकर्तव्यत्वलिङ्गवेद्यमिति किमनेनोक्तेनेत्याह- **यदि चेति** । गुरुमते हि कर्तव्यताज्ञानं विना न प्रवृत्तिः, तच्च वेदाद् वाऽनुमानाद् वा भवतु न कश्चिद् विशेषः । तथा च शिष्टाचारत्वलिङ्गप्रसूतकार्यताज्ञाने किमवशिष्यते यदर्थं वेदानुमानस्वीकारः । प्रवृत्तेरपि तावतैवोपपत्तेः । न च वेद एव कर्तव्यताधियमादधातीति युक्तम् । तथा सति जले तज्जातीयतया श्रेयःसाधनतामनुमापा(या)पि कर्तव्यताबोधाभावात् प्रवृत्त्यनुपपत्तिप्रसङ्गात् तदर्थस्येतिकर्तव्यताज्ञानात् प्रवृत्तेरित्यर्थः । ननु धर्मवेदकत्वनिबन्धनो वेदव्यवहारः सर्वत्र, त्स(स) च शिष्टाचार-त्वादित्यत्र लिङ्गेऽप्यस्ति, ततस्तस्यापि धर्मवेदकत्वेन नित्यानुमेयवेदपदेनाभिधानमित्याशङ्क्य निराकरोति - **न चेति** । नित्यानुमेयो हि वेदोऽभ्युपगतः । लिङ्गं च प्रत्यक्षम् । धर्मवेदकश्च शब्दः । अतः कथं लिङ्गं(ङ्गेन) नित्यानुमेयो वेदो भविष्यतीत्यर्थः ।

60. अथ शिष्टाचारत्वात् प्रमाणमूलोऽयमिति चेत् । ततः सिद्धसाधनम् । प्रत्यक्षमूलत्वाभ्युपगमात् । तदसम्भवेऽप्यनुमानसम्भवात् । नित्यमज्ञायमानत्वात् तदप्रत्यायकम्, कथमनुमानम्, कथं च मूलमिति चेत् । वेदः किमज्ञायमानः प्रत्यायकोऽप्रत्यायक एव वा मूलं येन जडतम ! तमाद्रियसे । अनुमितत्वाज्ज्ञायमान एव इति चेत् । लिङ्गमप्येवमेवास्तु । अनुमेयप्रतीतेः प्राक्तनी लिङ्गप्रतीतिरपेक्षिता, कारणत्वात्, न तु पश्चात्तनीति चेत् । शब्दप्रतीतिरप्येवमेव । आचारस्वरूपेण शब्दमूलत्वमनुमीयते, तेन तु शब्देन कर्तव्यता प्रतीयते इति चेत्, न । आचारस्वरूपस्य प्रत्यक्षसिद्धत्वेन मूलान्तरानपेक्षणात् । तत्कर्तव्यतायास्तु प्रत्यक्षाभावादप्रमिततया च शब्दानुमानानवकाशात् प्रत्यक्षश्रुतेरसम्भवाच्छिष्टाचारत्वेनैव कर्तव्यतामनुमाय तया मूलशब्दानुमानम्, तथा च किं तेन ? तदर्थस्य प्रागेव सिद्धेः । तथाप्यागममूलत्वेनैव तस्य व्याप्तेरिति चेत् । अत एव तर्हि तस्य प्रत्यक्षानुमानमूलत्वमनुमेयम् । आदिमतस्तत्त्वं स्यादयं त्वनादिरिति चेत् । आचारोऽपि तर्हि प्रथमतस्तथा स्यादयं त्वनादिर्विनाऽप्यागमं भविष्यति । आचारकर्तव्यतानुमानयोरेवमनादित्वमस्तु किं नश्छिन्नमिति चेत् । प्रथमं तावन्नित्यानुमेयो वेद इति, द्वितीयं च देशनैव धर्मे प्रमाणमिति । अथायमाशयः । वैदिका अप्याचारा राजसूयाश्वमेधादयः समुच्छिद्यमाना दृश्यन्ते, यत इदानीं नानुष्ठीयन्ते, न चैते प्रागपि नानुष्ठिता एव, तदर्थस्य वेदराशेरप्रामाण्यप्रसङ्गात्, समुद्रतरणोपदेशवत् । न चैवमेवास्तु, दर्शाद्युपदेशेन तुल्ययोगक्षेमत्वात् । एवं पुनः स कश्चित् कालो भविता यत्रैते अनुष्ठास्यन्ते, तथाऽन्येऽप्याचाराः समुच्छेत्स्यन्ते अनुष्ठास्यन्ते चेति न विच्छेदः । ततस्तद्वद् आगममूलतेति चेत् । एवं तर्हि प्रवाहादौ लिङ्गाभावे कर्तव्यत्वागमयोरननुमानादसत्यां प्रत्यक्षश्रुतौ आचारसङ्कथाऽपि कथमिति सर्वविप्लवः । तस्मात् प्रत्यक्षश्रुतिरेव मूलमाचारस्य, सा चेदानीं नास्तीति शाखोच्छेदः ।

60. सामान्येन प्रमाणमूलत्वेऽवगते पक्षधर्मतया वेदस्य सिद्धिर्भविष्यतीत्याशयेन शङ्कते - **अथे**ति । सिद्धसाधनमुक्तं प्रतिपादयति - **प्रत्यक्षे**ति । व्यवहारस्य प्रमाणमूलतामात्रमन्यतमप्रमाणमूलतामात्रमपि निर्वहति । न च यो यावान् व्यवहारः स सर्वः प्रमाणमूल इति व्याप्तिरस्ति भोजनादिव्यवहारेणानेकान्तात् । तथा च प्रत्यक्षसिद्धे वाऽऽचारे प्रत्यक्षमेव मूलमित्येव, तदुपपन्नावपेक्षितप्रमाणमूलता न सिद्ध्यतीत्याशयः । नन्वाचारस्वरूपे प्रत्यक्षमूलता [65B] संभाव्यते । न तु तस्येष्टसाधनत्व[म्] इत्यत आह - **तदसंभवेऽपी**ति । यथाहि अन्नपानाद्याहारभेदस्य जीवनसाधनत्वे प्रत्यक्षासंभवमप्यनुमानमूलं तथाऽत्रापि भविष्यतीत्यर्थः । ननु सामान्यतो ज्ञानानुमानमस्तीत्यनुमेयम्, न तु विशेषलिङ्गावभासोऽस्ति, विशेषतोऽनिश्चितं च लिङ्गमगमकमतोऽगमकं सन्नैतदनुमानं नापि मूलमित्याशयवान् शङ्कते – **नित्यमि**ति । अज्ञायमानत्वाद्विशेषाकार(रे)णेत्यर्थः । तदप्रत्यायकमाचाराप्रत्यायकम् । विशेषतोऽविनिश्चितस्यैव लिङ्गस्यानिश्चायकत्वादिति भावः । वाक्यमपि हि तद्विशेषाकारेण प्रतिसहितमेवार्थप्रत्यायकं न तु वाक्यत्वमात्रेण प्रतिसहितम् । नित्यानुमेयवेदपक्षे च विशेषाकारेण वेदप्रतिभासो नास्त्यतोऽप्रतिपादकस्य कथं वेदत्वम् ? कथं चानुमेयमिति? परिहरति – **वेदः किमि**ति । अत्रापि विशेषत इति शेषः । सामान्यतस्तु त[ज्]ज्ञानं वेद इवानुमानेऽपि समानमिति भावः । एतदेवाशङ्क्य परिहरति - **अनुमितत्वादि**ति । सामान्येनेत्यर्थः । **लिङ्गमपी**ति । यथाहि सामान्येन ज्ञातो वेदोऽस्य प्रतीति(तिः) तथा लिङ्गमपीत्यर्थः । शङ्कते - **अनुमानप्रतीतिरि**ति । अयमाशयः । आचारस्य हि तत्साधनत्वे कर्तव्यत्वे वाऽनुमानं प्रसाधनीयम् एवं चानुमानविषयादस्मादपूर्वभाविनी लिङ्गप्रतीतिर्वक्तव्या । इह चाचारकर्तव्यताविशेषेणैव

लिङ्गानुमानम्। तत्र यदि लिङ्गप्रतीतिं विनैवाचारकर्तव्यतावगम(मा)नुमानं तावल्लिङ्गेऽवगतेऽऽचारकर्तव्यताज्ञानमिति अनुमानम् आचारकर्तव्यताज्ञाने च लिङ्गानुमान[66A]मितीतरेतराश्रयत्वमिति । एतदपि तुल्यतया परिहरति – **शब्दप्रतीतिर**पीति । आचारकर्तव्यताज्ञानेन शब्दानुमानम्, तेन चाचारकर्तव्यता । यदि च शब्दप्रतीतिं विना आचारकर्तव्यतावगमस्तदा व्यर्थमनुमानमिति तुल्यमित्यर्थः । ननु न शिष्टाचार[प्र]माणमूलत्वमात्रमनुमीयते येन प्रत्यक्षादिना सिद्धसाधनावकाशः स्यात् किन्तु वेदप्रमाणमूलत्वमेवेत्याशयवान् शङ्कते - **आचारस्वरूपेणे**ति। एतदपि परिहरति - **ने**ति । अयमाशयः - आचारस्वरूपसिद्ध्यर्थं वा वेदानुमानम्, आचारकर्तव्यताबोधार्थं वा अविनाभावमात्रेण वा ? नाद्यः । तत्र प्रत्यक्षस्यैव मूलत्वादित्यत आह - **प्रत्यक्षसिद्धत्वेने**ति । न द्वितीयः। कर्तव्यतायामप्रतीतायां वेदाननुमानात् प्रतीतायां च तत्प्रतिपादकस्य वेदस्यानुमानशब्दर्थ(मानवैयर्थ्य)मित्याह - **तदि**ति । संछेदमाशङ्कते – **तथा च किं तेने**ति । न हि दर्शपूर्णमासादिव्यवहारस्यागममूलत्वदर्शनेन सर्वव्यवहारस्य तत्पूर्वकत्वाविनाभावसिद्धिः, सहचारमात्रेण तदभावात्, भावे वा पौरुषेयवाक्यस्येव वैदिकवाक्यस्यापि प्रत्यक्षानुमानमूलविवक्षाधीनवचनरूपत्वप्रसङ्ग इत्याशयवान् परिहरति – **अत एवे**ति । आगमत्वादेव देव(वेद)स्य प्रत्यक्षानुमानमूलत्वमनुमीयतामित्यर्थः । अत्रोपाधिमाह - **आदिमत** इति । आगमस्येत्यर्थः । **तत्त्वमि**ति प्रत्यक्षानुमानमूलत्वम् । अयं आगम इत्यर्थः । अयं चोपाधिः । प्रत्यक्षादिपूर्वकत्व इवागमपूर्वकत्वेऽपि [66B] साध्यं मन्वानः परिहरति - **आचारोऽपी**ति । आगममूलस्य प्रथममनुमीयमानोऽऽचारः । इदं प्रथम[मागमपूर्वकत्वम्] । पूर्वपूर्वाचारपरम्परोपलम्भमात्राधीनस्तु [आगमः ।]आगममुपलभ्यानुष्ठितोऽनादिस्तत्रेदं प्रथमागमपूर्वकत्वं दृष्टम्, अयं पुनरनादिरागमनिरपेक्षो भविष्यतीत्यर्थः । एवं प्रपञ्चतो नित्यानुमेयवेदपक्षक्षतिमावेद्यं(द्य) स्वसिद्धान्त-मपश्यन् वैलक्ष्यविजृम्भिकामिषेण यथाकथञ्चन प्रत्यवतिष्ठते – **आचारे**ति । **आचारे**ण कर्तव्यता, [कर्तव्य]तया चाचारस्तेन पुनः कर्तव्यतेत्यादिचोदना चेत्यत्रापि छिन्नम् इति मन्तव्यम् । अनुमानस्यापि धर्मे प्रमाणत्वाभ्युपगमा-दिति हृदयम्, ततस्तद्विच्छेदः, तथाप्यागममूलत्वमेव व्याप्तिवशाद् यथा अश्वमेधादयः आचाराः पूर्वमनुष्ठिता अपीदानीमुच्छिन्नास्तथाऽन्येऽप्याचाराः आचारत्वेनैवोच्छेदमेष्यन्ति । एवं वा घूकाद्याचाराणामप्यनादिभावेऽश्वमेधा-द्याचारवदागममूलत्वमत्र विधि(धे)यम् । अथवा मा वा नित्यानुमेयो वेद इत्याह - **अथायमि**ति । **न चैवमेवे**ति। न राजसूयादिप्रतिपादकस्याप्रामाण्यमेवेत्यर्थः । **दर्शे**ति । नित्यनिर्दोषतया चाप्तोक्तत्वेन वाऽप्रामाण्यव्युदास-स्योभयत्रापि समानत्वादित्यर्थः । **तथाऽन्येऽपी**ति । अश्र(श्रु)यमाणवेदवाक्या इत्यर्थः । **तद्वदि**ति । राजसूयादि-वदित्यर्थः । एतदुक्तं भवति । विवादाध्यासिता आचारा वेदमूलाः, [67A] उच्छेदानन्तरभाविप्रवाहरूपत्वात्, राजसूयाश्वमेधादिवदिति । न प्रत्यक्षादिना सिद्धसाधनम्, नाप्यात्यन्तिक उच्छेद इति । एतदयमपि पराभिमतं दूषयति - **एवं तहीं**ति । आचारो हि तयोर्लिङ्गम्, स च विच्छेदानन्तरं मूलाभावादनुपपन्नः । अष्टकाद्याचाराणा-मुच्छिन्नत्वादाचारस्य लिङ्गस्याभावे तत्कर्तव्यतागमानुमानाभावादसत्यां प्रत्यक्षश्रुतावनुष्ठानमेव न स्यादित्यसिद्धो हेतुरित्यर्थः । परप्रमाणमसिद्धमुक्त्वा स्वप्रमाणनिर्वाहायोपसंहरति - **तस्मादि**ति ।

61. अधुनाप्यस्ति सान्यत्रेति चेत्, अत्र कथं नास्ति ? किमुपाध्यायवंशानामन्यत्र गमनात्, तेषामेवोच्छेदाद् वा, आहोस्वित् स्वाध्यायविच्छेदात् । न प्रथमद्वितीयौ । सर्वेषामन्यत्र गमने उच्छेदे वा नियमेन भारतवर्षे शिष्टाचारस्याप्युच्छेदप्रसङ्गात्, तस्याध्येतृसमानकर्तृकत्वात् । अन्यत आगतैराचारप्रवर्तने अध्ययनप्रवर्तनमपि स्यात् । न तृतीयः । आध्यात्मिकशक्तिसम्पन्नानामन्तेवासिनामविच्छेदे तस्यासम्भवात् । तस्मादायुरारोग्यबलवीर्यश्रद्धाशमदमग्रहणधारणादिशक्तेरहरहरपचीयमानत्वात् स्वाध्यायानुष्ठाने शीर्यमाणे

कथञ्चिदनुवर्तते । विश्वपरिग्रहाच्च न सहसा सर्वोच्छेद इति युक्तमुत्पश्यामः । गतानुगतिको लोक इत्यप्रामाणिक एवाचारः, न तु शाखोच्छेदः, अनेकशाखागतेतिकर्तव्यतापूरणीयत्वात्, एकस्मिन्नपि कर्मण्यनाश्वासप्रसङ्गादिति चेत् । एवं हि महाजनपरिग्रहस्योपप्लवसम्भवे वेदा अपि गतानुगतिकतयैव लोकैः परिगृह्यन्ते इति न वेदाः प्रमाणं स्युः, तथा च वृश्चिकभिया पलायमानस्याशीविषमुखे निपातः । एतमेव च कालक्रमभाविनमनाश्वासमाशङ्क्यमानैर्महर्षिभिः प्रतिविहितमतो नोक्तदोषोऽपि, न चायमुच्छेदो ज्ञानक्रमेण येन श्लाघ्यः स्यात्, अपि तु प्रमादमदमानालस्यनास्तिक्यपरिपाकक्रमेण, ततश्चोच्छेदानन्तरं पुनः प्रवाहः, तदनन्तरश्च पुनरुच्छेद इति सारस्वतमिव स्रोतः, अन्यथा कृतहानप्रसङ्गात् । तथा च भाविप्रवाहवद् भवन्नप्ययमुच्छेदपूर्वक इत्यनुमीयते । स्मरति च भगवान् व्यासो गीतासु भगवद्वचनम्–

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ इति ॥

61. तदेवं नित्यानुमेयवेदपक्षं निराकृत्य विप्रकीर्णशाखवेदपक्षमाशङ्क्य निराकरोति – **अधुनापी**ति। **आयुः** कालविशेषावच्छिन्नप्राणवायुसम्बन्धः । **आरोग्यं** रोगाभावः । **बलं** सामर्थ्यम् । अङ्गप्रत्यङ्गपूर्णता । तथाभूतस्यास्योत्साहो **वीर्यम्** अनुष्ठानसहत्वमिति यावत् । **श्रद्धा** आस्तिक्यज्ञानम् । **शमः** कर्मेन्द्रियनियमः अहिंसा। जिह्वामनसोर्नियमो दमः कार्यव्रतादिर्वा । [1]त्कदि त्पहेतुः(?) प्राचीनप्राचीनसंस्कारो **ग्रहणम्** । गृहीताविस्मरणहेतुः संस्कारो **धारणा** । अत्र शङ्कते – **गतानुगतिक** इति । शाखोच्छेदसम्भावनाया बाधकमाह – **अनेकशाखे**ति । अस्य प्रस्तुतस्य कस्यचित् कर्मणोऽपीतिकर्तव्यतोच्छिन्नशाखां प्रतिपाद्येदानीं न ज्ञायत इत्यसम्पूर्णकर्मकत्वं [67B] फलदातृ भविष्यतीति प्रचूरतरवित्तव्ययायाससाध्ये पारलौकिके कर्मणि कथमेकोऽपि प्रवर्तेतेत्यर्थः । महाजनपरिगृहीतत्वेनास्याच(चा)रस्य न गतानुगतिकता, तथाभूतस्यापि गतानुगतिकत्वे अग्निष्टोमाद्याचाराणामपि तथात्वप्रसक्तौ वेदानामप्रामाण्यप्रसङ्ग इत्याशयवान् परिहरति – **वृश्चिके**ति । उच्छिन्नशाखवेदस्वीकारे नानुष्ठानम् । वृश्चिकभिया पलायमानत्वं गतानुगतिकत्वेनाप्रामाणिकत्वम्, तस्याशीविषमुखे निपातः सर्ववेदाप्रामाण्यप्रसङ्गे निपात इत्यर्थः । यत् तु अनेकेत्याद्युक्तं तत्र परिहारमाह – **एतमेवे**ति । नोक्तदोषोऽननुष्ठानलक्षण उच्छिन्नशाखार्थस्य स्मृतिप्रतिपादितत्वात् अदोष इत्यर्थः । अत एव स[न्]निहितकारणस्मृतिमाचारः कार्यतयाऽनुमापयति, तया च श्रुतिकल्पना, तया चाव्यवहितकारणमागममिति । तथा पठन्ति – 'आचारात् स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम्'इति । ननु यद्ययमाचारः प्रामाणिक [उच्छिन्न]शाखा तस्य मूलं तदा शाखान्तरवत् तच्छाखाऽप्यन्तेवासिभिर्गृह्येत तथा च नोच्छेदः । स चेन्नुनं समुद्रतरणोपदेशवच्छाखैवाप्रमाणमिति । बुद्धिपूर्वकोच्छित्तिप्रमाणत्वे तु अन्तेवासिभिरभियोगनौ(तो) गृह्यमाणा [68A] कथमुच्छेत्स्यतीत्यत आह – **न चे**ति । शक्तस्य कर्तव्यताऽकरणम्, कर्तव्यताऽकरणे बाधः प्रमादः । मद उन्मत्ततादिना विद्यमानाविद्यमानगुणाध्यारोपेण कस्मादध्येतव्यम् । न हि मत्तः कश्चिद् उत्कर्षवानुपाध्य(ध्या)य इत्यात्मन्युत्कर्षप्रत्ययो मानः। आलस्यं प्रयत्नविरहः। नास्तिक्यं किमपि नास्ति किमपि न सत्यमित्यादिज्ञानम् । तदेवं सिद्धं ह्रासदर्शनतो ह्रासः

---

१. भ्रष्टः पाठः ।

सम्प्रदायस्य मीयतामित्युपसंहरति - **ततश्चे**ति । श्रूयमाणा अपि वेदाः सार्थ[म्] उच्छेत्स्यन्ति वेदत्वादाचारानुमितवेदवदिति । न च दिनरात्रिह्रासैरनेकान्तता पक्षत्वात् । यथोक्तम् - 'निष्प्रभेऽस्मिन्निरालोके'त्यादि । एवं तनु-तरु-गिरि-सागरादिप्रवाहविच्छेदो वस्तुत्वादिभ्यः । न च विपक्षे बाधकाभावः कार्यवध्याण्डविनाशेन विनाशाव-श्यंभावनियमप्रसाधनादिति । ननु सिद्ध्यतु वर्तमानप्रवाहोच्छेदो भाविप्रवाह[उच्छेद]स्तु कुतस्त्य इत्यत आह - **अन्यथे**ति । पुनर्देहप्रवाहानुत्पत्ताविह कृतं कर्म विफलं प्रसज्येतेत्यर्थः । विवादाध्यासितं कर्म फलवदचीर्णप्रायश्चित्तकर्मत्वादारब्धदेहकर्मवदिति । विप्रतिपन्नं फलं शरीरादिकारणकं फलत्वात् संप्रतिपन्नफलवदिति प्रयोगो वेदितव्यः । नन्वेवमपि प्रवाहविच्छेदासिद्धौ परतन्त्रपुरुषपूर्वोऽनादिरेवायं सम्प्रदाय इत्यत्र न किञ्चिद-निष्टमित्यत आह - **तथा चे**ति । अत्रापि प्रयोगः - वर्तमानप्रवाह उच्छेदपूर्वकः प्रवाहत्वात्, भाविप्रवाहवदिति । अत्रैव स्मृतिसंवादमाह — **स्मरति चे**ति । **धर्मस्ये**ति चोदनालक्षितत्वाद् यागादेः । **ग्लानिरु**च्छेदः । **अधर्मस्ये**ति अचोदनाभिलक्षितत्वात् मण्डलीकरणादेः । **अभ्युत्थानमु**त्पत्तिः । **साधूना**मिति त्रयीमार्गा[त्] त्रिवृत्तानाम् । **दुष्कृतां** त्रयीनिषिद्धाचरणरतानामिति । **धर्मसंस्थापनाये**ति यागादिकर्मनियमायेत्यर्थः ।

**62. कः पुनरयं महाजनपरिग्रहः ? हेतुदर्शनशून्यैर्ग्रहणधारणार्थानुष्ठानादिः, स ह्यत्र न स्याद् ऋते निमित्तम् । न ह्यत्रालस्यादिर्निमित्तम् । दुःखमयकर्मप्रधानत्वात् । नाप्यन्यत्र सिद्धप्रामाण्येऽभ्युपायेऽ-नधिकारेणास्मिन्ननन्यगतिकतयाऽनुप्रवेशः । परैः पूज्यानामप्यत्राप्रवेशात् । नापि भक्ष्यपेयाद्यद्वैतरागः, तद्विभागव्यवस्थापरत्वात् । नापि कुतर्काभ्यासाहितव्यामोहः, आकुमारं प्रवृत्तेः । नापि सम्भवद्विप्रलम्भ-पाषण्डसंसर्गः, पित्रादिक्रमेण प्रवर्तनात् । नापि योगाभ्यासाभिमानेनाव्यग्रताभिसन्धिः, प्राथमिकस्य कर्मकाण्डे सुतरां व्यग्रत्वात् । नापि जीविका, प्रागुक्तेन न्यायेन दृष्टफलाभावात् । नापि कुहकवञ्चना, प्रकृते तदसम्भवात् । सम्भवन्ति चैते हेतवो बौद्धाद्यागमपरिग्रहे । तथा हि । भूयस्तत्र कर्मलाघव-मित्यलसाः । इतः पतितानामप्यनुप्रवेश इत्यनन्यगतिकाः । भक्ष्याद्यनियम इति रागिणः । स्वेच्छया परिग्रह इति कुतर्काभ्यासिनः । पित्रादिक्रमाभावात् प्रवृत्तिरिति पाषण्डसंसर्गिणः । 'उभयोरन्तरं ज्ञात्वा कस्य शौचं विधीयते' इत्यादिश्रवणादव्यग्रताभिमानिनः । सप्तघटिकाभोजनादिसिद्धेर्जीविकेत्ययोग्याः । आदित्यस्तम्भनम्, पाषाणपाटनम्, शाखाभङ्गः, भूतावेशः, प्रतिमाजल्पनम्, धातुवादः, इत्यादिधन्धनात् कुहकवञ्चिताः । ततस्तान् परिगृह्णन्तीति सम्भाव्यते । अतो न ते महाजनपरिगृहीता इति विभागः । स्यादेतत् । यद्येवं सर्वकर्मणां वृत्तिनिरोधो न किञ्चिदुत्पद्यते, न किञ्चिद् विनश्यति इति स्तिमिता-काशकल्पे जगति कुतो विशेषात् पुनः सर्गः ? प्रकृतिपरिणतेरिति साङ्ख्यानां शोभते । ब्रह्मपरिणतेरिति भास्करगोत्रे युज्यते । वासनापरिपाकादिति सौगतमतमनुधावति । कालविशेषादिति चोपाधिविशेषाभावा-दयुक्तम् । असतां चोपलक्षणानां न विशेषकत्वम्, सर्वदा तुल्यरूपत्वात् । न च ज्ञानद्वारा । अनित्यस्य तस्य तदानीमभावात् । नित्यस्य च विषयतः स्वरूपतश्च अविशेषादिति चेत्, न । शरीरसंक्षोभश्रम-जनितनिद्राणां प्राणिनामायुःपरिपाकक्रमसम्पादनैकप्रयोजनश्वाससन्तानानुवृत्तिवद् महाभूतसंप्लवसंक्षोभ-लब्धसंस्काराणां परमाणूनां मन्दतरतमादिभावेन कालावच्छेदैकप्रयोजनस्य प्रचयाख्यसंयोगपर्यन्तस्य कर्मसन्तानस्येश्वरनिःश्वसितस्यानुवृत्तेः । कियानसावित्यत्राविरोधादागमप्रसिद्धिमनतिक्रम्य तावन्तमेव कालमित्यनुमन्यते । ब्रह्माण्डान्तरव्यवहारो वा कालोपाधिः । तदवच्छिन्ने काले पुनः सर्गः । यथा खल्वलाबुलतायां वितितानि फलानि, तथा परमेश्वरशक्तावनुस्यूतानि सहस्रशोऽण्डानि इति श्रूयते ।

तस्मादेवं विच्छेदसम्भवे कस्य केन परिग्रहो यतः प्रामाण्यं स्यात् । ज्ञापकश्चायमर्थो न कारकः ततः कारकाभावान्निवर्तमानं कार्यं ज्ञापकाभिमतः कथङ्कारमास्थापयेत् । स्यादेतत् सन्तु कपिलादय एव साक्षात्कृतधर्माणः कर्मयोगसिद्धास्ते एव संसाराङ्गारेषु पच्यमानान् प्राणिनः पश्यन्तः परमकारुणिकाः प्रियहितोपदेशेनानुग्रहीष्यन्ति, कृतं परमेश्वरेणानपेक्षितकीटादिसंख्यापरिज्ञानवतेति चेत्, न । तदन्यस्मिन्ननाश्वासात् । तथा ह्यतीन्द्रियार्थदर्शनोपायो भावना इत्यभ्युपगमेऽपि नासौ सत्यमेव साक्षात्कार-मुत्पादयति यतः समाश्वसिमः । प्रमाणान्तरसंवादादिति चेत्, न । अहिंसादि हितसाधनमित्यत्र तदभावात् । आगमोऽस्तीति चेत्, न, भावनामात्रमूलत्वेन तस्याप्यनाश्वासविषयत्वात् । एकदेशसंवादेनापि प्रवृत्तिरिति चेत्, न, स्वप्नाख्यानवदन्यथापि सम्भवात् । न चानुपलब्धे भावनाऽपि । चौरसर्पादयो ह्युपलब्धा एव भीरुभिर्भाव्यन्ते । न च कर्मयोगयोर्हितसाधनत्वं कुतश्चिदुपलब्धम् ।

62. महाजनपरिग्रहं प्रश्नपूर्वकमादर्शयति । **कः पुनरिति** । **उभयोरिति** । अस्य पूर्वार्धम् – 'अत्यन्तमलिनः कायो देही चात्यन्तनिर्मलः' इति । एवं सर्वस्मिन् समर्थितावान्तरविशेषप्रतिपादनपरतया तत्तद्-वादिमतपक्षनिरसनेन इष्टमतं समाध्येयमित्यभिप्रायवांस्तत्तद्वादिपक्षं चात्र संभावयति – **स्यादेतदिति** । ननु वर्तमानोपाध्यभावेऽप्यतीतानां सूर्यसञ्चरणानामुपाधीनामुपलक्षणत्वं भविष्यतीत्यत आह – **असञ्चारेति** । कुत इत्याह - **सर्वदेति** । तथा च प्रलयानन्तरमेव कार्यजन्म स्यादिति विशेषमाशङ्क्य परिहरति - **न चेति** । स्वमतोपपादकसमाधिमाह - **नेति** । यथा सुषुप्तौ कर्मणां युगपद्वृत्तिनिरोधेन श्वाससन्तानानुवृत्तिवशात् कदाचित् प्रबोधस्तथा परमाणूनां कर्मसन्तानानुवृत्तिवशादेव कदाचित् सर्ग इत्यर्थः । **प्रचयेति** । यावत् प्रचयाख्यः संयोगोऽनुवर्तते तावत् कर्मसन्तानानुवृत्तिरित्यर्थः । प्रचयाख्यसंयोगो द्व्यणुकारम्भकसंयोगपर्यन्तः । आगमप्रसिद्धिवशेन ब्रह्मवर्षशतपर्यन्तोपाधिरित्याह – **कियानसाविति** । अथवा प्रकृतब्रह्माण्डव्यतिरिक्तब्रह्माण्डान्तरवृत्तव्यवहारविशेषा-वच्छिन्नकाले सर्ग इत्याह - **ब्रह्माण्डान्तरेति** । अनेकब्रह्माण्डानि आगमप्रसिद्धेरवसेयानीत्याह - **यथेति** । [69A] एवं महाजनानां वेदस्य चाभावेनोभयस्याप्यसिद्धेरिति यदुक्तं तत् समर्थितम् । किञ्च, महाजनपरिग्रहस्य प्रामाण्यज्ञापकत्वं न तूत्पादकत्वम् अतः कारणाभावादविद्यमानं कथं ज्ञापयिष्यतीत्याह - **ज्ञापकश्चेति** । **अयमिति** महाजनपरिग्रहरूपः । कथंकारं कथंकृत्वेत्यर्थः । एवं निर्दोषवेदद्वारको धर्मसम्प्रदायो भविष्यतीति पक्षं निरस्य योगकर्मसिद्धसर्वज्ञद्वारको वेति पक्षमाशङ्क्यते - **स्यादेतदिति** । तदेतदनाश्वासेन परिहरति - **नेति** । अनाश्वासं व्युत्पादयति - **तथाहीति** । संवादेनाश्वासमाशङ्कते – **प्रमाणेति** । प्रमाणान्न समाश्वासिम इत्यनुपंजीवीयां[1] । भवेदेवं यदि प्रमाणं स्यान्न त्वस्तीत्याह - **नेति** । आगमप्रमाणमाशङ्क्य परिहरति - **एकदेशेति** । एकदेशेति पूर्वभावनामनङ्गीकृत्योक्तम् । सम्प्रति भावनाऽपि न भवतीत्याह - **न चेति** । साधनेतिकर्तव्यतायारित्यर्थः । अनुज्ञानं भावयतीति भावनाऽऽत्मन्ये(न्य)तिर(ती)न्द्रिये मनसा संयोगः, तस्य साध्यत्वं साक्षात्कारोत्पादनं दृष्ट-शिष्टाचारानुष्ठानादिना चेष्टसहकारिवशात् । दृष्टवत् साधनेतिकर्तव्यताप्रत्ययोत्पादेऽपि शक्तिरप्रतिहता । न हि चौरसर्पादिवद् दर्शनपूर्वैवोपलब्धिः सर्वत्र । तथा सत्यदृष्टचराः परमाण्वादयो योगिनां प्रत्यक्षा भवेयुः । यथोक्तम् - **चौरसर्पादय** इति । न तु भाव्यन्त इति । स्मर्यत इति सिद्धसाधनम् । स्मृतेरनुभवपूर्वकत्वनियमात् । न चैवं तावता योगिनां मनसा इन्द्रियेण वा अपूर्वार्थगोचरं ज्ञानं जनयितव्यम् । अथ गृह्यत इत्यर्थः । तथा

---

१. भष्टः पाठः ।

सत्यनवस्थानाद् [69B] अचिरोत्पन्नपदार्थग्रहणप्रसङ्गाच्चेति । अतो मनोयोगादतीन्द्रियार्थज्ञानोपायो भविष्यति ..... स्यादित्यत आह - **न चे**ति । अत्र मनोयोग एव भावनेति च योग इति च । अस्तु तावत् स्वतो हितसाधनत्वमप्यस्तु च कर्मणोऽपि च योगसहाक्य(साहाय्य)त्वेन हि तत्साधनत्वं किन्त्वेतदेवाप्रतीतं न प्रवृत्तौ कल्प्यते । न चाप्रवृत्तौ योगसंभवोऽसंभवे नातीन्द्रियार्थसमुत्पाद इति भावः । ननु प्रतीयते अतीन्द्रियप्रदेशे मनसो योगः, तत्कर्मापि तदनुरूपजीवनमात्रनिमित्तं लोकव्यवहारत एव दृश्यत इत्यर्थः ।

63. न चैतयोः स्वरूपेणोपलम्भः क्वचिदुपयुज्यते, भावनासाध्यो वा । न चास्मिन्नन्वयव्यतिरेकौ सम्भवतः । देहान्तरभोग्यत्वात् फलस्याप्रतीततया तदनुष्ठाने तदभावाच्च । न च कर्तृभोक्तृरूपोभयदेहप्रतिसन्धानादेव तदुपपद्यते । तदभावात् । नह्येतस्य पूर्वकर्मणः फलमिदमनुभवामीति कश्चित् प्रतिसन्धत्ते । केचित् तथा भविष्यन्तीति सम्भावनामात्रेऽप्यनाश्वासात् । विनिगमनायां प्रमाणाभावात् । प्रतिपन्निशीथनिद्राणप्रातःप्रतिबुद्धसमस्तोपाध्यायवदन्योन्यसंवादात् कपिलादिषु समाश्वास इति चेत्, न । एकजन्मप्रतिसन्धानवत् जन्मान्तरप्रतिसन्धाने प्रमाणाभावात् । तथापि च अधिकारिविशेषेण ब्राह्मणत्वाद्यप्रतिसन्धानेऽनुष्ठानरूपस्याश्वासस्याभावात् । न हि पूर्वजन्मनि मातापित्रोर्ब्राह्मण्यात् तदुत्तरत्र ब्राह्मण्यमिति नियमः येन सर्गादौ वर्णादिधर्मव्यवस्था स्यात् । ईश्वरवद् अदृष्टविशेषोपनिबद्धभूतविशेषानुपलम्भात् । अतीन्द्रियार्थदर्शित्वे चानाश्वासस्योक्तत्वात् । एतेन ब्रह्माण्डान्तरसञ्चारिवर्णव्यवस्थया सम्प्रदायप्रवर्तनमपास्तम् । सञ्चारशक्तेरभावात् । वर्षान्तरसञ्चरणमेव हि दुष्करम्, कुतो लोकान्तरसञ्चारः, कुतस्तरां च ब्रह्माण्डान्तरगमनम् । अणिमादिसम्पत्तेरेवमपि स्यादिति चेत्, न । अत्रापि प्रमाणाभावात् सम्भावनामात्रेण समाश्वासानुपपत्तेः । आद्यमहाजनपरिग्रहान्यथानुपपत्तिरेवात्र प्रमाणमिति चेत् । न । एवम्भूतैककल्पनयैवोपपत्तौ भूयः कल्पनायां गौरवप्रसङ्गात् । विदेहनिर्माणशक्तेरणिमादिविभूतेश्चावश्याभ्युपगन्तव्यत्वात् । अस्तु एक एवेति चेत्, न तर्हीश्वरमन्तरेणान्यत्र समाश्वासः ।

कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत् क्रीडति ।
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवं
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेष्वपि ॥४॥

63. प्रतीतो योगो भाव्यते तस्मात् अतीन्द्रियो भविष्यतीत्यत आह - **न चैतयोरि**ति । हितसाधनत्वज्ञानाद् विप्रतिपत्तिः न तु वस्तुमात्रज्ञानादतिप्रसङ्गादित्यर्थः । ननु यथाऽन्वयव्यतिरेकाभ्यां साधनभावोऽवधार्यते अन्यत्र तथाऽत्रापि तथैव साधनत्वनिश्चयो भविष्यतीत्यत आह - **न चास्मिन्नि**ति । कुत इत्यत आह - **देहान्तरे**ति । अपि च प्रवृत्तौ सत्यां कर्मयोगान्वये सति फलदर्शने दृष्टफलत्वे च इष्टसाधनत्वनिश्चयात् प्रवृत्तिरित्याशयवानाह - **अप्रतीततये**ति । हितसाधनत्वेनेति शेषः । तदभावात् फलाभावादित्यर्थः । देहान्तरोपभोग्यत्वात् फलस्येत्याशङ्कां परिहरति — **केचिदि**ति । शङ्कते — **प्रतिपदि**ति । परिहरति - **पक्षे**ति । यथैकजन्मनि कार्यभेदे प्रतिसन्धिः प्रत्यक्षस्तद्वत् तथा जन्मान्तरप्रतिसन्धिरित्यर्थः । अस्तु वा संवादात् समाश्वासस्तथाप्यन्यत्र निषिद्धाश्वासा वर्णा इति । [70A] त्रैवर्णाचारात् तद्भेदा ब्राह्मण-क्षत्रिय-वैश्यजातयः कथं प्रतिसन्धेयाः । अप्रतिसन्धाने च कथमनुष्ठानाधिकृतकर्तृतायां सर्वशक्तौ समर्थितत्वादित्याह - **तथापि चे**ति । नन्विदानीमिव

[तदाऽपि] प्रत्यक्षत एव ब्राह्मणत्वादिजातयः प्रतिसन्धास्यन्त इति आह – **न हीति** । न त्वेवमयमीश्वरेऽपि दोषः समान इत्यत आह – **ईश्वरवदित** । **कपिला**दिभिरिति विशेषः । प्रकारान्तरमाशङ्क्य परिहरति – **नेति**। अणिमादिशक्तौ प्रमाणमाशङ्कते – **आद्येति** । त्रिविधपापम् । महाजनपरिग्रहस्तत्र हेतुदर्शनशून्यैर्ग्रहणधारणादिः प्रथमः, स्वीकृतप्रामाण्य(ण्या)र्थं करणाद्यनुपालनीयत्वम् द्वितीयः, सर्वदर्शना[न्]तःप[पा]तिभिरनुष्ठीयमानार्थत्वम् तृतीयः, तत्रानन्तरं द्वयोरन्यथोपपत्तिः कथंचित् संभाव्यते । न तु प्रथमस्येति भावः । **अत्रेति** अणिमादिसम्पत्ता-वित्यर्थः। परिहरति – **नेति** । तथाहि - अणिमादिसम्पन्ना बहव एव कल्पनीयाः, एक एव वा निरतिशयशक्तिशाली ? आद्येऽनिष्टमाह – **एवमिति** । द्वितीयं कल्पः(ल्पं) परमुखेनोत्थापयति – **विदेहेति**। आदिर्य इति शेषः । परिच्छेदार्थमुपसंहरन्नीश्वरं नमस्यति - **कारमिति** । **शिवं प्रति** शिवमुद्दिश्य । **नमन्** प्रणमन् । **अन्तेष्वपि** अन्तकालेष्वपि । **भूयासम्** भावीत्याशंसा लिङ् । ननु चेतनत्वाविशेषात् कुतस्तवायं नमस्य इत्यत आह – **देवमिति** स्तुत्यमित्यर्थः । एतदेव कुत इत्यत आह – **विश्वासैकभुवमिति**। एतदपि [70B] कुत इत्यत आह – **भवमिति** जगन्मूलकारणमित्यर्थः । एतेन नित्यज्ञानत्वादीश्वरानुगुणजगत्पितृत्वमस्य सूचितम् । अथ शरीरेणाशरीरेण वाऽस्मदादिवन्मुक्तात्मवच्च कथं साक्षा[द्] युगु(ग)[प]त् कारणत्वं चेत्याशङ्क्योभयतो विशेषमाह - **निरवग्रहेति** । निष्प्रतिबन्धस्फुरदभिध्यानानुभावं नित्येच्छाप्रभाववन्तमित्युक्ते कमित्याकाङ्क्षायामाह - **य** इति । यो जगत् हारं कृत्वा आभीक्ष्ण्येन । ननु कथमयं जगत् देवः संहर्तुं शक्नोतीति चेत् सत्कर्तृत्वादित्याह - **कारमिति** । कृत्वा कृत्वेति पूर्ववदिति ।

इति श्रीवामध्वजविरचिते कुसुमाञ्जलिनिबन्धे
द्वितीयः परिच्छेदः

तृतीयः स्तबकः

॥ ॐ नमः शिवाय ॥

क्षित्यादौ शशमस्तके च मतिमत्कर्तृत्वशृङ्गत्वयो-
र्बाधादेव न सिद्धिरस्ति यदि वा सिद्धिस्ततस्तुल्यता ।
इत्थं चालितमप्यहो पदयुगं यस्य प्रतिद्वन्द्विभि-
र्धत्ते निश्चलतामतीव तमहं वन्दे महेशं गुरुम् ॥१॥ [71 A]

64. नन्वेतदपि कथम्, तत्र बाधकसम्भवात् । तथाहि । यदि स्यादुपलभ्येत । अयोग्यत्वात् सन्नपि नोपलभ्यते इति चेदेवं *तर्हि शशशृङ्गमप्ययोग्यत्वान्नोपलभ्यते इति स्यात् । नैतदेवम् । शृङ्गस्य* योग्यतयैव व्याप्तत्वादिति चेत् । चेतनस्यापि योग्योपाधिमत्तयैव व्याप्तत्वात् तद्बाधे सोऽपि बाधित एवेति तुल्यम् । व्यापकस्वार्थाद्यनुपलम्भेनाप्यनुमीयते नास्तीति । को हि प्रयोजनमन्तरेण किञ्चित् कुर्यादिति । उच्यते –

योग्यादृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम् ।
क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम् ॥१॥

स्वात्मैव तावद् योग्यानुपलब्ध्या प्रतिषेद्धुं न शक्यते, कुतस्त्वयोग्यः परमात्मा । तथाहि सुषुप्त्यवस्थायामात्मानमनुपलभमानो नास्तीत्यवधारयेत् । कस्यापराधेन पुनर्योग्योऽप्यात्मा तदानीं नोपलभ्यते ? सामग्रीवैगुण्यात् । ज्ञानादिक्षणिकविशेषगुणोपधानो ह्यात्मा गृह्यते इत्यस्य स्वभावः । ज्ञानमेव कुतो न जायते इति चिन्त्यते । पश्चाद् वा कथमुत्पत्स्यते इति चेत्, मनसोऽनिन्द्रियप्रत्यासन्नतयाऽजननात् तत्प्रत्यासत्तौ च पश्चात् जननात् । मनोवैभववादिनामिदमसंमतम् । तथाहि । मनो विभु, सर्वदा स्पर्शरहितद्रव्यत्वात्, सर्वदा विशेषगुणशून्यद्रव्यत्वात्, नित्यत्वे सत्यनारम्भकद्रव्यत्वात्, ज्ञानासमवायिकारणसंयोगाधारत्वादित्यादेरिति चेत्, न । सर्वेषामापाततः स्वरूपासिद्धत्वात् । तथाहि । यदि रूपाद्युपलब्धीनां क्रियात्वेन करणतया मनोऽनुमितिर्न तदा द्रव्यत्वसिद्धिः । अद्रव्यस्यापि करणत्वात् ।

64. एवं द्वितीयां विप्रतिपत्तिं विस्तरतो निरस्य तृतीयां विप्रतिपत्तिं निराकर्तुमुत्थापयति – **नन्विति**। यत्किञ्चित् ईश्वरे प्रमाणमुच्यते तत् सर्वं बाधितविषयतया न प्रमाणपद्धतिमध्यास्ते । तथा च पदयुगस्य बाधितविषयतया न मननसम्पादकत्वमिति रहस्यम् । तत्रानुपलभ्यमानस्यापि [स]त्त्वमिति मन्यमानः प्रतितर्कमाह - **तथा हीति** । पराभिप्रायमाशङ्क्य निवारयति - **अयोग्यत्वादिति** । कर्तृशृङ्गयोरयोग्यतया अनुपलभ्यताबाधकमाशङ्क्य समानत्वमुपदर्श्य [अन्]उपलब्धिबाधमुपसंहरति - **शृङ्गस्येति** । तदेवं सन्तान(सत्तामात्राव)स्थितानुपलम्भविरोधमाशङ्क्य संप्रति व्यापकानुपलम्भकानुमानविरोधमाशङ्कते - **व्यापकस्वेति** । व्यापकश्चासौ

स्वार्थादिश्चेति। आदिग्रहणाच्छरीरादि । प्रयोगस्तु - ईश्वरो न कर्ता प्रयोजनरहितत्वाद् अशरीरत्वाद् वा मुक्तात्मवदिति । एवं संक्षिप्त[पू]र्वपक्षमुक्तम् । अनुपलब्धिर्बाधिकापि [त]थात्वे तु न प्रतिबन्धिरिति । अनुमानयोराश्रयासिद्धिबाधाभ्यामनुपजीवत्वाद् वा बाधकमिति । सिद्धान्तमाह - **उच्यत** इति । श्लोकं व्याचष्टे **स्वात्मैवेति** । यदि तु स्वात्माऽनुपलब्ध्या निषिध्यत एवेति परोक्षया त्व(त)दा परं प्रति अनिष्टमाह - **तथाहीति**। ननु यदि योग्यः स्वात्मा किमिति नोपलभ्यत [71 B] इति पृच्छति - **कस्येति** । उत्तरम् - **सामग्रीति** । यथा योग्यो घटादि सहकारीन्द्रियसन्निकर्षाद्यु[प]धानादिविरहान्नोपलभ्यते तथा चात्मापि क्षणिकज्ञानाद्युपधानसहकारिविरहान्नोपलभ्यत इत्यर्थः । ननु तस्यामवस्थायां ज्ञानमेव कुतो न भवतीत्याशङ्क्ते – **ज्ञानमेवेति**। प्रथममजननं पश्चाच्च जननमित्यनुक्रमेण । परिहरति – **मनस** इति । उक्त(क्तं) सर्व(र्वं) समर्थयितुं परमतं [च] निराकर्तुमुपन्यस्यति – **मनोवैभवेति** । विभुत्वं प्रमाणैः परः साधयति – **तथाहीति** । द्रव्यत्वमात्रं परमाण्वादिभिरनेकान्तः, स्पर्शरहितत्वं च गुणादिभिरित्युभयोपादानम् । तथापि पाकनिक्षिप्तप्रथमक्षणवर्तिघटेनानैकान्त इत्यतः सर्वदेति । आत्मादि[वदि]ति दृष्टान्तो वेदितव्यः । द्वितीये च प्रयोगे पूर्ववद् विशेषणप्रयोजनं व्याख्येयं सर्वदेति चानुषंजनीयम् । [72 A] दिक्कालौ दृष्टान्तः । अनारम्भकं च तद्द्रव्यं चेति अनारम्भकद्रव्यम्, तथा चासिद्धिर्मनसः । स्वसंवेत्त(स्वसमवेत)मूर्तामूर्तद्रव्याद्रव्यसंयोगविभागारम्भकत्वादेश्च नानवबोधात् द्रव्यारम्भकद्रव्यत्वादिति विवक्षितत्वात् । एवमपि घटेनानेकान्तः, न हि घटोऽपि स्वसमवेतद्रव्यमारभत इति । तदर्थम् [उक्तम्] - **नित्यत्व** इति । आकाशादिदृष्टान्तश्च तृतीये, चतुर्थे तु आत्मैव दृष्टान्तः स्पष्टत्वात् [त]दनभिधानम्। दृष्टान्तस्य ग्रन्थः - विवादे दृष्टान्तोऽवश्यं वक्तव्यः अन्यथा न्यूनमवयवादिना भवेदिति रहस्यम् । आदिशब्देन निरवयवेन्द्रियत्वाच्छोत्रवदिति द्रष्टव्यम् । तदेतत् साधनपञ्चकम् । द्रव्यत्वासिद्धौ स्वरूपासिद्धेन, तत्सिद्धौ च लिङ्गग्राहकप्रमाणबाधितत्वेन च निराचष्टे - नेति । स्वरूपासिद्धिं व्युत्पादयति – **तथाहीति** । **अद्रव्यस्यापीति**। अद्रव्यमपि हि [72 B] लिङ्गज्ञानं वाक्यज्ञानं चानुमितौ वाक्यार्थप्रतीतौ च करणमुपलभ्यते लोक इत्यर्थः।

65. अथासामेव साक्षात्कारितयेन्द्रियत्वेन तदनुमातव्यम् । तथापि व्यापकस्य निरुपाधेर्नेन्द्रियत्वमित्युपाधिर्वक्तव्यः । तत्र यदि कर्णशष्कुलीवन्नियतशरीरावयवस्योपाधित्वं तदा तावन्मात्रे वृत्तिलाभः । तद्दोषे च वृत्तिनिरोधः श्रोत्रवत् प्रसज्येत । ततः शरीरमात्रमुपाधिरवसेयः । तथा च तदवच्छेदेन वृत्तिलाभे शिरसि मे वेदना, पादे मे सुखमित्याद्यव्याप्यवृत्तित्वप्रतीतिविरोधः । असमवायिकारणानुरोधेन विभुकार्याणां प्रादेशिकत्वनियमात् । शरीरतदवयवादिपरमाणुपर्यन्तोपाधिकल्पनायां कल्पनागौरवप्रसङ्गो नियमानुपपत्तिश्चेति ततोऽन्यदेवैकं सूक्ष्ममुपाधित्वेनातीन्द्रियं कल्पनीयम् । तथा च तस्यैवेन्द्रियत्वे स्वाभाविकेऽधिककल्पनायां प्रमाणाभावात् धर्मिग्राहकप्रमाणबाधः । अथ ज्ञानक्रमेणेन्द्रियसहकारितया तदनुमानम्, ततः सुतरां प्रागुक्तदोषः । यदि च मनसो वैभवेऽप्यदृष्टवशात् क्रम उपपाद्येत तदा मनसोऽसिद्धेराश्रयासिद्धिरेव वैभवहेतूनामिति । अथ यत्रादृष्टस्य दृष्टकारणोपहारेणोपयोगः, तत्र तत्पूर्णतायां कार्यमुत्पद्यते एव । अन्यथा अन्त्यतन्तुसंयोगेभ्योऽपि कदाचित् पटो न जायेत, जातोऽपि वा कदाचिन्निर्गुणः स्यात्, बलवता कुलालेन दृढदण्डनुन्नमपि चक्रं न भ्राम्येत । यत्र तु दृष्टानुपहारेणादृष्टव्यापारस्तत्र तद्वैगुण्यात् कार्यानुदयः । यथा परमाणुकर्मणः । तदिहापि यदि विषयेन्द्रियात्मनां समवधानमेव ज्ञानहेतुः, तदा तत्सद्भावे सदैव कार्यं स्यात्, न ह्येतदतिरिक्तमप्यदृष्टस्योपहरणीयमस्ति, न च सदैव ज्ञानोदयः, ततोऽतिरिक्तमपेक्षितव्यम् । तच्च यद्यपि सर्वाण्येवेन्द्रियाणि व्याप्नोति तथापि

करणधर्मत्वेन क्रियाक्रमः सङ्गच्छते । अकल्पिते तु तस्मिन्नायं न्यायः । प्रतिपत्तुरकरणत्वात् चक्षुरादीनामनेकत्वादिति चेत् ।

65. **अथासामेवेति** । तथा चेन्द्रियत्वेन चक्षुरादिवद् द्रव्यत्वसिद्धिरित्याशयः । अथवा अनीश्वरसाक्षात्कारिप्रतीतिर्द्रव्यकरणिकेत्यभिमतमिति साक्षात्कारित्वं च ज्ञानत्वावान्तरसामान्य(न्या)त् व्यवस्थापकं वा ज्ञायमानकरणजन्यत्वमिति द्रष्टव्यम् । तत्र चानीश्वरसाक्षात्कारिप्रतीतित्वद्रव्यकरणत्वयोर्वा विपक्षे बाधकाभावात् सहभावमात्रेण व्याप्त्यसिद्धेः । अन्यथा अनित्यत्वं विशेषगुणवत्त्वं च मनसि प्रसह्य(ज्य)ते, ततो ज्ञानक्रियया अनुमितकरणं द्रव्याद्यन्यतमतद्व्यापकं वेति संदिह्यते । तत्र नाद्यो व्यासङ्गकालाकलितप्रत्यर्थनियतोपलम्भक्रमानुपपत्तिप्रसङ्गात् । बुभुत्साविशेषादुपलम्भे क्रम इति चेत् । अत्र च वक्ष्यते — न ह्येष बुभुत्साया इति । द्वितीये शरीरव्यापकं वा । नाद्यः पूर्ववदेव । द्वितीये सक्रियं निष्क्रियं वा ? । क्रियावदपि सावयवमन्यथा वा ?। नाद्यः हेत्वसिद्धिप्राप्तेः । द्वितीये तु लिङ्गग्राहकप्रमाणविरोधः । निष्क्रियत्वे तु साध्यमेव पक्षीकरणे हेतुनामसिद्धिः । तदतिरिक्तानां पक्षीकरणे अन्वाश्रयासिद्धिरिति तात्पर्या(र्यम्) । **नियमानुपपत्तिश्चेति** । सर्वेषां करणादीनामुपाधित्वे कुतो विशेषान्नियतदेशसुखाद्युत्पत्तिरित्यर्थः । शङ्कते — **अथेति** । परिहरति **तत** इति। **प्रागुक्तदोष** इति । व्यापकत्वे व्यासङ्गप्रत्यर्थनियतबुद्धिक्रमानुपपत्त्यादिरित्यर्थः । [73 A] नन्वदृष्टमाहात्म्यादेवोक्तदोषानवकाश इति यदि तदा तत एव ज्ञानक्रमो भविष्यतीति । मनःसद्भावे न किञ्चित् प्रमाणमस्तीत्याशयेन प्रमाणान्तरमाह - **यदि चेति** । ननु तत्रादृष्टमाहात्म्यमुपरप्येते(मुपगम्येत) यत्राश्रयासिद्धिः स्यात् । किन्तु तत्सिद्धौ युगपद्विज्ञानकारणसद्भावे ज्ञानयौगपद्यप्रसङ्गं पुरस्कृत्य न ज्ञानक्रमिकत्वप्रमाणबलेन मनःसिद्धौ करणधर्मत्वेन च कार्यक्रम इति मन्वानः शङ्कते — **अथेति** । ननु मनस्यकल्पितेऽपि प्रतिपत्तृनियमाच्चक्षुरादिकारणनियमाद् व्यापकस्य तत्तदिन्द्रियसम्बन्धात् सिद्धिः विभिन्नदेशोपलभ्यमानसुखदुःखादेरनुपपत्तिश्चेति स्थितेऽभ्युच्चययुक्तिमात्रं निरू(रु)पाधिनेन्द्रियत्वमित्याशयवानाह - **तथापीति** । बहिर्नियता(त)देशसंसृष्टश्र(स्र)गादिनियमादेव नियमोपपत्त्यें(त्यै) असमवादायी(वायी)ति एकव[च]नमाह । असमवायिकारणदेशनियमवशेन विभुकार्याणां देशनियमः । किं नाम सुखादिकार्योपार्जनानुकूलसामग्रीशक्तिवा(र्वो)[प]लभ्यम(मा)नदेशनियमः सुखादीनाम्। रथादिसंयोगेष्वपि स्वजनकसामग्रीशक्तिबलेन नियतदेशाच्च [अ]समवायिकारणसामर्थ्येनान्यथा रथमात्रवृत्तित्वमेव संयोगस्य स्यात् । असमवायिनः कर्मणस्तन्मात्रदेशत्वात् । न तु रथाकाशावृत्तित्वम् । एवं च सति शरीरमात्मन उपाधिरस्तु, शरीरोपहिते [73 B] आत्मनि तत्र तत्र सामग्रीबलेन तेषु तेषु देशेषु सुखादय उत्पत्स्यन्ते । मनस्तु निरुपहितमेवेन्द्रियमस्तु । तथा च कुतो धर्मिग्राहकप्रमाणबाधः । उच्यते — तत्तच्छरीरावयवानाम् इन्द्रियादित्वे कस्यचित् परमाणोर्वा तेषां कार्यक्रमो भविष्यतीत्याशङ्क्य परिहरति — **अकल्पिते त्विति** ।

66. नन्वेवमपि युगपद् ज्ञानानि मा भूवन्, युगपद् ज्ञानं तु केन वार्यते । भवत्येव समूहालम्बनमेकं ज्ञानमिति चेत्, न । एकेन्द्रियग्राह्येष्विव नानेन्द्रियग्राह्येष्वपि प्रसङ्गात् । तेष्वपि भवत्येवेति चेत्, न । व्यासङ्गकाले ज्ञानक्रमेण विवादविषये क्रमानुमानात् । बुभुत्साविशेषेण व्यासङ्गे क्रियाक्रम इति चेत्, मैवम् । न ह्येष बुभुत्साया महिमा यदबुभुत्सिते विषये ज्ञानसामग्र्यां सत्यामपि न ज्ञानमपि तु न तत्र संस्कारातिशयाधायकः प्रत्ययः स्यात् । यदि त्वबुभुत्सिते विषये सामग्रीमेव सा निरुन्ध्यात्, घटायोन्मीलितं चक्षुः पटं नैव दर्शयेत् तस्माद् बुभुत्सापीन्द्रियान्तरादाकृष्य बुभुत्सितार्थग्राहिणीन्द्रिये मनो निवेशयन्ती युगपज्ज्ञानानुत्पत्तावुपयुज्यते, न स्वरूपतः । विभुनोऽपि मनसो व्यापारक्रमात् क्रम इति

चेत्, न । तस्य संयोगातिरिक्तस्य कर्मरूपत्वे वैभवविरोधात् । गुणरूपत्वे नित्यस्य क्रमानुपपत्तेः । अनित्यस्य च नित्यैकगुणस्याविभुद्रव्यसंयोगासमवायिकारणकत्वेन तदन्तरेणानुपपत्तेः । तदपि कल्पयिष्यते इति चेत्, तदेव तर्हि मनःस्थाने निवेश्यतां लाघवाय । तस्मादण्वेव मन इति । तथा च तस्मिन्-निन्द्रियप्रत्यासन्ने निरुपधानत्वादात्मनः सुषुप्त्यवस्थायामनुपलम्भः । एतदेव मनसः शीलमिति कुतो निर्णीतमिति चेत्, अन्वयव्यतिरेकाभ्याम् । न केवलं तस्य किन्तु सर्वेषामेवेन्द्रियाणाम् । न हि विशेषगुणमनपेक्ष्य चक्षुराद्यपि द्रव्ये प्रवर्तते । स्वापावस्थायां कथं ज्ञानमिति चेत् तत्तत्संस्कारोद्बोधे विषयस्मरणेन स्वप्नविभ्रमाणामुत्पत्तेः । उद्बोध एव कथमिति चेत् । मन्दतरतमादिन्यायेन बाह्यानामेव शब्दादीनामुपलम्भाद् अन्ततः शरीरस्यैवोष्मादेः प्रतिपत्तेः, यदा च मनस्त्वचमपि परिहृत्य पुरीतति वर्तते तदा सुषुप्तिः ।

66. एकस्य करणस्यैव धर्मो वादकक्रि(यदेकक्रि)याजनकत्वम् न तु बहूनाम्, तेषां एकदाऽनेककार्यकर्तृत्वदर्शनात्, नापि कर्तुस्तस्याप्यनेककर्तृत्वादित्यर्थः । नन्वेकदा मा भूव[न्] बहूनि ज्ञानानि, रूपादिबह्वर्थविषयमेकज्ञानं तु भवत् केन वार्यत इत्याह - **नन्विति** । आशयमविद्वान् पर आह - **भवत्येवेति**। आशयमुद्घाटयति - **एकेति** । प्रतीतिबाधितमपि स्वपक्षरागेण पुरस्करोति - **तेष्विति** । प्रतीतिबाधमुपपादयति। एकत्राश(स)क्तचित्तस्य विषयान्तरे ज्ञानं न भवतीति सार्वजनीनम्, तेन दृष्टान्तेन विवादसमये क्रमोऽनुमीयते। तथा च प्रयोगः – विवादाध्यासितं रूपादिज्ञानं क्रमवदेकयोगिषु रूपादिज्ञानत्वात् क्रमोत्पन्नरूपादिज्ञानवत् । ननु नात्र विशेषणं रूपादिज्ञानत्वप्रयुक्तं क्रमवत्त्वं किन्तु बुभुत्सितरूपादिज्ञानत्वप्रयुक्तमिति मन्वानः शङ्कते - **बुभुत्सेति**। अबुभुत्सितानामपि रूपादीनां कदाचित् क्रमेणोपलम्भदर्शनसंशयं विधूतमुपाधिभावम् उक्तसाधनमित्याशयेन परिहरति **– नैवमिति** । एवं निवारिताभिमानः स्वदर्शनश्रद्धयाऽऽकाशकुशावलम्बनेनापि स्वपक्षरक्षेति [74 A] मन्यमानः शङ्कते – **विभुनोऽपीति** । एतदप्यवलम्बनं विकल्पानुपपत्ति(त्तिः) शनैरुच्छिनत्ति। तदेवं धर्मिग्राहक-प्रमाणादिभिः परोक्ताननुमानप्रयोगान् विस्तरतो निराकृत्य मनसा(सो)ऽणुत्वे प्रमाणान्तरं सूचयन्नुपसंहरति - **तस्मादिति** । प्रयोगस्तु - अणु अचेतनद्रव्यत्वापरजातिमन्नित्यत्वात् आप्यपरमाणुवदिति। उभयाभिमतप्रमाण-सिद्धम् । नन्य(न्व)स्याचेतनत्वद्रव्यत्वापरजातिमत्त्वनित्यत्वं चोभयवादिसम्मतमिति नाश्रयासिद्ध्याद्यवकाशः । अचेतनापरजातिमत्त्वनित्यत्वग्रहणैर्यथासङ्ख्यमात्माकाशघटादिभिरनैकान्तिकत्वम् । निरस्तस्पर्शनवत्त्वं च घटादि-गतत्वेन साध्यव्यभिचारत्वान्नोपाधिरिति निरवद्यम् । **अण्वेवेत्येवकारेण** निर्दोषत्वं दर्शयता दूषणान्तरमिति परिहृतमिति मन्तव्यम् । तथा च न विव(रु)द्धानै[कान्ति]कबाधप्रतिरोधान्यतमव्यवहारभाजनमुक्तसाधनम् । सपक्ष(क्षा)न्वितत्वे विपक्षमात्रव्यावृत्तत्वबलवत् प्रमाणानपह्नविषयत्वागृह्यमाणविशेषप्रतिबु(ब)द्धत्वेभ्य इति [वि]वेचनीयम् । एवमु(मौ)पोद्घातिकं मनोवैभवनिराकरणप्रकरणं समर्थ्याणुत्वं चोपसंभू(ह्)त्य प्रकृतेऽपीति – **तथा चेति** । ननु यद्यनिन्द्रियप्रत्यासन्नमनसि न ज्ञानं [74 B] तथा कथं स्वप्नप्रत्यया मनसस्तदानी[म्] अनिन्द्रियप्रत्यासन्नत्वात् । उपरतेन्द्रियप्रत्यासत्तिविरहे मनसो ज्ञान(ना)जनकत्वं न तु स्वात्मादिप्रत्यासत्तिमतोऽपीति मन्वानः परिहरति - **तत्तदिति** । स्मरणेन प्राप्तेन दोषसादृश्यादिसामग्रीवशा[त्] तदनुभवो जायत इत्यर्थः । न तु संस्कारोऽनुद्बुद्धः स्वकार्यजननाय [समर्थः] न च सदृशदर्शनादिकं विनोद्बोध इत्याशङ्कते - **उद्बोध** इति। नात्र स्मर्तव्यसदृशवस्तुदर्शनमेवोद्बोधकं किन्तु अदृष्टादिकम्, क्वचिच्च सदृशदर्शनं क्वचिच्च कस्यचिद्दृ(द्दर्श)नमिति यथासम्भवेनेत्याशयवानाह - **मन्देति** । मन्दत्वं गत्वादिविशेषाग्रहे शब्दत्वमात्रग्रहोऽस्फुटत्वमिति यावत् ।

स्वापमुक्त्वा सुषुप्तिमाह – **यदे**ति । परात्मा परस्याप्रत्यक्ष इत्युक्त[म्] तस्या(तत्त्व)युक्तम् स्वस्याप्यप्रत्यक्षत्वप्रसङ्गात् तुल्ययोगक्षेमत्वात् हि(इ)त्याशङ्कते – **स्यादेतदि**ति ।

67. स्यादेतत् । परात्मा तु कथं परस्यायोग्यः । न हि साक्षात्कारिज्ञानविषयतामेवायं न प्राप्नोति । स्वयमप्यदर्शनप्रसङ्गात् । नापि ग्रहीतुरेवायमपराधः । तस्यापि हि ज्ञानसमवायिकारणतयैव तद्योग्यता । नापि करणस्य । साधारणत्वात् । न ह्यासंसारमेकमेव मनः एवमेवात्मानं गृह्णातीत्यत्र नियामकमस्ति । स्वभाव इति चेत्, तर्हि मुक्तौ निःस्वभावत्वप्रसङ्गः । तेदकार्थतायाः अपायादिति । न । भोजकादृष्टोपग्रहस्य नियामकत्वात् । यद्धि मनो यच्छरीरं यानीन्द्रियाणि यस्यादृष्टेनाकृष्टानि तानि तस्यैवेति नियमः । तदुक्तं प्राक् – प्रत्यात्मनियमाद् भुक्तेरिति । एतेन परबुद्ध्यादयो व्याख्याताः । तदेवं योग्यानुपलब्धिः परात्मादौ नास्ति, तदितरा तु न बाधिकेति तवापि सम्मतम् । अतः किमधिकृत्य प्रतिबन्धिः । न हि शशशृङ्गमयोग्यानुपलब्ध्या कश्चिद् निषेधति । न च प्रकृते योग्यानुपलब्धिं कश्चिद् मन्यते । अथायमाशयः । अयोग्यशशशृङ्गादावनुपलब्धिर्न बाधिका स्यादिति । ततः किम् ? तत् सिद्ध्येदिति चेत् । एवमस्तु यदि प्रमाणमस्ति । पशुत्वादिकमिति चेत् । परसाधने प्रतिबन्धिस्तर्हि न तद्बाधने । तत्रैव भविष्यतीति चेत् । तत् किं तत्र प्रतिबन्धिरेव दूषणम् । अथ कथञ्चित्तुल्यन्यायतया योग्या एव परात्मबुद्ध्यादयस्ते च बाधिता एवेत्यपहृतविषयत्वम् ? न प्रथमः, अव्याप्तेः । न हि पशुत्वादेः शशशृङ्गसाधकत्वेन कार्यत्वादेः कर्तृमत्त्वादिसाधकत्वं व्याप्तं येन तस्मिन् असति तत् प्रतिषिद्ध्येत । न द्वितीयः, मिथोऽनुपलभ्यमानत्वस्य वादिप्रतिवादिस्वीकारात् । तथापि पशुत्वादौ को दोष इति चेत् । न जानीमस्तावत् तद्विचारावसरे चिन्तयिष्यामः ।

67. ननु साधारण्यमेव मनसो भविष्यति । किञ्चिन्मनः कमप्यात्मानं ग्रहीतु(तुं) समर्थमित्यत आह – **न ही**ति । तदा ह्यसाधारण्यं मनसो भविष्यति यदेकं मनः एकमेव चेन्द्रिय[म्] न कदाचिदन्यस्य । यदा त्वन्यस्यापीति शङ्कते [75 A] तदैकस्याप्युभयात्मगो[च]रापरोक्षविज्ञप्तिजनकस्वभावत्वमेव मनसो भविष्यतीत्यत आह – **मुक्ताविति** । निःस्वभावत्वमेकात्मगोचरापरोक्षविज्ञप्तिजनकस्वभावत्वाभावत्वमित्यर्थः । यदीयादृष्टाकृष्टं यन् मनस्तत् तस्यैवेति नियमोपपत्तिः । न चादृष्टेऽपि तदीयत्वनियमः कथमिति वाच्यम् । अदृष्टस्यापि तदीयमनोनिष्पन्नत्वेन न तदीयत्वाद् मनोनिबन्धनोऽदृष्टनियमोऽदृष्टनिबन्धनस्तु मनोनियम इति पूर्वपूर्वादृष्टापेक्षाया अनादित्वाद् बीजाङ्कुरादिवद् नानवस्थादिदोष इत्यभिप्रायवान् परिहरति – **ने**ति । यथा परात्मनि परमनो न साक्षात्कारविज्ञानमर्पयति तथा परबुद्ध्यादावपि तुल्ययोगक्षेमत्वादित्याह – **एतेने**ति । एवं ज्ञानादित्रयाधारस्य कर्तृत्वस्य परं प्रत्ययोग्यत्वा(त्व)मुभयसिद्धमुभयसिद्धं च शृङ्ग[स्या]न्ययोगात् । अतो महद्वैषम्यसंभव इति । द्वितीयपदं व्याचष्टे – **तदेवमि**ति । तत् किमपि प्रकृते न किञ्चिद् दूषण[म्] इति, अर्थान्तरनिग्रहस्थानमित्यर्थः । **परसाधन** इति । पूर्वमिदमुक्तं शशशृङ्गानुमानवदीश्वरानुमानमिदानं(नीं) त्वां(त्वी)श्वरानुमानवच्च [75 B] शशशृङ्गानुमानमित्यर्थः । तत्वे(नन्वे)तदपि भवतामनिष्टमित्याह – **तत्रैवे**ति । उद्भूतरूपस्पर्शकठिनावयवं पशुशिरोवर्ति शृङ्गं लोकप्रसिद्धम् । तादृशस्य 'शृङ्ग'शब्दवाच्यत्वात् । शृङ्गे च साध्ये बाध एव कर्तारं प्रत्ययोग्य एवोभयसंमत इति समर्थितमित्याशयेन विकल्पप्रतिबन्दिमुन्मोचयति । **तत्कमि**ति । **मिथ** इति । परस्परमनुपलभ्यावतो वादिप्रतिवादिनौ चेति तौ तथा तथा तयोः स्वीकारात् । वादिना प्रत्यक्षानुपलभ्यमान(नं) पर(रः) प्रतिवादी स्वीक्रियते(करोति), प्रतिवादिना च वादीत्यर्थः । प्रतिव(वा)दी निराकृतो[ऽपि] स्वपक्षरागान्धो विशेषमपश्यन्

शङ्कते – **तथापी**ति। बाध एवो(व) दोष इति किं नावबुध्यते। स्वपक्षरागेणानवबोधः, किमस्माभिर्वक्तव्यमित्यर्थः। वक्ताऽज्ञा[न]मुपदर्शयन्नाह – [**न जानीम**] इति ।

68. स्यादेतत् । यत्प्रमाणगम्यं हि यत्, तदभाव एव तस्याभावमावेदयति । यथा रूपादिप्रतिपत्तेरभावश्चक्षुरादेरभावम् । कायवाग्व्यापारैकप्रमाणकश्च परात्मा, तदभाव एव तस्याभावे प्रमाणमङ्कुरादिषु । तन्न । तदेकप्रमाणकत्वासिद्धेः । अन्यथा सुषुप्तोऽपि न स्यात् । श्वाससन्तानोऽपि तत्र प्रमाणमिति चेत्, न । निरुद्धपवनोऽपि न स्यात् । कायसंस्थानविशेषोऽपि तत्र प्रमाणमिति चेत्, न, विषमूर्छितोऽपि न स्यात् । शरीरोष्मापि तत्र प्रमाणमिति चेत्, न । जलावसिक्तविषमूर्छितोऽपि न स्यात्। तस्माद् यद् यत् कार्यमुपलभ्यते तत् तदनुगुणश्चेतनस्तत्र तत्र सिद्ध्यति । न च कार्यमात्रस्य क्वचिद् व्यावृत्तिरिति । न च त्वदभ्युपगतेनैव प्रमाणेन भवितव्यं नान्येनेति नियमोऽस्ति । न च प्रमेयस्य प्रमाणेन व्याप्तिः । सा हि कात्स्न्र्येन वा स्यात् एकदेशेन वा स्यात् ? न प्रथमः । प्रत्यक्षाद्यन्यतमासद्भावेऽपि तत्प्रमेयावस्थितेः । न द्वितीयः । पुरुषनियमेन सर्वप्रमाणव्यावृत्तावपि प्रमेयावस्थितेः । अनियमेनासिद्धेः । न हि सर्वस्य सर्वदा सर्वथाऽत्र प्रमाणं नास्तीति निश्चयः शक्य इति । कथं तर्हि चक्षुरादेरभावो निश्चेयः ? व्यापकानुपलब्धेः । चरमसामग्रीनिवेशिनो हि कार्यमेव व्यापकम्, तन्निवृत्तौ तथाभूतस्यापि निवृत्तिः । योग्यतामात्रस्य कदाचित् कार्यम्, तन्निवृत्तौ तथाभूतस्यापि निवृत्तिः । अन्यथा तत्रापि सन्देहः । प्रकृतेऽपि व्यापकानुपलब्ध्या तत्प्रतिषेधोऽस्तु, न, आश्रयासिद्धत्वात् । न हीश्वरस्तज्ज्ञानं वा क्वचित् सिद्धम् । आभासप्रतिपन्नमिति चेत्, न । तस्याश्रयत्वानुपपत्तेः । प्रतिषेध्यत्वानुपपत्तेश्च ॥

व्यावर्त्याभाववत्तैव भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता ॥२॥

68. ननु युक्तं प्रत्यक्षानुपलभ्यमानयोरपि वादिप्रतिवादिनोः अभ्युपगमः, कायवाग्बुद्ध्यादिलिङ्गैरुपलभ्यमानत्वात् । न चैवं क्षित्यादिक[र्तृ]त्वे [इ]त्याशयवानाशङ्कते – **स्यादेतदि**ति । **यत्प्रमाणगम्यं हीति**। यदेकप्रमाणगम्यं हीत्यर्थः । अत एव सिद्धान्ते तदेकप्रमाणेत्याद्याह । अत्र बाधकमाह – **अन्यथेति** । [76 B] अन्यथा सुषुप्तोऽपि न स्यादित्याद्ययुक्तम् । श(स) हि प्रमाणान्तरेणापि गम्यते । कर्ता तु कायवाग्व्यापारैकप्रमाणक एवेति चेत् । नन्वन्यन्त(त)रव्यापारैकप्रमाणक एव किं न स्वीक्रियते । उभयत्र तदन्वयव्यतिरेकानुविधानस्याविशेषादिति चेत् । एवं तर्हि कार्यसामान्यमपि कर्तृपूर्वत्वेन स्वारा(स्वभा)वप्रतिबद्धमिति । कायव्यापारादिलक्षणकार्यविशेषनिवृत्तावपि क्षित्यादिकार्यत्वस्य भावात् कर्ता कथं निवर्त्स्यतीति प्रतिसंदधीथाः । न हि कार्यमात्रप्रमाणोऽस्ति कस्त(कर्ता यस्त)द्विशेषनिवृत्तिमात्रेण निवर्तितुमुत्सहते । न च कार्यसामान्यस्यापि व्यावृत्तिरिति उपसंहारव्याजेन दर्शयति – **तस्मादि**ति । तदेव प्रमाणविशेषनिवृत्तावपि प्रमाणसामान्यसद्भावेन तदेकप्रमाणत्वात् सिद्धिमुपसंहृत्य संप्रति [प्रमाण]प्रमेययोर्व्याप्यकव्याप्यभावं निराकरोति – **न चेति** । **पुरुषनियमेनेति** । एकपुरुषापेक्षयेत्यर्थः । यदि प्रमाणनिवृत्तावपि नाभावः प्रमेयस्य कथं तर्हि क्वचित् पुरुषे रूपाद्युपलब्धिप्रवृत्तौ चक्षुरादिर्भवद्भिरभ्युपगम्यत इत्याशङ्क्य तत्तद्व्यापकनिवृत्तिवशेन तत्तद्व्यापक(व्याप्य)निवृत्तिरिति समाधाय प्रकृतेऽपीश्वरो न कर्ता न ज्ञा[नवान्] सर्वविषय[स्य] [76 B] शरीरित्वज्ञानत्वाभ्या-

मुक्तात्मास्मदादिज्ञानवदिति व्यापकानुपलब्धिरित्याशङ्क्यानुमानमनाश्रयमिति प्रकृतं व्याचष्टे – **नाश्रयसिद्धेत्यादि**। आभासप्रतिपन्नोऽप्याश्रयो बौद्धानामित्याशङ्क्य तथाविधस्याश्रयत्वे न क्वचिद्धेवु(तु)रनाश्रयत्वमनारब्धिदा-(त्वा)देरप्याभासप्रतिपन्नत्वेनाश्रयत्वात्। ततश्च हेतुहेत्वाभासावभ्युपगच्छन्तो बौद्धा आभासप्रतिपन्नमाना अयमेवेति गलेपादि(दु)कयाप्यङ्गीकारयितव्य इत्याशयवानाह – **आभासेति**। यथा नीलोत्पलस्य प्रमाणसिद्धत्वादिति कृत्वोत्पलं विशेष्यमित्यत्र व्यावृत्त्या नीलाभावं च नोत्पलमिति लोके भण्यते। इह नास्तीति। आश्र[यस्यो]-त्पलस्य प्रतियोगित्वम् स्वाभावविरहित्वं प्रमाणसिद्धमिति। तत्वे(तत्त्वी)श्वरादि(दे)रपि वक्तव्य[म्] इत्याशय-वानुक्तमर्थं श्लोकेन दृढयति – **व्यावर्त्येति**।

69. न चैतदाभासप्रतिपन्नस्यास्तीति कुतस्तस्य निषेधाधिकरणत्वं निषेध्यता वेति। कथं तर्हि शशशृङ्गस्य निषेधः। न कथञ्चित्। स ह्यभावप्रत्यय एव। न चायमपारमार्थिकप्रतियोगिकः परमार्थाभावो नाम। न चापारमार्थिकविषयं प्रमाणं नामेति।

अपि च –

दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता।
न तस्यां नोपलम्भोऽस्ति नास्ति साऽनुपलम्भने ॥३॥

केन च शशशृङ्गं प्रतिषिद्ध्यते। सर्वथाऽनुपलब्धस्य योग्यत्वासिद्धेः। तदितरसामग्रीसाकल्यं हि तत्। ननूक्तमाभासोपलब्धं हि तत्। अत एवाशक्यनिषेधमित्युक्तम्। अनुपलम्भकाल आभासोपलम्भसामग्र्या अभावात्, तत्काले चानुपलम्भाभावादिति। कस्तर्हि शशशृङ्गं नास्तीत्यस्यार्थः। शशे अधिकरणे विषाणाभावोऽस्तीति। स्यादेतत्। यद्यपीश्वरो नावगतो, यद्यपि च नाभाससिद्धेन प्रमाणव्यवहारः शक्यसम्पादनः, तथाप्यात्मानः सिद्धास्तेषां सार्वज्ञ्यं निषिद्ध्यते, क्षित्यादिकर्तृत्वं चेति। तथाहि। मदितरे न सर्वज्ञाश्चेतनत्वादहमिव, न च ते क्षित्यादिकर्तारः पुरुषत्वादहमिव। एवं वस्तुत्वादेरपीति। तदेतदपि प्रागेव परिहृतम्। तथाहि –

इष्टसिद्धिः प्रसिद्धे अंशे हेत्वसिद्धिरगोचरे।
नान्या सामान्यतः सिद्धिर्जातावपि तथैव सा ॥४॥

प्रमाणेन गृहीतानां चेतनानां पक्षीकरणे सिद्धसाधनम्। ततोऽन्येषामसिद्धौ हेतोराश्रयासिद्धत्वम्। आत्मत्वमात्रेण सोऽपि सिद्ध इति चेत्। कोऽस्यार्थः ? किं आत्मत्वेनोपलक्षिता सैव वस्तुगत्या सर्वज्ञत्वविश्वकर्तृव्यक्तिः, अथ तदन्या, आत्मत्वमेव वा पक्षः ? सर्वत्र पूर्वदोषानतिवृत्तेः। अथायमाशयः। आत्मत्वं न सर्वज्ञसर्वकर्तृव्यक्तिसमवेतम्, जातित्वात्, गोत्ववदिति। तदसत्। निषेध्यासिद्धेर्निषेध-स्याशक्यत्वात्। तथा चाप्रसिद्धविशेषणः पक्ष इत्याश्रयासिद्धिरिति स एव दोषः। त्वदभ्युपगमैर्लोक-प्रसिद्ध्या च प्रसिद्धस्यैवेश्वरस्यासर्वज्ञत्वमकर्तृत्वं च साध्यते इति चेत्, न।

आगमादेः प्रमाणत्वे बाधनादनिषेधनम्।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता ॥५॥

निगदव्याख्यातमेतत्। चार्वाकस्त्वाह किं योग्यताविशेषाग्रहणेन ? यन्नोपलभ्यते तन्नास्ति,

विपरीतमस्ति । न चेश्वरादयस्तथा । ततो न सन्तीत्येतदेव ज्यायः । एवमनुमानादिविलोप इति चेत् । नेदमनिष्टम् । तथा च लोकव्यवहारोच्छेद इति चेत्, न । सम्भावनामात्रेण तत्सिद्धेः । संवादेन च प्रामाण्याभिमानादिति ।

69. यदेश्वरे कर्तृत्वनिषेधः तदाधिकरणत्वमीश्वरस्य । यदा त्वीश्वरो नास्ति तदा विश्वे धर्मप्रतियोगित्वमित्यर्थः । ननूक्तक्रमेण यदि कल्पितस्य तन्निषेध्यत्वं तदा कथं शशशृङ्गं नास्तीति । शशशृङ्गस्यैव कल्पितस्य निषेध्यत्वं सर्वजनसिद्धमित्याशयेन शङ्कते — **कथमिति** । न शश[शृङ्गस्य] कल्पितस्य निषेध्यत्वं प्रामाणिकजनसिद्धमित्याशयवान् परिहरति — **न कथञ्चिदिति** । न निषिध्यत इति हृदि निधायेतरनिषेधव्यवहारसमानतामाह — **स हीति** । प्रामाणिके तु निषेधे प्रमाणसिद्धनिषेध्यव्यवस्थितिरित्याह - **न चेति** । शशशृङ्गस्य [प्र]माणतोऽधिगतिरप्रमाणेन निषेध [77 A] इत्याह - **न चेति** । योग्यानुपलम्भनश्च(म्भश्च) भावनि[षेधप्र]त्ययमुपजनयति, नानुपलम्भमात्रमित्युभयसिद्धम् । न च प्रमाणतः क्वचिदनवगतस्य योग्यत्वम्, न च तथाभूतस्याऽऽभासप्रतिपन्नत्वम्, न चाभासप्रतिपन्नस्य निषेधकानुपलम्भः, न च त[द्]विना निषेधसम्भव इत्याशयवतोक्तम् - **अपि चेति** । दुष्टोपलम्भसामग्री वा योग्यपदसन्निधानमेव । **केनेति** । किमनुपलम्भमात्रेण योग्यताविशिष्टेन वा । आद्यः सर्वैरनभ्युपगमाद् दुस्थः । द्वितीयस्तु प्रमाणतः शशशृङ्गस्य क्वचिदसिद्धेरसिद्धः । ततो न केनापीत्यर्थः । एतदेवाह - **सर्वथेति** । प्रमाणत इति भावः । ननूपलब्धिमात्रविषयीकृतमेव रूपं निषिध्यते न तु प्रमाविषयीकृतमाभासोपलब्धरजतादेर्निषेधदर्शनादित्यत आह - **तदितरेति** । रजतादेः क्वचित्प्रमाणसिद्धत्वेन योग्यत्वात् निश्चितं ततश्च सदृशस्यानुपलम्भेन निषेधो न त्वाभासप्रतिपन्नरजतस्य तस्याभासप्रतीतिसामग्रीसमये निषेधकानुपलम्भाभावादनुपलम्भसमये च योग्यत्वविशेषणाभावादिति । समानन्यायेनाह - **नन्विति** । एवं निवारिताभिमानो मीमांसकः स्वपक्षरागबाहुल्यात् प्रकारान्तरेणेश्वरनिषेधकानुमानमाशङ्कते — **स्यादेतदिति** । तद्व्यक्तं परमिति पूर्वप्रतिज्ञायामेव । [77 B] प्रमेयत्वादिकमपि वार्तिककृतोक्तम् —

> प्रत्यक्षाद्यविसंवादि प्रमेयत्वादि यस्य तु ।
> सद्भाववारणेनोक्तं(णे शक्तं) को नु तं कल्पयिष्यति ॥ [श्लो० वा० चोदनासूत्र १३२]

इति ततोऽपि सार्वज्ञ(ज्ञ्य)क्षितिकर्तृत्वनिषेध इत्यर्थः । इदमपि अनुमानमनाश्रयमिति सङ्ग्रहेण निवारयति — **तदेतदिति** । सिद्धसाधनमप्याश्रयासिद्ध्यन्तर्भूतमिति भावः । विवरणमि(म)तिरोहितार्थम् । आमि(त्म)त्वस्यापि सा(स)र्वज्ञसर्वकर्तृनिषेधे सिद्धसाधनमिति उत्क(क्त)माशकंदितं(माशंकितं) दृष्ट्वा प्रकारान्तरेण शङ्कते — **अन्वे(थे)ति** । जिज्ञासितधर्मसिद्धत्वादत्र च तदभावादसिद्धतया असिद्धिरित्यर्थः । एवं तावन्नैयायिकमीमांसकसिद्धनिषेधकयोग्यानुपलम्भबलेनैव निषेधो न त्वन्यथेति समर्थितम् । प्रमाणसिद्धत्वाच्चायं मार्गोऽवश्यमभ्युपगन्तव्योऽन्येनाप्यन्यथा समस्तलोकव्यवहारोपप्लव इति । समानन्यायेन बोधाय तु अत्र विप्रतिपन्नचार्वाकमुत्थापयति - **चार्वाक** इति । भाविस्मरणानुकूलानुभा(भ)वादित्यर्थः । अथवा मनसा स्मरणगोचरानुभवादिति । ननु चक्षुरादीनामपि सोपलम्भकाल एव सत्त्वमन्यदा त्व[सत्त्व]मेवास्त्वित्याह - **न चेति** ।

70. अत्रोच्यते —

> **दृष्ट्यदृष्ट्योः क्व सन्देहो भावाभावविनिश्चयात् ।**
> **अदृष्टिबाधिते हेतौ प्रत्यक्षमपि दुर्लभम् ॥६॥**

सम्भावना हि सन्देह एव । तस्माच्च व्यवहारस्तस्मिन् सति स्यात् । स एव तु कुतः ? दर्शनदशायां भावनिश्चयात्, अदर्शनदशायामभावावधारणात् । तथा च गृहाद् बहिर्गतश्चार्वाको वराको न निवर्तेत । प्रत्युत पुत्रदारधनाद्यभावावधारणात् सोरस्ताडं शोकविकलो विक्रोशेत् । स्मरणानुभवानैवमिति चेत्, न । प्रतियोगिस्मरण एवाभावपरिच्छेदात्, परावृत्तोऽपि कथं पुनरासादयिष्यति । सत्त्वादिति चेदनुपलम्भकालेऽपि तर्हि सन्तीति न तावन्मात्रेणाभावावधारणम् । तदैवोत्पन्ना इति चेत्, न । अनुपलम्भनहेतूनां बाधात् । अबाधे वा स एव दोषः । अत एव प्रत्यक्षमपि न स्यात्, तद्धेतूनां चक्षुरादीनामनुपलम्भबाधितत्वात् । उपलभ्यन्त एव गोलकादय इति चेत्, न । तदुपलब्धेः पूर्वं तेषामनुपलम्भात् । न च यौगपद्यनियमः । कार्यकारणभावादिति । एतेन न परमाणवः सन्ति अनुपलब्धेः । न ते नित्या निरवयवा वा पार्थिवत्वात् घटादिवत् । न पाथसीयपरमाणुरूपादयो नित्याः, रूपादित्वात्, दृश्यमानरूपादिवत् । न रूपत्वपार्थिवत्वादि नित्याकार्यातीन्द्रियसमवायि जातित्वात् शृङ्गत्ववत् । नेन्द्रियाणि सन्ति योग्यानुपलब्धेः । अयोग्यानि च शशशृङ्गप्रतिबन्धिनिरसनीयानीत्येवं स्वर्गापूर्वदेवतानिराकरणं नास्तिकानां निरसनीयम् । मीमांसकश्च तोषयितव्यो भीषयितव्यश्चेति । यद्येवमनुपलम्भेनादृश्यप्रतिषेधो नेष्यते, अनुपलभ्योपाधिप्रतिषेधोऽपि तर्हि नेष्टव्यः । तथा च कथं तथाभूतार्थसिद्धिरपि अनुमानबीजप्रतिबन्धासिद्धेः । तदभावे शब्दादेरप्यभावः । प्रामाण्यासिद्धेः । सेयमुभयतः पाशारज्जुः । अत्र कश्चिदाह । मा भूदुपाधिविधूननम्, चतुःपञ्चरूपसम्पत्तिमात्रेणैव प्रतिबन्धनिर्वाहात् । तस्याश्च सपक्षासपक्षदर्शनादर्शनमात्रप्रमाणकत्वात् । यत्र तु तद्भङ्गः तत्र प्रमाणभङ्गोऽप्यावश्यकः । न ह्यस्ति सम्भवो दर्शनादर्शनयोरविप्लवे हेतुरुपप्लवत इति । अप्रयोजकोऽपि तर्हि हेतुः स्यादिति चेत्, भूयोदर्शनाविप्लवे कोऽयमप्रयोजको नाम ? न तावत् साध्यं प्रत्यकार्यमकारणं वा । सामान्यतोदृष्टानुमानस्वीकारात् । नापि सामग्र्यां कारणैकदेशः । पूर्ववदभ्युपगमात् । नापि व्यभिचारी । तदनुपलम्भात् । व्यभिचारोपलम्भे वा स एव दोषः । न च शङ्कितव्यभिचारः । निर्बीजशङ्कायाः सर्वत्र सुलभत्वात् । नापि व्याप्यान्तरसहवृत्तिः । एकत्रापि साध्येऽनेकसाधनोपगमात् । नाप्यल्पविषयः, धूमादेस्तथाभावेऽपि हेतुत्वात् । ननु धूमो वह्निमात्रे अप्रयोजक एव, तन्निवृत्तावपि तदनिवृत्तेः । आर्द्रेन्धनवन्तं वह्निविशेषं प्रति तु प्रयोजकः, तन्निवृत्तौ तस्यैव निवृत्तेरित्येतदप्ययुक्तम् । सामान्याप्रयोजकतायां विशेषसाधकत्वायोगात् तदसिद्धौ तस्यासिद्धिनियमात् । सिद्धौ वा सामान्यविशेषभावानुपपत्तेः । नापि क्लृप्तसामर्थ्येऽन्यस्मिन् कल्पनीयसामर्थ्योऽप्रयोजकः, नाशे कार्यत्वसावयवत्वयोरपि हेतुभावादिति ।

70. **कुतः**? कार्येति । उपलम्भेन्द्रिययोरिति शेषः । **एतेने**पि । परात्मन्यनुपलम्भमात्रस्यासाधकत्वेन हेत्वन्तरस्य चाश्रयासिद्ध्यादिप्रसङ्गेनेत्यर्थः । [78 A] यदि च परमेश्वरविद्वेषान्मीमांसका अपि पाखण्डिपक्षमालम्बनीनाश्चार्वाकमुत्थाप्यास्मान् भीषयितुं प्रवृत्तास्तदा वयवम(वयम)पि तानेवोत्थाप्य तान् भीषयितुं विवदाम [इ]त्याशयवानाह - **मीमांसकश्चे**ति । चार्वाकमतस्वीकार-तिरस्काराभ्याम् भीषणस्तोषण इत्यर्थः । न त्वनुपलम्भमात्राद् निषेधस्वीकारे उपाध्यनुपलम्भेनापि नोपाधिविरहनिश्चयस्तथा सति नानुमानादिव्यवस्थितिरिति भिन्नलोकमर्यादा[मा]ह — **यद्येवमि**ति । **उभयत** इति । अनुलम्भमात्रस्य निषेधकत्वेऽनिषेधकत्वे चेत्यर्थः । यद्यनुपलम्भमात्रेणोपाध्यभावावधारणं तदेश्वराद्यभावावधारणमपि । न चेत् तथा तदा नोपाध्यभावनिश्चय इत्यर्थः । चार्वाकप्रागल्भ्यमुपलभ्य नायं पन्था किन्त्वन्य एवेति केचिदित्याह - **अत्रे**ति । चिरन्तननैयायिका एवमुचुरित्यर्थः ।

तद्भङ्ग इति । उक्तरूपसम्पत्तिभङ्ग इत्यर्थः । **प्रमाणभङ्ग** इति । दर्शनादर्शने प्रमाणभङ्ग इत्यर्थः । एतदेव स्पष्टयति – **न हीति** । **पूर्ववदिति** । कारणलैङ्गिकानुमानमित्यर्थः । पूर्वं कारणं तद् यस्यास्ति विषयतया परामर्शज्ञानस्य तत् तथा, तथा च कारणैकदेशं दृष्ट्वा कार्यमनुमि[त]त्वात् । वादिनौ नैवं वक्तुमर्हत इत्यर्थः । **तन्निवृत्तौ** धूमनिवृत्तौ **तदनिवृत्तेर्वह्न्यनिवृत्तेर्वह्न्यवस्थितेरिति** यावत् । **तस्यैवेति** । आर्द्रेन्धनवद्वह्नेरेवेत्यर्थः ।

71. तदेतदपेशलम् । कथं हि विशेषाभावात् कश्चिद् व्यभिचरति, कश्चिच्च नेति शक्यमवगन्तुम् । अतो निर्णायकाभावे सति साहित्यदर्शनमेव शङ्काबीजमिति क्वासौ निर्बीजा । एवं सत्यतिप्रसक्तिरपि चार्वाकनन्दिनो नोपलम्भाय । स्वभावादेव कश्चित् किञ्चिद् व्यभिचरति, कश्चिच्च नेति स्वभाव एव विशेष इति चेत्, केन चिह्नेन पुनरसौ निर्णेय इति निपुणेन भावनीयम् । भूयोदर्शनस्य शतशः प्रवृत्तस्यापि भङ्गदर्शनात् । यत्र भङ्गो न दृश्यते तत्र तत् तथेति चेत् । आपाततो न दृश्यते इति सर्वत्र कालक्रमेणापि न द्रक्ष्यते इति को नियन्तेति । तस्मादुपाधितद्विरहावेव व्यभिचाराव्यभिचारनिबन्धनम्, तदवधारणं चाशक्यमिति । ननु यः सर्वैः प्रमाणैः सर्वदाऽस्मदादिभिर्यद्वत्तया नोपलभ्यते नासौ तद्वान् । यथा बकः श्यामिकया, नोपलभ्यते च वह्नौ धूम उपाधिमत्तयेति शक्यमिति चेत्, न । अस्याप्यनुमानतया तदपेक्षायामनवस्थानात् । 'सर्वादृष्टेश्च सन्देहात् स्वादृष्टेर्व्यभिचारतः' सर्वदेत्यसिद्धेः । तादात्म्यतदुत्पत्तिभ्यां नियम इत्यन्ये । तत्र तादात्म्यं विपक्षे बाधकाद् भवति । तदुत्पत्तिश्च पौर्वापर्येण प्रत्यक्षानुपलम्भाभ्याम् । न ह्येवं सति शङ्कापिशाच्यवकाशमासादयति, अशङ्क्यमानकारणभावस्यापि पिशाचादेरेतल्लक्षणाविरोधेनैव तत्त्वनिर्वाहादिति । न । एवमप्युभयगामिनोऽव्यभिचारनिबन्धनस्यैकस्याविवेचनात्, प्रत्येकं चाव्यापकत्वात् । कुतश्च कार्यात्मानौ कारणमात्मानं च न व्यभिचरत इति ।

अत्रोच्यते –

शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ॥७॥

कालान्तरे कदाचिद् व्यभिचरिष्यतीति कालं भाविनमाकलय्य शङ्क्येत तदाकलनं च नानुमानमवधीर्य कस्यचित् । मुहूर्तयामाहोरात्रपक्षमासर्त्वयनसंवत्सरादयो हि भाविनो भवन्मुहूर्ताद्यनुमेया एव । अनवगतेषु स्मरणस्याप्यनाशङ्कनीयत्वात् । अनाकलने वा, कमाश्रित्य व्यभिचारः शङ्क्येत । तथा च सुतरामनुमानस्वीकारः ।

71. **कश्चिदिति** दृष्टसाहित्या(योऽ)पीत्यर्थः । [78 B] **अत** इति । यथाहुश्चार्वाकाः । अवश्यं शङ्क्या भाव्यं नियामकमपश्यतामिति । **एवमिति** । व्यभिचारशङ्कायामपि गमकत्वे सतीत्यर्थः । ननु कार्यकारण[स्वभा]वत एव कश्चिद् व्याप्यो व्यापकश्च कश्चिदित्याशङ्क्य अयं स्वधा(भा)वः कुतोऽवधारणीय इति परिहरति – **स्वभावादेवेति** । अनन्यगतिकतयोपाधिविरह एवोपायः, न चासाववधारयितुं शक्य इत्युपसंहरति – **तस्मादिति** । चिरन्तनसमस्तमास्कन्दितं दृष्ट्वा नूतनैरभिहितमुपायमुत्थाप्य निवारयति – **नन्विति** । अत्र बौद्धोक्तमप्युपायमुपन्यस्य दूषयति – **तादात्म्येति** । किं तादात्म्यतदुत्पत्ती मिलिते प्रत्येकं वा प्रतिबन्धावधारणे उपायः । नाद्यः, असिद्धेः । न द्वितीयः, अव्यापकत्वादिति । दूषणान्तरमाह – **कुतश्चेति** । ततोऽनन्यगतिकतया भवद्भिरपि स्वभाव एवोत्तरीकर्तव्य इति भावः । बौद्धोक्तमपि चार्वाकशङ्काकलङ्कितं न व्यवतिष्ठत इति ।

स्वयमनुमानवैरिणं प्रत्युत्तरमाह – **शङ्का चेदिति** । इदमसाधकमनुपलभ्योपाधिशङ्काग्रस्तत्वाद् व्यभिचारशङ्काग्रस्तत्वाद्वेत्यादिर्दूषणमनुमानमपि व्याप्नोतीत्यतः स्वात्म[79 A]व्याघातकत्वोपाधिना जात्युत्तरत्वादिति तात्पर्यार्थः। अक्षरार्थस्तु देशान्तरकालान्तरयोर्व्यभिचारोपाध्योरन्यत[र]**शङ्का चेद**नुमानवैरिणाभ्युपगम्यते यदि तदाऽ**नुमाऽस्त्येव** तामन्तरेण कालान्तरदेशान्तरयोरप्रतीतेः शङ्कायाः कर्तुमशक्यत्वादिति । पूर्वार्धं व्याचष्टे **काले**त्यादिना **तथा चेत्यन्तेन** ।

72. एवं च देशान्तरेऽपि वक्तव्यम् । स्वीकृतमनुमानम् । सुहृद्भावेन पृच्छामः, कथामाशङ्का निवर्तनीया ? इति चेत्, न । यावदाशङ्कं तर्कप्रवृत्तेः । तेन हि वर्तमानेनोपाधिकोटौ तदायत्तव्यभिचारकोटौ वाऽनिष्टमुपनयतेच्छा विच्छिद्यते । विच्छिन्नविपक्षेच्छश्च प्रमाता भूयोदर्शनोपलब्धसाहचर्यं लिङ्गमनाकुलोऽधितिष्ठति, अधिष्ठिताच्च करणात् क्रियापरिनिष्पत्तिरिति किमनुपपन्नम् । ननु तर्कोऽप्यविनाभावमपेक्ष्य प्रवर्तते, ततोऽनवस्थया भवितव्यम् । न । शङ्काया व्याघातावधित्वात् । तदेव ह्याशङ्क्यते यस्मिन् आशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा नावतरन्तीति लोकमर्यादा । न हि हेतुफलभावो न भविष्यतीति शङ्कितुमपि शक्यते । तथा सति शङ्कैव न स्यात्, सर्वं मिथ्या भविष्यतीत्यादिवत् ।

72. **एवमिति** । अनुमानमवधीर्य यथा कालान्तरव्यभिचारशङ्का न भवति तथा देशान्तरेऽपीत्यर्थः। चतुर्थपादं व्याचिख्यासुः शङ्कते – ननु च शङ्कानिवृत्तेः किं प्रयोजनम् ? प्रतिबन्धनिश्चयो ह्यनुमानाङ्गम्, स चेदस्ति तदा तत्सामर्थ्येनैव शङ्कानिवृत्तिः । अथ नास्ति, कुतः ? तज्ज्ञानसामग्रीविरहादिति । तदुत्पत्त्यर्थं सामग्र्येव गवेषणीया किं शङ्कानिवृत्तिप्रार्थनयेति । उच्यते । अव्यभिचारश्चि(रनिश्च)यो व्यभिचारव्यावर्तकधर्मानुसन्धानबलेनैव वक्रक्षेटवाद्युपलम्भेन स्थाणुनिश्चयवत्[1]। यदा तु तथाभूतविशेषाननुसन्धाता(त्री) व्यभिचारशङ्कोपजाता तदा विपरीतशङ्कायां बाधकदशनो(र्शने)न सहायेन भूयो हि दर्शनेन निश्चयो जन्यते बाधके च विपर्ययेऽनिष्टप्रसङ्ग इत्यभिप्रायवान् परिहरति – **न यावदिति** । यथा नानुविहितान्वयव्यतिरेकत्वं कारणे हेतुः, व्यापारलक्षणोपकारस्योपाधि(धे)र्विद्यमानत्वादित्यत्रानवस्थाप्रसङ्गलक्षणस्तर्कः । **इच्छा विच्छिद्यते** जिज्ञासाजनकसहाय[79-B]सहितेत्यर्थः । **अनिष्टमिति** । प्रामाणिकहानमप्रामाणिकोपादानमित्यर्थः । तृतीयं पादं व्याख्यातुमाशङ्कते – **ननु तर्कोऽपीति** । व्याप्यधर्माध्यारोपेण च नियतव्यापकधर्मप्रसञ्जनं तर्कमाहुस्तार्किका इत्यभिप्रायः । **तत** इति। तथा चान्यत्रै(त्रे)व तत्रापि व्याप्यव्यापकभावान[व]धारणे शङ्कानिवर्तकतर्कान्तरस्वीकारेऽनवस्थेत्यर्थः । न सर्वत्र शङ्का लौकिकपरीक्षकैः क्रियते । नोपायाद्य(नोपाध्य)भ्यवहरणाचौ(च्चा)निश्चयपूर्वकत्वेनोभयप्रवृत्त्यनुपपत्तेः ततो विरोधप्रतिसन्धानम्, तर्के न शङ्कां(ङ्का), ततो नानवस्थेति हृदि निधाय परिहरति – **नेति** । **नहीति** । यदि कार्यकर्तारमन्तरेण स्यादेवं समवाये(य)समवायिनोरन्यतरमन्तरेणापि स्यादिति । हेतुफलभावोच्छेदप्रसङ्ग इत्यस्मिंस्तर्के मा भूद्धेतुफलभाव इति शङ्कां वारयति । कुत इत्यत आह – **तथा सतीति** ।

73. तथापि अतीन्द्रियोपाधिनिषेधे किं प्रमाणमित्युच्यतामिति चेत् । न वै कश्चिदतीन्द्रियोपाधिः प्रमाणसिद्धोऽस्ति यस्याभावे प्रमाणमन्वेषणीयम् । केवलं साहचर्ये निबन्धनान्तरमात्रं शङ्क्यते ततः शङ्कैव फलतः स्वरूपतश्च निवर्तनीया । तत्र फलमस्या विपक्षस्यापि जिज्ञासा तर्कादाहत्य निवर्तते ।

---

१. 'क्षेटव' शब्दः कोशे नोपलब्धः ।

ततोऽनुमानप्रवृत्तौ शङ्कास्वरूपमपीति सर्वं सुस्थम् । न चैतदनागमम्, न्यायाङ्गतया तर्कं व्युत्पादयतः सूत्रकारस्याभिमतत्वात् । अन्यथा तद्व्युत्पादनवैयर्थ्यात् । तदयं संक्षेपः । यत्रानुकूलतर्को नास्ति सोऽप्रयोजकः । स च द्विविधः – शङ्कितोपाधिर्निश्चितोपाधिश्च ।

यत्रेदमुच्यते –

यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते ।
विपक्षस्य कुतस्तावद् हेतोर्गमनिकाबलम् ॥

तत्रोपाधिस्तु साधनाव्यापकत्वे सति साध्यव्यापकः । तद्धर्मभूता हि व्याप्तिर्जपाकुसुमरक्ततेव स्फटिके साधनाभिमते चकास्तीत्युपाधिरसावुच्यते इति ।

तदिदमाहुः –

अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः ।
तैर्दृष्टैरपि नैवेष्टा व्यापकांशाऽवधारणा ॥ इति ।

तदनेन विपक्षदण्डभूतेन तर्केण सनाथे भूयोदर्शने, कार्यं वा कारणं वा ततोऽन्यद् वा समवायि वा संयोगि वा अन्यथा वा भावो वाऽभावो वा सविशेषणं वा निर्विशेषणं वा लिङ्गमिति निःशङ्कमवधारणीयम् । अन्यथा तदाभास इति रहस्यम् ।

73. शङ्कापि हेतुमती न वा ? आद्ये, हेतुं विना न स्यादेव । द्वितीये, देशादिनियमानुपपत्तिरित्यर्थः । नन्वतीन्द्रियोपाधिनिषेधकमानाभावादेवानिषेध इत्याशङ्क्य तथाविधोपाधिशङ्कायां सकललोकयात्रोच्छेद इति आशयेन परिहरति - **तथापी**ति । **तत्र फलमि**ति । तद्यथा धि(वि)वादपद(दं) सकर्तृकं कार्यत्वादित्युक्ते, ननु कार्यमकर्तृकमपि भविष्यतीति विपक्षजिज्ञासा सा **तर्कादि**ति । परमाण्वादीनामचेत[80 A]नत्वात् स्वातन्त्र्येण स्वप्रवृत्त्यनुपपत्त्ये(त्ते)रकर्तृकत्वे विवादपदस्य कर्तृव्यावृत्तावन्यकारकव्यावृत्तिरिति कार्यता [इति] लोकः पठति। तर्क(काद्) विपक्षेच्छा विच्छिद्यते इत्यर्थः । तत एककोटिनियतायां जिज्ञासायामनुमानप्रवृत्तौ प्रमो(प्रमे)त्यादे(देः) संशयस्वरूपमपि निवर्तत इति । सर्वं सुस्थमिति तात्पर्यार्थः । न त्वेतत् सर्वमाशङ्कां पूर्वव्याख्यातृभिरेवमप्रतिपादनादित्यत आह – **न चैतदि**ति । सूत्रकारेणावयवरूपन्यायानन्तरमाहत्य विपक्षजिज्ञासानिवर्तकत्वेन न्यायाङ्गतया प्रतिपादनात् तद्व्याख्यातृभिः सुव्याख्यातत्वादन्यथा प्रतिबन्धग्राहकत्व[म्] मानाङ्गत्वमात्रं स्यादिति भावः । ननु यदि विपर्ययबाधकबलेन प्रतिबन्धनिरूपणं तदोपाधितदभावनिरूपणेन किं प्रयोजनम् ? विपर्ययबाधकसिद्ध्यर्थमेवेति। तथाहि यदिदं व्यभिचरेत् तदा अनयोर्निरुपाधिः सम्बन्धो न स्यादिति विपक्षे बाधक[म्] । न च तन्निरुपाधित्वनिरूपणं विनाशं भवति । ननु येनैव बाधकेन निरुपाधित्वं निरूप्यते तेनैवाव्यभिचारो निरूप्यतामन्येन वा ? उच्यते – यदि मित्रातनयत्वादावपि श्यामतासाधने ब्रवीति । मित्रातनयत्वं चेच्छ्यामतां परिहरेत्, सर्वत्र परिहरेत् न क्वचिदपि परिहरेत् । [80 B] न हि संसर्गस्य क्वचित् सत्तायां बीजमस्तीति बाधके दर्शितम्। संसर्गस्य क्वचित् कस्यचित् सिद्ध्यर्थमवश्यं बीजमुपदर्शयितव्यम् । स एवोपाधिरित्युच्यते । तस्माद् यत्सत्त्वे साध्यसंसर्गत्वं यदभावे च साध्यसंसर्गव्यावृत्तिः स एवान्यथासिद्धिबीजमुपाधिरित्युच्यते । स एव सुखावबोधार्थमन्यल्लक्षणेनाभिधीयते । सोपाधिसाध्यसम्बन्धहेतु[र]प्रयोजकमिति पूर्वाक्षेपसमाधानमिति मीमांसावार्तिकस्यापि

मतमिति व्याख्याय तद्ग्रन्थपाठपूर्वकमुपाधिलक्षणमाह — **तदयमिति** । तत्र यदि साधनाव्यापकमात्रस्योपाधित्वमङ्गीक्रियते तदा सावयवत्वस्यापि कृतकत्वं प्रति उपाधित्वं स्यात् । अथ साध्यव्यापकमात्रस्योपाधित्वमुच्येत तदा कृतकत्वस्यैव सावयवत्वं प्रति उपाधित्वं स्यात् । एतदुभयमुपादेयनिश्चितोपाधिर्यथा प्रमेयत्वमनित्यत्वे, आशङ्कितोपाधिश्च यथा मित्रातनयत्वं श्यामतायामिति । पूर्वत्वकृतकत्वोपाधेः साध्यसाधन-व्यापकाव्यापकत्वविनिश्चयादिति । उत्तरत्रापि आहारविशेषपरिणतिरुपाधिः । अयं हि मित्रातनयत्वस्य [81 A] व्यापिकां(का), एतद्व्यतिरेकेऽपि मित्रातनयत्वस्य सत्त्वे बाधकाभावात् । आहारविशेषपरिणतेश्च देशकालप्राप्तिकरणशक्तिविचित्राणां हेतूनामनियमात् । व्यापकताप्रसाधकप्रमाणाभा[वा]त् साधनं प्रति अव्यापकत्वमाशङ्कितमिति । शङ्कितोपाधिरयमित्यर्थः । नन्वर्थमुपाधि(धेः) दर्शयति । **तद्धर्मेति** । रक्तः स्फटिकः स्फटिकत्वादुभयाभिमतस्फटिकवदित्युक्ते न स्फटिकत्वमत्र साधनं जपाकुसुमसंपर्कवशेन रक्तावभासादित्यर्थः । अध्ययनं त्वध्ययनहेतुके साहचर्ये उपाधिर्न तु गुरुशिष्यव्यवहारमात्रे । अन्यथापि गुरुशिष्यव्यवहारदर्शनादित्येवं सर्वत्र निपुणेन भवितव्यमिति तात्पर्यम् । एतेनोपहितप्रत्ययहेतुरुपाधिरिति वदता प्रयोजकाद् भेदो दर्शितः । यदि पुनर्द्वितीयसाधनमुपाधिरित्यभिधीयते तदैकस्मिन् साध्ये साधनान्तरसम्बन्धो न स्यादिति । ननु निरुपाधिः सम्बन्धो व्याप्तिः सत्तावत्संयोगसमवायतादात्म्यविशेषणविशेष्यभावत्वान्यतमो अव्यापकत्वात् । न च सर्वसाधारणसम्बन्धान्तरमभ्युपगम्यत इत्यत आह — **तदनेन** ।

74. तादात्म्यतदुत्पत्त्योरप्येतदेव बीजम् । यदि कार्यात्मानौ कारणमात्मानं चातिपतेतां तदा तयोस्तत्त्वं व्याहन्येत । अत एव सामग्रीनिवेशिनश्चरमकारणादपि कार्यमनुमिमते सौगता अपि । तस्माद् विपक्षबाधकमेव प्रतिबन्धलक्षणम् । तथाहि । शाकद्याहारपरिणतिविरहिणि मित्रातनये न किञ्चिदनिष्टमिति नासौ तस्य व्यापिका, व्यापिका तु श्यामिकायाः, कारणत्वावधारणात् । कारणं च तत् तस्य, तदतिपत्य भवति चेति व्याहतम् । एवमन्यत्राप्यूहनीयमिति । क्व पुनरप्रयोजकोऽन्तर्भवति ? न क्वचिदित्येके । यथाहि - सिद्धसाधनं न बाधितविषयम्, विषयापहाराभावात् । नापि निर्णये सति पक्षत्वातिपातादपक्षधर्मः । कालातीतविलोपप्रसङ्गात् । न चानैकान्तिकादिः, व्यभिचाराद्यभावात् । तथाऽयमपि । सूत्रं तूपलक्षणपरमिति । तदसत् । विभागस्य न्यूनाधिकसंख्याव्यवच्छेदफलत्वात् । क्व तर्हि द्वयोरन्तर्निवेशः । असिद्ध एव । तथाहि व्याप्तस्य हि पक्षधर्मताप्रतीतिः सिद्धिः । तदभावोऽसिद्धिः । इयं च व्याप्तिपक्षपक्षधर्मतास्वरूपाणामन्यतमाप्रतीत्या भवन्ती यथासङ्ख्यमन्यथासिद्धिराश्रयासिद्धिः स्वरूपासिद्धिरित्याख्यायते । मध्यमाऽप्याश्रयस्वरूपाप्रतीत्या तद्विशेषणपक्षत्वाप्रतीत्या वेति द्वयी । तत्र चरमा सिद्धसाधनमिति व्यापदिश्यते । व्याप्तिस्थितौ पक्षत्वस्याहत्य विघटनात् । न त्वेवं बाधे व्याप्तेरेव प्रथमं विघटनादिति विशेषः । यत्त्वप्रयोजकः सन्दिग्धानैकान्तिक इत्यनैकान्तिकेऽन्तर्भाव्यते तदसत् । व्याप्त्यसिद्ध्या हि निमित्तेन व्यभिचारः शङ्कनीयः अन्यथा वा ? प्रथमे असिद्धिरेव दूषणमुपजीव्यत्वात्, नानैकान्तिकम्, उपजीवकत्वात् । अन्यथा शङ्का त्वदूषणमेव; निर्णीते तदनवकाशादिति ॥७॥

74. एतेन ने(नि)यतसहभावो व्याप्तिरित्युक्तं भवति । नियमश्च [81 B] विपक्षे बाधकात् स्वपक्षानुकूलतर्कादिति । परैरपि शङ्कापसारिणोऽस्मदुक्तप्रकारोऽभ्युपेतव्यः, अन्यथा शङ्कानिवृत्तिर्दुर्लभेत्याह — **तादात्म्येति**।

व्यभिचारिणि कुतस्तदुत्पन्नत्वं न स्यात् तादात्म्यं वा ? अदर्शनादिति चेत्, न । किं समर्थेषा(सर्वेषा)मदर्शनमुत स्वस्य, योग्यादर्शनं वेति । नाद्यः, असिद्धेः । न द्वितीयो व्यभिचारात् । न तृतीयः, सर्वे[षां व्य]भिचाराणाम् असर्वज्ञं प्रति ग्रहणयोग्यासिद्धेः । तस्मादनिष्टप्रसङ्गेनैव व्यभिचारिणि व्याप्यवृत्तिर्वक्तव्या । तथा च तदेव बीजमित्यर्थः । एतदेव दर्शयति - **यदि चे**ति । **अत एवे**ति । यत एव विपक्षे बाधकादविनाभाव इत्यत्र निर्भरो(नियमो) न तु स्वभावकार्ययोरेवेत्यर्थः । तद्यथा बधिरस्य मुरजमुखाभिधाताच्छब्दानुमानं पूर्वमुक्तम् । यत्रानुकूलस्तर्को नास्ति सा(तत्रा)प्रयोजकत्वमित्यस्योदाहरणमाह — **तथाही**ति । **नासौ तस्ये**ति । न शाकाद्याहार-परिणतिः मित्रातनयत्वस्य व्यापिकेत्यर्थः । ननु यदि सिद्धसाधनाप्रयोजकौ अपि दूषणान्तरे एव कथं तर्हि विभागे सव्यभिचारादिपञ्चकमेव दूषणत्वेन सूत्रकृतोक्तमित्यत आह - **सूत्रं त्वि**ति । तदेवमाधिक्यं विभागसूत्रस्य विशेषविधित्वेनाधिक[82 A]निषेधफलत्वेनात्ययमित्याशयवान् साधयति **तदसदि**त्यादिना । व्याप्तस्य निरुपाधि-साध्यसम्बन्धस्य पक्षधर्मतया संदिग्धसाध्यधर्मतया प्रतीतिसिद्धिरिति । तदभावस्तस्य निरुपाधिसाध्यसम्बन्ध-स्याभावः सोपाधित्वम् । एवं तस्य संदिग्धसाध्यधर्मिणस्तद्धर्मस्य वा अभाव इत्यर्थः । एतदेव [वि]वृणोति। यद्यपि संदेहस्योभयत्रापि समानत्वं तथाप्येकत्र साधकप्रमाण(णा)सद्भावेनान्यत्र बाधकप्रमाणसंभवेनेति शेषः । न च किमनेनेति वाच्यम् । साधकप्रमाणस्य स्वरूपतोऽनुकूलत्वाद् बाधक[प्रमाणस्य] स्वरूपतः प्रतिकूलत्वेन सर्ववादिसंमतत्वादिति रहस्यम् । अत एवाह — **व्याप्तेरेवे**ति । ननु यदि व्याहत्य विघटनं तदाऽनैकान्तिक-मेव दूषणम् । अथ व्याप्तेर्विघटनं नास्ति तदा अपक्षधर्मतैव दूषणमित्युभयथापि कालातीतविलोप इति चेत्। उच्यते - साध्याभावनिश्चयेन हि हेतोः पक्षधर्मता प्रत्यु[क्ते]ति, विपक्षवृत्तिता वा व्यवस्थाप्या भावसाध्या-ऽसावनिश्चयमनुद्भाव्योद्भावयितुमशक्या, तदुद्भावने तु तेनैव हेतोर्दूषितत्वाद् व्यर्थमपरस्याभिधानम् । अन्यथा विरुद्धस्यापि साध्यसाधनयोरन्यतरविरहे, साध्यविरहे अपक्षधर्मत्वं, साधनविरहे स्वरूपासिद्धत्वमिति निराकणापत्तेः[१]। तत्र विरोधप्रतीत्युत्तरकालं तयोः प्रतीतौ विरोधस्यैव [82 B] दूषणत्वेऽन्यत्रापि बाधोत्तरकालं तयोः प्रतीतिरिति समानम्, तस्माद् विरुद्धहेत्वाभासमनभ्यु(मभ्यु)पग[त]त्वात् कालात्ययापदिष्टमपि पृथगभ्युपगन्तव्यम्, अन्यथा विरुद्धस्यापि परिहार इति दुरुत्तरम् । तदेतत् सर्वं पाखा(षा)णरेषे(खे)यमिति मन्वानो मतान्तरं विकल्प्य निराकरोति - **यत्त्वि**ति ।

75. उपमानं तु बाधकमनाशङ्कनीयमेव, विषयानतिरेकादिति केचित् । तथाहि । न तावदस्य विषयः सादृश्यव्यपदेश्यं पदार्थान्तरमेव सम्भावनीयम् ।

परस्परविरोधे हि न प्रकारान्तरस्थितिः ।
नैकताऽपि विरुद्धानामुक्तिमात्रविरोधतः ॥८॥

न हि भावाभावाभ्यामन्यः प्रकारः सम्भावनीयः, परस्परविधिनिषेधरूपत्वात् । न भाव इति भावनिषेधमात्रेणैवाभावविधिः । ततस्तं विहाय कथं स्ववचनेनैव पुनः सहृदयो निषेधेन्नाभाव इति । एवं नाभाव इति निषेध एव भावविधिः । ततस्तं विहाय स्ववाचैवानुन्मत्तः कथं पुनर्निषेधेन्न भाव इति । अत एवम्भूतानामेकताप्यशक्यप्रतिपत्तिः । प्रतिषेधविध्योरेकत्रासम्भवात् । तस्माद् भावाभावावेव तत्त्वम् । भावत्वेऽपि गुणवन्निर्गुणं वेति द्वयमेव पूर्ववत् । पूर्वं द्रव्यमेव । उत्तरं चाश्रितमनाश्रितं वेति

१. भ्रष्टः पाठः ।

द्वयमेव पूर्ववत् । तत्रोत्तरं समवाय एव । अनवस्थाभयात् । आश्रितं तु सामान्यवद् निःसामान्यं चेति पूर्ववत् द्वयमेव । तत्र प्रथममपि स्पक्तोऽस्पन्द इति द्वयमेव । एतच्च यथासङ्ख्यं कर्म गुण इति व्यपदिश्यते । निःसामान्यं निर्गुणमाश्रितं त्वेकाश्रितमनेकाश्रितं चेति प्रागिव द्वयमेव । एतदपि यथासंख्यं विशेषः सामान्यं चेत्यभिधीयते । तदेतत् सादृश्यमेतास्वेकां विधामासादयन् नातिरिच्यते । अनासादयन् न पदार्थीभूय स्थातुमुत्सहते । एतेन शक्तिसंख्यादयो व्याख्याताः । ततोऽभावेन सह सप्तैव पदार्था इति नियमः । अतो नोपमानविषयोऽर्थान्तरमिति । स्यादेतत् । भवतु सामान्यमेव सादृश्यम्, तदेव तस्य विषयः स्यात् । तत्सदृशोऽयमिति हि प्रत्ययो नेन्द्रियजन्यः, तदापातमात्रेणानुत्पत्तेरिति चेत्, न । पूर्वपिण्डानुसन्धानरूपसहकारिवैधुर्येणानुत्पत्तेः । सोऽयमिति प्रत्यभिज्ञानवदिति । नन्वेतत्सदृशः स इति नेन्द्रियजन्यम् । तेन तस्यासम्बन्धात् । न चेदं स्मरणम्, तत्पिण्डानुभवेऽपि विशिष्टस्याननुभवात् । न चैतदपि अयं स इति विपरीतप्रत्यभिज्ञानवदुपपादनीयम् । तत्तेदन्तोपस्थापनक्रमविपर्ययेऽपि विशेष्यस्येन्द्रियेण सन्निकर्षाविरोधात् । तस्य सन्निहितवर्तमानगोचरत्वात् । प्रकृते तु तदभावात् । तस्मात् तत्पिण्डस्मरणसहायमेतत्पिण्डवृत्तिसादृश्यज्ञानमेव तथाविधं ज्ञानमुत्पादयदुपमानं प्रमाणमिति । एतदपि नास्ति ।

75. एवमुपलब्ध्यनुमानाभ्यां न क्षित्यादिकर्तृबाधक इति व्युत्पाद्योपमानस्याबाधकत्वं उभयसम्मतं किन्तु नियतविषयत्वादेव न तु विषयानतिरेकादिति दर्शयितुमुपमानबाधकत्वं निराचष्टे — **उपमानं त्विति** । **केचिदिति** । साङ्ख्यनैयायिकैकदेशिबौद्धप्रभृतयः । न त्वस्यातिरिक्तोऽस्ति विषयः सादृश्य[म्], न चैतदध्यक्षगम्यमिन्द्रियापातमात्रेणाप्रतिभासनात्, न च लिङ्गादिगम्यं तदनुसन्धानविरहिणोऽपि सादृश्यप्रतीतेः । प्रत्यक्षादिविषयीभूतद्रव्यादिपदार्थातिरिक्तत्वाच्च । तथाहि — न तावदेव द्रव्यम्, [न] गुणः कर्म वा, अगुणत्वात्, अगुणविषयविलक्षणबुद्धिवेद्यत्वाद् विभागाहेतुत्वात् । न सामान्याद्यन्यतमम् अनुगतव्यावृत्तबुद्ध्यहेतुत्वादिति । पदार्थान्तरमेवेति गुरुमतमाशङ्क्य निषेधति — **तथाहीति** । परस्परविरोधो हि परस्पराभावरूपत्वं ननु(न तु) पराभाववत्त्वम् । अतो नीलपीतयोरन्यतरनिषेधेऽपि नान्यतरविधिरिति शीतोष्णस्पर्शाद् भेद इति । इममेवार्थं [83 A] श्लोकविवरणव्याजेनाह — **न हीति** । **पूर्ववदिति** । परस्परविरोधे प्रकारान्तरासंभवादिति। इदमेव सर्वत्र योज्यम् । शक्त्यादयोऽपि पटे पदार्थानतिरेकित्वेन व्याख्येया इत्याशङ्क्याह - **एतेनेति** । भावरूपपदार्थातिरिक्त(क्तं) सिद्धमित्याह — **तत** इति । मा भूत् पदार्थातिरिक्तं तदन्तर्भूतमेवास्तु सादृश्यं तत्र प्रत्यक्षाद्यप्रवृत्तेः उपमानप्रवृत्तिरिति जरन्मीमांसकमतमपाकर्तुमुपन्यस्यति — **स्यादेतदिति** । नेन्द्रियजन्य इत्युपलक्षणम्, लिङ्गादिजन्योऽपि न, तत्प्रतिसन्धानविधुरस्यापि याज(जाय)मानत्वादित्यपि द्रष्टव्यम् । निराकरोति — **नेति** । जरन्मीमांसकमतमपाकृत्याभिनवमीमांसक**शबरस्वामि**मतमाशङ्कते — **नन्वेतदिति** । अनेन सदृशी मदीया गौरिति ज्ञानं नेन्द्रियादिजन्यमिन्द्रियसन्निकर्षलिङ्गादिप्रतिसन्धानविरहेऽपि जायमानत्वादिति । अन्यं **भूषणकार**दूषणमत्राशङ्क्य निराचष्टे — **तावदिदमिति**[1] । इदं नैयायिकोक्तदूषणमुत्थाप्य निराकरोति - **न चैतदपीति** । एकत्व(त्र) विशेष्यस्येन्द्रियसन्निकृष्टत्वात् अन्यत्रासन्निकृष्टत्वादिति विशेष्यस्य सत्त्वादिति । अस्यापि च व्यक्त्यन्तर्भावेऽ[83 B]प्यर्थापत्तावन्तर्भाव इति नोपमानमतिरिक्तं सिद्ध्यति, अन्यथा वैधर्म्यस्यापि साधर्म्यवत् प्रमाणान्तरत्वमित्याह - **एतदपीति** ।

१. प्रतीकमिदं मुद्रितमूले नास्ति ।

76. साधर्म्यमिव वैधर्म्यं मानमेवं प्रसज्यते ।
अर्थापत्तिरसौ व्यक्तमिति चेत् प्रकृतं न किम् ॥९॥

यदा हि एतद्विसदृशोऽसौ इति प्रत्येति, तत्रापि तुल्यमेतत् । न हि तत्प्रत्यक्षमसन्निकृष्टविषयत्वात् । न स्मरणम् । विशिष्टस्याननुभवात् । नोपमानमसादृश्यविषयत्वात् । नन्वेतद्धर्माभावविशिष्टत्वमेव तस्य वैधर्म्यम्, तच्चाभावगम्यमेवेष्यते । न च प्रकृतेऽपि तथाऽस्तु । सादृश्यस्य भावरूपत्वादिति चेत्, न । इतो व्यावृत्तधर्मविशिष्टताया अपि वैधर्म्यरूपत्वात् । तस्य च भावरूपत्वात् । स्यादेतत् । तद्धर्मा इह न सन्तीत्यवगते अर्थादापद्यते इहाविद्यमानास्तत्र सन्तीति । न हि तद्विधर्मत्वमेतस्योपपद्यते, यद्येतद्विधर्माऽसौ न भवतीति चेत् । एवं तर्हि प्रकृतमप्यर्थापत्तिरेव । न हि तत्सादृश्यविशिष्टत्वमेतस्य प्रत्यक्षसिद्धमपि तस्यैतत्सादृश्यविशिष्टत्वं विनोपपद्यते । एतेन दृष्टासन्निकृष्टप्रत्यभिज्ञानं व्याख्यातम् । तत्रापि तद्धर्मशालित्वं तस्य स्मरणाभिव्यक्तमनुपपद्यमानं तदिदन्तास्पदस्यैकतां व्यवस्थापयति । तस्मान्नोपमानमधिकमिति । एवं प्राप्ते अभिधीयते –

सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह ।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥१०॥

यथा गौस्तथा गवय इति श्रुतातिदेशवाक्यस्य गोसदृशं पिण्डमनुभवतः स्मरतश्च वाक्यार्थमयमसौ गवयशब्दवाच्य इति भवति मतिः । सेयं न तावद् वाक्यमात्रफलम्, अनुपलब्धपिण्डस्यापि प्रसङ्गात् । नापि प्रत्यक्षफलम्, अश्रुतवाक्यस्यापि प्रसङ्गात् । नापि समाहारफलम्, वाक्यप्रत्यक्षयोर्भिन्नकालत्वात् । वाक्यतदर्थयोः स्मृतिद्वारोपनीतावपि गवयपिण्डसम्बन्धेनापि इन्द्रियेण तद्गतसादृश्यानुपलम्भे समयपरिच्छेदासिद्धेः । फलसमाहारे तु तदन्तर्भावे अनुमानादेरपि प्रत्यक्षत्वप्रसङ्गः । तत् किं तत्फलस्य तत्प्रमाणबहिर्भाव एव ?, अन्तर्भावे वा कियती सीमा ? तत्तदसाधारणेन्द्रियादिसाहित्यम् । अस्ति तर्हि सादृश्यादिज्ञानकाले विस्फारितस्य चक्षुषो व्यापारः । न । उपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वाक्यतदर्थस्मृतिमतः कालान्तरेऽप्यनुसन्धानबलात् समयपरिच्छेदोपपत्तेः ।

76. एतदे[व वि]वृणो[ति] – **यदा हीति** । ननु यदा वाराणसीपरिदृष्टः पुरुषोऽनन्तरं पाटलिपुत्रेऽप्युपलभ्यते तदन्तरं च तद्देशासंनिहितेन पुरुषेण प्रत्यभिज्ञायते – 'य एव मया वाराणस्यां दृष्टः स एव मया पाटलिपुत्रेऽपि' इति । [न] तदिदं तावदनुस्मरणं प्रत्यभिज्ञानगोचरस्य पूर्वमननुभूतत्वात् । न(ना)पि बहिरिन्द्रियप्रत्यक्षम् इन्द्रियासन्निकृष्टविषयत्वात् । नानुमितिः शाब्दं वा लिङ्गशब्दान्तरेण(णा)जायमानत्वात् । नापि मानसं मनसो बहिरस्वातन्त्र्यादित्यत उपमानगम्यमेतद् भविष्यतीति नैयायिकैकदेशिमतमाशङ्क्यातिदिशति – **एतेनेति** । साधर्म्यवैधर्म्ययोरर्थापत्त्यन्तर्भावेनेत्यर्थः । पूर्वदृष्टं च तन्मध्येऽसन्निकृष्टं चेति दृष्टासन्निकृष्टं तस्य प्रत्यभिज्ञानमिति । अतिदेशार्थं स्फुटयति – **तत्रापीति** । ननु च तद्धर्मिणीव तद्धर्मेऽपि प्रत्यभिज्ञा नोपपद्यते । तत्राप्यपरापरधर्मापेक्षायामनवस्थानादित्युच्यते – प्रत्यभिज्ञायमानेनापि [84 A] साधारणमुखसंस्थानादिना स्मर्यमाणेनैकत्वमनुमीयते । अयं वाराणसीपरिदृष्टपुरुषादभिन्नोऽविशिष्टमुखसंस्थानत्वात् । यः पुनः तस्माद्भिन्नः स एवंभूतमुखसंस्थानवानपि न भवति । यथोभयवादिसंप्रतिपन्नयज्ञदत्तः । न चायं तथा । तस्मान्न तथेति । एवं मीमांसकाभ्युपगतमुपमान(नं) प्रत्यक्षार्थापत्त्योर्यथासंभवमन्तर्भाव्याभिनवनैयायिकैरुपमितिरूपफलस्य प्रत्यक्षाद्य-

साध्यतया प्रमाणोत्तर(णान्त)रफलत्वमुपवर्ण्यत इत्याह । प्रत्येकं व्यभिचारेऽपि समुदितयोर्वाक्यप्रत्यक्षया(योः) फलं भविष्यतीत्याशङ्क्य परिहरति – **नापी**ति । **भिन्नकालत्वादि**ति । वाक्यकाले प्रत्यक्षं नास्ति, प्रत्यक्षकाले च वाक्यं नास्तीत्यर्थः । नन्विन्द्रियसम्बद्धे गवये वाक्यतदर्थस्मृतौ च सत्यां प्रमाणसमाहारो भविष्यतीति आशङ्क्य गवयगतगोसादृश्यावेदने न भ[व]त्येवैवं [स्]मृतिरित्याह – **वाक्ये**ति । फलसमाहारमाशङ्क्यापाकरोति । प्रत्यक्षफलं हि प्रायशो लिङ्गपरामर्शोऽनुमितिरूपप्रतिपत्तिं कुर्वन् अनुमानमिष्यते । श्रोत्रजानुभवप्रसूतवाक्यप्रतिपत्तौः वाक्यार्थप्रतिपत्तौ [च] कर्तव्यायां [84 B] शब्दः प्रमाणमिष्यते, तदुभयमपि प्रत्यक्षं स्यादित्यर्थः । ननु यदि तत्फलत्वेन तदन्तर्भावो न स्यात् तर्हि विकल्पस्याप्यालोचनफलस्य प्रत्यक्षान्तर्भावो न स्यात् । भविष्यति चेत् तदा लिङ्गसादृश्यसाक्षात्कारयोः कः प्रद्वेषः ? अथैकदा[ऩ]तर्भावो न सर्वत्रेति नियामकाभावादमुं विशेषं न विद्म इत्याशयवान् – **एतेने**ति[1] । **तत् किमि**ति । यत्र व्यापारिण इन्द्रियसन्निकर्षादेरवस्थितिस्तत्र तत्फलस्यावान्तरव्यापारता, यत्र पुनर्व्यापारिण एवानवस्थितिस्तत्र प्रमाणबहिर्भूतत्वं, यथेन्द्रियव्यापारोपरतौ लिङ्गशब्दानुसन्धानबलेनानुमितिर्वाक्यार्थप्रमित्युत्पादे सोऽयं विशेष इत्याह – **तत्तदि**ति । इममेव विशेषमुपादायाशङ्कः(ङ्कां) पूर्वयुक्त्या परिहरति – **अस्ति तर्ही**ति । एतेन यदुक्तं कैश्चिद् व्यरिप्ति(व्याप्ति)प्रत्ययजनितसंस्कारसहायमिन्द्रियमेव लिङ्गानुभा(भ)वार्थान्तरव्यापारं लिङ्गिज्ञानकरणमस्तु कृतमनुमानेनेति तदपि परा[कृतम्, स]न्निकर्षासाधारणव्यापारस्य साक्षात्कारिविज्ञप्तिजनकस्य परोक्षाकारज्ञानजनकत्वानुपपत्तेः । पूर्वमुक्तं न तावद् वाक्यफलम् अनुपलब्धे[85 A]न्द्रियस्यापि प्रसङ्गात् ।

77. ननु च वाक्यादेवानेन समयः परिच्छिन्नः – गोसदृशस्य गवयशब्दः संज्ञेति, केवलमिदानीं प्रत्यभिजानात्ययमसाविति । प्रयोगाद्वाऽनुमितः – यो यत्रासति वृत्त्यन्तरे वृद्धैः प्रयुज्यते स तस्य वाचको यथा गोशब्द एव गोः, प्रयुज्यते चायं गोसदृशे, इति किमुपमानेनेति । न –

सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः ।
समयो दुर्ग्रहः पूर्वं शब्देनानुमयाऽपि वा ॥११॥

न हि गवयशब्दस्य सादृश्यं प्रवृत्तिनिमित्तम्, अप्रतीतगूनामव्यवहारप्रसङ्गात् । न चोभयमपि निमित्तम्, स्वयं प्रतीतसमयसंक्रान्तयेऽतिदेशवाक्यप्रयोगानुपपत्तेः । गवयत्वे ह्ययं व्युत्पन्नो वृद्धव्यवहारात्, न सादृश्ये । कथमेतन्निर्धारणीयमिति चेत् । वस्तुगतिस्तावदियम्, तदापाततः सन्देहेऽपि न फलसिद्धिः । गन्धवत्त्वमिव पृथिवीत्वस्य, गोसादृश्यं गवयशब्दप्रवृत्तिनिमित्तस्योपलक्षणमिदमेव वा निमित्तमित्यनिर्धारणात् ।

77. यदवादि **भूषणकार**प्रभृतयस्तदाशङ्कते – **नन्वि**ति । तथा चोक्तं संज्ञासंज्ञिसम्बन्धप्रतिपत्तिरप्याप्तवचनकार्येति । **भट्टै**रप्युक्तम् – अतिदेशवाक्यादेव गोसादृश्येन गवयशब्दवाच्यत्वेऽर्थेऽवधानम्, निर्व्यक्तिरूपेण न च ते सर्वार्थसम्बन्धोऽप्यवगत एव, तद्धि तदाऽवगति यदा गोसदृशं वस्तु गवयशब्दवाच्यमित्यादि । सांख्यमतमाशङ्कते – **प्रयोगाद्वे**ति । गवयशब्दो गोसदृशस्य वाचकः, असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वादिति । प्रतिज्ञाहेत्वोरनभिधानं न दोषाय, प्रतिपादनमात्रस्य विवक्षितत्वात् । ग्रन्थे च संगृहीतस्याप्यर्थस्य कथायां

---

१. मुद्रितमूले प्रतीकमिदं नास्ति ।

संपूर्णाभिधानस्यैवोचितत्वात्, अन्यथा न्यूनावतारादिति । गौणलाक्षणिके व्यभिचारनिवृत्त्यर्थम् असतीत्यादि-विशेषणमिति । ततश्च प्रत्यक्षासाध्यत्वेन प्रमाणान्तरफलत्वे सिद्धसाधनमागमानुमानसाध्यत्वमसिद्धमागमानुमानाभ्यां सम्बन्धपरिच्छेदस्योपपादितत्वादित्याशयः । प्रकृतवाक्यं न संज्ञिनो गवयस्य प्रतिपादकम्, 'गोसदृश'पदस्य सादृश्यमात्राभिधायकत्वात्, 'गवय'पदस्य त्वगृहीतसमयतयाऽप्रतिपादकत्वात् प्रत्यक्षत्वादे(देः) असि[द्ध]त्वाच्च। न च संज्ञिन्यप्रतीते संज्ञाकरणमिति भवतामपि सम्मतमित्याशयवान् समाधत्ते – **नेति** । **दुर्ग्रहो**ऽयं वाक्यग्रहः। **पूर्वमिति** । गवयपिण्डदर्शनादिति विशेषः । [85 B] **न चोभयमिति** । समुच्चयेनाप्रतीतगूनामव्यवहारप्रसङ्गादेव। विकल्पेन तूभयनिमित्ततायां दोषमाह - **स्वयमिति** । अविदितगोर्विदितगवयस्य परप्रतिपादनायातिदेशवाक्यप्रयोगोऽनुपपन्न इत्यर्थः । स्वयं 'गवय'शब्दस्य सङ्केता(तो)ऽवगतस्तस्य च परस्मिन् सङ्क्रमणायातिदेशवाक्यं प्रयुज्यते । मया प्रतीतं सङ्केतं परोऽप्यवगच्छत्विति बुद्ध्या वाक्यमुच्चारयति प्रयोक्ता नान्यथेति सर्वमतसिद्धमिति सारम् । एतदेव दर्शयति – **गवयत्वे हीति** । **वस्तुगतिरिति** । यदा हि व्युत्पित्सुर्गोर्गवयसादृश्यं गवयत्वं च पतरेत्यति(प्रतिपादयति) तदाऽनेकनिमित्तकल्पनायामतिप्रसङ्ग इति तर्कपुरस्काराद् गवयत्वमेव निमित्तमित्यनुगच्छति, गवयत्वाप्रतीतौ त्वतिदेशवाक्यमात्रश्रुतिकाले सादृश्योपलक्षणत्वसंदेहास्पदत्वेन समयपरिच्छेदानुपपत्तेः व्युत्पद्यमानो गवयत्व एव व्युत्पद्यत इति तात्पर्यम् । उक्तविशेषाप्रतिसन्धाने तु **तदापातत** इत्यादि । तस्मिन् सादृश्ये आपाततः संदेह इति पुनरप्यतिदेशवाक्यप्रयोगानुपपत्तिरेवेत्यर्थः । तथाहि तदेव ह्याप्तेन वाक्यं प्रयुज्यते यदसंदिग्धं न विपरीतं तात्प्रत्ययं वा, तस्यान्यथात्वेऽनाप्तत्वप्रसङ्गात्, तदयमाप्तो वाचकशब्दात् समयं ग्राहयन् असंदिग्धार्थादेव ग्राहयेत् । न चेदमतिदे[86 A]शवाक्यमसंदिग्धार्थं सादृश्यस्योपलक्षणत्वनिमित्तत्वयोरुपलम्भात्। तस्मात् संदिग्धार्थं वाक्यं न समयनिश्चयाय प्रयुङ्क्ते इत्याशयवान् संदेहाकारं भावयति – **गोसादृश्यमिति** ।

78. स्यादेतत् । पूर्वं निमित्तानुपलब्धेर्न फलसिद्धिरिदानीं तु तस्मिन्नुपलब्धे तदेव वाक्यं स्मृतिसमारूढं फलिष्यति, अध्ययनसमयगृहीत इव वेदराशिरङ्गोपाङ्गपर्यवदातस्य कालान्तरे । न च वाच्यं 'वाक्येन स्वार्थस्य प्रागेव बोधितत्वात् प्रागेव पर्यवसितम्' इति । गोसादृश्यस्योपलक्षणनिमित्तत्वयोरन्यतरत्र तात्पर्ये सन्देहात्, इदानीं तु गवयत्वेऽवगते तर्कपुरस्कारात् सादृश्यस्योपलक्षणतायां व्यवस्थितायां, 'गङ्गायां घोषः' इतिवदन्वयप्रतिपत्तिरिति चेत्, न –

श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात् तदाक्षिप्तेन सङ्गतिः ॥१२॥

गोसदृशो गवयशब्दवाच्य इति समानाधिकरण्यमात्रेणान्वयोपपत्तौ विशेषसन्देहेऽपि वाक्यस्य पर्यवसितत्वेन मानान्तरोपनीतानपेक्षणात् । रक्तारक्तसन्देहेऽपि घटो भवति इति वाक्यवत्, अन्यथा वाक्यभेददोषात् । न च 'गङ्गायां घोषः' इतिवत् पदार्था एवान्वयायोग्याः येन प्रमाणान्तरोपनीतेनान्वयः स्यात् । प्रतीतवाक्यार्थबलायातोऽप्यर्थो यदि वाक्यस्यैव, दिवाभोजननिषेधवाक्यस्यापि रात्रिभोजनमर्थः स्यात् । तस्माद् यथा गवयशब्दः कस्यचिद् वाचकः शिष्टप्रयोगादिति सामान्यतो निश्चितेऽपि विशेषे मानान्तरापेक्षा, तथा गोसदृशस्य गवयशब्दो वाचक इति वाक्याद् निश्चितेऽपि सामान्ये विशेषवाचकत्वेऽस्य मानान्तरमनुसरणीयमिति ।

78. अप्रतीते गवयत्वेऽतिदेशवाक्यकाल(ले) संज्ञासंज्ञिसम्बन्धप्रतिपत्तिर्मा भूत् । वने दृष्टे गवयत्वे तत

एव वाक्यात् सम्बन्धपरिच्छेद इति पुनरपि न मानान्तरत्वसिद्धिरिति आशङ्कते - **स्यादेत**दिति । अत्र दृष्टान्तमाह — **अध्ययने**ति । **इदानीं त्वि**ति । प्रत्यक्षेण गवयपिण्डोपलम्भकाले सादृश्यस्य केवलस्याभिधेयत्वेऽतिप्रसङ्गाद् गवयत्वावच्छिन्नस्य त्वभिधेयत्वे कल्पनागौरवप्रसङ्गात् । तस्मान्न सादृश्यस्य प्रवृत्तिनिमित्तत्वं किन्तु प्रवृत्ति-निवृ(मि)त्तोपलक्षणत्वं यथा 'गङ्गायां घोषः' इत्यत्र 'गङ्गा'पदार्थस्य तीरोपलक्षणत्वेनाऽऽशयस्तथा गोसादृश्यस्यापि गवयजातीयोपलक्षणत्वेनेति तात्पर्यम् । समाधत्ते — **न** । **श्रुते**ति । यत्र पदार्थानामन्वयो न घटते बाधकप्रमाण-सत्त्वात् तत्र तदाक्षिप्तेन श्रुतपदार्थाक्षिप्तेन सङ्गतिर्भवति, न तु 'गङ्गाया जलमानीयताम्' इत्यात्रापीत्यर्थः । यदुक्तमन्यतरत्र तात्पर्यसंदेहापर्यवसानमिति । तत्किमाकाङ्क्षादिमत्पदतदर्थसामानाधिकरण्याप्रतीतेर्वाप्रतीतसामाना-धिकरण्यानुपपत्तेर्वा । पूर्वार्धं विवृण्वन् आद्यं तावन्निवर्तयति । **गोसदृश** इति । मानान्तरोपनीतेति । [86B] मानान्तरं प्रत्यक्षादि । तेनोपनीतं दर्शितमिति । तत्किम् ? पदार्थविशेषजिज्ञासा नाकाङ्क्षेति चेत् क एवमाह नेति, किन्तु समभिव्याहृतपदस्मारितपदार्थविषया न तु जिज्ञासामात्रमिति । कथमेष विभाग इत्यत आह - **अन्यथे**ति । यदि जिज्ञासामात्रमाकाङ्क्षेति तदा विशेषजिज्ञासायामेकमेव वाक्यं सर्वजनसिद्धं साकाङ्क्षत्वाद् भिद्यते। यदि पटो भवतीत्येतत्सामान्यप्रतिपादनेन पर्यवसितं संशयवि[ष]यीभूतरक्ततामयमपेक्षते तदा पटो भवतीत्येतद्वाक्यमेव न स्यात् । तदेतत् सामान्येन प्रथमं पर्यवसितं पश्चाद् रक्तान्वयमपेक्षमाणं रक्तान्वयमभिधत्ते तदा वाक्यभेद इत्यर्थः । न त्वेवं 'गङ्गायां घोषः' इत्यादेरपि सामानाधिकरण्यमात्रेण पर्यवसितत्वात् मानान्तरोपनीत(ते)न वान्वयः स्यादित्यत आह — **न चे**ति । न सामानाधिकरण्यमात्रं वाक्यार्थपर्यवसाने कारणमाचक्षामहे किन्त्वाकाङ्क्षादिभिर्विशेष(ष)मिति नातिप्रसङ्ग इत्यर्थः । ननु मा भूत् प्रतीत्यपर्यवसानमस्तु प्रतीतापर्यवसानम्, तावताऽप्यस्मत्समीहितसिद्धेरिति । अत आह **प्रतीते**ति । यदि तु गोसादृश्यस्य कल्पनागौरवात् प्रतिपत्तिनिमित्तत्वानुपपत्तौ गवयजातीयस्य प्रवृत्तिनिमित्तत्वकल्पनाऽपि यदि वाक्यार्थः स्यात् तदा दिवाऽभोजिनः पीनत्वानुपपत्त्या रात्रिभोजनकल्पनापि वाक्यार्थः स्यादित्यर्थः । [87A] **विशेषे मानान्तरापेक्षेति** विशेषे गवयत्वे शब्दानुमानापेक्षेत्यर्थः ।

79. अस्त्वनुमानम् - तथाहि गवयशब्दो गवयस्य वाचकः, असति वृत्त्यन्तरेऽभियुक्तैस्तत्र पयुज्यमानत्वात्, गवि गोशब्दवत् इति - चेत्, न, असिद्धेः । न ह्यसति वृत्त्यन्तरे तद्विषयतया प्रयोगः सङ्गतिमविज्ञाय ज्ञातुं शक्यते । सामानाधिकरण्यादिति चेत्, न । पिण्डमात्रे सिद्धसाधनात्, निमित्ते चासिद्धेः, सादृश्यस्यानिमित्तत्वादित्युक्तम् । ननु व्याप्तिपरमिदं वाक्यं स्यात् — यो गोसदृशः स गवयपदार्थ इति, तथा च वाक्यादवगतप्रतिबन्धोऽनुमिनुयात् - अयमसौ गवयो गोसदृशत्वादति-देशवाक्यावगतपिण्डवदिति । न । विपर्ययात्, न हि गोसदृशं बुद्धावारोप्यानेन पृष्टः स किंशब्दवाच्य इति, किन्तु सामान्यतो गवयपदार्थमवगम्य स कीदृगिति । तथा च यद्योगप्राथम्याभ्यां तस्यैव व्याप्यत्वम्, ततः किं तेन ? प्रकृतानुपयोगात् । अथ किंलक्षणकोऽसाविति प्रश्नार्थः । तदा व्यतिरेकपरं स्यात्, लक्षणस्य तथाभावात् । तथा च गोसदृशो गवय इत्यस्यार्थो यो गवय इति न व्यवह्रियते नासौ गोसदृश इति । एवं च प्रयोक्तव्यम् — अयमसौ गवय इति व्यवहर्तव्यः गोसदृशत्वात्, यस्तु न तथा नासौ गोसदृशो यथा हस्ती । न च हस्त्यादीनां विपक्षत्वे प्रमाणमस्ति, सर्वाप्रयोगस्य दुरवधारणात्, कतिपयाव्यवहारस्य चानैकान्तिकत्वात् । ननु लिङ्गमात्रे प्रश्नो भविष्यति — कीदृक् किं लिङ्गमिति । न ।

79. एवं तावद् नागमसम्बन्धपरिच्छेदफल इति समर्थितमिदानीमनुमानमपि तथा भवितुमर्हतीति । तदनुमानमुपन्यस्य निराकरोति – **अस्त्वि**ति । न ह्यसति 'गवय'शब्दे गवयजातीये गौणवृत्त्या लक्षणया वाऽत्र प्रयुक्त इति कथं ज्ञायते ? तत्र मुख्यत्वात् इति चेत् । न त्विदमेवानुमितेः प्रमेयं तत् कथमनुमिते पूर्वसङ्गतिमविज्ञाय वाच्यवाचकलक्षणसम्बन्धो विज्ञायते । तत्र चासिद्धमित्यर्थः । गवयसामानाधिकरण्येन गोसादृश्ये गवय इति 'गवय'शब्दवाच्यत्वस्य प्रयोगादुत्तरं गवयजातीयसामानाधिकरण्येन प्रयोगादथ गोसदृशसामानाधिकरण्ये[न] प्रयोगात् । तत्र पिण्डसामानाधिकरण्येन प्रयोगात् पिण्डस्य वाचको न च गवयत्वस्येति प्राप्तम् । तथा च नोपमानस्य स्यादिति । नोपमानभङ्ग इति मन्वानः प्रथमपक्षमपाकरोति – **न पिण्डे**ति । गवयजातीयसामानाधिकरण्येन प्रयोगस्तु प्रमाणाभावादसिद्ध इत्याह – **निमित्ते**ति । सादृश्यवाचकत्वं बाधकमित्याह – **सादृश्ये**ति। ननु पिण्डदर्शनात् पूर्वनिमित्तात् प्रतीतौ शब्देनेवानुमानेनापि मा भूत् परिच्छेदः, पिण्डदर्शनानन्तरं त्वनुमानेनैव समयपरिच्छेदेति(द इति) र(अ)स्तु । न च व्युत्पित्सुव्युत्पादकप्रश्नोत्तरातिदेशवाक्यप्रयोगवैयर्थ्यं व्याप्तिपरत्वादुपदेशस्येति । [87B] शङ्कते – **ननु** इति । समाधत्ते **ने**ति । **विपर्ययादि**ति । अभिमतव्याप्ति-विपरीतव्याप्तिप्रसङ्गादित्यर्थः । एतदेव विवृणोति – **न ही**ति । येन सादृश्यस्य व्याप्यत्वं भवेदिति शेषः । उत्तरवाक्यमिदं प्रष्टुराकाङ्क्षितमर्थमुपदर्शयति, न त्वन्यथेति सर्ववादिसिद्धम्, प्रष्टुश्चापेक्षा - 'गवय'शब्दवाच्यः केन साधारणेन धर्मेण युक्त इति । तत्र 'गवय'शब्दवाच्यमुद्दिश्य गोसादृश्यप्रतिपादनाद् 'यो धूमः [स] वह्निमान्' इति 'गवय'शब्दवाच्यगोसादृश्यस्याप्यनुमानात् । 'गवय'शब्दवाच्यत्वाद् गोसादृश्यानुमानादित्यर्थः । अन्यथा सूत्रार्थमाशङ्क्यपरिहरति – **अथे**ति । **न च हस्त्यादी**ति । कस्य हस्त्यादीनां विपक्षत्वे प्रमाणं नास्ति किमुपदेष्टुरुतोपदेश्यस्य ? उपदेष्टुस्तावद् वृद्धव्यवहारादुपदेशाद् वा अबाधितगवयशब्दवाच्यस्य प्रवृत्तिनिमित्त-विपर्ययावसायबलेनैव कुञ्जरादौ 'गवय'शब्दवाच्यत्वं निश्चेयम्, उपदेश्यस्य त्वेतस्मादेव वाक्याद् व्यतिरेक-व्याप्तिनिश्चयः । आप्तप्रणीतत्वसंदेहान्नेदं वाक्यं निश्चायकमिति चेत् । न, तथा सत्युपमानस्याप्यनुपपत्तेरिति उच्यते । न हि 'यो गोसदृशः स गवयः' इति वाक्याद् व्यवहारे क(का) व्याप्तिः प्रतीयेत । सा हीतरव्यतिरेकव्याप्तेर्मर्यादया वाक्यादपि प्रतीयमाना अवधारितविपक्षभावे [88A] क्वचित् प्रत्येतव्या, विपक्षावधारणं च नैव प्रमाणैः, प्रत्यक्षस्य तत्रासामर्थ्यादनुमानस्य तु सर्वाप्रयोगस्येत्यादिना दूषितत्वात् । अनवगते च विपक्षे वाक्यादपि व्यतिरेकव्याप्तेः प्रतीतिः सम्भवति । न च व्यतिरेकव्याप्तिप्रतिपादकं वाक्यमस्ति ; न हि 'गवय'शब्दवाच्यो गोविसदृशः इति वाक्यमस्ति। न च साक्षादप्रतीयमानेऽपि व्यतिरेके त्वत्र वाक्यस्य तात्पर्यमिति। [न] तात्पर्यबलेन व्यतिरेकावगतिरिति वाच्यम्, लक्षणवदुपलक्षणेऽपि तात्पर्यसम्भवात्। अतो व्यतिरेकव्याप्तौ तात्पर्यसंदेहात् तत्र वाक्यस्य प्रामाण्यमिति । तस्मान्न व्याप्तिपरमिदं वाक्यमिति समर्थिते अन्यपरत्वमाशङ्कते – **नत्वि**ति । निराकरोति – **ने**ति ।

80. न ह्यनेन लिङ्गमविज्ञाय गवयशब्दस्य वाचकत्वं कस्यचिद् वाच्यत्वं वाऽवगतं येन तदर्थः प्रश्नः स्यात् । प्रवृत्तिनिमित्तविशेषलिङ्गे प्रश्नः येन निमित्तेन गवयशब्दः प्रवर्तते तस्य किं लिङ्गमिति चेत्, न । न हि तदवश्यमनुमेयमेवेत्यनेन निश्चितं यत इदं स्यात् । ज्ञानोपायमात्रप्रश्ने तद्विशेषेणोत्तरमिति चेत्, न । अविशेषादिन्द्रियसन्निकर्षमप्युत्तरयेत् । पर्यायान्तरं वा यथा गवयमहं कथं जानीयामिति प्रश्ने वनं गतो द्रक्ष्यसीति । यथा वा कः पिक इत्यत्र कोकिल इति । तस्माद् निमित्तभेदप्रश्न एवायम् – गवयो गवयपदवाच्यः कीदृक् केन निमित्तेनेति युक्तमुत्पश्यामः । तस्य

च निमित्तविशेषस्य साक्षादुपदर्शयितुमशक्यत्वात् पृष्टस्तदुपलक्षणं किञ्चिदाचष्टे, तच्चोपमानसामग्री-समुत्थापनमेव । तस्य च प्रमाणस्य सतस्तर्कः सहायतामापद्यते, सादृश्यस्यैव निमित्ततायां कल्पनागौरवम्, निमित्तान्तरकल्पने च क्लृप्तकल्प्यविरोध इति तदेव निमित्तमवगच्छतीति । लक्षणं त्वस्य – अनवगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञिन्यनुसन्धानमुपमानम् । वाक्यार्थश्च क्वचित् साधर्म्यं क्वचिद् वैधर्म्यमतो नाव्यापकम्, तस्माद् नियतविषयत्वादेव न तेन बाधः, न त्वनतिरेकादिति स्थितिः ।

80. **न ह्यनेने**ति । सामान्यतो निरूपिते विशेषतोऽथानिश्चिते विशेषे जिज्ञासा स्यात् । जिज्ञासाऽऽविष्करणं च प्रश्नः । न च गवयशब्दवाच(च्य)त्वे सामान्यतो लिङ्गमनेनाधिगतं न च शब्दानित्यत्वे कृतकत्वलिङ्गमिति सामान्यतोऽधिगतं विशेषतोऽनिरूपितं व्याप्तिपक्षधर्मत्वलिङ्गिनिश्चयं जनयति । तस्मादेतदप्युक्तमिति । अथ मतं गोसादृश्येन समानजातीयेभ्योऽसमानजातीयेभ्यश्च व्यावृत्तः पदार्थो य इत्युपक्रान्तः स इति सर्वनाम्ना परामृष्टो वाक्यादेवावगतः सज्जी भविष्यति । न च प्रत्यक्षः संज्ञाविषयः, सहस्राक्षादिशब्दानां सङ्केताग्रहणप्रसङ्गात् । तस्मादेवमवधारिते [88B] संज्ञिनि वाक्यादेव संज्ञासंज्ञिसम्बन्धावगमो भविष्यतीति । अत्रोच्यते गवयजातीयस्य संज्ञिनो वाक्यादनवगमात् । गोसदृशशब्दाद् सादृश्यविशिष्टः पिण्डान्तरः प्रतीयते न तु गवयजातीयं च संज्ञि, ततो न वाक्यात् संज्ञासंज्ञिसम्बन्धावगम इति । ननु सामान्यान्येव भूयांसि गुणावयवकर्मणां भिन्नं प्रधानसामान्यं चोक्तं सादृश्यमुच्यते । अतो गोसदृश इत्यस्य शब्दस्यायमर्थो ग(गो)तः भिन्नजातीयः प्रचुरतर गोधर्मवांश्च, सा च जातिर्गोसादृश्येनान्यतो व्यावृत्ता असाधारणत्वेनावगता संज्ञासंज्ञिसम्बन्धविषया भविष्यति । मनस्त्ववतामेवंजात्यभावेति सादृश्यदर्शनाद् भवेद् यथा 'अरविन्दमिव मुखम्' 'मुखमिवारविन्दम्' 'मुखमिव चन्द्रः' 'चन्द्रवन्मुखम्' इत्याद्युदाहरणानि लोके भिन्नप्रधानसामान्यव्यक्तानीति तु प्रायोवादः । अतो गवयजातेरन-वगमान्नास्ति व्युत्पत्तिरिति । न चेयमर्थापत्तिः स्यादिति वाच्यमर्थापत्तेर्व्यतिरेकि व्यतिरेकेणानभ्युपगमात् । व्यतिरेकिणश्चोक्तक्रमेणदूषितत्वात् । अप्रसिद्धविशेषणत्वात् । अन्यत्र तु व्यतिरेकिणः प्रमासम्प्लवेन प्रवृत्त्यभ्यु-पगमात् । अ[त्र] तु तद्विरहादिति [हृदि] निधायोपसंहरति – **तस्मादि**ति । **तच्चोपमानसामग्रीसमुपस्थापनं** सामग्र्यनुकूलग्त्यर्थः । तदेवमियता प्रबन्धेन पूर्वोक्तं समर्थितमिति । प्रयोगस्तु विवादाध्यासितः संज्ञासंज्ञिपरिच्छेदः प्रत्यक्षादि(द्य)तिरिक्तप्रमाणसाध्यः, कार्यत्वे सति तदसाध्यत्वात्, यत् कार्यत्वे [89A] सति यदि(द)साध्यं तत् तदतिरिक्तसाध्यं यथा तन्त्वाद्यसाध्ये घटस्तथाद्य(तद)तिरिक्तमृदादिसाध्यः, तथा चायम्, तस्मात् तथेति । व्यतिरेकेण चायं न प्रत्यक्षानुमित्यादिफलम्, अतः न तथा यथा घटादीत्यादि, न चायं तथा, तस्मात् तथेति। प्रमाणसिद्धसाधकमुपमानं कृत्वा लक्षणमव्याप्तिपरिहारेण विभावयति – **लक्षणं त्वि**ति ।

81. शब्दोऽपि न बाधकमनुमानानतिरेकादिति वैशेषिकादयः । तथाहि यद्यप्येते पदार्था मिथः संसर्गवन्तो वाक्यत्वादिति व्याधिकरणम्, पदार्थत्वादिति चानैकान्तिकम्, पदैः स्मारितत्वादित्यपि तथा । यद्यपि चैतानि पदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वादित्यादौ साध्याभावः । न ह्यत्र मत्वर्थः संयोगः समवायस्तादात्म्यं विशेषणविशेष्यभावो वा सम्भवति । ज्ञाप्यज्ञापकभावस्तु स्वातन्त्र्येणानु-मानान्तर्भाववादिभिर्नेष्यते । न च लिङ्गतया ज्ञापकत्वम्, यल्लिङ्गस्य विषयस्तदेव तस्य, परस्पराश्रय-प्रसङ्गात् – तदुपलम्भे हि व्याप्तिसिद्धिस्तत्सिद्धौ च तदनुमानमिति । तथाप्याकाङ्क्षादिमद्भिः पदैः

स्मारितत्वाद् गामभ्याजेति पदार्थवदिति स्यात् । न च विशेषासिद्धिर्दोषः, संसर्गस्य संसृज्यमानविशेषादेव विशिष्टत्वात् । यद्वा – एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वात् गामभ्याजेति पदवत् । न चैवमर्थासिद्धिः । ज्ञानावच्छेदकतयैव तत्सिद्धेः । तस्य च संसृज्यमानोपहितस्यैवावच्छेदकत्वाद् न विशेषाप्रतिलम्भ इति ।

81. भगवति महेश्वरे अनुमानाबाधकत्वप्रदर्शनेनैव शब्दबाधकत्वमपि निरस्तमित्याह – **शब्द** इति । यदा पदानि पदार्था आकांक्षादिमन्तः सन्तो अर्थप्रत्यायने[१] लिङ्गं न तदातिरेकी शब्द इति भावः । पदार्थपदकरणपक्षं यथाक्रमं आशङ्कते – **यद्यप्येत** इति । **यद्यपि चे**ति । ननु मा भूत् स्वातन्त्र्येण ज्ञापकत्वं लिङ्गतया ज्ञापकत्वमेव मत्वार्थो भविष्यतीत्याशङ्क्य निषेधति - **न चे**ति । शब्दस्य लिङ्गत्वेनाभिमतस्य यल्लिङ्गतया ज्ञापकत्वं तदेव तस्य तत्स्मारकत्वादित्यस्य विषयः कर्मेति । कथंकारं हि भिन्नं सत् ज्ञानलक्षणाय फलायोपयुज्यते । तत् तथेति । सर्वं सिद्धम् । कुतः ? **परस्परे**ति । एतदेव विशदयति - **तदुपलम्भे हीति** । लिङ्गतया ज्ञापकत्वमनुमेयव्यापकं भवति । व्यापकोपलम्भे हि व्याप्तिर्निश्चीयते । तत्र व्यापकोपलब्धौ सत्यां व्याप्तिप्रतीतिः । लिङ्गतया व्यापकस्य प्रतीतौ तदनुमानमिति । शङ्कितप्रयोगे दूषणमभिधाय प्रयोगान्तरमाशङ्कते – नन्वेवं संसर्गसामान्यमिह प्रतीयते । इह सहकारतरौ मधुरं पिको रौतीति संसर्गविशेषावगतिः कुतः सेत्स्यत्यत आह – **न चे**ति । न हि पदार्थान् विहाय संसर्गस्यापरो विशेषोऽस्ति । [89B] तत्र पदार्थेषु धर्मिषु संसर्गे साध्यमाने तत(तः) पदार्थोपरक्तः संसर्गः सिध्यन्न विशेष एव सिध्यतीत्यर्थः । करणपक्षमाशङ्कते – **यद्वा एतानि** । ननु ज्ञानपूर्वकत्वे साध्ये ज्ञानपूर्वकत्वं सिध्यतु वाक्यार्थसिद्धिस्तु कुतस्त्येत्याशङ्क्य निराकरोति – **न चैवमि**ति । न ह्यत्र ज्ञानमात्रं सिद्ध्यति किन्तु संसर्गरूपविषयविशेषावच्छिन्नम् । तत्रापि न संसर्गमात्रेणावच्छिन्नं किन्तु स्मारिताकाङ्क्षितयोग्यसन्निहिततत्तत्पदार्थविशेषोपरक्तसंसर्गावच्छिन्न(न्नं) तथा च कत्वं(थं) न वाक्यार्थसिद्धिरित्यर्थः । **तस्ये**ति । तस्य संसर्गभेदस्य संसृज्यमानोपहितज्ञानावच्छेदकत्वात् ।

82. अत्रोच्यते –

अनैकान्तः परिच्छेदे सम्भवे च न निश्चयः ।
आकङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना ॥१३॥

एते पदार्था मिथः संसर्गवन्त इति संसृष्टा एवेति नियमो वा साध्यः, सम्भावितसंसर्गा इति वा ? न प्रथमः, अनाप्तोक्तपदकदम्बस्मारितैरनैकान्तात् । आप्तोक्त्या विशेषणीयमिति चेत्, न । वाक्यार्थप्रतीतेः प्राक् तदसिद्धेः । न ह्यविप्रलम्भकत्वमात्रमिहाप्तशब्देन विवक्षितम्, तदुक्तेरपि पदार्थसंसर्गव्यभिचारात्, अपि तु तदनुभवप्रामाण्यमपि । न चैतच्छक्यमसर्वज्ञेन सर्वदा सर्वविषये सत्यज्ञानवानयमिति निश्चेतुम् । भ्रान्तेः पुरुषधर्मत्वात् । तत्र क्वचिद् आप्तत्वमनाप्तस्याप्यस्तीति न तेनोपयोगः । ततोऽस्मिन्नर्थेऽयमभ्रान्त इति केनचिदुपायेन ग्राह्यम् । न चैतत् संसर्गविशेषमप्रतीत्य शक्यम् । बुद्धेरर्थभेदमन्तरेण निरूपयितुमशक्यत्वात् । पदार्थमात्रे चाभ्रान्तत्वसिद्धौ न किञ्चित् । अनाप्तसाधारण्यात् । एतेषां संसर्गेऽयमभ्रान्त इति शक्यमिति चेत्, न । एतेषां संसर्गे इत्यस्या एव बुद्धेरसिद्धेः । अननुभूतचरे स्मरणायोगात्, तदनुभवस्य लिङ्गाधीनतया तस्य च विशेषणासिद्धत्वेनानुपपत्तेरिति । नापि द्वितीयः,

१. वाक्यार्थप्रत्यायने ।

योग्यतामात्रसिद्धावपि संसर्गानिश्चयात्, वाक्यस्य च तदेकफलत्वात्, योग्यतामात्रस्य प्रागेव सिद्धेः । अन्यथा तदसिद्धावासन्नसाकाङ्क्षपदस्मारितत्वादित्येव हेतुः स्यात् । तथा चाग्निना सिञ्चेदित्यादिना स्मारितैरनैकान्तः । तथाविधानां सर्वथा संसर्गायोग्यत्वात् इति । द्वितीयेऽपि प्रयोगे हेतुराकाङ्क्षादिमत्त्वे सतीति । तत्र केयमाकाङ्क्षा नाम ? न तावद् विशेषणविशेष्यभावः, तस्य संसर्गस्वभावतया साध्यत्वात् । नापि तद्योग्यता, योग्यतयैव गतार्थत्वात् । नाप्यविनाभावः । नीलं सरोजमित्यादौ तदभावेऽपि वाक्यार्थप्रत्ययात् । तत्रापि विशेषाक्षिप्तसामान्ययोरविनाभावोऽस्तीति चेत्, न । 'अहो विमलं जलं नद्याः कच्छे महिषश्चरति' इत्यादौ वाक्यभेदानुपपत्तिप्रसङ्गात् । नापि प्रतिपत्तुर्जिज्ञासा । पटो भवतीत्यादौ शुक्लादिजिज्ञासायां रक्तः पटो भवतीत्यस्यैकदेशवत् सर्वदा वाक्यापर्यवसानप्रसङ्गात् ।

82. वैशेषिकादिमतमुत्थाप्य व्यभिचारव्यावर्तनायोपादेयं सत्तामात्रेणाकाङ्क्षाया कारणत्वादित्याह — **आकाङ्क्षेति** । नन्वस्ति तर्हि योग्यासत्तिः । तन्मात्रमेव गमकमित्यत आह - **योग्येति** । **योग्यासत्तिरबन्धना** न निबन्धनमनेकान्तादिति । विषरिष्यति[1] । ननु कृतं संसर्गविशेषनिरूपणेन पदार्थमात्रप्रत्ययादेव बुद्धिनिरूपणा-दभ्रान्तत्वनिरूपणोपपत्तेरित्यत आह - **पदार्थमात्रे चेति** । विशेषाभ्यां नीलसरोजाभ्यामाक्षिप्तयोर्नीलत्वसरोजत्वयोः सामान्ययोः सर्वकालदेशवर्तिनोर्न व्यभिचारादित्यर्थः । **अहो विमलं जलमित्यादि** । नैतदपि व्यभिचारयति । अत्र हि प्रथमोपनिपातिना विमलजलपदेन पूरिताकाङ्क्षि(क्ष)त्वान्नद्याः कच्छे इत्यादिना। अनाकाङ्क्षितत्वेन प्रतिबन्धिनाऽन्वय इति वाक्याभेदव्यवस्थितिः । तत्र विशेषाक्षिप्तसामान्याविनाभावश्चेदाकाङ्क्षा तर्ह्यस्य प्रकृते विमलजल[90A]नदीकच्छमहिषचरत्वयोरपि सामान्यतोऽव्यभिचारादित्यर्थः ।

83. गुणक्रियाद्यशेषविशेषजिज्ञासायामपि पदस्मारितविशेषजिज्ञासा आकाङ्क्षा । पट इत्युक्ते किंरूपः कुत्र किं करोतीत्यादिरूपजिज्ञासा । तत्र भवतीत्युक्ते किं करोतीत्येषैव पदस्मारितविषया, न तु किंरूप इत्यादिरपि । यदा तु रक्त इत्युच्यते तदा किंरूप इत्येषाऽपि स्मारितविषया स्यात् इति न किञ्चिदनुपपन्नमिति चेत् । एवं तर्हि चक्षुषी निमील्य परिभावयतु भवान् । किमस्यां जातायामन्वय-प्रत्ययोऽथ ज्ञातायामिति । तत्र प्रथमे नानया व्यभिचारव्यावर्तनाय हेतुर्विशेषणीयः, मनःसंयोगादिवत् सत्तामात्रेणोपयोगात् । आसत्तियोग्यतामात्रेण विशिष्टस्तु निश्चितोऽपि न गमकः । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ व्यभिचारात् । द्वितीयस्तु स्यादपि यद्यनुमानान्तरवत् तत्सद्भावेऽपि तज्ज्ञान-वैधुर्यादन्वयप्रत्ययो न जायते । न त्वेतदस्ति, आसत्तियोग्यतामात्रप्रतिसन्धानादेव साकाङ्क्षस्य सर्वत्र वाक्यार्थप्रत्ययात् । निवृत्ताकाङ्क्षस्य च तदभावात् । कथमेष निश्चयः साकाङ्क्ष एव प्रत्येति, न तु ज्ञाताकाङ्क्ष इति चेत्, तावन्मात्रेणोपपत्तावनुपलभ्यमानज्ञानकल्पनाऽनुपपत्तेः, अन्यत्र तथा दर्शनाच्च । यदा हि दूराद् दृष्टसामान्यो जिज्ञासते कोऽयमिति प्रत्यासीदंश्च स्थाणुरयमिति प्रत्येति तदाऽस्य ज्ञातुमहमिच्छामीत्यनुव्यवसायाभावेऽपि स्थाणुरयमित्यर्थप्रत्ययो भवति । तथेहाप्यविशेषाद् विशेषोप-स्थानकाले संसर्गावगतिरेव जायते, न तु जिज्ञासावगतिरिति । न च विशेषोपस्थानात् प्रागेव जिज्ञासावगतिः प्रकृतोपयोगिनी, तावन्मात्रस्यानाकाङ्क्षत्वात् । न चैवम्भूतोऽप्ययमैकान्तिको हेतुः । यदा ह्ययमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामिति वक्तोच्चारयति, श्रोता च व्यासङ्गादिना निमित्तेनायमेति

---

१. भ्रष्टम् ।

पुत्र इत्यश्रुत्वैव राज्ञः पुरुषोऽपसार्यतामिति शृणोति, तदाऽस्त्याकाङ्क्षादिमत्त्वे सति पदकदम्बकत्वम्, न च स्मारितार्थसंसर्गज्ञानपूर्वकत्वमिति ।

83. शङ्कते — **गुणक्रियेति** । पट इत्युक्ते हि तावत् केन गुणेन युक्तः किंसंस्कारकः किंक्रियश्चेति जिज्ञासा तत्र यदा भवतीत्युच्यते तदा जिज्ञासाविषयस्य क्रियाविशेषस्य पदेन स्मारणात् सैव जिज्ञासा आकाङ्क्षेत्युच्यते । **नानये**ति । ननु काङ्क्षायां ज्ञानं न सम्भवति । आकाङ्क्षा हीच्छा, सा चोत्पन्नैव मानसप्रत्यक्षा, अतो नापरिज्ञानसम्भवः । अज्ञाता[काङ्]क्षा[या] इच्छायाः कारणत्वे हेतौ किं दूषणमुक्तं भवति । अत्रोच्यते - ते(न) हि जिज्ञासामात्रमाकाङ्क्षा किन्तु पदस्मारितविशेषविषया । न च समानप्रत्यक्षवेद्या किन्तु प्रमाणान्तरगम्या । अतस्तस्याः परिज्ञानकालो(ले) हेतुः प्रयोक्तव्यः ज्ञानकाले वा? प्रथमे विशेषण्य(णा)सिद्धिः । द्वितीये तु योग्यतासत्तिविशेषितस्य साकाङ्क्षस्यैव वाक्यार्थजनकप्रतीतित्वादुत्तरकाले शब्दादवगम(त)स्यार्थस्यानुमानपक्षे न सिद्धसाधनम् । ज्ञातैवाकाङ्क्षा वाक्यार्थप्रतीतिकारणमिति चेत् तस्यैव ज्ञानस्य वाक्यार्थप्रतीतिकारणत्वं यस्यात्तसातस्य[1] कार्यविपर्ययो यथा प्रतिबन्धस्य पक्षधर्मत्वस्य च, न चेह तथा । न ह्यज्ञाताकाङ्क्ष[90B]स्य वाक्यार्थप्रतिभासविपर्यासो अवधारित इति तात्पर्यमिति । **तथेहापी**ति । यथा प्रत्यक्षे अज्ञातैव जिज्ञासा कारणं तथा शब्देऽपीति । किञ्च कदा जिज्ञासावगतिरपेक्षिता ? किं प्रतियोगिपदार्थस्मरणात् पूर्वं प्रतियोगिपदार्थस्मरणकाले वा ? तदुत्तरकाले वा ? तत्र विशेषोपस्थानकाले तावत् पटमित्युक्ते हि किं करोतीति जिज्ञासायां पश्यतीत्युक्ते पटं पश्यतीत्यन्वयावगतिरुत्पद्यते । ननु जिज्ञासाज्ञानमित्याकाङ्क्षा, विशेषोपस्थानं प्रतियोगिपदार्थस्मरणं, तदनन्तराव्यवहितकाले इत्यर्थः । न च जिज्ञासाज्ञानमाकाङ्क्षाज्ञानं किन्तु पदस्मारितार्थविषयत्वे सति जिज्ञासाज्ञानम् । न च तद् वाक्यार्थावगतिकाले विद्यते । नापि ततः पूर्वं, पूर्वं हि जिज्ञासाज्ञानमस्ति न तु पदस्मारितविषयजिज्ञासाज्ञानम्, तस्मात् पूर्वमाकाङ्क्षाज्ञानं नास्त्येव । उत्तरकालीनमाकाङ्क्षाज्ञानं न वाक्यार्थप्रतीतेः कारणं, पूर्वभावित्वस्य कारणत्वात् । ज्ञायमानाकाङ्क्षायाः हेतुत्वपक्षमभ्युपगम्याह — **न चैवम्भूतोऽपी**ति आकाङ्क्षा-दिमत्त्वेन विशेषितोऽपीत्यर्थः । न च **स्मारिता**[91A]**र्थे**ति वस्तुतः पुत्रपदस्मारितार्थसंसर्गत्वाद् राजपदार्थस्ये-त्यर्थः ।

84. स्यादेतत् । यावत् समभिव्याहृतत्वेन विशेषिते हेतौ नायं दोषः, तथाविधस्य व्यभिचारोदाहरणासंस्पर्शात् । कुतस्तर्हि कतिपयपदश्राविणः संसर्गप्रत्ययः ? अलिङ्ग एव लिङ्गत्वाध्यारोपात् । एतावानेवायं समभिव्याहार इति तत्र श्रोतुरभिमानः । न । तत्सन्देहेऽपि श्रुतानुरूपसंसर्गावगमात् । भवति हि तत्र प्रत्ययः, न जाने किमपरमनेनोक्तमेतावदेव श्रुतं यद् राज्ञः पुरुषोऽपसार्यताम् इति । भ्रान्तिरसाविति चेत्, न तावदसौ दुष्टेन्द्रियजा, परोक्षाकारत्वात् । न लिङ्गाभासजा, लिङ्गाभिमानाभावेऽपि जायमानत्वात् । एतादृक्पदकदम्बप्रतिसन्धानमेव तां जनयतीति चेत् । यद्येवमेतदेवादुष्टं सदभ्रान्तिं जनयत् केन वारणीयम् ? व्याप्तिप्रतिसन्धानं विनापि तस्य संसर्गप्रत्यायने सामर्थ्यावधारणात्, चक्षुरादिवत् । नास्त्येव तत्र संसर्गप्रत्ययोऽसंसर्गाग्रहमात्रेण तु तथा व्यवहार इति चेत्, तर्हि यावत् समभिव्याहारेणापि विशेषणे नाप्रतिकारः, तथाभूतस्यानाप्तवाक्यस्य संसर्गज्ञानपूर्वकत्वाभावात् । असंसर्गाऽग्रहपूर्वकत्वमात्रे साध्ये न व्यभिचार इति चेत् । एवं तर्हि संसर्गो न सिद्ध्येत् । आप्तवाक्येषु

---

१. अस्पष्टम् ।

सेत्स्यतीति चेत्, न । सर्वविषयाप्तत्वस्यासिद्धेः । यत्र क्वचिदाप्तत्वस्यानैकान्तिकत्वात् । प्रकृतविषये चाप्तत्वसिद्धौ संसर्गविशेषस्य प्रागेव सिद्ध्यभ्युपगमादित्युक्तम् । न च सर्वत्र जिज्ञासा निबन्धनम्, अजिज्ञासोरपि वाक्यार्थप्रत्ययात् । आकाङ्क्षापदार्थस्तर्हि कः ? जिज्ञासां प्रति योग्यता । सा च पदस्मारिततदाक्षिप्तयोरविनाभावे सति श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावः । न चैषोऽपि ज्ञानमपेक्षते, प्रतियोगिनिरूपणाधीननिरूपणत्वात्, तदभावनिरूपणस्य च विषयनिरूप्यत्वादिति ।

84. **न, तत्संदेहेऽपी**ति यावत् समभिव्याहारसंदेहेऽपीत्यर्थः । एतेन लिङ्गत्वाद् भेदको हेतुः सूचितः । लिङ्गं ह्याभासानाभाससाधारणैककोटिनियतानुभवविषयीकृतमेवाभासानाभाससाधारणं लिङ्गज्ञानमप्याधत्ते, न त्वसंसर्गभूतमपि एतदेवाग्रे विभावयिष्यति । **लिङ्गाभिमानाभावेऽपी**त्यादिना भ्रान्तिरसाविति । कतिपयपदश्राविणः असंसर्गाऽग्रह इत्यर्थः । **व्याप्तिप्रतिसन्धानमि**ति । लङ्गं संसर्गप्रत्ययहेतुः । व्याप्तिप्रतिसन्धानविरहिणोऽपि दोषवतः सविषयविपर्ययहेतुत्वाच्चक्षुरादिवदिति । **नास्त्येव तत्रे**ति । कतिपयपदश्रवणं यत्रेत्यर्थः । एवं परेण व्यवस्थापिते हेतावनैकान्तिकतामाह — **सिद्ध्यभ्युपगमादि**ति । अभ्युपगमप्रसङ्गादित्यर्थः । तदेवं पदस्मारितपदार्थजिज्ञासा आकाङ्क्षेत्यङ्गीकृत्योक्तम्, सम्प्रति तामव्यापकतया समास्कन्दितुमाह — **न च सर्वत्रे**ति । यदि प्रतिपत्तुर्जिज्ञासा आकाङ्क्षा भवति, सैव तावत् पदस्मारितविषया नाकाङ्क्षा, तर्ह्याकाङ्क्षा केति आशयवान् पृच्छति । **आकाङ्क्षे**ति । उत्तरम् - **जिज्ञासामि**ति । अथ योग्यतैव केत्यत आह — **सा चे**ति । **पदस्मारिते**ति । शब्दस्मारितयोरविनाभावो यथौदनं पचतीति । कारकं क्रियाऽविनाभूतम्, क्रिया च कारकान्विता । आक्षिप्तयोरविनाभावो यथा नीलं सरोजमस्तीति । विशेषाक्षिप्तयोर्नीलत्वसरोजत्वयोरविनाभावः । तथापि प्रतिपादयितरि संसर्गावगतिप्रागभावो नास्तीत्यत उक्तं **श्रोतरी**ति । तथापि वाक्यान्तरेण संसर्गावगतौ संसर्गज्ञानप्रागभावो नास्तीत्यत उक्तम् — **तदुत्पाद्ये**ति । संदृष्टार्थपरत्वे [91B] सति वा संसर्गावगतिप्रागभाव आकाङ्क्षा, तदेवमाकाङ्क्षायोग्यतासत्तिमत्पदकदम्बकं वाक्यमिति सिद्धम् । अस्य प्रत्युदाहरणं गौरश्वपुरुषो हस्तीति । अन्वये बाधकाभावो योग्यता । अस्य प्रत्युदाहरणमग्निना सिञ्चेदिति । आकाङ्क्षानन्तरं बुद्धिविपरिवृत्तिः सन्निधिः । अस्य प्रत्युदाहरणं गिरिः देवदत्तेन भुक्तमग्निमानिति । एवं ता[व]द् वैशेषिकादिमतव्युदासेन शब्दोऽनुमानाद् व्यतिरिक्त इति समर्थितः ।

85. प्राभाकरास्तु - लोकवेदसाधारणव्युत्पत्तिबलेनान्विताभिधानं प्रसाध्य वेदस्यापौरुषेयतया वक्तृज्ञानानुमानानवकाशात् संसर्गे शब्दस्यैव स्वातन्त्र्येण प्रामाण्यमास्थिषत । लोके त्वनुमानत एव वक्तृज्ञानोपसर्जनतया संसर्गस्य सिद्धेरन्विताभिधानबलायातेऽपि प्रतिपादकत्वेऽनुवादकतामात्रं वाक्यस्येति निर्णीतवन्तः । तदतिस्थवीयः —

निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णये ।
व्याप्तिस्मृतिविलम्बेन लिङ्गस्यैवानुवादिता ॥१४॥

यावती हि वेदे सामग्री तावत्येव लोकेऽपि भवन्ती कथमिव नार्थं गमयेत्, न ह्यपेक्षणीयान्तरमस्ति, लिङ्गे तु परिपूर्णेऽप्यवगते व्याप्तिस्मृतिरपेक्षणीयाऽस्तीति विलम्बेन किं निर्णेयम् ? अन्वयस्य प्रागेव प्रतीतेः । लोके वक्तुराप्तत्वनिश्चयोऽपेक्षणीय इति चेत्, न । तद्रहितस्यापि स्वार्थप्रत्यायने शब्दस्य शक्तेरवधारणात् । अन्यथा वेदेऽप्यर्थप्रत्ययो न स्यात्, तदभावात् । न च लोके

अन्यान्येव पदानि येन शक्तिवैचित्र्यं स्यात् । अनाप्तोक्तौ व्यभिचारदर्शनात् तुल्याऽपि सामग्री सन्देहेन शिथिलायते इति चेत्, न । चक्षुरादौ व्यभिचारदर्शनेन शङ्कायामपि सत्यां ज्ञानसामग्रीतस्तदुत्पत्तिदर्शनात् । ज्ञायमानस्यायं विधिर्यत्सन्देहे सति निश्चायकं यथा लिङ्गम्, चक्षुरादि तु सत्तयेति चेत्, न । वाक्यस्य निश्चितत्वात्, फलप्रामाण्यसन्देहस्य च फलोत्तरकालीनत्वात् । आप्तोक्तत्वस्य चार्थप्रत्ययं प्रत्यनङ्गत्वात् । लोकेऽपि चाप्तत्वानिश्चयेऽपि वाक्यार्थप्रतीतेः । भवति हि वेदानुकारेण पठ्यमानेषु मन्वादिवाक्येषु अपौरुषेयत्वाभिमानिनो गौडमीमांसाकस्यार्थनिश्चयः । न चासौ भ्रान्तिः, पौरुषेयत्वनिश्चयदशायामपि तथा निश्चयादिति ।

85. प्रत्य[क्षा]नुमानातिरिक्तशब्दप्रमाणवादिनः प्राभाकरस्य वैदिकलौकिकशब्दयोरर्थप्रतिपादने अवान्तर-विशेषमातिष्ठमानस्य तद्विशेषविशेषनिराकरणेन तुल्यत्वमुभयशब्दयोर्दर्शयितुर्मतमुत्थापयति - **प्राभाकरास्त्विति** । **लोके त्विति** । लौकिकं हि वाक्यं द्विविधं दृष्टं व्यभिचारि चाव्यभिचारि च । अतः श्रूयमाणेषु वाक्येषु भवति व्यभिचारसंशयः । तत्र व्यभिचारशङ्कानिराकरणार्थं वाक्यार्थविषयं वक्तुर्ज्ञानमनुमातव्यम् । तस्मिंश्चानुमिते व्यभिचार-शङ्कायां निरस्तायां निरस्तव्यभिचाराशङ्क(ङ्का) वाक्यार्थ(र्था)विरोधकाम्(धिका) । अतो वाक्यस्य वाक्यार्थज्ञानानु-मानापेक्षस्य स्वार्थप्रतिपादकत्वात् स्मृतिवत् स्वविषयपरिच्छेदे पूर्वप्रमाणापेक्षत्वात् तदप्रामाण्यमनुवादकत्वं चेति तात्पर्यम् । तदुक्तम् - तस्य ज्ञानं च वाक्येन लिङ्गभूतेन कल्प्यते । न च वाच्यं लिङ्गत्वेऽप्यनाप्तोक्तौ व्यभिचार इति । वाक्याद् हि कार्यकारणवत् वक्तृज्ञानस्यानुमानात् । यथोक्तम् –

वक्तुर्ज्ञानप्रभूतं हि वाक्यं तत्कार्यमिष्यते ।
कार्यात् [92A] कारणसिद्धिश्च सर्वेषामनुमानतः ॥

नन्वेवमन्वितमभिदधति पदानीति सुप्तप्रलाप इति चेत्, मैवम्, तेनार्थे निश्चिते पश्चात् सोऽर्थो वाक्यस्य गम्यते । तस्यां दशायां वाक्यस्य तस्मादनुवी(वा)दिता । ननु तथापि तेन रूपेण प्रमाणत्वाद् गर्दभीक्षीरमथन-वदफलोऽन्विताभिधानवादप्रयास इति चेत्, न, वेदे वक्तृज्ञानानुमानावकाशे तदुपयोगात् । अत एवोक्तम् – **लोकवेदेति** । तदेतत्प्राभाकरमतमुपन्यस्य निरस्यति – **निर्णीतेति** । अनाप्तोक्तत्वादिति । यथोक्तम् –

पदानां तत्पदार्थेषु शक्तिः स्वाभाविकी मता ।
वाक्येषु विसंवादेन संहिता तु तिरोहिता ॥

संदेहेनेति । वाक्यस्वरूपे संदेहः किं वा तज्जनितज्ञानप्रामाण्ये वा आप्तोक्तत्वविनिश्चये वेति । आद्ये **वाक्यस्येति** । द्वितीये **फलेति** । तृतीये **आप्तेति** । ननु वाक्यस्य व्यभिचारिज्ञानजनकत्वमव्यभिचारिज्ञानजनकत्वं च दृष्टम् अतः तत्संशय एव वाक्यार्थनिश्चयपरिपन्थिता । अत्रोच्यते - शङ्कायाः प्रतिपक्षत्वं तस्यां सत्यां वाक्यार्थप्रयवि(प्रत्यय)विपर्ययोपलब्धिर्निश्चीयते, ततः सं[देहात्] प्रमाणान्तराद् वा । नाद्यः, व्यभिचारशङ्कायां वाक्यार्थप्रत्ययो नास्तीति परिभाव[न]या । न द्वितीयः, अव्यभिचारिनिश्चयनिरपेक्षस्यैव प्रमाणस्य व्यभिचारसंदेहार्थ-प्रतीतिजनकत्वादर्शनात् । अन्यथा यद्धि(यद्वि)ज्ञातमर्थं प्रमितिसाधनं तत् स्वार्थव्याप्तिनिश्चयसापेक्षमेवेति । वेदस्याप्यनुमानत्वप्रसङ्गात् । तस्मादयुक्तमेतदपीति ।

86. स्यादेतत्, नाप्तोक्तत्वमर्थप्रतीतेरङ्गमिति ब्रूमः, किन्त्वनाप्तोक्तत्वशङ्कानिरासः, स च क्वचिदपौरुषेयत्वनिश्चयात्, क्वचिदाप्तोक्तत्वावधारणादिति चेत् । तत् किमपौरुषेयत्वस्याप्रतीतौ सन्देहे

वा वेदवाक्याद् विदितपदार्थसङ्गतेरर्थप्रत्यय एव न भवेत्, भवन्नपि वा न श्रद्धेयः ? प्रथमे सत्यादय एव प्रमाणम् । न चासंसर्गाग्रहे तदानीं संसर्गव्यवहारः, बाधकस्यात्यन्तमभावात् । तथापि तत्कल्पनाया-मन्वयोच्छेदप्रसङ्गात् । द्वितीये त्वश्रद्धा प्रत्यक्षवन्निमित्तान्तरान्निवर्त्स्यतीति वेदे यदि, लोकेऽपि तथा स्यादविशेषात् । अन्यथा वेदस्याप्यनुवादकताप्रसङ्गः ।

तदुच्यते –

व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी ।
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः ॥१५॥

यदा ह्यपौरुषेयत्वनिश्चयात् प्राग् वेदो न किञ्चिदभिधत्ते इति पक्षः तदाऽऽप्तोक्तत्वनिश्चयो-त्तरकालं लोकवद् वेदेऽप्यपौरुषेयत्वनिश्चयात् पश्चादनुमानावतारः । इयांस्तु विशेषो यदत्र पदार्थानेव पक्षीकृत्य निरस्तपुंदोषाशङ्कैराकाङ्क्षादिमद्भिः पदैः स्मारितत्वादाप्तोक्तपदकदम्बकस्मारितपदार्थवत् संसर्ग एवाहत्य साध्यो बुद्धिव्यवहितस्त्वितरत्रेति फलतो न कश्चिद् विशेष इति । तथा चान्विताभिधानेऽपि जघन्यत्वाद् वेदस्यानुवादकत्वप्रसङ्गः । न चैवं सति तत्र प्रमाणमस्ति । विशिष्टप्रतिपत्त्यन्यथानुपपत्त्या हि शब्दस्य तत्र शक्तिः परिकल्पनीया, सा चानुमानेनैवोपपन्नेति वृथा प्रयासः । तस्माल्लोके शब्दस्यानुवादकतेति विपरीतकल्पनेयमायुष्मताम् ।

86. अनाप्तोक्तत्वशङ्कानिरासत्वमित्युपलक्षणं चेदम् । यथार्थतात्पर्यावधारणमप्यर्थप्रतीतेरङ्गम् । यथार्थ-तात्पर्यावधारणं तु क्वचिदाप्तोक्तत्वविनिश्चयात् क्वचिदपौरुषेय[92B]त्वनिश्चयादित्यपि द्रष्टव्यम् । **सत्यादय** इत्यर्थः । **बाधकस्ये**ति । ननु च यथार्थतात्पर्यावधारणं वाक्यार्थप्रत्याय[न]कर्तव्ये सहकारी [वा] अनाप्तोक्त-त्वशङ्कानिरासो वा ? एतदुभयमपि चाऽपौरुषेयत्वनिश्चयात् पूर्वं न सम्भवति । अतः संसर्गप्रत्ययकारणाभावस्य बाधकस्य सत्त्वादसंसर्गाग्रहादेव संसर्गव्यवहार इति चेत्, मैवम्, असंसर्गाग्रहस्य संसर्गव्यवहारहेतुत्वाभावात्, तद्धेतुत्वे वा शब्दप्रमाणोच्छेदप्रसङ्गात् सर्वत्र पदार्थानामसंसर्गाग्रहेणैव संसर्गव्यवहारोपपत्तेः । यत्र बाधकं नास्ति तत्र संसर्गज्ञानात् संसर्गव्यवहार इति चेत्, किं पुनरत्र मानम् ? बाधक(का)संभवे संसर्गग्रहात् संसर्गव्यवहारो न पुनः संसर्गाग्रहादिति । नन्वेवं सति शब्दप्रमाणस्योच्छेद एव स्यात् । अस्तु । इदमेवापाद्यते । अनुभवसिद्ध एवात्र संसर्गप्रत्यय इति चेत्, तुल्यमपौरुषेयत्वनिश्चयात् पूर्वं संसर्गप्रत्ययोऽनुभवसिद्ध एवातो व्यभिचारशङ्कायामपि वाक्यार्थज्ञानस्य सत्त्वान्न शङ्का वाक्यार्थप्रतिपत्तिप्रतिबन्धिकेति । ननु च वेदस्यापौरुषेयत्वेन प्रतिसंहितस्य व्यभिचारशङ्कानिराकरणे सति वाक्यार्थप्रतिपत्तौ संभूतसामग्रीकत्वमनुमानस्य, पुनर्व्याप्तिस्मृतिरपेक्षणीयाऽस्तीति विलम्बितप्रवृत्तित्वेन लिङ्गस्यैवानुवादकत्वं, तत् कथं वेदस्यानुवादकत्वप्रसङ्ग इत्यत आह – **न चैवमि**ति । अनुमानादेव संसर्गप्रतिपत्तौ वेदस्य संसर्गप्रतिपत्तिजननसामर्थ्यानवधारणात् प्रमाणत्वमेव न स्यात् । तस्मान्न वेदप्रामाण्यमुपपद्यते । [93A] यदि पौरुषेयत्वशङ्कायामपि वेदो वाक्यार्थं बोधयति तदापि नानुमानस्य शक्तिरस्ति । निरस्तपुंदोष्या(षा)शङ्कत्वस्य विशेषस्यासिद्धेरिति । संप्रति प्राथम्यादभिधातृत्वादित्यादिन्यायं(य)-संपादना(न)साधनीयं पदानामन्विताभिधानं विकल्प्य सिद्धसाधनादिना निराकरोति ।

87. किं चेदमन्विताभिधानं नाम ? न तावदन्वितप्रतिपादनमात्रम् । अविवादात् । नापि स्वार्थाभिधायास्तत्र तात्पर्यम् । अविवादादेव । नापि सङ्गतिबलेन तत्प्रतिपादनम्, वाक्यार्थस्यापूर्वत्वात् ।

नापि स्वार्थसङ्गतिबलेन, तस्य स्वार्थ एवोपक्षयात् । नापि सैव सङ्गतिरुभयप्रतिपादिका, प्रतीतिक्रमानुपपत्तेः । यौगपद्याभ्युपगमे तु योग्यत्वादिप्रतिसन्धानशून्यस्यापि पदार्थप्रत्ययवत् वाक्यार्थप्रत्ययप्रसङ्गात् । नापि सैव सङ्गतिः स्वार्थे निरपेक्षा, वाक्यार्थे तु पदार्थप्रतिपादनाऽवान्तरव्यापारेति युक्तम् । तस्याः स्वयमकरणत्वात् । सङ्गतानि पदानि हि करणम्, न तु सङ्गतिः । तथापि तत्प्रतिपादनानुगुणसङ्गतिशालीनि पदानीति चेत् । न तावद् वाक्यार्थप्रतिपादनानुगुणता सङ्गतेस्तदाश्रयत्वेन, सामान्यमात्रगोचरत्वात् तद्वनमात्रगोचरत्वाद् वा । नापि तदनुगुणव्यापारवत्त्वेन, अकरणत्वादित्युक्तम् । तदनुगुणकरणव्यापारोत्थापकत्वात् तदनुगुणत्वे न नो विवादः । अन्वित एव शक्तिरिति चेत् । उक्तमत्र वाक्यार्थस्यापूर्वत्वात् प्रतीतिक्रमानुपपत्तेश्चेति । स्मृतक्रियान्विते कारके स्मृतकारकान्वितायां च क्रियायां सङ्गतिरतो नोक्तदोषावकाशः । नापि पर्यायतापत्तिः, प्राधान्येन नियमात् । नापि पौनरुक्त्यम्, विशेषान्वये तात्पर्यात् । नापीतरेतराश्रयत्वम्, स्वार्थस्मृतावनपेक्षणात् । नापि वाक्यभेदापत्तिः । परस्परपदार्थस्मृतिसन्निधौ तदितरानपेक्षणादिति चेत् । न । अन्विते सङ्गतिग्रह इति कोऽर्थः ? यदि यत्र सङ्गतिस्तद्वस्तुगत्या पदार्थान्वितम्, न किञ्चित् प्रकृतोपयोगीति । न हि यत्र चक्षुषः सामर्थ्यमवगतं तद् वस्तुगत्या स्पर्शवदिति तद्वत्ताऽपि तस्य विषयः । अथान्विततयैव तत्र व्युत्पत्तिरित्यर्थः । तदसत् । प्रमाणाभावात् ।

87. **किं चेदमिति** । **अविवादादिति** । पदानां साक्षाद् वाक्यार्थानभिधायकत्वेऽपि नैयायिकमते अन्विताभिहितस्वार्थद्वारा अन्वितप्रत्ययोत्पत्तेरित्यर्थः । **नापि सङ्गतीति** । सङ्गतिरपि वाक्यार्थे पदार्थे वा विवक्षितेति । आद्ये वाक्यार्थस्येति । द्वितीयमाशङ्क्य निराकरोति - **नापीति** । **तथापीति** । **तदिति** । **वाक्यार्थेति**। **न तावदिति** । तथाह्यस्य पदस्येदं वाच्यमिति पदार्थाश्रयता सङ्गतेः तथाऽस्य वाक्यस्यायं वाक्यार्थो वाच्य इति वाक्यार्थाश्रयता सङ्गते[र्ग्रहा]न्नेत्यर्थः । **सामान्यतद्वन्मात्रेति** मतभेदेन द्रष्टव्यम् । वाक्यार्थप्रत्ययानुकूलपदार्थप्रतिपादनावान्तरव्यापारशालितया सङ्गतया सङ्गतेरनुकूलत्वमस्त्वित्यत आह - **नापीति**। करणं ह्यवान्तरव्यापारेण युज्यते, न तु सङ्गतिरकरणभूतेत्यर्थः । वाक्यार्थप्रतीत्यनुकूलव्यापारजनकतामात्रेण करणभूतापि [93B]सङ्गतिर्वाक्यार्थप्रतीत्यनुकूलमस्त्वित्यत आह - **तदनुगुणेति** । ननु यद्यन्वयविशेषसङ्केतो गृह्यते तदा वाक्यार्थस्य पूर्वमप्रतीतत्वेन सङ्केतानुपपत्तिदोष इत्यत आह – **स्मृतेति** । यदि क्रियाकारकयोरन्यतरदर्शनेने(न) [त]योरन्योन्याविनाभूतत्वादन्यतरस्मरणसम्भवेन क्रियासामान्यान्विते कारके कारकसामान्यान्वितायां क्रियायां शब्दस्य सङ्गतिस्तदा न सङ्केतानुपपत्तिरित्यर्थः । ननु क्रियापदेनापि कारकान्वितक्रियाभिधाने कारकपदेनापि क्रियान्वितकारकाभिधाने क्रियाकारकशब्दयोः पर्यायतापत्तिरित्यत आह – **नापीति** । कुत इत्यत आह - **प्राधान्येनेति**। 'ओदनं पचति' इत्यत्र पचतिशब्देन कर्ममात्रान्वितपाकावगमेऽपि कर्मविशेषौदनप्रतिपादनार्थमोदन[पदं] [न] विधायकमपि तु नियामकमेव, एवं ओदनपदेनापि क्रियामात्रान्वितौदनावगतौ क्रियाविशेषपाकप्रतिपादनार्थं पचतिपदं न विधायकमपि तु नियामकमित्यर्थः । ननु 'ओदनं पचति' इत्यत्र [94A] ओदनेन तावत् पाकाश्रित ओदनः प्रतिपादितः पचतिशब्देन पुनरेतदेव प्रतिपाद्यत इति पौनरुक्त्यमित्यत आह – **नापीति** । ओदनं-पचतिशब्दाभ्यां शुद्धाभ्यां क्रियाकारकानुन(भ)यमात्रप्रतिपत्त्योरन्वयस्य, तत्र पारस्परिकान्वितत्वे विशेषबोधे विशेषपदानां तात्पर्यम्, न त्वेकेन सामान्यान्विते प्रतिपादिते पुनः पदान्तरेण तदेव सामान्यान्वितं प्रतिपाद्यते येन पुनरुक्तं स्यादित्यर्थः। ननु यदि पचतिपदेनापि पूर्वपदाभिहितेनार्थेनान्वितः

स्वार्थोऽभिधीयते तदा यावत् पूर्वपदं स्वार्थं नाभिधत्ते तावत् उत्तरपदस्य पूर्वपदार्थान्वितस्वार्थप्रतिपादनं न भवतीति अन्योन्याश्रयत्वमित्यत आह — **नापी**ति । कुत इत्यत आह — **स्मृताविति** । अन्वितस्मारकत्वात् पदानां पदार्थस्मृतौ पदान्तरापेक्षा नास्तीत्यर्थः । 'ओदनं पचति' इत्यस्य एकवाक्यत्वेन प्रसिद्धस्यान्विताभिधानपक्षे क्रियाकारकपदयोः कारकक्रियाविशिष्टक्रियाकारकाभिधायिनो निरपेक्षत्वाद् 'देवदत्तः पचति' 'वृक्षस्तिष्ठति' इतिवद् वाक्यभेदापत्तिरित्यत आह — **नापी**ति । कुत इत्यत आह — **परस्परे**ति । तत्र हि वाक्यभेदो भवति यत्र पदार्थानां स्मृतानामन्योन्यस्याकाङ्क्षा न भवति । यथा अयमेति पुत्रो राज्ञः पुरुषो[94B]ऽपसार्यतामित्यत्र राजपुरुषयोर्नान्योन्यमाकाङ्क्षा किन्तु राजशब्दस्य पुरुषादितरत्र पुत्र इत्यत्राकाङ्क्षा पुरुषपदस्य च राजशब्दादितरत्रापसार्यतामित्यत्राकाङ्क्षा । यत्र पुत्रपदार्थस्मृतिसन्निधावन्योन्यमाकाङ्क्षा तत्रैकवाक्यतैव यथा राज्ञः पुरुषोऽपसार्यतामिति । तदेतदन्विताभिधानं विकल्प्य निराकरोति - **न, अन्वित** इति ।

88. अन्वितार्थप्रतिपत्त्यन्यथानुपपत्तिरिति चेत्, न, अन्विताभिधानेनाप्युपपत्तेः । आकाङ्क्षाऽनुपपत्तिरस्तु, न हि सामान्यतोऽन्वितानवगमेऽन्वयविशेषे जिज्ञासा स्यात् । न । दृष्टे फलविशेषे रसविशेषजिज्ञासावदाक्षेपतोऽप्युपपत्तेः । शब्दमहिमानमन्तरेण यतः कुतश्चिदपि स्मृतेषु पदार्थेषु अन्वयप्रतीतिः स्यात् । न चैवम् । ततः शब्दशक्तिरवश्यं कल्पनीयेति चेत् । कुतस्तर्हि कविकाव्यानि विलसन्ति । न हि संसर्गविशेषमप्रतीत्य वाक्यरचना नाम । न च स्वोत्प्रेक्षायां प्रत्यक्षमनुमानं शब्दस्तदाभासा वा सम्भवन्ति, अन्यत्र चिन्तावशेन पदार्थस्मरणेभ्यः । असंसर्गाग्रहोऽसाविति चेत् । मम तावत् संसर्गग्रह एवासौ । तवाऽपि सैव पदावली क्वचिदन्वये पर्यवस्यति क्वचिदनन्वयाग्रहे इति कुतो विशेषात् । आप्तानाप्तवक्तृकतयेति चेत् । किं तथाविधेन वक्त्रा तत्र कश्चिद् विशेष आहितः ? आहो वक्तैवावच्छेदकतया विशेषः ? प्रथमे अभिहितान्वयवादिनामिव तवापि शक्तिकल्पनागौरवम् । द्वितीये तु वक्तुरिव पदानामप्यवच्छेदकतयैव विशेषकत्वमस्तु । एवं तर्हि पदानामप्यन्वयप्रतीतावस्त्युपयोगः । कः सन्देहः । परं पदार्थाभिधानेन, न त्वन्यथा । यथा तवैवाप्तस्य संसर्गपरतया पदसमभिव्याहारमात्रेण, न त्वन्यथा । अन्यथा तु गुरुमतविदामेव श्लोक आप्तपदप्रक्षेपेण पठनीयः —

प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि ।
आप्तानामेव सा शक्तिर्वरमभ्युपगम्यताम् ॥ इति ॥

तस्मात् प्रकारान्तरेण संसर्गप्रत्ययो भवतु मा वा, पदार्थानामाकाङ्क्षादिमत्त्वे सति अभिहितानामवश्यमन्वय इति कुतोऽतिप्रसङ्गः ।

88. अन्वितप्रतिपत्तावर्थापत्त्यन्तरमाशङ्कते — **आकाङ्क्षे**ति प्रमाणमिति शेषः । ओदनमित्युक्तेऽन्वयविशेषे जिज्ञासेति । सामान्यतोऽवगते वस्तुनि विशेषतोऽनधिगते विशेषे जिज्ञासा स्यात् । अन्यथेत्यतो विशेषे जिज्ञासा । अन्यथानुपपत्त्या सामान्येन शब्दादन्वितं ज्ञानं परिकल्प्यत इति अभिप्रायः परस्य । इयमप्यर्थापत्तिरन्यथोपपन्नेति न प्रमाणमिति निराकरोति — **न, दृष्टे** इति । यथा चक्षुषा रूपेऽधिगते रसविशेषे जिज्ञासा भवति । न च तत्र रससामान्यं चक्षुषाधिगतं किन्त्वाक्षिप्तं तथेहापि पदैरन्वितं सामान्यं नाभिहितं किन्त्वाक्षिप्तमित्यर्थः । अन्वयसामान्यप्रत्ययेऽपि शब्दशक्तिः कल्पनीया विपक्षे बाधकोपपत्तेरित्याशङ्कते — **शब्दमहिमानमि**ति । पदैः प्रति[95A]पादितानामेव पदार्थानां यदि वाक्यार्थप्रतिपादकत्वं तदा कविकाव्यानि नोपपद्यते । वाक्यार्थमवगम्यान्यस्य

तद्विवक्षया हि वाक्यनिरमा(र्मा)णम्। न च काव्यप्रतिपाद्यस्यार्थस्य प्रमाणान्तरादवगमः । उत्प्रेक्षाविषयत्वेनाविद्यमानत्वात्। न चासौ 'पीतः शङ्खः' इतिवत् प्रत्यक्षाभासगोचरस्तथाभूते प्रत्यक्षाभासाभावात्। न लिङ्गाभासगोचरो लिङ्गाभासात् तु सन्धानं विनापि जायमानत्वात् । शब्दान्तरं तु तत्र नास्त्येवेति । तस्मात् पदार्था एवं संसर्गज्ञानजनका वाच्याः । तत्कथं [त]दप्रतिपादितैरेवेति नियम्यत इत्याह - **कुतस्तर्ही**ति । किं श्वेतरूपदर्शनाद् हेषाशब्दश्रवणात् क्षुरविक्षेपश्रवणादपि शब्दं विना संसर्गप्रत्ययो न स्यादिति विभावयति — **न ही**ति । न उत्प्रेक्षाध्यारोपितवाक्यार्थज्ञानम् । शङ्कते — **असंसर्गे**ति । परिहरति — **ममे**ति । अस्मात् प्रतिनियमशक्त्यापादनं सम्भवति । अस्माभिः पदैः प्रतिपादितानामपि वाक्यार्थप्रतीतिजनकत्वाभ्युपगमादित्यर्थः । न केवलमस्माकमेवमभ्युपगमः किन्तु त्वयाऽप्यभ्युगन्तव्यम् गत्यन्तराभावादित्याशयवानाह — **तवापी**ति । अन्विताभिधानपक्षेऽपि आप्तोच्चरिता पदावली अन्वयप्रतीतिमुत्पादयति, अन्या तु नान्वयप्रतीतिमिति वदन्परः प्रष्टव्यः — तत्र किमाप्तेन तेषु कश्चिद् विशेषो जन्यते न वा ? न चेत् अनाप्तोच्चारितपदवन्न(न्ना)न्वयप्रतीतिमुत्पादयेत् । जन्यते चेत् [95B] तवापि शक्तिकल्पनागौरवम् । अथावच्छेदकतामात्रेणोच्चारणकर्तृतया आप्तानां विशेषकत्वमिति यदि तदा पदानामपि पदार्थस्मृतिजनकतामात्रेण विशेषकत्वमिति न(अ)स्त्येवमपि शक्तिकल्पनागौरवमिति तात्पर्यमभिहितान्वयवादीनामिवेति । तथाहि - पदानां स्वार्थाभिधानशक्तिः पदार्थप्रतीतिरित्येव । अतिशयाधानशक्तिर्वाक्यार्थप्रत्ययहेतुरिति द्वितीया । तच्चेदानीमाप्तानामभिव्यक्तिशक्तिरतिशयाधानशक्तिर्वाक्यार्थप्रतीतिहेतुरिति अक्षरास्त्वपरे निपातिता इत्यर्थः । अतिशयाधाने तु त्वन्मत इवास्मन्मतेऽपि कल्पनागौरवमित्याह - **द्वितीये त्वि**ति । नन्वेवं सति पदानामपि वाक्यार्थबोधकत्वमायातमिति । तथा चान्वितप्रतिपादकत्वमित्याशयवान् शङ्कते — पदानां पदार्थप्रतिपादनावान्तरव्यापाराणामाकाङ्क्षादिमतां बा(बो)धकत्वं न तु वाक्यार्थबोधकत्वेनेत्याशयवान् समाधत्ते - **क** इति । आशयं प्रकटयति - **परमि**ति **न त्वन्यथे**ति । न तु वाक्यार्थवाचकत्वेनेत्यर्थः । एवमनङ्गीकारे तु त्वन्नयेऽप्याप्तानां संसर्गवाचकत्वापत्तिरित्याह — **अन्यथे**ति । एवं तावदन्वितत्तयैव सङ्गतिरित्यत्र प्रमाणाभावं व्युत्पाद्याभिहितान्वयपक्षेऽतिप्रसङ्गमुक्तमुपसंहारव्याजेन परिहरति — **तस्मादि**ति ।

89. न चैवं सति पदार्था एव करणम्, तेषामनागतादिरूपतया कारकत्वाऽनुपपत्तौ तद्विशेषस्य करणत्वस्यायोगात्। तत्संसर्गे प्रमाणान्तरासंकीर्णोदाहरणाभावाच्च । पदानां तु पूर्वभावनियमेन पदार्थस्मरणावान्तरव्यापारवत्तया तदुपपत्तेः, व्यापारस्याव्यवधायकत्वादिति कृतं प्रसक्तानुप्रसक्त्या । अस्तु तर्हि शब्द एव बाधकं सर्वज्ञे कर्तरि, तथाहि —

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥

इत्यादि पठन्ति । अस्यायमर्थः - न पारमार्थिकं चेतनस्य कर्तृत्वमस्ति, आभिमानिकं तु तत्। न च सर्वज्ञस्याभिमानः, न चासर्वज्ञस्य जगत्कर्तृत्वमस्ति । उच्यते —

न प्रमाणमनाप्तोक्तिर्नादृष्टे क्वचिदाप्तता ।
अदृश्यदृष्टौ सर्वज्ञो न च नित्यागमः क्षमः ॥१६॥

यदि हि सर्वज्ञकर्त्रभावावेदकः शब्दो नाप्तोक्तः, न तर्हि प्रमाणम् । अथाप्तोऽस्य वक्ता, कथं न तदर्थदर्शी । अतीन्द्रियार्थदर्शीति चेत् । कथमसर्वज्ञ ? कथं वा न कर्ता ? आगमस्यैव प्रणयनात्।

न च नित्यागमसम्भवो विच्छेदादित्यावेदितम् । अपि च –

न चासौ क्वचिदेकान्तः सत्त्वस्यापि प्रवेदनात् ।
निरञ्जनावबोधार्थो न च सन्नपि तत्परः ॥१७॥

न ह्यसत्त्वपक्ष एवागमो नियतः । ईश्वरसद्भावस्यैव भूयःसु प्रदेशेषु प्रतिपादनात् । तथा चाग्रे दर्शयिष्यामः । तथा च सति क्वचिदसत्त्वप्रतिपादनमनेकान्तं न बाधकम् । सत्त्वप्रतिपादनमपि तर्हि न साधनमिति चेदापाततस्तावदेवमेतत् । यदा तु निःशेषविशेषगुणशून्यात्मस्वरूपप्रतिपादनार्थत्वमकर्तृकत्वागमानामवधारयिष्यते, तदा न तन्निषेधे तात्पर्यममीषामिति सत्त्वप्रतिपादकानामेवागमानां प्रामाण्यं भविष्यतीति । न च तेषामप्यन्यत्र तात्पर्यमिति वक्ष्यामः ।

89. यथायमाप्तानाप्तानामवच्छेदकतयैव विशेषस्तथाऽस्माक[96A]मप्यभिधानस्यैवावच्छेदकतया विशेषकत्वमित्यभिहितानामित्युक्तम् । यदि पदार्थानि वाक्यार्थबोधकानि तदा पदार्थबोधकसमय एव वाक्यार्थबोधः किं न स्यात् । अथ पदार्थबोधः तदा पदार्थानामेव करणत्वं न पदानां पदार्थबोधव्यवहितानामित्याशयवान् शङ्कते – **न चैवमिति** । पदानि पदार्थबोधे निराकाङ्क्षाणि वाक्यार्थबोधे तु साकाङ्क्षाणीति । पदार्थस्मृतिमवान्तरव्यापारभूतामपेक्ष्यन्त इत्याशयवान् परिहरति – **तेषामित्यादिना** । तथाहि – पदार्था हि पदार्थस्वरूपं संसर्गप्रत्ययमा(यं वा)दधीत तज्ज्ञानाय । आद्ये दूषणं **तेषामिति** । द्वितीये दूषणं **तत्संसर्ग** इति । चकारादाकाङ्क्षाद्यनुपपत्तेश्चेत्यर्थः । ननु पदानामप्यतीतत्वात् कथं संसर्गबोधकत्वं, तदनु च बोधकत्वे तु कथं करणत्वमिति अत आह – **पदानां त्विति** । स्वरूपतोऽसतामपि व्यापारद्वारा करणत्वसंभवादग्निषोमादेरिवापूर्वव्यापारेणेत्यर्थ(व)गन्तव्यम् । शब्दप्रामाण्ये प्रसङ्गागतमन्विताभिधाननिराकरणं तदनुप्रसक्तेश्चाभिहितान्वयवादः । अतस्तन्निराकरणविस्तरेण त्व(ग्रन्थ)गौरवमापद्येतेत्याशयवानुपसंहरति - **कृतमिति** । एवं शब्दस्यानुमाना(न)व्यतिरेकं प्रतिपाद्य शब्दस्यैव प्रकृतिप्रमाणं प्रतिप्रमाणं प्रतिबन्धकत्वमाशङ्कते – **अस्त्विति** । प्रकृतेरचेतनाया गुणैः सत्त्वादिभिः सर्वकर्माणि [96B] कार्याणि क्रियन्त इति प्रतिपादनाच्चेतनस्य कर्तृत्वं निषिद्धम् । विशेषविधेः शेषनिषेधपर्यवसितत्वादिति तात्पर्यमिति शङ्कार्थः । साङ्ख्यमतस्य प्रमाणासम्भवेनानुपपत्तेरचेतनानां चेतनसाहित्येनैव कार्यका(क)रणनियमदर्शनाद् विपरीतस्य चादर्शनादागमस्यापि कार्यतयाऽवगच्छामो नूनमत्र चेतनेन सर्वविदा भवितव्यमित्याशयवान् समाधिमुपक्रमते – **उच्यत** इति । उपदर्शितागमो यदि मूढादिना केनाप्युक्तस्तदा न प्रमाणं मूढोक्तेरप्रमाणत्वस्योभयसिद्धत्वात् । अथ तत्त्वविदा केनाप्युक्तं तदा तत्त्वमपश्यतः कथं तत्त्ववित्त्वम् ? अथ तत्त्वं पश्यति तत्राह - **अदृश्येति** । शब्दोत्पत्तौ हेतुभूतसंसर्गज्ञाने न तावदिन्द्रियं प्रमाणं विरोधात् । विरोधे वा तथैव तज्जातीयानामपि ग्रहणप्रसक्तौऽसर्वज्ञत्वानुत्प(नुपप)त्तेः । न चानुमानमत्र लिङ्गाभावादतो नित्यमस्य तज्ज्ञानमभ्युपेयं तस्य च विषयनियमहेतोः कारणस्याभावात् सर्वविषयत्वमनिवार्यमित्यर्थः । अस्य विवरणं सुबोधमिति । उपदर्शितागमबाधं परिहृत्य संप्रति श्रुतिस्मृतिपुराणवाक्यानि "द्यावाभूमी जनयन्नहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । त्रयाणामपि लोकानां कर्ता देवो महेश्वरः" इत्यादीनि साधकानि सन्तीत्याह [97A] - **अपि चेति** । शेषमतिरोहितार्थम् ।

90. अस्त्वर्थापत्तिस्तर्हि बाधिका, तथाहि – यद्यभविष्यन्नोपादेक्ष्यत्, न ह्यसावनुपदिश्य प्रवर्तयितुं न जानाति, अत उपदेश एवान्यथानुपपद्यमानस्तथाविधस्याभावमौदासीन्यं वाऽऽवेदयति ।

न । अन्यथैवोपपत्तेः –

हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा ।
तदभावात् प्रवृत्तिर्नो कर्मवादेऽप्ययं विधिः ॥१८॥

बुद्धिपूर्वा हि प्रवृत्तिर्न बुद्धिमनुत्पाद्य शक्यसम्पादना, न च प्रकृते बुद्धिरप्युपदेशमन्तरेण शक्यसिद्धिः, तस्यैव तत्कारणत्वात् । भूतावेशन्यायेन प्रवर्तयेदिति चेत् । प्रवर्तयेदेव यदि तथा फलसिद्धिः स्यात् । न त्वेवम् । कुत एवदवसितम् ? उपदेशान्यथानुपपत्त्यैव । यस्यापि मते अदृष्टवशादेव भूतानां प्रवृत्तिस्तस्यापि तुल्यमेतत् । यद्यस्ति प्रवृत्तिनिमित्तमदृष्टम्, किमुपदेशेन । तत एव प्रवृत्तिसिद्धेः । न चेत्, तथापि किमुपदेशेन । तदभावे तस्मिन् सत्यप्यप्रवृत्तेः । नित्यः स्वतन्त्र उपदेशो न पर्यनुयोज्य इति चेत् । यूयं पर्यनुयोज्याः ? ये तमवधानतो धारयन्ति विचारयन्ति चेति । न चार्थापत्तिरनुमानतो भिद्यते, लोके तदसंकीर्णोदाहरणाभावात्, प्रकारान्तराभावात् च । तथाहि –

अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः ।
न मानयोर्विरोधोऽस्ति प्रसिद्धे वाऽप्यसौ समः ॥१९॥

जीवन् चैत्रो गृहे नास्तीत्यनुपपद्यमानमसति बहिःसद्भावे तमापादयतीत्युदाहरन्ति । तत्र चिन्त्यते – किमनुपपन्नं जीवतो गृहाभावस्येति, न ह्यनियम्यस्यानियामकं विना किञ्चिदनुपपन्नम् । अतिप्रसङ्गात् । ननु स्वरूपमेव तद् न तावद् बहिःसत्त्वेन कर्तव्यम्, तदकार्यत्वात् तस्य, स्थितिरेवास्य तेन विना न स्यादित्यस्य स्वभाव इति चेत् । एवं तर्हि तन्नियतस्वभाव एवासौ व्याप्तेरेव व्यतिरेकमुखनिरूप्या-यास्तथा व्यपदेशात् । कथं वा बहिःसत्त्वमस्योपपादकम् ? न हि अनियामको भवन्नप्यनियम्यमुप-पादयति, अतिप्रसङ्गादेव । स्वभावोऽस्य यदनेन बहिःसत्त्वेन गेहासत्त्वं क्रोडीकृत्य स्थातव्यमिति चेत् ।

90. अर्थापत्तिबाधमुपन्यस्य निराकरोति - **अस्त्विति** । हेत्वभाव इति हेतोः कारणस्याभावे फलस्य कार्यस्याभाव इत्युत्सर्गः । फलविशेषश्चात्र प्रमा हेतुविशेषे प्रमाणेऽसति न स्यादित्यर्थः । न हि तदभावे किञ्चिदनिष्टमस्तीत्यत आह - तदभावात् प्रमाऽभावात् प्रवृत्तिरिच्छाजननद्वारा प्रयत्नलक्षणा हि तत्साधन-गोचराऽस्मदादीनां स्यादित्युपदेशमतिष्ठामह इति समुदायार्थः । इह केचिद् अदृष्टवशेनैव प्रमाद्यभावेऽपि प्रवृत्ति-मिच्छन्ति । तत्परिहारार्थमाह – **कर्मवादेऽपीति** । विवरणं सुबोधमिति । अर्थापत्तेः पृथक्प्रमाणत्वमभ्युपगम्य पूर्वं तद्बाधः परिहृतः सम्प्रत्यर्थापत्तिरनुमानमेवेति प्रतिपादनार्थमाह – **न चेति** । कुत इत्याह - **लोक** इति। तत्तस्या अर्थापत्तेरनुमानासङ्कीर्णोदाहरणरहितत्वाद् यदेवानुमानोदाहरणं तदेवार्थापत्तेरिति यदि तदाऽर्थापत्त्यनुमान-योरन्तरः कः ? अथातिरिक्तमुदाहरणमिति तदाऽसिद्धिरित्यर्थः । अनुमानप्रकारापेक्षया प्रकारान्तरस्याभावादिति वानुमानाभिन्नप्रकारत्वादिति तात्पर्यम् । एतदेव दर्शयति – **तथाहीति** । अनियम्यस्याव्याप्यस्येत्यर्थः । नायुक्ति-र्व्यापकं विना । न हि रासभस्य दहन(नं) विनाऽयुक्तिरस्ति [97B] लोके यथा धूमस्य तेन विना युक्तिरिति सर्वजनसिद्धमेतदिति । नायं नियन्ताऽपि कार्य[स्ये]त्यर्थः, नोपपादको यथा रासभो तस्येति । प्रमाणद्वयविरोधो-ऽर्थापत्तिरिति मतान्तरं निरस्यति । **न मानयोरिति** । एवमनङ्गीकारे प्रसिद्धानुमानमप्यर्थापत्तिरिति । नानुमानसंभव इति सङ्ग्रहार्थः । अर्थापत्तिरपि दृष्टः श्रुतो वाऽर्थो नोपपद्यत इत्यर्थान्तरकल्पनेति लक्षणमुक्त्वाऽस्योदाहरणमुक्तं भाष्यकृता यथा जीवति देवदत्ते गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनेति । **काशिका**व्याख्यानमुपदर्शयति

– **जीवंश्चैत्र** इति । **एवं तर्हीति** । बहिःसत्त्वव्यावृत्त्या गेहासत्त्वव्यावृत्तेरव्यभिचारव्यपदेशादित्यर्थः ।

91. सेयं व्याप्तिरेवान्वयमुखनिरूप्या तथा व्यपदिश्यते इति । न वयमविनाभावमर्थापत्तावपजानीमहे किन्तु तज्ज्ञानम्, न चासौ सत्तामात्रेण तदनुमानत्वमापादयतीति चेत् । न । अनुपपत्तिप्रतिसन्धानस्यावश्याभ्युपगन्तव्यत्वात् । अन्यथा त्वतिप्रसङ्गात्, अर्थापत्त्याभासानवकाशाच्च । यदा ह्यन्यथैवोपपन्नमन्यथानुपपन्नमिति मन्यते तदाऽस्य विपर्ययः, न त्वन्यथेति । तथापि कथमत्र व्याप्तिर्गृह्येतेति चेत् । यदाऽहमिह तदा नान्यत्र, यदाऽन्यत्र तदा नेहेति सर्वप्रत्यक्षसिद्धमेतत्, का तत्रापि कथंता ? सर्वदेशाप्रत्यक्षत्वे तत्राभावो दुरवधारण इत्यपि नास्ति । तेषामेव संसर्गस्यात्मनि प्रतिषेधात् । अयोग्यानां प्रतिषेधे का वार्तेति चेत् । तदवयवानां तत्संसर्गप्रतिषेधादेवानुमानाद् अन्येषां न काचित्, न ह्यकारणीभूतेन परमाणुना नेदं संसृष्टमिति निश्चेतुं शक्यमिति । न चाविनाभावनिश्चयेनापि गमयन्पक्षधर्मोऽर्थापत्तिरिति युक्तम् । पक्षधर्मताया अनिमित्तत्वप्रसङ्गात् । अविशेषात्, व्यधिकरणेनाविनाभावनिश्चयायोगच्च – यद् यत्र यदेति प्रकारानुपपत्तेः ।

91. **सेयमिति** । वह्निनेव धूमं बहिःसत्त्वेन गेहासत्त्वं क्रोडीकृत्य स्थातव्यमित्यस्य सति धूमे वह्निर्भवत्येवेत्ययोगव्यवच्छेदकर्तृकर्मव्याप्तिनिरूपणवत् सति गेहासत्त्वे जीवतो बहिःसत्त्वं भवत्येवेत्यर्थादित्यर्थः । तदेतत् सकलं हृदि निधाय तदभिज्ञैरुक्तम् –

अविनाभाविता चात्र तदैव परिकल्प्यते ।
न प्रागववृतेत्येवं सत्यपि नैव कारणम् ॥ [श्लोकवार्तिक, अर्थापत्ति०, ३०]

एतदेवाशङ्कते – **न वयमिति** । नात्र सत्तामात्रावस्थितोऽविनाभावोऽपितु प्रसिद्धानुमानवत् प्रतिसन्धीयमानः, न हीदमनेनाविनाभूतमिति प्रतिसं[98A]धानविरहिणः कदाचिदनुपपत्तिराविरस्ति । असदज्ञातयोरविशेषादन्यथात्वगृहीतव्याप्तेर्नालिकेरद्वीपवासिनोऽनुपपत्त्यैव धूमाद् धूमध्वजप्रत्ययो जायेत । तथाभावे चाविनाभावग्रहवैयर्थ्येनानुमानविलोपप्रसङ्गादित्याशयवान् परिहरति - **न, अनुपपत्तीति** । वैनाशिकैरप्युक्तम् – अन्यथाऽनुपपन्नत्वमन्वयव्यतिरेकिणिऽर्थे भवति यत् तस्मान्नार्थापत्तिः प्रमाणान्तरमिति । ननु स्यादेव प्रकृतेऽपि व्याप्तिग्रहोपयोगो यदि शङ्कते । न च तयोरेकग्रहणेऽपरदर्शनमर्थापत्त्या विना संभवति । अतः साहित्यप्रत्ययार्थमप्यर्थापत्तिरर्थनीयेति सिद्धं प्रमाणान्तरमिति । यथोक्तं –

प्रमाणं तयोरन्यदर्थापत्तेर्न च विद्यते ।
अन्यथानुपपत्त्यैव ह्येकेनान्यः प्रतीयते ॥
तथा न कल्प्यते तच्चेत् साहित्यं न प्रतीयते । [श्लोकवार्तिक, अर्थापत्ति० ३२]

इति परमतमाशङ्कते । **तथापि कथमिति** । समाधत्ते – **यदाहमिति** । अत्र परेण नैयायिकसमाधानम् –

गृहद्वारि स्थितो यस्तु बहिर्भावं प्रकल्पयेत् ।
यदैकस्मिन्नयं देशे न तदाऽन्यत्र विद्यते ॥ [श्लोकवार्तिक, अर्थापत्ति०, ३४]

इत्यनेनानाशङ्क्य सर्वत्राभावस्य प्रत्येतुमशक्यत्वान्नैकत्र भावो नियतः शक्योऽवगन्तुमित्याशयवता समाधान-

मुक्तम् - तदाप्यविद्यमानत्वं [98B] [न] सर्वत्र प्रतीयत इति [श्लोकवार्तिक, अर्थापत्ति०, ३५][1] तदुत्थापयति – **सर्वदेशेति** । कुत इत्यत आह - **तेषामेवेति**। इन्द्रियग्रहणयोग्यानां तावदित्यर्था[नां] न तेषु देशेषु भावो गृह्यते किन्तु देशानामेव योग्यानामात्मनि शरीरेऽभावावगतिरित्यर्थः । अत्र शङ्कते – **अयोग्यानामिति** । योग्या ये दिव्या(देशा)स्तेषां शरीरे संसर्गो निषिध्यते योग्यानुपलम्भेन, न पुनरयोग्यदि(दे)शानां तत्र योग्यानुपलम्भस्यासमर्थत्वादित्यर्थः । समाधत्ते – **तदवयवानामिति** । अयोग्याः किल योग्यानां स्थूला येऽवयवा द्व्यणुकपरमाणवस्तेषां योग्यावयविसंसर्गनिषेधादेव योग्यावयवसंसर्गो निषिध्यते । यद् येनावयविना न संसृष्टं तत् तदवयवासंसृष्टम्, यथा पटेनासंसृष्टो घटो न तदवयवतन्तुसंसृष्ट इति व्याप्तेरित्यर्थः । अथवा अयोपे(ग्य)देशसंसर्गस्तु निषिध्यते तदवयवसंसर्गनिषेधात् । यो हि यदवयवेन संसृज्यते स तदवयविनापि संसृज्यते । अवयवसंसर्गनिषेधश्च तद्व्यापकसंसर्गनिषेधात् । व्याप्यावयवसंसर्गो हि तद्व्यापकस्पर्शो-(संसर्गो)पलम्भव्याप्तः, स चातो व्यावर्तमानस्तत्संसर्गमपि व्यावर्तयेदित्यर्थः । नन्ववयवावयवि-विधुरातीन्द्रियसंसर्गनिषेधस्तु कथमित्यत आह – **अन्येषामिति** । न कदाचिद् [99A] विधिनिषेधवार्तेत्यर्थः। नन्वविनाभावोऽर्थापत्तेरनिश्चेयो यद्यपि तथाप्यपक्षधर्मतयाऽनुमानादर्थापत्तेर्भेदो भविष्यति। यथोक्तम् –

अभावावगताच्चैत्राद् बहिर्भावस्य सूचनम् ।
पक्षधर्माद्यनङ्गत्वाद् भिन्नैषा ह्यनुमानतः ॥ [श्लोकवार्तिक, अर्थापत्ति०, १०]

इत्याशङ्क्य निराकरोति - न **चाविनाभावेति** । जीवतो देवदत्तस्य गृहेऽनुपलभ्यमानत्वं देवदत्तबहिः-सत्त्वाविनाभूततया निश्चितमभ्युपेतं परैरपि । ततश्च यथा धूमध्वजाविनाभूततया निश्चितः पक्षधर्मतापेक्षो [धूमः] धूमध्वजं बोधयति तथा देवदत्तस्य गृहेऽनुपलभ्यमानत्वं देवदत्तवर्ति वहिःसत्त्वं बोधयन् न पक्षधर्मतया शक्योऽभिधातुम्, अन्यथाऽनुमानेऽप्येवं वक्तुं सुकरत्वादनुमानमप्यविनाभावनिश्चयेन गमयन्नपक्षधर्म इतरदर्थापत्तिरपि पक्षधर्म इति नास्ति लेशतोऽपि विशेष इत्याशयवतोक्तम् - **पक्षधर्मताया** इत्यादि ।

92. प्रमाणयोर्विरोधे अर्थापत्तिरविरोधोपपादिका, न त्वेवमनुमानमित्यपि नास्ति । विरोधे हि रज्जुसर्पादिवदेकस्य बाध एव स्यान्नतूभयोः प्रामाण्यम् । प्रामाण्ये वा न विरोधः । स्थूलमिदमेक-मितिवत् सह संभवात् । चैत्रोऽयमयं तु मैत्र इतिवद् वा विषयभेदात् । प्रकृते क्वाप्यस्तीति सामान्यतो गेहस्यापि प्रवेशादेकविषयताऽप्यस्तीति चेत् । यद्येवं क्वचिदस्ति क्वचिन्नास्तीतिवन्न विरोधः । अत्रापि विरोध एवेति चेत्, एकं तर्हि भज्येत । न भज्येत, अर्थापत्त्या उभयोरप्युपपादनादिति चेत् । किमनुपपद्यमानम् । विरोध एवान्यथानुपपद्यमानो विभिन्नविषयतया व्यवस्थापयतीति चेत् । अथाभिन्नविषयतयैव किं न व्यवस्थापयेत् ? व्यवस्थापनमविरोधापादनम्, एकविषयतयैव चानयोर्विरोधः, स कथं तयैव शमयितव्यः, न हि यो यद्विषमूर्छितः स तेनैवोत्थाप्यते इति चेत् । एकविषयतया अनयोर्विरोध इत्येतदेव कुतः । विभिन्नदेशस्वभावतयैव सर्वत्रोपलम्भादिति चेत् । नन्वियं व्याप्तिरेव । तथा च घट्टकुट्यां प्रभातमिति । धूमोऽपि वा अनुपपद्यमानतयैव वह्निं गमयेत्, न हि तेन विना असावुपपद्यते । विरोधोऽपि धूमाद् वह्निना भवितव्यम्, अनुपलब्धेश्च न भवितव्यमिति । तथा चानुपलब्धेरर्वाग्भागव्यवस्थापनम्, धूमस्य च व्यवधानेनानुपलभ्यवह्निविषयत्वस्थितिरर्थापत्तिरिति कुतोऽनुमानम् । वह्निमानयमित्यनुमानं व्याप्तेः । अन्यथाऽनुमानाभावे विरोधासिद्धेः ।

१. श्लोकोत्तरार्धम् – न चैकदेशे नास्तित्वाद् व्याप्तिर्हेतोर्भविष्यति ॥

92. तदेवमनियम्यस्येत्यादि पूर्वार्धं प्रपञ्चतो व्याख्यायोत्तरार्धं व्याख्यातुमाशङ्कते - **प्रमाणयो**रिति। अनुमानं प्रमाणद्वयविरोधमुखेन प्रवर्तते, अर्थापत्तिस्तु प्रमाणद्वयविरोधेन प्रवर्तमाना तु वैधर्म्यादनुमानात् भिद्यत इत्यर्थः। यथोक्तं **काशि**[**का**]कृता से[99B]यमभावानुमानयोर्विरोधानुपपत्तिरित्याख्यायत इति। अत्राप्यभावानुमानयोर्गृहमात्रदेशमात्रविषययोरवच्छिन्नानवच्छिन्नदेशेन(शत)या प्रमाणत्वान्न विरोधोऽभावावच्छिन्ने गृहेऽनुमानस्य बाधितविषयतयाऽप्रवृत्तेः नैकविषयत्वम्, विभिन्नविषयतया च विरोधो न भवतामपि सम्मतः सम्बन्धविरोधप्रसङ्गादित्याशयवानाह - **विरोधे हीति**। अथाभिन्नविषयतयेति विरोधकल्पनं क्रियमाणम् एकविषयत्वेनैव कुतो न क्रियते। एकविषयतयापि हि विरोधव्यावृत्ति(त्ते)रुपलम्भवरीयस्त्वात् कृतकत्वानित्यत्वयोरि[वे]त्यर्थः। **व्यवस्थापनमि**त्यादि सुगमम्। **विभिन्नदेशस्वभावतये**ति। एकविषयतया तयोरविरोधो न विकल्प्यते। विभिन्नदेशत्वेनैवानयोर्न विरोध उपलम्भादिति यदि तर्हि विभिन्नदेशत्वेनाप्युपलम्भादुत विभिन्नदेशत्वेनैवोपलम्भात्। तत्र प्रथमे [अ]भिन्नदेशत्वेनाविरोधः कुतो न कल्प्यते। यथा हि - तयोर्भिन्नदेशेनादृष्टस्तथाऽभिन्नदेशेनापि। द्वितीये तु भिन्नदेशेन नियमोपलम्भाच्चेद् भिन्नदेशतयाऽविरोधकल्पनं तदा भिन्नदेशतया नियमोपलम्भाज्जीवनवतः सत्त्वासत्त्वयोर्भिन्नदेशेना[100A]नुमानमस्त्वलं विरोधज्ञानप्र(प्रा)माण्यानुसरणेनेति। **घट्टकुट्यामि**ति। व्याप्तिभिया विरोधे अविरोधा[पा]दनाकारगोपेन पलायमानस्य व्याप्तावेव निपातादित्यर्थः। न ह्यभावस्य व्याप्तदेशाद् देशान्तर एव सत्त्वं भवतीति अप्रा(र्वा)ग्निश्चिते संज्ञाना(सहान)वस्थानलक्षणविरोधसिद्धिः। सदसत्त्वविषययोरनुमानाभावयोरेकधर्मिधर्मद्वयग्राहकत्वाद् रूपस्पर्शग्राहकवदविरोधकत्वात् तन्निश्चये च विरोधसिद्ध्यनुगुणतया सहानवस्थानव्याप्तिप्रतिसन्धानमनिवार्यमित्यर्थः। एवमनङ्गीकुर्वतः प्रसिद्धानुमानमर्थापत्तिरिति नानुमानस्यात्र संभव इत्याह - **धूमोऽपी**ति।

93. अर्वाग्भागानुपलब्धिविरोधेन परभागेऽस्य वह्निरित्यर्थापत्तिरेवेति चेत्, न। व्याप्तिग्राहकेन प्रमाणेन विरोधस्योक्तत्वात्। नाप्युत्तरार्थापत्तिः। अन्यथा पाण्डरत्वस्यापालालत्वविरोधेन पालालत्वस्थितिरित्यर्थापत्तिरेव स्यात्। तद्विशिष्टस्य तेनैव व्याप्तेर्नैवमिति चेत्। यद्येवमर्वाग्भागानुपलभ्यमानवह्नित्वेन विशिष्टस्य धूमस्य तेनैव व्याप्तेः कथमेवं भविष्यतीति तुल्यम्। केवलव्यतिरेक्यनुमानं पराभिमतमर्थापत्तिरन्वयाभावादिति चेत्। एवं तावता विशेषेणानुमानेऽर्थापत्तिव्यवहारं न वारयामः। तत्रानुमानव्यवहारः कुत इति चेत्। अविनाभूतलिङ्गसमुत्पन्नत्वात्। साध्यधर्मेण विना ह्यभवनमन्वयिन इव व्यतिरेकिणोऽप्यविशिष्टम्, तन्निश्चयश्चान्वयव्यतिरेकाभ्यामन्यतरेण वेति। तस्मादर्थापत्तिरित्यनुमानस्य पर्यायोऽयं तद्विशेषवचनं वा पूर्ववदादिवदिति युक्तम्। अनुपलब्धिस्तु न बाधिकेति चिन्तितम्। न च प्रत्यक्षादेरतिरिच्यते।

93. ननु धूमोऽपीत्याद्यनुपपन्नम्। वह्निमत्तापेक्षयैव धूमस्वरूपनिश्चयात्। तावन्मात्रस्यैव च हेतुत्वात्। तदुक्तम् -

> धूमावगमापेक्षैव वह्निमत्ता प्रतीयते।
> तद्ग्रहवेलायामसंसर्गाधीनं हि किञ्चन ॥[१]

---

१. तुलना - अग्निमत्तानपेक्षा तु धूमवत्ता प्रतीयते।
न तद्ग्रहणवेलायामग्न्यधीनं हि किञ्चन ॥ [श्लोकवार्तिक, अर्थापत्ति०, २०]

प्रकृते तु गेहाभावमात्रं वा हेतुः स्यात् जीवत इति विशेषितो वा ? न तावदाद्योऽनैकान्तात् । यथोक्तम् - गेहाभावस्तु यः शुद्धः इत्यादि [श्लो० वा०, अर्था०, २१] । न द्वितीयस्तव क्लृप्तः, चैत्रवद् बहिर्भावात् संदिग्धासिद्धत्वात् । यथोक्तम् – जीवतस्तु गृहाभाव इत्यादि [श्लो० वा०, अर्था० १९] । तदेतदर्थापत्तावनेनापि समानमन्यत्राभिनिवेशादित्यादिनाऽऽशङ्क्य समाहितम् - यदि तावदनुमानं न स्वीक्रियते कस्यानुपलब्धौ विरोधो वक्तव्यः । अथ स्वीक्रियते कथमनुमानप्रत्याख्यानमित्याह - **न, व्याप्तिग्राहकेने**ति । यो धूमः स अग्निमान् दृष्टः कथमिह न स्यादिति तर्को गृहाभाव इव प्रकृते नापि सम इत्यर्थः । **उत्तरे**ति । [100B] अर्वाग्भागानुपलब्धिविरोधेनेत्यादिनोक्ते[रि]त्यर्थः । यथोक्तं वार्तिककृता परस्वभावाऽप्यनुमानशब्दं लभेत चेत् तदस्तु यथेप्सितम् । **वे**ति तदपि समीकरोति । **एवं तावते**ति । **अन्यतरेण वे**त्यस्य वाकारपर एव विस्तरः । तदत्र प्रयोगः - देवदत्तो बहिरस्ति जीवनवत्त्वे गेहाभावप्रतियोगिकत्वाद् गेहेऽनुपलभ्यमानत्वात् । एवं च विवादाध्यासितो देवदत्तो गृहे नास्ति । बहिःसत्त्वप्रतिपत्तावनुमानमविनाभाव(भूत)पक्षधर्मत्वल(त्ववल्लिङ्गे)न प्रतिपत्तिसाधनत्वाद् धूमवदिति । अर्थापत्तिरनुमानमनुमानाभिन्नप्रकारत्वादुभयाभिमतानुमानवदिति । साधितं चैतत् सर्वमिति नावसरः परस्येत्याशयवानुपसंहरति - **तस्मादि**ति । अनुपलब्धिस्त्वादावेवाशङ्क्य परिहृतेत्याह - **अनुपलब्धिस्त्वि**ति । अभावप्रमेयप्रतिपत्तावभावाख्यं पृथक् प्रमाणमङ्गीकुर्वतः परान् प्रसङ्गतो निरस्यति - **न चे**ति । योऽभावोऽस्माभिः साक्षादेव गम्यते स प्रत्यक्षप्रमाणेन, यस्तु परोक्षः सोऽपि कश्चिदनुमानात् कश्चिदागमाच्चेति न प्रमाणान्तरावकाश इत्यर्थः ।

94. तदुच्यते –

प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात् ।
अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः ॥२०॥

या हि साक्षात्कारिणी प्रतीतिः सेन्द्रियकरणिका, यथा रूपादिप्रतीतिः । तथेह भूतले घटो नास्तीत्यपि । साक्षात्कारित्वमस्या असिद्धमिति चेत्, न, एकजातीयत्वे ज्ञाताज्ञातकरणत्वानुपपत्तेः । न हि तस्मिन्नेव कार्ये तदेव करणमेकदा ज्ञातमज्ञातं चैकदोपयुज्यते, लिङ्गेन्द्रिययोरपि व्यत्ययप्रसङ्गाद् ज्ञानस्याकारणत्वप्रसङ्गाच्च । न हि तदतिपत्यापि भवतस्तत्कारणत्वम्, व्याघातात् । तस्माद् ज्ञातानुपलब्धि-जन्यस्यासाक्षात्कारित्वात् तद्विपरीतकारणकमिदं तद्विपरीतजातीयमिति न्याय्यम् । ननु क्व नाम ज्ञातानुपलब्धिरसाक्षात्कारिणीमभावप्रतीतिं जनयति । तद् यथा निपुणतरमनुसृतो मया मन्दिरे चैत्रो न चोपलब्ध इति श्रुत्वा श्रोताऽनुमिनोति नूनं नासीदेवेति । एतेन प्राङ्नास्तितापि व्याख्याता ।

94. अत्र विप्रतिपन्नं प्रति प्रमाणमाह - **प्रतिपत्तेरि**ति । अस्मदाद्यपरोक्षप्रतिपत्तेरिन्द्रियकरणकत्वा-विनाभावनियमादिन्द्रियकरणमित्यन्वयः । अनुपलब्धिरत्र करणमिन्द्रियं वेति विवादे इन्द्रियकरणसिद्धावनुपलब्धेः सहकारितया कारणत्वं निषिध्यत इत्यग्रे स्पष्टीकरिष्याम इति तात्पर्यम् । तथा नान्यत्रोपक्षीणेन्द्रियव्यापारानन्तर-भाविप्रतीतार्थस्येन्द्रियकरणत्वाविनाभूतत्वेनावधारणादिन्द्रियकरणमित्यर्थः । अस्मदादिबाह्या[101A]नुभवत्वस्य भावकरणसहकृतरेतो(मनो)जन्यत्वाविनाभूतत्वनिर्न(र्ण)याद् यद् भावभूतं प्रकृते तदिन्द्रियमिति मन्तव्यम् । प्रथमपदं विवृणोति - **या ही**ति । विवादाध्यासिता 'इह भूतले घटो नास्ति' इति प्रतीतिरिन्द्रियकरणिका कार्य-साक्षात्कारिप्रतीतित्वादिति । प्रतिज्ञाद्यनभिधानं ग्रन्थधर्मतया, प्रयोगकाले तु सम्पूर्णं यथा भवति तथा कर्तव्यम्,

अन्यथा न्यूनाद्यवकाशः । ईश्वरसाक्षात्कारिप्रतीत्या व्यभिचारनिवृत्त्यर्थं कार्येति विशेषणमादरणीयमिति सर्वमवदातम् । साक्षात्कारित्वविशेषणस्यासिद्धिमाशङ्क्याज्ञातकरणकानुभवत्वेन साक्षात्कारित्वं प्रसाध्य निराकरोति **साक्षात्कारित्वमित्यादिना** । प्रयोगस्तु - विवादपदम् [अध्यारूढा 'इह भूतले घटो नास्ति' इति प्रतीतिः] साक्षात्कारवद् अज्ञातकरणजाऽनुभवत्वादुभयाभिमतरूपानुभववत् । ननु स्वरूपमात्रदृष्टेऽपि गेहादौ सत्तयाऽनुपलब्धेः प्रकरणत्वाद् न च गेहस्य व्यवहितविप्रकृष्टत्वेन योग्यानुपलब्धेरभाव इति वाच्यम् । स्मरणार्हास्मरणस्य तत्रायोग्यानुपलब्धित्वात् । यत एवं च प्रत्यक्षफलस्य निवृत्त्या फलतः प्रत्यक्षनिषेधः । उक्तं च — स्वरूपमात्रं दृष्ट्वापीत्यादि [श्लो० वा०, अभाव०, २८]। न च विनिगमनायामत्र को हेतुरिति वाच्यम् । प्रतिज्ञाविरोधात् पक्षधर्मता[दि]भिः 'न चाप्यत्रानुमानत्वं लिङ्गाभावात् प्रतीयते' इति [श्लो० वा०, अभाव, २९], नासम्बन्धेन । शङ्कोत्तराभ्यां वार्तिककृता लिङ्गत्वानुपपत्ते[रिद]मुक्तत्वादिति हृदि निधायाशङ्कते - **ननु क्व नामेति** । उत्तरं **तद्यथेति** । अयमाशयः — यत्र त्वनुपलब्धचरचैत्राभावः पृच्छ्यते तत्र नाभावं प्रतिपद्य प्रत्याययति, किन्तु तत्र मया नोपलब्ध इत्या[चक्षते], अनुपलम्भमात्रभानसं(स्य) ततः श्रोतुरनुमानमेव युज्यते । अन्यानुपलम्भस्यान्यं प्र[101B]ति लिङ्गकरणत्वेऽतिप्रसङ्गादिति वस्तुगतिः । तदत्र प्रतिपद्यमानं प्रति पर्यनुयोगः कर्तव्यः । तद्देहं तदानीं चैत्राभाववत् समानयोगक्षेम[त्वात्] । चैत्रस्मरणैकार्था तदस्य स्मृति(तिः) कर्मत्वात् यथा प्रातर्दृष्टः संप्रति दृश्यमानोऽयं देशः । ननु प्राग् नास्तितायामिन्द्रियव्यतिरेकेणाप्यभावप्रतिपत्तेर्व्यभिचारादकारणमिन्द्रियमिति वादिध्व(दिवच)नं निराकर्तुमाह - **एतेनेति** । यथा शब्दादधिगतेनानुपलम्भेनाभावानुमानं युक्तं तथा प्राग्नास्तिता[ज्ञा]न[मा]नुमानिकमित्यतिदेशार्थः । न च तथाविधलिङ्गाभावादिति वाच्यम् । भवति हि तद्देवकुलं चैत्राभाववत् एकज्ञानग्रहणयोग्यस्य ज्ञायमानत्वेऽपि तत्र चैत्रवत्तयाऽज्ञायमानत्वात्, यदेवं तदेवं, यथा अघटं भूतलमिति । न च प्रदेशान्तरे घटवत्तया अज्ञायमानेन प्रदेशान्तरे च तद्वत्तया ज्ञायमानेन देवकुलेनेदमप्यनैकान्तिकमिति वाच्यं ते, प्रतिपादनविशेषणात् । न चैवं सति ज्ञानाभावस्यात्मधर्मत्वेन देवकुलधर्मत्वाभावाद् व्यधिकरणत्वाद(द्दे)वकुलज्ञानाभावयोर्विषयविषयिताभावलक्षणसम्बन्धस्यैव विद्यमानत्वात् । न च परोक्षाभावप्रतीतिरिन्द्रियव्यभिचारिणीति । साक्षात्कारवत्यपि व्यभिचरति । वह्न्यादावपि साक्षात्कारप्रतीतेरिन्द्रियव्यभिचा[102A]रप्रसङ्गात्; क्वचिद् वह्नेरप्यनुमेयत्वादिति तात्पर्यम् ।

95. ननु तथाप्यवान्तरजातिभेदोऽस्तु अज्ञातानुपलब्धिजन्ये साक्षात्कारस्तु कुत इति चेत् । कारणविरोधात् कार्यविरोधेन भवितव्यमित्युक्तमेव । अनन्यत्रोपक्षीणेन्द्रियव्यापारानन्तरभावित्वाच्च । अधिकरणग्रहणे तदुपक्षीणमिति चेत्, न । अन्धस्यापि त्वगिन्द्रियोपनीते घटादौ रूपविशेषाभावप्रतीतिप्रसङ्गात् । अस्ति हि तस्याधिकरणग्रहणम्, अस्ति च प्रतियोगिस्मरणम्, अस्ति च श्यामे रक्तत्वस्य योग्यस्याभवोऽनुलब्धिश्च । अधिकरणग्राहकेन्द्रियग्राह्याभाववादिनोऽपि समानमेतदिति चेत्, न । प्रतियोगिग्राहकेन्द्रियग्राह्योऽभाव इत्यभ्युपगमात् । ममापि प्रतियोगिग्राहकेन्द्रियगृहीतेऽधिकरणे अनुपलब्धिः प्रमाणमित्यभ्युपगम इति चेत्, न । वायौ त्वगिन्द्रियोपनीते रूपाभावप्रतीत्यनुदयप्रसङ्गात् । तथापि तत्तत्र सन्निकृष्टमिति चेत् । हन्तैवमनन्यत्र चरितार्थमिन्द्रियमवश्यमपेक्षणीयं रूपाभावानुभवेन । स्यादेतत् तथापि वस्त्वन्तरग्रह एव तस्योपयोग इति चेत्, न । तस्य तं प्रत्यकारणत्वात्, कारणत्वे वा महान्धकारे करपरामर्शेन स्पर्शवद्द्रव्याभावं न प्रतीयात् । प्रतीयाच्च पुरोविस्फारिताक्षः पृष्ठलग्नस्याश्यामत्वम् । आर्जवावस्थानमप्यधिकरणस्योपयुज्यते इति चेत्, तर्हि नयनसन्निकर्षोऽप्युपयोक्ष्यते,

तदेकसहकारिप्रभासन्निकर्षापेक्षणात् । अन्यथा वातायनविवरविसारिकरपरामृष्टेऽप्यधिकरणे तदुपलम्भप्रसङ्गाच्च ।

95. ननु ज्ञातानुपलब्ध्याऽसाक्षात्कारजननेऽप्यज्ञातानुपलब्धिजन्येनावश्यं साक्षात्कारो नियमहेतोरनुपलम्भादिति आशयवानाशङ्कते – **नन्वि**ति । न च य[त्] सर्वं साक्षात्कारि ज्ञानं तस्य ज्ञायमानकरणजन्यत्वव्याप्तिः, तन्निवृत्तावसाक्षात्कारित्वव्यावृत्तेरवान्तरजातिसाक्षात्कारित्वस्येन्द्रियजन्यत्वप्रयुक्तत्वात् ज्ञातजन्यत्वमप्रयोयनक(योजक)मिति वाच्यम् । ज्ञातेन्द्रियसन्निकर्षजन्येन्द्रियगतिज्ञाने साक्षात्कारित्वप्रसङ्गादित्याशयवान् परिहरति – **कारणविरोधा**दिति । द्वितीयं हेतुं विभजते । **अनन्यत्रे**ति । इह भूतले घटो नास्तीति ज्ञानरिं(ज्ञानमिन्)द्रियकरणकम् अन्यत्रोपक्षीणेन्द्रियव्यापारानन्तरभावित्वादुभयाभिमतरूपज्ञानवदिति । ननु यथा नास्मृति(त)प्रतियोगिन्यभावो गृह्यते तथा नाश्रयोऽपीति । सत्यपि सम्बन्धे आश्रयग्रहणार्थमात्रमिन्द्रियाप(पे)क्षेति विशेषणासिद्धो हेतुः । तदुक्तम्-

मयूरो वृक्षमारुह्य कृत्वा दिगवलोकनम् ।
हन्त ! भावमभावेन ज्ञात्वा नृत्यति निर्भयः ॥

कारिकायामप्युक्तम् - 'गृहीत्वा वस्तुसद्भावम्' इति [श्लो० वा०, अभाव०, २७] हृदि निधायाशङ्कते - **अधिकरणे**ति । अधिकरणग्रहणवदभावग्रहेऽपि चक्षुः समर्थं यथा घटग्रहे तद्रूपग्रहण इति, अन्यथा तत्रापि घटग्रहोपक्षीणत्वेन न रूपं गृह्णी[102B]यादित्याशयेन परिहरति – **नान्धस्ये**ति । **तत्तत्रे**ति । तदिन्द्रियं तत्र वायौ इत्यर्थः । नन्वाश्रयग्रहणमत्रास्योपलक्षणमस्ति च वायौ सन्निकृष्टस्येन्द्रियस्य तद्देशाकाशादिप्रकाशकत्वमित्यन्यथासिद्धिरेवेत्याशङ्कते – **स्यादेतदि**ति । अत्र च परः प्रष्टव्यः - तव किमिन्द्रियमभावप्रत्ययं प्रत्यकारणमेव ? कारणोछेंन(कारणं चेत्) एकत्वेन परम्पराकारणं वा ? नाद्यो अन्धस्यापि रूपाभावोपलम्भप्रसङ्गप्रतिहतत्वात् । न द्वितीय इत्याह - **तस्ये**ति तद्देशाकाशादिग्रहणस्य **तं प्रती**त्यभावप्रत्ययं प्र[ती]त्यर्थः । ननु क एवमाह 'अकारणत्वम्' इति, अत आह - **कारणत्वे** इति **न प्रतीयादि**ति । त्वगिन्द्रियेण वस्त्वन्तराग्रहणादिति भावः । ननु प्रतीयत एवाकाशमत्रापीत्यत आह - **प्रतीयादि**ति । शङ्कते - **आर्जवे**ति । यदि पृष्ठलग्नस्याप्रतीतावार्जवावस्थानमिष्यते तदाऽऽर्जवावस्थितेऽपि महान्धकारे प्रतीत्यर्थः(र्थं) प्रभासन्निकर्ष एष्टव्यः । प्रभासन्निकर्षश्चक्षुषः सहकारी नान्यस्येति हृदि निधाय परिहरति – **नयने**ति । **तदेकसहकारी**ति चक्षुरेकसहकारीत्यर्थः । प्रभासन्निकर्षानपेक्षत्वे त्वगिन्द्रियस्य दूषणमाह - **वातायने**ति । **तदुपलम्भप्रसङ्गादि**ति रूपाभावोपलम्भप्रसङ्गादिति । प्रतियोगिग्राहकेणाश्रयग्रहणकारणं(ण)त्वस्य वायौ रूपाभावप्रतीतिपरिपन्थित्वाच्चक्षुषा यस्य कस्यचिदुपलम्भस्य प्रस्तुते[103A]ऽपि सम्भवादित्यर्थः ।

96. तथापि योग्यताऽऽपादनोपक्षीणं चक्षुः । यदितरसामग्रीसाकल्ये ह्यनुपलभ्यमानस्याभावो निश्चीयते । तच्च चक्षुष्यधिकरणसन्निकृष्टे सति स्यादिति चेत् । ननु परिपूर्णानि कारणान्येव साकल्यम् । तथा च किं कुत्रोपक्षीणम् । अथान्योन्यमेलकं मिथः प्रत्यासत्त्यादिशब्दवाच्यं तदुपक्षयः, न तर्हि क्वचिच्चक्षुः कारणं स्यादिति । न हि रूपाद्युपलब्धिमप्यसन्निकृष्टमेतदुपजनयति । अथाधिकरणसमवेतकिञ्चिदुपलम्भोऽपि तद्विषयाभावग्रहेऽनुपलब्धेरपेक्षणीयः, ततस्तत्रेदं चरितार्थम्, वाय्वादिषु तु रूपाद्यभावप्रतीतिरानुमानिकी । तथा हि अनुपलब्ध्या ह्यनुमीयते - अयं नीरूपो वायुरिति । न असिद्धेः । न ह्युपलम्भाभावो भवतामभावोपलम्भः, उपलम्भस्यातीन्द्रियत्वाभ्युपगमात् । प्राकट्याभावे-

नानुमेय इति चेत्, न । वायौ रूपवत्ताप्राकट्याभावस्याप्यसिद्धेः, रूपाभावेन समानत्वात् । व्यवहाराभावेनानुमेय इति चेत्, न । कायवाग्व्यापाराभावेऽप्युपेक्षाज्ञानाभावाभ्युपगमात्, मूकस्वप्नोपपत्तेश्च । न च व्यवहाराभावमात्रेणानुमातुमपि शक्यते । अनैकान्तिकत्वादसिद्धेश्च । तद्विषयस्तु व्यवहारस्तद्विषयज्ञानजन्यो वा, तद्विषयज्ञानजनको वा, तदाश्रयधर्मजनको वा ? तदभावश्च तज्ज्ञानतदाश्रयधर्माभावान्तर्भूत एवेत्यशक्यनिश्चय एव । आत्माश्रयेतरेतराश्रयचक्रकप्रवृत्तिप्रसङ्गात् ।

96. एवं निवारितदर्पः परः पुनरपि प्रसङ्गानन्यथासिद्धिमाशङ्कते - **तथापी**ति । कारण(णं) कारणानां प्रत्यासत्तिरित्युभयं विकल्प्य दूषयति - **नन्वि**त्यादिना । प्रतियोगिग्राहकेन्द्रियग्रहीतेऽधिकरणे त्वनुपलब्ध्याऽभावग्रहणमित्युपगमे प्रसङ्गमुक्तमपाकर्तुं किञ्चित् प्रकारान्त[र]माशङ्कते । अत्र च वायौ रूपाभावप्रतीतिरनुमानेन सर्वथा न संभवतीति मन्वानः परिहरति - **न [अ]सिद्धेरि**ति । उपलक्षणमपसिद्धान्तापत्तिरपि द्रष्टव्या सर्वत्राभावाभ्युपगमने । एतदेव स्पष्टयति — **न ही**ति । उपलम्भकार्यविरुद्धादनुमीयत इत्याशङ्कते — **प्राकट्ये**ति । निराकरोति - **रूपाभावे**ति । [अ]सिद्धः कथमनुमापक इत्यर्थः । अथ प्रा[कट्याभावो योग्यानु]पल[ब्धिगम्यस्तर्हि रूपाभावोऽपि तथाऽ]भ्युपगन्तव्यस्तुल्ययोगक्षेमत्वात् । तत्र यद्यधिकरणस[म]वेतनः(स्य) किं(क्व)चिदुपलम्भोऽपि तद्विषयाभावग्रहेऽनुपलब्ध्याऽपेक्षणीयधत(यस्त)दा रूपाभावबोधविरहवत् प्राकट्याभावबोधवैधुर्यमप्यधिकरणसमवेत[स्य] क(क्व)चिदुपलम्भनिरपेक्षानुपलब्धिरभावबोधनीयं(या) तदा रूपाभावप्रतीतिरपि । नानुमानिकेति तात्पर्यम् । उभयसमर्थनाय शङ्कते — **व्यवहाराभावेने**ति । रूपोपलम्भाभावः प्राकट्याभावश्च पूर्वानुवृत्तेन सम्बन्धः । एतदपि दूषयति - अत्र किं दृश्यव्यवहारस्याभावो हेतुः अथ दृश्यादृश्यसाधारणस्य वा ? आद्यस्यानैका[न्तिक]हेतुत्वमित्याह - **कायेति** । द्वितीयस्या[103B]प्यनेकान्तासिद्धिरिति दर्शयति - **न चेति** । सा[धा]रणस्येति प्रतीतिमभ्युपेत्यानैकान्तिकत्वप्रतीतौ त्वसिद्धिरिति मन्तव्यम् । ननु द्विविधो व्यवहारः - व्यवहर्तृदेशनिरूपणीयो व्यवहर्तव्यविषयनिरूपणीयश्चेति । तत्र न प्रथमो हेतुः उक्तदोषत्वात्, द्वितीयस्तु [अ]हेतुस्तद्व्यभिचारित्वात् । तदा स्याद्यदि तत्र सर्वदा सर्वेषां व्यवहारो न भवेत् । अन्यथा तु स्वयमेव न स्यात् । न हि सकलघटसम्बन्धित्वेऽप्येकघटसम्बन्धी भूतलादिरघट इति व्यवह्रियत इत्याशङ्क्याऽऽह - **तद्विषयस्त्वि**ति । अयमर्थः । वायोः रूपवत्ताप्राकट्यनिवृत्तिः किं वायुव्यतिरिक्तपदार्थरूपवत्ताव्यवहारव्यावृत्त्या निरूप्यते, वायुगोचररूपवत्ताव्यवहारव्यावृत्त्या वा ? नाद्यो व्यधिकरणाया व्यवहारव्यावृत्ते[ः], व्यवहारस्य वायुना सह न तावत् कश्चित् स्वतः सम्बन्धः सम्भवति, किन्तु वायुसम्बन्धधर्मजनकः संभवति, स तु वायुसम्बन्धजन्यत्वेन वा वायुसम्बद्धधर्मजनकत्वेन वा तदीयत्वं(त्वेन) वा ? [उ]च्यते । [त]था च वायुसम्बन्धव्यवहारनिवृत्त्या वायौ रूपज्ञानाभावनिरूपणम्, वायुसम्बन्धिता च व्यवहारज्ञानविशेषः, यद्धि ज्ञान(नं) वायुना सह विषयविषयिभावसम्बन्धव्यवहारे कारणतापन्न(न्नं) यथा भूतले घटस्य निषेधः, उभयवर्ती संयोगः । एव(वं) च वायुसम्बन्धव्यवहारनिवृत्त्या वायौ ज्ञानाभावनिरूपण[म्], वायौ ज्ञानाभावनि[104A]रूपणेन च वायुव्यवहाराभावनिरूपणमित्यात्माश्रयम् । तद्विषयस्तु व्यवहारः तद्विषयज्ञानजन्मा यत्वा(था) घटादौ हानादिव्यवहारो घटादिज्ञाने, यदि वा तद्विषयज्ञानजनको यथा घटादौ शब्दादिव्यवहारः, अथवा तदाश्रितधर्मजनको यथा घटादौ स्पन्दादिव्यवहारः तद्विषयप्राप्तिजनकः । तदभावश्च वायुसंसृष्टव्यवहाररूपधर्माभावश्चेत्यर्थः । यथा हि वायौ धर्मान्तराणामभावस्तादृश एव वायुसंसृष्टव्यवहारस्वरूपधर्माभावोऽपीत्यर्थः । प्रथमे दूषणम[मा]त्माश्रयः इति । वायुसंसृष्टतया व्यवहारनिवृत्तिः, [तन्निवृत्त्या] वायुगोचरज्ञाननिवृत्तिः, तदवधारणेन ज्ञानाभावनिरूपण[म्], तेनैव तन्निरूपण-

मिति आत्माश्रयः । द्वितीये दूषण**मितरेतराश्रयः** इति । तद्गोचरत्वाद् ज्ञानाभावनिरूपणे तद्विषयव्यवहाराभावनिरूपणं, तद्विषयव्यवहाराभावे तद्गोचरत्वाद् ज्ञान(ना)भावनिरूपणमितीतरेतराश्रयत्वम् । तृतीये दूषणं **चक्रके**ति । तदाश्रित-धर्माभावनिरूपणं तदाश्रितधर्मानुपलम्भेन, उपलम्भाभावावधारणं च प्राकट्याभावेन, प्राकट्याभावज्ञानं च व्यवहाराभावेन, तद्गोचर[104B]व्यवहारनिवृत्तिश्च तदाश्रितप्राप्त्यादिरूपधर्माभावेनेति चक्रकमिति विवेचनीयम् ।

97. न चाज्ञातस्योपलम्भाद्यभावस्य लिङ्गता । न च प्राकट्याभावः सत्तामात्रेणोपलम्भाभाव-मावेदयतीति युक्तम् । लिङ्गाभावस्य तथात्वेऽतिप्रसङ्गात् । अविनाभावबलेन तु नियमे तत्प्रतिसन्धानापत्तेः । न ह्यविनाभावः सत्तामात्रेण ज्ञानहेतुं नियमयति, धूमादावपि तथाभावप्रसङ्गादिति । ज्ञानप्रत्यक्षत्वेन त्वद्दिशा भविष्यतीति चेत्, न । शब्दध्वंसादिनोक्तोत्तरत्वात् । अपि च प्रतियोगिग्राहकेन्द्रियेणाधिकरण-धर्मप्रतीतिरनुपलब्धेरङ्गमिति, तद्रहितायास्तस्याः कार्यव्यभिचाराद् व्यवस्थाप्येत, व्याप्तिबलाद् वा । न तावदुक्तरूपानुपलब्धिस्तां विना अभावप्रत्ययमजनयन्ती दृश्यते । नापि व्याप्तेः । तथासति वायौ रूपाभावप्रत्ययस्तामाक्षिपेत्, एवम्भूतत्वात् । अनाक्षेपे वा न तत्कारणको भवेद् न वा भवेत् । ततो न भवत्येव, लिङ्गात् तदुत्पत्तिरिति चेत् । ननु लिङ्गमपि सैव, न तत्त्वान्तरम् । यथा योनिसम्बन्धोऽ-लिङ्गदशायामिन्द्रियसन्निकर्षमपेक्षते, लिङ्गदशायां तु तदनपेक्ष एव ब्राह्मण्यज्ञाने, तथैतत् स्यादिति चेत्, न । कार्यजातिभेदात् तदुपपत्तेः । प्रकृते च तदनभ्युपगमात् । पारोक्ष्यापारोक्ष्ये विहायान्यथाऽप्यसौ भविष्यतीति चेत्, न । अनुपलम्भात् ।

97. ननु वायौ रूपाभावाद्यनुमाने तथानुपलब्ध्यादिकमज्ञातमेव लिङ्गं भविष्यति । तथा च नोक्तदोषावकाशमिति आशयवान् आशङ्क्य परिहरति – **न चे**ति । सत्तया गमकत्वे प्रत्यक्षवेद्यत्वमुक्तं तदुद्दिधीषं(ष)या लिङ्गत्वमास्थितं परेण लिङ्गस्य च ज्ञातस्यैव गमकत्वेन कस्यचिद् विप्रतिपत्तिरस्तीत्यभिप्रायः । नन्वन्येषामज्ञातानामलिङ्गत्वम्, प्राकट्यं तु स्वसत्तयैव विषयप्रकाशवत्त्व[म्, तस्या]भावः सत्तयैव विज्ञानाभावं गमयिष्यति । न चायोग्यप्रतियोगिकत्वेनायोग्योऽस्याभाव इति वाच्यम् । अनुपलब्धेरेव तथाविशेषणापेक्षणादिति हृदि निधाय शङ्कते – **न चे**ति । अनुपलब्धेः ह्यस्तत्रया(स्वसत्तया) वा स्वकारणाभावमविनाभावबलेन वा प्रतिपादयेत् लिङ्गाभावत्वमात्रेण वा । न मध्यमान्तिमावित्याह - **लिङ्गाभावस्ये**ति । एवं सति धूमाभावोऽपि वह्न्यभावं गमयेदित्यर्थः । प्रथममाशङ्क्य निराकरोति - **अविनाभावे**ति । एतदुक्तं भवति - [न] उपलम्भा-भावो भवतामभा[105A]वोपलम्भ इति । तत्र शङ्कते – **ज्ञाने**ति । भवन्मते ज्ञानस्याप्रत्यक्षत्वात् प्रत्यक्षेण ज्ञानाभावो नावगम्यते । न रूपाभावानुमानं भविष्यतीत्यर्थः । अस्मन्तरे(न्मते) योग्यप्रतियोग्यतया(प्रतियोगिमत्तया) अनुपलम्भवद्(म्भाद्) वाय्वादिरूपाभावस्यापि प्रत्यक्षत्वादनुमेयत्वाभाव इत्याशयवान् परिहरति - **ने**ति । नन्वधिकरणमप्रतीत्य कथं वाय्वादौ रूपाभावः प्रत्यक्षः स्यादित्यत आह - **शब्दे**ति । अस्मन्मते अप्रत्यक्षेणाप्या-श्रयेणाभावस्य प्रत्यक्षेण निरूपणात् शब्दप्रध्वंसवदिति व्युत्पादितत्वादित्यर्थः । संप्रति प्रतिपत्तियोग्यग्राहके-न्द्रियेणाधिकरणधर्मप्रतीतिरनुपलब्धेरङ्गमिति । [1]**यथा वे**ति । ननु स्मरणस्येनि(स्यानि)यतत्वे साक्षात्कार्यनुभव-त्वप्रसङ्ग इत्याशङ्क्य निराकरोति । .... वदतः परान् विविकल्या(विकल्प्य) निराकरोति - **अपि चे**ति । **तत** इति अनुपलब्धित इत्यर्थः । **सैवे**ति अनुपलब्धिरेवेत्यर्थः । ब्राह्मण्यज्ञाने योनिसम्बन्धो लिङ्गालिङ्गदशयारि-

---

१. प्रतीकमिदं मुद्रितमूले नास्ति ।

(दशायामि)न्द्रियसम्बन्धनिरपेक्षसापेक्षवदनुपलब्धिरप्यलिङ्गदशायां सापेक्षा लिङ्गदशायां तु निरपेक्षा भविष्यतीत्याशङ्कते - **यथेति** । इन्द्रियसम्बन्धमपेक्षमाणस्य योनिसम्बन्धस्यापरोक्षज्ञानजनकत्वमिति युक्तो दृष्टान्त इत्याशयेन परिहरति - **न, कार्येति** । ननु दार्ष्टान्तिकेऽपि तथा भविष्यतीत्याह - **प्रकृते चेति** शेषः ।

98. संभाव्यते तावदिति चेत्, संभाव्यताम्, न त्वेतावताऽपि तमाश्रित्य करणनियमनिश्चयः । अज्ञातकरणत्वाच्च । यदज्ञायमानकरणजं ज्ञानं तत्साक्षादिन्द्रियजम्, यथा रूपप्रत्यक्षम्, तथा च 'इह भूतले घटो नास्ति' इति ज्ञानमिति । यथा वा स्मरणमज्ञायमानकरणजं साक्षान्मनोजन्म । कुतस्तर्हि न साक्षात्कार्यनुभवरूपम् ? संस्कारातिरिक्तसन्निकर्षाभावादिति वक्ष्यामः । तथापि भावविषये इयं व्यवस्था, अभावज्ञानं त्वज्ञातकरणत्वेऽपि न साक्षादिन्द्रियजं भविष्यतीति चेत्, न । उत्सर्गस्य बाधकाभावेन सङ्कोचानुपपत्तेः । अन्यथा सर्वव्याप्तीनां भावमात्रविषयत्वप्रसङ्गोऽविशेषात् । तथापि विपक्षे किं बाधकमिति चेत् । नन्विदमेव तावत् । अन्यदप्युच्यमानमाकर्णय । तद् यथा अकारणककार्यप्रसङ्गो रूपाद्युपलब्धीनामपि वानिन्द्रियकरणत्वप्रसङ्गः । न ह्यनुमित्यादिभिरुपलभ्यमानकरणिकाभिश्चक्षुरादिव्यवस्थापनम्, अपि त्वनुपलभ्यमानकरणिकाभिः रूपाद्युपलब्धिभिरेव । यद्यपि साक्षात्कारितापि तत्रैव पर्यवस्यति, तथापि प्रथमतोऽनुपलभ्यमानकरणत्वमेव प्रयोजकं चक्षुरादिकल्पने । न ह्युपलभ्यमाने करणान्तरे साक्षात्कारिणीष्वपि तासु चक्षुराद्यनुपलभ्यमानं कश्चिदकल्पयिष्यत् । अत एव साक्षात्कारित्वेऽपि स्मृतेर्मन एव करणमुपागमन् धीराः । संस्कारस्त्वर्थविशेषप्रत्यासत्तावुपयुज्यते, इन्द्रियाणां प्राप्यकारित्वव्यवस्थापनात् ।

98. **सम्भाव्यतामिति** । कार्यभेदसंभावनया तज्जाती[105B]यनियतस्य कारणत्वमपि सम्भाव्यते न तु निश्चीयत इत्यभिप्रायतो हेतुद्वयं विस्तरतः परोदीरितदोषापाकरणेन समर्च्य तृतीयहेतुमुपन्यस्तमनूद्य वा(व्या)चष्टे - **अज्ञातेति** । अत्रापीह भूतले घटो नास्तीति विज्ञानमिन्द्रियकरणकमज्ञायमानकरणजानुभवत्वादित्यभिधानं पूर्ववत् समर्थनीयम् । अथवा **साक्षादिन्द्रियजमिति** साध्यम् । तत्र साक्षादिति मनसा सिद्धसाध्यतानिरासार्थं शङ्कितविपक्षस्य सत्त्वोपपादनेनानैकान्तिकतां निराकरोति **कुत** इत्यादिना । यदि तु संस्कारापेक्षणान्मनसः स्मृतौ न करणत्वं तदा प्रत्यभिज्ञादौ चक्षुरादेरपि न करणत्वं स्यादिति भावः । ननु भावज्ञानमेवमस्तु, न त्वभावज्ञानमिति विपक्षे बाधकविरहादित्याशयवान् शङ्कते - **तथापीति** । अस्त्यत्र विपक्षे बाधकमिति परिहरति । **उत्सर्गस्येति** । उक्तबाधकमपश्यन् पुनः शङ्कते । उक्तबाधकस्मारणेन परिहरति — **तथापीति** । बाधकान्तरमप्याह - **अकारणकेति** । अस्ति तावद् रूपाद्युपलब्धिवदभावोपलब्धिः । सा यदि चक्षुरादिकरणिका न भवति तदा अकरण(णि)कैव स्यादन्यस्य करणस्यानुपलम्भादिति वाक्यार्थः । न चानुपलब्धिकरणिका भविष्यतीति वाच्यम्, रूपाद्युपलब्धरवपि(ब्धावपि) चक्षुरादिविलयप्रसङ्गात्, रूपाद्यभावानुपलब्धिस्तत्रापि वज्ञज्जलेयायमानत्वात्[१] प्रतियोगिविशेषादेवा[106A]नुपलब्धीनामपि भेदात् । न चाभावप्रमाणस्य भावेन सम्बन्धो ना(नो)पपद्यत इति वाच्यम्, अभावप्रमाणप्रमेययोरपि तुल्यत्वादित्याशयवानाह - **रूपाद्युपलब्धीनामपीति** । ननु नाज्ञायमानकरणत्वेन चक्षुरादिव्यवस्थापनं किन्तु रूपाद्युपलम्भसाक्षात्कारित्वेनात आह - **यद्यपीति** । तत्रैवेन्द्रियकरणत्व एवेत्यर्थः । यदि पुनः साक्षात्कारित्वमेवेन्द्रियकरणसिद्धौ सर्वत्र प्रमाणं स्यात् [तदा] स्मृते[:] मनःकरणत्वं नानुमीयेतेत्या-

---

१. भ्रष्टम् ।

शयवानाह - ननु स्मृतेः संस्कारः करणं भविष्यतीत्यत आह – **संस्कारस्त्विति** । इन्द्रियाणां सर्वस्मृत्यनुपपत्तेः संस्कार एव प्रत्यासत्तिरिति रहस्यम् ।

99. भावावेशाच्च चेतसः । सर्वत्र हि बाह्यार्थानुभवे जनयितव्ये भावभूतप्रमाणाविष्टमेव चेत उपयुज्यते नातोऽन्यथेति व्याप्तिः । तथैव शक्तेरवधारणात् । न ह्यनुपलब्धिमात्रसहायं तदभावेऽप्यनुभवमाधातुमुत्सहते । शब्दलिङ्गादेरपेक्षादर्शनात् । न च यत्र यदपेक्षं यस्य जनकत्वमुपलब्धं तदेव तस्यैव तदनपेक्षं जनकमिति न्यायसहम् । आर्द्रेन्धनसम्बन्धमन्तरेणापि दहनाद् धूमसम्भावनापत्तेः । तथा च गतं कार्यकारणभावपरिग्रहव्यसनेन ।

99. चतुर्थस्य हेतोः संगृहीतस्य विवरणम् । **भावेति** । चेतसो मनसो वादेशः । भावरूपप्रमाणसाहित्यमित्यर्थः । प्रयोगं दर्शयितुं व्याप्तिमाह – **सर्वत्रेति** । [यथा] अन्तरे सुखादावनुभूतिजनना(ने) मनसो भावात्मकप्रमाणापेक्षाऽस्तीति [तथा] बाह्या[र्था]नुभव इत्युक्तम् । प्रयोगस्त्विह भूतले घटो नास्तीति [अभावप्रमा]-जनकं चेतो भावरूपप्रमाणापेक्षं अस्मादादित्मा(दाद्यभा)[वप्रमात्वात्].... यथाऽनुभवजनकश्चेतस्त्वादुभयाभिमतरूपाद्यनुभवजनकश्चेतोवत् । अथ भूतले घटो नास्तीति प्रतीतिः भावरूपप्रमाणापेक्षचेतोन(ज)न्या अस्मदादिबाह्यार्था(र्थ)प्रमात्वादुभयाभिमतरूपादिप्रमावदि[ति] । [भूतले घटो नास्तीति अभावज्ञानं भाव]भूतकरणं बाह्यानुभवत्वाद् रूपाद्यनुभववदिति । [106B] न च प्राग्नास्तिताद्यनुभवैरनेकान्तस्तत्रापि केवलगेहस्मरणस्य चैत्रानुपलम्भविशिष्टस्य लिङ्गत्वादेव तद्व्यापकरहितत्वादीना(नां) लिङ्गत्वात् तद्व्याप्याभावानुभवादिभिरनेकान्त इति विवेचनीयम् । एतदेवाह - **तथैवेति** । ननु भावप्रमेये भावप्रमाणापेक्षा मनसः, अभावप्रमेये त्वनुपलम्भमात्रापेक्षं चेतो भविष्यतीति विपक्षे बाधकाभावात् संदिग्धव्यतिरेकित्वमाशङ्क्य विपक्षि(क्षी) बाधकोपन्यासेन परिहरति - **न हीति** । **शब्दलिङ्गादेरे(रि)ति** । व्यवहिताद् भाव(वा)भावनिश्चयार्थमेवेत्यर्थः ।

100. अपि च

प्रतियोगिनि सामर्थ्याद् व्यापाराव्यवधानतः ।
अक्षाश्रयत्वाद् दोषाणामिन्द्रियाणि विकल्पनात् ॥२१॥

यद्धि प्रमाणं यद्भावावगाहि तत् तदभावावगाहि यथा लिङ्गं शब्दो वा । घटाद्यवगाहि चेन्द्रियमिति । अन्यथा हि शब्दादिकमपि नाभावमावेदयत्, भाव एव सामर्थ्यावधारणात् । न चैवमेव न्याय्यम् । देवदत्तो गेहे नास्तीति शब्दात्, मया तत्र जिज्ञासमानेनापि न दृष्टो मैत्र इत्यवगतानुपलब्ध्यानुमानादप्यवगतेः । ग्राहयतु वाश्रयमिन्द्रियम्, तथापि न तेनेदं व्यवधीयते व्यापारत्वात्, अन्यथा सर्वसविकल्पकानां प्रत्यक्षत्वाय दत्तो जलाञ्जलिः स्यात् । नन्वेवं सति धूमोपलम्भोऽप्यस्य व्यापारः स्यात्, तथा च गतमनुमानेनापीति चेत्, न । यया क्रियया विना यस्य यत्कारणत्वं न निर्वहति, तं प्रति तस्या एव व्यापारत्वात् । न च धूमाद्युपलब्धिमन्तरेण चक्षुषो वह्निज्ञानकारणत्वं न निर्वहति, संयोगवदिति । अस्ति च भावाभावविपर्ययः । सोऽयं यस्य दोषमनुविधत्ते तदेवात्र करणमिति न्याय्यम् । न चानुपलब्धिः स्वभावतो दुष्टा, नाप्यधिकग्रहणं प्रतियोगिस्मरणं वा स्वभावतो दुष्टम् । अनुत्पत्तिदशायामनुत्पत्तेरुत्पत्तिदशायां च स्वार्थप्रकाशनस्वभावताया अपरावृत्तेः । असंसृष्टयोरधिकरणप्रतियोगिनोः संसृष्टतया प्रतिभानं दुष्टम्, संसृष्टयोश्चासंसृष्टतयेति चेत् । नन्वयमेव विपर्ययः ।

तथा च आत्माश्रयो दोषः । तस्माद् दुष्टेन्द्रियस्य तद्विपर्ययसामर्थ्ये अदुष्टस्य तत्समीचीनज्ञानसामर्थ्यमपि । तथा च प्रयोगः - इन्द्रियमभावप्रमाकरणम्, तद्विपर्ययकरणत्वात्, यद् यद्विपर्ययकरणं तत् तत्प्रमाकरणं यथा रूपप्रमाकरणं चक्षुरिति । विकल्पनात् खल्वपि । अघटं भूतलमिति हि विशिष्ट-धीरवश्यमिन्द्रियकरणिका स्वीकर्तव्या प्रमाणान्तरं वा सप्तममास्थेयम् । यथा हि विशेष्य-मात्रोपक्षीणमिन्द्रियमकरणमत्र, तथा विशेषणमात्रोपक्षीणा अनुपलब्धिरपि न करणं स्यात् । स्वस्वविषयमात्रप्रवृत्तयोः प्रमाणयोः समाहारः कारणमिति चेत्, न । विषयभेदे फलवैजात्ये च तदनुपपत्तेः । न हि मृत्सु तन्तुषु च व्याप्रियमाणयोः कुलालकुविन्दयोः समाहारः स्यात् । नापि घटपटादिकारिणां चक्रवेमादीनां समाहारः क्वचिदुपयुज्यते । तत्र कर्बुरकार्याभावान्न तथा, प्रकृते तु विशिष्टप्रत्ययस्य परोक्षापरोक्षरूपस्य दर्शनात् तथेति चेत्, न । विरुद्धजातिसमावेशाभावात् । भावे वा करम्बित एव कार्ये द्वयोरपि शक्तिरभ्युपगन्तव्या दर्शनबलात्, न हि नियतविषयेण सामर्थ्येन कर्बुरकार्यसिद्धिः । अन्यत्रापि तथा प्रसङ्गात् । ननूभयोरप्युभयत्र सामर्थ्ये कोऽर्थो मिथः सन्निधानेनेति चेत्, न । तत्सहितस्यैव तस्य तत्र सामर्थ्यादिति ।

100. अभावप्रमायामिन्द्रियाणां करणत्वप्रतिपत्तये प्रमाणान्तरमाह - **अपि चेति । इन्द्रियाणी**ति धर्म-निर्देशः, करणमिति साध्यं, प्रकरणात् । इन्द्रियं क्वचिदभावानुभवकरणं प्रतियोग्यनुभवकरणत्वाद् लिङ्गवत् । **शब्द(ब्दो) वेति । यद् भावावगाहि, यत्ततीव(तत्तद)भा[वा]वगाही**ति विवक्षितमतो नोपमानेनानेकान्तः । अथवा येषां भावानां नानाजातीनामवगाहीति व्याख्येयमतो नोक्तदोषः । एतदुभयमभिप्रेत्योपन्यस्याह - **अन्यथे**ति । सिद्धत्वादत उक्तम् - **व्यापाराव्यवधानत** इति । तद् विवृणोति — **ग्राहयतु वे**ति । व्यापारव्यवधायकत्वं-(त्वे) चेन्द्रियस्य सर्वि(र्व)सविकल्पकप्रत्यक्षत्वविलोपमनिष्टमाह - **अन्यथे**ति । नन्वधिकरणग्रहणनिर्विकल्प-कोपक्षीणसविकल्पकप्रत्यक्षत्वधि(वि)लो[पा]न्न स व्यापारश्चक्षुषः । [107A] पर्वतनितम्बवर्तिवह्निबोधने धूमोपलम्भस्यापि व्यापारत्वमिति नानुमानसंभव इत्यादि निराकरोति - **नन्वेवमि**ति । यदि चेन्द्रिय(यं) भावप्रतीतिकरणं न भवे[त्] तदा [अ]घट(टं) भूतलमिति विकल्पनात् विशिष्टधीर्न स्यादिति विपक्षे बाधकयु(मु)क्तं निवारयति - **विकल्पनादि**ति । शङ्कते - **स्वस्वे**ति । अत्र विवेचनीयं किं प्रमाणयोः समाहारः, समाहृतयोर्वा प्रामाण्यम् ? नाद्यः, वि(भि)न्नप्रमाजनकत्वेन तयोः पर्यवसितयोः प्रमान्तरजनकत्वानुपपत्तेः । तदुक्तम् — **न विषयभेद** इति । विसेष(विषय)भेदे समाहाराभावमुदाहरति — **न ही**ति । फलभेदे तदनुपपत्तिं दर्शयति - **नापी**ति । द्वितीये तूभयत्रापि चक्षुषः सामर्थ्यमनिच्छतापि मन्तव्यम् इत्यतो भावात् नैव सम्बन्धो-ऽयोग्यत्वादिन्द्रियस्य हीत्यादि निरस्तप्रायमित्याशयवतोक्तम् - **भावे वे**त्यादि ।

101. एतेन सुरभि चन्दनमित्यादयो व्याख्याताः । तथा चाभावविषयेऽपीन्द्रियसामर्थ्यस्य दुरपह्नवत्वादलमसत्ग्रहेणेति । स्यादेतत्, नागृहीते विशेषणे विशिष्टबुद्धिरुदेति, तत्कार्यत्वात् । न च विशिष्टसामर्थ्ये केवलविशेषणेऽपि सामर्थ्यम्, केवलसौरभेऽपि चक्षुषो वृत्तिप्रसङ्गात् । अतोऽभाव-विशेषणग्रहणाय मानान्तरसम्भवः । अपि च कथमनालोचितोऽर्थ इन्द्रियेण विकल्प्येतः ? न च मानान्तरस्याप्येषा रीतिः । अनुमानादिभिरनालोचितस्याप्यर्थस्य विकल्पनात् । अप्राप्तेश्च । न ह्यभावे-नेन्द्रियस्य संयोगादिः सम्भवति । न च विशेषणत्वं सम्बन्धान्तरपूर्वकत्वात् तस्य । अवश्याभ्युपगन्तव्यत्वा-

च्चानुपलब्धेः, न हि तदुपलब्धौ तस्याभावोपलम्भ इति चेत् । उच्यते –

अवच्छेदग्रहधौव्यादधौव्ये सिद्धसाधनात् ।
प्राप्त्यन्तरेऽनवस्थानान्न चेदन्योऽपि दुर्घटः ॥२२॥

101. ननु सुरभि चन्दनमिति प्रत्ययो न तावत् घ्राणजन्मा, तस्य गन्ध एव सामर्थ्यात्; नापि समुच्चितघ्राणत्वगिन्द्रियजन्मा, समुच्चितयोरिन्द्रिययोरणुना मनसाऽधिष्ठातुम[श]क्यत्वात्; नापि पारिशेष्यजन्मा 'तिक्ता शर्करा' इत्यादिभ्रमानुपपत्तिप्रसङ्गात्, तत्र पारिशेष्याभासस्याप्यभावात्, तिक्तत्वस्य शर्करासमवायि(य)त्वे मधुरशर्करास्मरणस्यैव बाधकस्पर्शत्वात्(बाधकस्य सत्त्वात्), अनपेक्षितबाधकोपपत्तौ शिष्यमाणसंप्रत्ययः परिशेषः। नापि परस्परसाकाङ्क्षपदार्थजन्मा अपदार्थप्रमाणस्वीकारप्रसङ्गात्। तत् कथं सुरभिचन्दनमित्यादिकः प्रत्य[107B] योऽत आह - प्रमाणजनिक(त)सौरभज्ञानसहकृतस्य त्वगिन्द्रियस्यैव सुरभित्वविशिष्टचन्दनज्ञानजनक[त्व]सामर्थ्य-मित्यर्थः। प्रकृतमुपसंहरति – **तथा चे**ति। ननु विशिष्टप्रत्ययस्यैन्द्रियकत्वेऽपि विशेषणतया ग्रहणायार्भा(भा)-वप्रमाणाभ्युपगमः। सौरभग्रहणाय घ्राणाभ्युपगमा(मो) तवेत्याह - **न चे**ति **स्यादेतदि**ति। साक्षात्कारिसविकल्प-पूर्वकत्वेन व्याप्तो दृष्टो भावे, अभावे च निर्विकल्पपूर्वकत्वेन व्याप्तो दृष्टः। तथा च निर्विकल्पकत्वपूर्वक-त्वनिवृत्तौ निवर्तत इत्याशयवानाह - **अपि चे**ति। बाधकान्तरमाह - **अप्राप्तेश्चे**ति। सम्बन्धविशेषणत्वे(त्व)मिति चेदत्राह - **न चे**ति। अनन्यगतिकतयाऽनुपलब्धिरभावप्रतिपत्तये स्वीकर्तव्येत्याह – **अवश्याभ्युपगन्तव्य-[त्वा]च्चे**ति। शुक्तिकायामिन्द्रियसन्निकर्षे सत्यपि रजताभावेऽपि रजताभावो न गृह्यते। तदुक्तम् - तदुपलब्धौ रजतोपलब्धिरित्यर्थः। यत्तावदुक्तं विशिष्टप्रत्ययत्वाद् विशेषणज्ञानपूर्वकत्वं सविकल्पकत्वाच्च निर्विकल्पस(क)-पूर्वकत्वं, तत्राप्रयोजकत्वात्। अवच्छेदग्रहानियतप्रकाश[विषय]त्वस्योपाधेर्विद्यमानत्वात्। मु(शु)क्तौ रजतबोधे रजतानुप[लब्धे]रे[वाभावज्ञानम्]। [अ]त एव हि ब्राह्मणत्वादिविकल्पानामालोचनपूर्वकत्वम्। तत् किमत्र तस्योपाधिरस्ति येन विवक्षितव्यतिरेकः स्यादिति चेत् ओमिति आशयवानाह - **अवच्छेदे**ति।

102. स ह्यर्थविशेषणीभविष्यन् केवलोऽपि विस्फुरेद् यस्यावच्छेदकज्ञानं न व्यञ्जकम्। स च विकल्पयितव्य आलोच्यते यो विशेषणज्ञाननिरपेक्षेणेन्द्रियेण विज्ञाप्यते। यस्तु तत्पुरःसर एव प्रकाशते, तत्र तस्य विकल्पसामग्रीसमवधानवत एव सामर्थ्यान्नायं विधिः। स्वभावप्राप्तौ सत्यामत्यधिका प्राप्तिः प्रतिपत्तिबलेन रूपादावभ्युपगता, इह त्वनवस्थादुस्थतया न तदभ्युपगमः, न तु स्वभावप्रत्या-सत्तिरेतावतैव विफलायते। न चेदेवम्, प्रमाणान्तरेऽपि सर्वमेतद् दुर्घटं स्यात्। तथाहि – सर्वमेव मानं रूक्षात् परम्परया वा निर्विकल्पकविश्रान्तम्। न ह्यनुमानादिकमप्यनालोचनपूर्वकम्। ततोऽना-लोचितोऽभावः कथमनुपलब्ध्याऽपि विकल्प्येत। न च तया तदालोचनमेव जन्यते, प्रतियोग्यन-वच्छिन्नस्य तस्य निरूपयितुमशक्यत्वात्, शक्यत्वे वा किमपराद्धमिन्द्रियेण। तथा सम्बन्धान्तरगर्भत्व-नियमेन विशेषणत्वस्य, मानान्तरेऽपि कः प्रतीकारः ? तदभावस्य तदानीमपि समानत्वात्। परस्य तादात्म्यमस्तीति चेत्। ननु यद्यसावस्ति, अस्त्येव, न चेन्नैव। न ह्यभ्युपगमेनार्थाः क्रियन्ते, अनभ्यु-पगमेन वा निवर्तन्ते इति। अवश्याभ्युपगन्तव्यत्वे कारणत्वं सिद्ध्येत्, न तु मानान्तरत्वम्। अन्यथा भावोपलम्भेऽप्यभावानुपलब्धिरेव प्रमाणं स्यात्, नेन्द्रियम्। अभावोपलम्भे भावानुपलम्भवद् भावोपलम्भे अभावानुपलम्भस्यापि वज्रलेपायमानत्वादिति।

प्रत्यक्षादिभिरेभिरेवमधरो दूरे विरोधोदयः
प्रायो यन्मुखवीक्षणैकविधुरैरात्मापि नासाद्यते ।
तं सर्वानुविधेयमेकमसमस्वच्छन्दलीलोत्सवं
देवानामपि देवमुद्भवदतिश्रद्धाः प्रपद्यामहे ॥२३॥

॥ इति तृतीयः स्तबकः ॥

102. अभावस्यावच्छेदग्रहध्रौव्ये प्रतियोगिनिरूप्यत्व[मिति] [108A] मन्तव्यो वायं नियमः । तदेतत् सर्वहार्थ (**स ह्यर्थ**) इत्यादिनोपाधिस्वरूपं दर्शयित्वाऽधुना व्यतिरेकं दर्शयन्नाह — **यस्त्वि**ति । अतो विशिष्ट-प्रत्ययमात्रस्योपाधिसम्बन्धशालित्वादवच्छेदग्रहनियमावच्छेदग्रहानियमे स त्बि(तु) वि[शि]ष्टप्रत्ययादिति हेतुर्वक्तव्यः, तत्र च सिद्धसाधवह्निमाह(साधनत्वमाह) — [**अध्रौ**]**व्य** इति । न चाभावो निर्विकल्पवेद्यो न केनापीष्ट इति वाच्यम् । **भूषणकार**प्रभृतिरभावस्यापि निर्विकल्पकवेद्यत्वस्वीकारात् प्रबन्धेन व्युत्पादनाच्च । तदभिप्रायेणैव **अध्रौव्य** इत्युक्तम् । एतदत्वं(दनङ्)गीकारे वा[ऽ]प्रयोजकत्वमेवेति प्रतिसंधेयमिति तद्ग्रेहेण ॥छा। यत्तु सम्बन्धान्तरपूर्वकत्वात् तस्येत्युक्तं तत्रानवस्थाप्रसङ्गं प्रतिज्ञातं विवृणोति - **स्वभावप्राप्ताविति** । अथ भूतलमिति विशिष्टप्रतिपत्तिदर्शनात् समवायिव्यतिरिक्तं भावस्य विशेषणत्वं सम्बन्धान्तरपूर्वकमेष्त(मेषित)व्यम्, गत्यन्तराभावादिति रहस्यम् । तदाऽन्येऽपि पराभ्युपेतप्रमाणतयाऽभावोऽपि दुर्णयो दुरुपपादनीय इति पूर्वोक्तसमस्तमनभ्युपगम अनिष्टमाहुः — **न चेदेवमि**ति । अवश्याभ्युपगन्तव्यत्वे तु कारणत्वमस्तु । अन्यच्च भावोपलब्धावप्यभावानुपल-[म्भः] [अभावोपलब्धौ] भावानुपलम्भवदित्यन्यथाऽयमेवेकं प्रमाणमनिष्टमापद्येतेत्याह - **तस्ये**ति । परिच्छेद-साध्यमर्थमुपसंहरन् परामर्शसरणं(र्णिं) प्रतिपादयति - **प्रत्यक्षे**ति । एवमुक्तक्रमेण भगवतो मुखवीक्षणैकविभु(धु)रैः प्रत्यक्षादिभिरात्मापि नासाद्यते तैरवि(तैर्वि)रोधः(धो)दयोऽधरोऽधः । [108B] अतो दूरे । असमोऽसौ स्वच्छन्दाद् चेतनान्तरप्रयोजकत्वात् लीलेच्छा सैवोत्सवो यस्य दुःखाभावैकनिबन्धनत्वादित्यर्थः ॥छा।

इति श्रीवामेश्वरध्वजविरचिते कुसुमाञ्जलिनिबन्धने तृतीयः परिच्छेदः ॥

चतुर्थः स्तबकः

103. ननु सदपीश्वरज्ञानं न प्रमाणम्, तल्लक्षणायोगात्, अनधिगतार्थगन्तुस्तथाभावात्, अन्यथा स्मृतेरपि प्रामाण्यप्रसङ्गात् । न च नित्यस्य सर्वविषयस्य चानधिगतार्थता, व्याघातात् । अत्रोच्यते –

अव्याप्तेरधिकव्याप्तेरलक्षणमपूर्वदृक् ।
यथार्थानुभवो मानमनपेक्षतयेष्यते ॥१॥

103. मिथ्याज्ञानतमिस्रमुद्रितदृशः संसारदुःख(खा)कुलान्
लोकान् दर्शयितुं सुमार्गमभितो न्यायागमैर्व्य[ञ्]जितम् ।
श्रीवामध्वजनामधेयगु(मु)निना विद्यावतामचि(र्चि)ता
टीकेयं कुसुमाञ्जलेर्विरचिता चेतश्चमत्कारिणी ॥

आत्मानं श्रुतिवाक्यतः प्रकटयन् न्यायाच्च निर्णापयन्
कञ्चित् प्रत्यवं(व)गृ(गू)हनं च निखिलैस्तर्कैर्निराकारयन् ।
यः पुष्णाति कुतूहलादिव सदा विद्वद्विनोदात्(न्) प्रभुः
वन्द्यः सोऽस्तु महेश्वरो वरयिता दुःपक्ष-सत्पक्षयोः ॥

एतदेवमीश्वरसाधकप्रमाणे बाधक[प्र]माणाभावं विस्तरतो व्युत्पाद्य संप्रति सत्वे(त्त्वे)पि तस्याप्रमाणत्वादित्यनेन तर्कापरिशुद्धिं परोक्तां निराचिकीर्षुः चतुर्थीं विप्रतिपत्तिमुत्थापयति - **ननु सदपी**ति । [न] प्रमाणमिति न प्रमेत्यर्थः । [अनधिगतार्थ]गन्तुर्बौद्धस्येत्यर्थः । गन्तुर्बौ(र्बो)ध[क]स्येत्यर्थः । परोक्तप्रमाणलक्षणं यथोक्तमाभिप्रायिकं चाप्ति(ति)व्याप्ता(प्त्य)व्याप्तिभ्यां लक्षणाभासमित्यस्मत्प्रमाणलक्षणमेवादरणीयमिति । तथा च पारमेश्वरज्ञानमपि प्रमेति न दोष इति । सिद्धान्तमुपक्रमते - **अत्रोच्य**ते । अनधिगतार्थबोधः प्रमेति लक्षणं यथार्थत्वविशेषणसहितं तद्रहितं वा ? प्रथमे धारावहनबुद्धीनामुभयसिद्धप्रमाणभावानामधिगतार्थगो-[109A][च]राणामसंभवेनाव्याप्तिः । द्वितीयेऽपि विपर्ययज्ञाने अप्रमाणरूपे यतत्वेना(संभवेना)तिव्याप्तिरित्यर्थः । एतद्विवरणे स्पष्टीभविष्यति । परलक्षणमलक्षणमभिधाय स्वलक्षणमाह - **यथार्थे**ति । न ह्यस्मल्लक्षणे परेणातिव्याप्त्यव्याप्ती प्रतिपादयितुं शक्यते इति रहस्यम् । अनुभय(व)ज्ञानत्वावान्तरजातिः म्मृ(स्मृ)तीतरज्ञानत्वं च व्यवस्थापकम् । पूर्वधीत्वव्यवस्थापकम् गन्धवस्त्व(वत्त्व)वत् । पृथिवीव्यवहारकारकगन्धवत्त्वमिव वा स्मृतीतरज्ञानत्वमनुभवव्यवहारकारकमिति । स्मृतित्वमपि जातिः, संस्कारासाधारणजनितज्ञानत्वं च व्यवस्थापकमिति सर्वं निरवद्यम् । अनुभवत्वैकनियतप्रमात्वमिति, स्मृतेरनुभवत्वविरहे न प्रमात्वमिति व्यवस्थिते, यथा स्मृतेः पूर्वानुभवैकविषयत्वं नियमेन, न तथाऽनुभूतेरपीत्यर्थः । यथा अननुभूते न स्मृतिः तथाऽनुभूते प्रमाऽपि न स्यात् । न चैवमस्ति । तस्मान्नियमेनानुभवापेक्षित्वात् स्मृतेर्न [स्वा]भाविकं यथार्थत्वमित्याशयवतोक्तम् - **अनपेक्षतयेष्यत** इति ।

104. न ह्यधिगतेऽर्थे अधिगतिरेव नोत्पद्यते, कारणानामप्रतिबन्धात् । न चोत्पद्यमानाऽपि प्रमातुरनपेक्षितेति न प्रमा, प्रामाण्यस्यातदधीनत्वात् । नापि पूर्वाविशिष्टतामात्रेणाप्रामाण्यम् । उत्तराविशिष्टतया पूर्वस्याप्यप्रामाण्यप्रसङ्गात् । तदनपेक्षत्वेन तु तस्य प्रामाण्ये तदुत्तरस्यापि तथैव स्यादविशेषात् । छिन्ने कुठारादीनामिव परिच्छिन्ने नयनादीनां साधकतमत्वमेव नास्तीत्यपि नास्ति, फलोत्पादानुत्पादाभ्यां विशेषात् । तत्फलं प्रमैव न भवति, गृहितमात्रगोचरत्वात् स्मृतिवदिति चेत् । न । यथार्थानुभवत्वनिषेधे साध्ये बाधितत्वात् । अनधिगतार्थत्वे सिद्धसाधनात् साध्यसमत्वाच्च । व्यवहारनिषेधे तन्निमित्तविरहौपाधिकत्वात्, बाधितत्वाच्च । न चानधिगतार्थत्वमेव तन्निमित्तम्, विपययेऽपि प्रमाव्यवहारप्रसङ्गात् । नापि यथार्थत्वविशिष्टमेतदेव धारावहनबुद्ध्यव्याप्तेः न च तत्तत्कालकलाविशिष्टतया तत्राप्यनधिगतार्थत्वमुपपादनीयम् । क्षणोपाधीनामनाकलनात् । न चाज्ञातेष्वपि विशेषणेषु तज्जनितविशिष्टता प्रकाशते इति कल्पनीयम्, स्वरूपेण तज्जननेऽनागतादिविशिष्टतानुभवविरोधात् । तज्ज्ञानेन तु तज्जनने सूर्यगत्यादीनामज्ञाने तद्विशिष्टतानुत्पादात् । न चैतस्यां प्रमाणमस्ति । नन्वनुपकार्यानुपकारकयोर्विशेषणविशेष्यभावे कथमतिप्रसङ्गो वारणीयः ? व्यवच्छित्तिप्रत्यायनेन व्यवच्छित्तौ स्वभावेन ।

104. श्लोकव्याचिख्यासुरनधिगतार्थगन्तृलक्षणप्रणेतुरभिप्रायं विकल्प्य निराकर्तुमुपन्यस्यति । श[ङ्]कते **तत्फलमिति** । समाधानम् — **नेति** । प्रमैव न भवतीति । अत्र [109B] यथार्थानुभवत्वस्य निषेधो विवक्षितः, अ[न]धिक(ग)[ता]र्थत्वस्य वा प्रमाव्यवहारमात्रस्य वेति । यथाक्रममुपन्यस्य निरस्यति । **यथार्थानुभवेति** । तन्निमित्तविरह(हा)[त्] प्रमानिमित्तविरहः । एतदेव निमित्तमित्याशङ्क्य निराकरोति - **न चेति** । **विपर्ययेऽपीति** । भाता(भ्रमा)वपीत्यर्थः । अतिशय(अनधिगतार्थगन्तृ)लक्षणमाशङ्क्य निराकरोति - **न च** । धारावहनबुद्धीनामप्यनधिगतविषयत्वमाशङ्क्य परिहरति - **न चेति** । 'घटोऽयम्' 'घटोऽयम्' इति बुद्धिसहस्रस्यापि न विषयभेदमुपलभामहे, कालश्च न प्रत्यक्षबुद्धौ प्रतिभासते । अप्रतिभासते च तस्यैकत्वात्, भेदाग्र[हा]च्चेति । सूक्ष्मकालोपाधय एव कालो वक्तव्यस्ते[षां] च न प्रतिभाहो(सो) वेति परिहारार्था(र्थं) 'नुनु(ननु) मा भूवन् उपाधयः प्रतीतिविषयास्तज्जनितविशिष्टतांप्रत्यक्षत्वादेवानधिगतविषयत्वम्' इत्याशङ्क्य निराकरोति - **न चाज्ञातेष्विति** । उपाधयो हि ति(तां) विशिष्टतां स्त(स्व)धा(स)त्तयैव [ज]नयेयु(युः) स्वज्ञानसत्तया वा । आद्ये दूषणमाह — **स्वरूपेणेति** । अस्ति तावच्छुक्लगुणविशिष्टा पटानुभ[व]वेदना या 'अनागतश्वेतपटः' इति तथाविध[वि]शिष्टानुभवस्तेन विरोधः, [तस्माद्] असम्भव एवोक्तपक्षस्य । द्वितीयं दूषयति — **तज्ज्ञानेनेति** । ननु सतः सत्तामात्रेण असतः स्वज्ञानसत्तया विशेषणस्य विशिष्ट[110A]ताजनकत्वाभ्युपगमान्नोक्तप्रसङ्ग इत्यतोऽपरितुष्यन्निदमाह - **न चैतस्यामिति** । न तु विशिष्टोऽर्थ इति न च ज्ञानमिति विशिष्टतायां प्रमाणमित्युक्ष्ये(क्ते) अर्थज्ञाना(ने) शुक्लतायासि(मि)वेत्याशयवा[न]निष्टमाह । यथा शुक्लगुणसम्बन्धव्यतिरिक्ता जाति[रि]त्यत(तः) शुक्लता न चकास्ति तथा विशेषणसम्बन्धव्यतिरिक्तविशिष्टताऽपीत्याशयवानतिप्रसङ्गं निवारयति - **व्यवच्छित्ती**-त्यादिना ।

105. अन्यथा तवाप्यनवस्थानादिति । ज्ञाततैवोपाधिरिति चेत् । न, निराकरिष्यमाणत्वात् । तत्सद्भावेऽपि वा स्मृतेरपि तथैव प्रामाण्यप्रसङ्गात् । जनकागोचरत्वेऽप्युत्तरोत्तरस्मृतौ पूर्वपूर्वस्मरणजनितज्ञाततावभासनात् । अस्तु वा प्रत्यक्षे यथा तथा, गृहीतविस्मृतार्थश्रुतौ का वार्ता । अप्रमैवासाविति

चेत् । गतमिदानीं वेदप्रामाण्यप्रत्याशया, न ह्यनादौ संसारे स्वर्गकामो यजेतेति वाक्यार्थः केनाचिन्नावगतः, सन्देहेऽपि प्रामाण्यसन्देहात् । न च तत्रापि कालकलाविशेषाः परिस्फुरन्ति । न चैकजन्मावच्छेदपरिभाषयेदं लक्षणम्, तत्राप्यनुभूतविस्मृतवेदार्थं प्रति अप्रामाण्यप्रसङ्गात् । कथं तर्हि स्मृतेर्व्यवच्छेदः ? अननुभवत्वेनैव । यथार्थो ह्यनुभवः प्रमेति प्रामाणिकाः पश्यन्ति । 'तत्त्वज्ञानात्' इति सूत्रणात्, 'अव्यभिचारि ज्ञानम्' इति च । ननु स्मृतिः प्रमैव किं न स्यात्, यथार्थज्ञानत्वात् प्रत्यक्षाद्यनुभूतिवदिति चेत् । न । सिद्धे व्यवहारे निमित्तानुसरणात्, न च स्वेच्छाकल्पितेन निमित्तेन लोकव्यवहारनियमनम्, अव्यवस्थया लोकव्यवहारविप्लवप्रसङ्गात् । न च स्मृतिहेतौ प्रमाणाभियुक्तानां महर्षीणां प्रमाणव्यवहारोऽस्ति, पृथगनुपदेशात् । उक्तेष्वन्तर्भावादनुपदेश इति चेत् । न । प्रत्यक्षस्यासाक्षात्कारिफलत्वानुपपत्तेः, लिङ्गशब्दादेश्च सत्तामात्रेण प्रतीत्यसाधनत्वादिति ।

105. **अन्यथेति** । व्यवच्छित्तिप्रत्ययजननेन स्वभावसामर्थ्यमभ्युपगन्तव्यम्, **तवापीति** विशिष्टतालक्षणोपकाराधानेऽप्युपकारान्तरापा[तं] स्यादिति । जनणां(नानां) संयोगसमवायबलेनैव द्रव्यगुणकर्मोपरक्तप्रत्ययो भवन् 'अघटं भूतलम्' इत्यत्राभावो[प]रक्तः कथमसत्यां विशिष्टतायां स्यात् । न ह्यत्र भावाभावयोः सङ्गमनिराकरणे सिद्धे न(ना)तिप्रसङ्गभयादपि विशिष्टताऽभ्युपगन्तुं शक्येत्याशयः । तत्र द्रव्यगुणकर्मणैवैतदपीति चेत्, न, समवायविलोपप्रसङ्गात् । अधिकस्तत्र प्रवाहो हीयते, न तु प्रतीयते, न तु प्रतीयमान इति चेत्, तुल्यमितरत्रापि । बाधोऽत्रास्तीति चेत् तदनभिधानासङ्गतः, समवायो वा पराभ्युपगतपदार्थ(र्थः) संभवति विशिष्टताविशिष्टप्र[त्]य[य]वत् । विशिष्टप्रत्ययवता स्वभावरूपेणैवैतदपीति चेत् समवायविलोपप्रसङ्गात् । बाधोऽस्तीति चेत् तदनभिधानादनुपलम्भमात्रस्य चोभयत्रासुवगुयवचत्वात्[१] । वाचकसम्भेदमात्रमिदमिति चेत्, न, इ(त)द्भेदमित्यादावपि तत्प्रसङ्गादिति । अत्रोच्यते । [110B] विशिष्टता [२]स्मि(स्मृ)त्य(त्यु)परक्तप्रत्ययान्यथानुपपत्त्या वावसीयते विशिष्टप्रत्ययान्यथानुपपत्त्या वा ? नाद्यो, अतदाधारव्यावृत्त्या विशेष्यस्य विशेषणबुद्ध्यादिमनारोपवर्तितामात्रस्यो(स्या)परा(र)मार्थत्वात् । न द्वितीयः, विशिष्टतयैव व्यभिचारात् । तथापीहप्रत्ययहेतुतया रूपादाविवाभावेऽपि समवायः सिद्ध्येत्, असिद्धौ न क्वचिदिति समवायविलोप इति तु विशिष्टतामांसिद्ध्यनतु (विशिष्टता मा सिद्ध्यतु) गुणमप्रस्तुतमित्युपेक्षणीयं समवायप्रतीतिपरिपन्थि तावद् भवतीति चेत् ततः किं तस्या(स्य) अप्रस्तुतत्वात् । यदापि तत्प्रस्तावस्तदापि भूतला(ल)भावापेक्षया । 'इह भूतले' इति प्रत्ययः किं निषिध्यमानसंयोगप्रतिसम्बन्धिघटाद्यपेक्षयेति । यत्किञ्चिदेतत् । ननु तथापीति पृच्छामः समवायवृत्त्यैव रूपादिवदभावोऽपि किं न भूतलविशेषणमिति चेत् । न, प्रमाणाभावात् । इह-प्रत्ययस्य त्वन्यापेक्षत्वस्योक्तत्वात् । समवेतकार्यस्य तन्नाशे न्ना(ना)शप्रसङ्गात् । प्रध्वंसविनाशकलनायां च कल्पनागौरवप्रसङ्गात् । इत्याशयवानुपाध्यन्तरमास(श)[ङ्]का(क्य) निराकरोति - **ज्ञाततेति** । स्मृतिव्यवच्छेदार्थमनधिगतग्रहणमिच्छन्ति मीमांसकाः । ज्ञाततापक्षे च न स्मृतेरपि व्यवच्छेदः स्यादित्याह - **तत्सद्भावेऽपीति** । एतावता प्रबन्धेन प्रत्यक्षधारावाहिकबुद्धिवत् तदुपाधिविशिष्टग्रहो नास्तीति समर्थितं संप्रति तत्संदेहेऽप्यन्यत्र वेदे उभयसिद्धप्रामाण्ये अधिगतमर्थमधिगमयति प्रामाण्यस(सं)भव इति न्यायामे(त्याज्यमे)वानधिगतग्रहणमन्यथा वेदाप्रामाण्यस्वीकार इति त[द्] दु[रु]त्तरं व्यसनमित्याह — **अस्तु वेति** । कालत्रयापरामृष्टभावतया विधिवाक्यादितज्ज्ञानेन तत्कालविशिष्टताभ्युपगमं

१-२. भ्रष्टः पाठः ।

परेषामपीत्याशयवानाह – **न** [111A] **चे**ति । ननु यद्यधिगतार्थग्रहणं तर्हि स्मृतेरपि व्यवच्छेदः प्रकारान्तरेणैवेत्याशयवान् परिहरति - **अननुभवत्वेनैवे**ति । प्रतीतिसिद्धं गोत्वाश्वत्वादिजातिभेदवत् 'इममर्थमनुभवामि', 'इमं स्मरामि' इत्यनुभूतिस्मृतित्वादीनामपि प्रतीतिभेदसाक्षिकत्वादिति । न च स्मृत्य[नु]भूत्योरपि कस्यचिद् भ्रान्तस्येमं स्मरामीत्यत्रेममनुभावामीत्यत्र चेत्स[मं] स्मरामीत्यध्यवसाय इत्येषा दिगिति । न चैतदुत्सूत्रमिवोक्तमिति शङ्कां सूत्रकारसंमतिप्रदर्शनेनापाकरोति **तत्त्वे**त्यादिना । यद्यपि स्मृतेः प्रमात्वं सर्वशास्त्रनिषिद्धं तथापि [यथार्थत्वं] न न्नि(नि)षिद्धम्, नृ(न) तु युक्ते(क्तमि)ति शङ्कां निराचिकीर्षुः युक्तिमुपदर्शयिष्यन् प्रथम(मं) तावत् सर्वपक्षयुक्तिमाह - **नन्वि**ति ।

106. एवं व्यवस्थिते तर्क्यतेऽपि – यदियमनुभवैकविषया सती तन्मुखनिरीक्षणेन तद्यथार्थत्वायथार्थत्वे अनुविधीयमाना तत्प्रामाण्यमव्यवस्थाप्य न यथार्थतया व्यवहर्तुं शक्यते इति । व्यवहारेऽपि पूर्वानुभव एव प्रमितिरनपेक्षत्वात् । न तु स्मृतिः, नित्यं तदपेक्षणात् । असमीचीने ह्यनुभवे स्मृतिरपि तथैव । नन्वेवमनुमानमप्यप्रमाणमापद्येत, मूलप्रत्यक्षानुविधानात् । न, विषयभेदात् । आगमस्तर्हि न प्रमाणम्, तद्विषयमानान्तरानुविधानात् । न । प्रमातृभेदात् । धारावाहिकबुद्धयस्तर्हि न प्रमाणम्, आद्यप्रमाणानुविधानात् ।

106. **तर्क्यत** इति विचार्यत इत्यर्थः । यदियमिति यस्मादित्यर्थः । एतदुक्तं भवति स्वविषयप्रवर्तकत्वप्रापकत्वाभ्यां हि प्रमाणानां प्रामाण्यं मृग्यते तेन व्यसनितया । अथ समीहितसाधनविषयमनुस्मृत्यापि नत्रा(न ता)वन्निःश[ङ्कं] प्रवर्तते प्रो(प्रे)क्षावाना(न्) यावन्न पूर्वप्रवृत्तानुभवप्रामाण्यं व्यवस्थापयति । तद्व्यवस्थापने च तस्यैव क्षु(क्षि)प्रसामर्थ्यस्यैव निरपेक्षत्वात् स्मृतिरूपव्यापारेण प्रवर्तकत्वमिति युज्यते, न तु स्मृते(तेः) [111B] सापेक्षत्वात् कल्पनीयशक्तित्वाच्च । यथाह म(स) जयाथी(र्थी) **त्रिलोचनगुरुः** । तथाहि स्मृतिज्ञानेन पूर्वानुभूतमर्थ(र्थं) व्यवस्थापयता अनुभावो(भव उ)पस्थापितः, अनुभवस्य च स्वविषयापेक्षं प्रामाण्यमप्यु[प]स्थापित(तं), तावता तस्यैव स्मृत्यारूढस्य प्रवृत्त्य[ङ्]गत्वान्न स्मृतेः स्मर्तव्यार्थिनः प्रवृत्तिरिति । तस्मादप्रमाणमिति । सापेक्षत्वमेव स्मृति(ते)र्दर्शयितुमाह – **असमीचीन** इति । पूर्वानुभवापेक्षित्वेनानुमितेरप्यप्रमात्वमिति शङ्कते – **नन्वि**ति । पूर्वप्रत्यक्षस्य लिङ्गविषयत्वात्, अनुमितेश्च लिङ्गविषयत्वात् स्मृत्यनुभवयोश्चैकविषयत्वाभावाद् वैषम्यमिति परिहरति - **ने**ति । श्रोतुरागमजनितवाक्यार्थप्रमा वाक्यप्रणेतुर्वाक्यार्थ[ज्ञान]प्र(प्रा)म(मा)[ण्यापे]क्षितत्वान्न प्रमा स्यादित्याशयवान् शङ्कते – **आगम** इति । तज्जनिता प्रतिपत्तिर्न प्रमेत्यर्थः । प्रवर्तकत्वप्रापकत्वाभ्यां हि प्रामाण्यमित्युक्तम्, तच्च प्रकृते स्मृतेरिव स्वानुभवशब्दात् तत्फलभूतं वक्तुः प्रामाण्यमनुमाय श्रोत्रा प्रवर्तयितव्यमिति संभवति । वैयधिकरण्याद् वक्तुः प्र[व]य(च)नं त्वप्रमाणमेवेति । अतएव परप्रत्यायनाय शब्दमुच्चारयन्ती(ती)त्येतावन्मात्रं निरुक्तिकुठ(श)[ल]तामुद्गिरयतीत्याशयवान् परिहरति - **ने**ति । यद्येकविषये प्रमामात्रभेदे च यो(या) बुद्धयो [112A] न ताः पूर्वबुद्ध्यपेक्षितत्वात् प्रमारूपा इत्याशङ्कते - **धारे**ति। अत्रापि न प्रमाणमिति न प्रमेत्यर्थः ।

107. न । कारणविशुद्धिमात्रापेक्षया प्रथमवदुत्तरासामपि पूर्वमुखनिरीक्षणभावात्, कारणबलायातं काकतालीयं पौर्वापर्यमिति । यदि हि स्मृतिर्न प्रमितिः पूर्वानुभवे किं प्रमाणम् । स्मृत्यन्यथानुपपत्तिरिति चेत् । न । तया कारणमात्रसिद्धेः, न तु तेनानुभवेनैव भवितव्यमिति नियामकमस्ति । अननुभूतेऽपि

तर्हि स्मरणं स्यादिति चेत्, किं न स्यात् । न ह्यत्र प्रमाणमस्ति । पूर्वानुभवाकारोल्लेखः स्मृतेर्दृश्यते, सोऽन्यथा न स्यादिति चेत् । तत् किं बौद्धवद् विषयाकारान्यथानुपपत्त्या विषयसिद्धिस्त्वयापीष्यते, तथाभूतं ज्ञानमेव वा तत्सिद्धिः ? आद्ये तद्वदेवानैकान्तिकत्वम् । न हि यदाकारं ज्ञानं तत्पूर्वकत्वं तस्येति नियमः, अनागतज्ञाने विभ्रमे च व्यभिचारात् । द्वितीये तु स्मृतिप्रामाण्यमवर्जनीयम् । मा भूत् पूर्वानुभवसिद्धिः, किं नश्छिन्नमिति चेत् । न तर्हि स्मृत्यनुभवयोः कार्यकारणभावसिद्धिरिति । न । तदप्रामाण्येऽपि पूर्वापरावस्थावदात्मप्रत्यभिज्ञानप्रामाण्यादेव तदुपपत्तेः । योऽहमन्वभवममुमर्थं सोऽहं स्मरामीति मानसप्रत्यक्षमस्तीति । न च गृहीतग्राहित्वमीश्वरज्ञानस्य, तदीयज्ञानान्तरागोचरत्वाद् विश्वस्य । न च तदेव ज्ञानं कालभेदेनाप्रमाणम्, अनपेक्षत्वस्यापरावृत्तेः । तथापि वा अप्रामाण्येऽतिप्रसङ्गादिति । स्यादेतत् । अनुपकारकं विषयस्य, तदीयमेतदीयं वा न भवितुमर्हत्यविशेषात् । न च तस्येत्यनियतं तत्र प्रमाणमतिप्रसङ्गात् । न च तदभिज्ञमन्तरेण तदुपकारस्योत्पत्तिः, तथानभ्युपगमात् । अभ्युपगमे वा कार्यत्वस्यानैकान्तिकत्वात् । अत्रोच्यते –

स्वभावनियमाभावादुपकारोऽपि दुर्घटः ।
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा ॥२॥

107. धारावहनबुद्धीनामप्युभयसिद्धप्रमाभावानां दोषानुप[सं]हरते(ति) । नेन्द्रियार्थसन्निकर्षजन्मत्वेन पूर्वबुद्धाव(द्ध्य)पेक्षित्वमित्याशयवान् समाधत्ते – **ने**ति । नन्वनुभवस्य पूर्वकालत्वं कुत अनुभूयते - मान[स]प्रत्यक्षत्वात् स्मृतेर्वा ? न तावदाद्यः, अनुभवसत्तादशायाम् अनुभवस्य तदानीं वर्तमानतयाऽपूर्वत्वाभासात् कथं तेन रूपेणावभासनम् असत्तादशायां तु न प्रत्यक्षज्ञानगोचरत्वम् । अथ स्मृतावेवाभासते, कथं तर्हि स्मृतेरप्रामाण्यम् ? अनुभवपूर्वताग्राहकत्वात् । अतः स्मृत्यनुभवयोः कार्यकारणभावः । एवं स्मृते(तेः) प्रमात्वमन्तरेणाशक्यप्रतिपत्तिरित्याशयवान् परं शङ्कते – **न तर्ही**त्यादि । न तर्हीत्यनेन न स्मृतिः स्मृत्यनुभवयोः कार्यकारणभावयोः ग्राहिणी । किं तर्हि ? प्रत्यभिःक्षे(भिज्ञे)ति समाधत्ते - **न, तदप्रामाण्ये** इति । **तदुपपत्तेः** स्मृत्यनुभवयोः कार्यकारणभावोपपत्तेरित्यर्थः । योऽहमन्वभवममुमर्थं सोऽहं स्मरामीति प्रत्यभिज्ञाने घटानुभवस्य स्मरणं प्रत्यन्वयनियमः प्रतीयते । अतो अन्वयनियमेनैव स्मृत्यनुभवयोः कार्यकारणभावसिद्धिरित्यर्थः । **न चे**ति **अतिप्रसङ्गादि**ति । सर्वज्ञानानां द्वितीयादिक्षणे गृहीतग्रहणरूपतयाऽप्रामाण्यप्रसङ्गादित्यर्थः । न च ज्ञानानां द्वितीयादिक्षणेऽनवस्थानमिति वाच्यम् अग्रे निराकरिष्यमाणत्वात् । ननूक्तक्रमेण मा भूदि(दी)श्वरज्ञानस्याप्रामाण्यमितरत्व(था) वक्ष्यमाणप्रकारादप्रामाण्यमस्य केन वारणीयमित्याशङ्कते - **स्यादेतदि**ति । यद्य[112B]पि परमेश्वरज्ञानं सर्वविषयं तथापि सर्वत्रानियतं न सर्वोपकाराधाना(न)मन्तरेण भवितुमर्हति । सर्वोपकाराधानेऽपि सर्वोऽयमित्युच्यमाने अस्मदादिज्ञाना[ना]मपि सर्वविषयत्वप्रसङ्गात् । स्यात् परमेश्वरज्ञानस्य सर्वत्रोपकाराधार(य)कत्वमस्मदादिज्ञानानां तु क्वचिदेवोपकाराधायकत्वमित्यकामेनापि स्वीकर्तव्यमित्यभिसन्धिता । एतदेव स्पष्टयति - **न च तस्ये**ति । तस्येदमित्येवमाकारनियमरहितं यदित्यर्थः । अस्तु तर्हि ज्ञानं विषयोपकारकमेव मीमांसकानामिवो(वे)त्यत आह - **न चे**ति । सम्भवेदेवमनीश्वरवादे, न तु सेश्वर[वादे] इति । सम्भवः तथाहीश्वरवादे कार्यमात्रस्योपादानोपकरणाद्यभिज्ञपुरुषपूर्वकत्वेन व्याप्तेरुपकारकारणमीश्वरज्ञानमपि ज्ञातव्यं ज्ञानान्तरेण, न चैवमभ्युपगमादनवस्थाप्रसङ्गाच्च । अतस्तदभिज्ञमन्तरेण ईश्वरज्ञानाभिज्ञमन्तरेण तज्जन्यविषयोपकारस्य नोत्पत्तिरिति विषया(य)व्यवस्थायां नेश्वरज्ञानं प्रमेति पूर्वपक्षः । अत्रेश्वरानीश्वरज्ञानस्य साधारणोपक्रमेण समाधानमारभतेः -

स्वभावेति । येनापि मीमांसक(के)न विषयोपकारकमित्यनैकान्तिकत्वम् ।

108. विशेषाभावात् तत्रैव फलं नान्यत्रेत्यस्यापि नियमस्यानुपपत्तेः । स्वभावनियमेन चोपपत्तौ तथैव विषयव्यवस्थोपपत्तेः । अवश्यं चैतदनुमन्तव्यम्, अतीतादिविषयत्वानुरोधात् । न हि तत्र ज्ञानेन किञ्चित् क्रियते इति शक्यमवगन्तुम् । असत्त्वात् । न च तद्धर्मसामान्याधारं किञ्चित् क्रियते इति युक्तम् । तेन तस्यैव विषयत्वप्राप्तेः । तादात्म्याद् विशेषस्यापि सैव ज्ञाततेति चेत्, तत् किं चक्षुषा घटे ज्ञायमाने रसोऽपि ज्ञायते, तादात्म्यात् । घटाकारेण ज्ञायते एवासौ रस इति चेत् । अथ रसाकारेण किं न ज्ञायते । तेन रूपेण ज्ञाततानाधारत्वादिति चेत् । न तर्हि वर्तमानसामान्यज्ञानेऽप्यतीतानागतादिज्ञानम्, तेनाकारेण प्राकट्यानाधारत्वादिति । ननु क्रियया कर्मणि किञ्चित् कर्तव्यमिति व्याप्तेरस्त्वनुमानम् । न ।

अनैकान्त्यादसिद्धेर्वा न च लिङ्गमिह क्रिया ।
तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके ॥३॥

धात्वर्थमात्राभिप्रायेण प्रयोगे संयोगादिभिरनेकान्तात्, न हि शरसंयोगेन गगने किञ्चित् क्रियते, अन्त्यशब्दाभिव्यक्त्या वा, स्पन्दाभिप्रायेणासिद्धेः । व्यापाराभिप्रायेण शब्दलिङ्गेन्द्रियव्यापारैर्व्यभिचारात्, न हि तैः प्रमेये किञ्चित् क्रियते, अपि तु प्रमातर्येव । फलाभिप्रायेणापि तथा । अन्ततस्तेनैवानेकान्तात् अनवस्थानाच्च । आशुविनाशिधर्माभिप्रायेण द्वित्वादिभिरनियमात् ।

108. उत्तरार्धं व्याख्यातुमाशङ्कते - [1]**अनुभवे**ति ज्ञानमिष्यते । तेनापि किं विषयसम्बद्धेन ज्ञानेनोपकाराधानमसम्बद्धेन वेति । पूर्वस्मिन् विषयोपकारात् प्राग् यदि ज्ञानं विषयसम्बद्धं किमुपकारेण, असम्बद्धेन चेत् कथं तर्हि क्वचिदेवोपकाराधानं न सर्वत्रेति नियामकमनुस्मरता स्वभाव एवोपगन्तव्यो गत्यन्तराभावादिति तात्पर्यम् । इममेवार्थं विवरणव्याजेन दर्शयति - **विशेषाभावादि**त्यादि । सुबोधम् । न तु ज्ञान[113A]क्रिया कर्मणि किञ्चित्कारिका क्रियात्वात् उद्यमन-निपातनक्रियावदित्यनुमानमस्तीति प्रमाणसिद्धमिदमित्याशयवान् शङ्कते । - **नन्वि**ति । इदमप्यनुमानं ज्ञाततायां परेषां न सम्भवतीत्याह - **अनैकान्त्यादि**त्यादि । नन्वनुभवसिद्धां(द्धं) विषयविशेषणत्वमेव किञ्चिदस्ति, अन्यथा स युक्त इति, ततः ज्ञाने सत्ययं प्रयोगो न स्यादिति हृदि निधायाह - **तद्वैशिष्ट्ये**ति । अस्ति(धि)के ज्ञाततावि शिष्टत्वानुभा(भ)वेनाध्यक्षानुभवः कुतः । तद्वैशिष्ट्यत्वा[त्] ज्ञात इत्यनुभवस्य क्रिया किं धात्वर्थमात्रं वा स्यादथ करणादिव्यापारो वा फलं वेति ? यथाऽनुक्रमं दूषयति - **धात्वर्थे**त्यादिना । **न ही**ति । गगनं शरेण सं[यो]ज्यत इति कर्मत्व(त्वं) यस्येत्यन(त्र) गगनस्य । न च गगने संयोगेन किञ्चित् क्रियत इत्यर्थः । **अन्त्यशब्दे**ति अन्त्यशब्दज्ञानानन्तरम[न्]त्य[शब्द]स्य नाशात् तव(त्र) ज्ञानेन [न] किञ्चित् क्रियते इत्यर्थः । एतच्च स्वसिद्धान्तावधृतेनोक्तम् । सुबोधमितरत् । **फलाभिप्रायेणे**ति । गमनक्रिया हि ग्रामप्राप्तिफलं(ला) । न च ग्रामप्राप्त्या ग्रामे कर्मणि किञ्चित् क्रियत इति फल(लं) कर्मणि किञ्चित्करमिति व्यभिचार इत्यर्थः । **अन्तत** इति । तथाहि — यत् फलं तत् प्रमेये किञ्चिदतिशयाधायक[म्], फलत्वात्, प्रयत्नवदात्मशरीरसंयोगवत् भेरीदण्डसंयोगवत् च विभागवत् चेति । अत्र फलोत्पादितस्यापि फलत्वात् फलान्तरजनकत्वमिष्यते न वा । न चेदनैकान्तता, [इष्यते] चेदनवस्थेति त्याजनीयम् । न त्वाशु-

१. मुद्रितमूले प्रतीकमिदं नास्ति ।

[113B]विनाशिक्रियासाधर्म्यात् आशुविनाशिधर्ममात्रं क्रियेति विवक्षितमित्याशङ्क्य निराकरोति - **आशु-विनाशीति। अनियमाद्** व्यभिचारादित्यर्थः ।

109. आशुकारकाभिप्रायेण कर्मण्यसिद्धेः, कर्मण्याशुकारकं ज्ञानमित्येव हि साध्यम् । कर्तर्याशुकारकत्वस्य कर्मोपकारत्वेनाव्याप्तेः । शब्दादिव्यापारैरेवानेकान्तात् । स्यादेतत्, अनुभवसिद्धमेव प्राकट्यम् । तथाहि – ज्ञतोऽयमर्थ इति सामान्यतः, साक्षात्कृतोऽयमर्थ इति विशेषतो विषयविशेषणमेव किञ्चित् परिस्फुरतीति चेत् । तदसत् । यथा हि –

अर्थे नैव विशेषो हि निराकारतया धियाम् ।
तथा,
क्रियायैव विशेषो हि व्यवहारेषु कर्मणाम् ॥४॥

किं न पश्यसि, घटक्रिया पटक्रियेतिवत् कृतो घटः करिष्यते घट इत्यादि, तथैव गृहाण, घटज्ञानं पटज्ञानमितिवज्ज्ञातो घटो ज्ञायते इति । कथमसम्बद्धयोर्धर्मधर्मिभाव इति चेद्, ध्वस्तो घट इति यथा । एतदपि कथमिति चेत्, नूनं ध्वंसेनापि घटे किञ्चित् क्रियते इति वक्तुमध्यवसितोऽसि । तन्निरूपणाधीननिरूपणो ध्वंसः स्वभावादेव तदीय इति किमत्र संबन्धान्तरेणेति चेत् । प्रकृतेऽप्येवमेव । एतेन फलानाधारत्वादर्थः कथं कर्मेति निरस्तम् । विनाश्यवत् करणव्यापारविषयत्वेन तदुपपत्तेः । स्वाभाविकफलनिरूपकत्वं च तुल्यम् ।

109. नन्वस्तु तर्हि क्रियासाधर्म्यादाशुकारकमात्रं क्रियेत्याशङ्क्य निराचष्टे - **आशुकारकेति** । तथाहि - कर्मण्याशुकारकत्वं वा हेतुः, कर्तर्याशुकारकत्वं वा [आशुकारकत्वमात्रं] वा । न प्रथमम्, साध्यावि(वि)शिष्टत्वात् । न द्वितीयतृतीयावनेकान्तादिति । दर्शयति **कर्मणीति** । **शब्द(ब्दादि)व्यापारैरिति** पदार्थस्मरणादिभिरित्यर्थः । पदानां पदार्थस्मृतिरवान्तरव्यापारभूता वाक्यार्थप्रतिपत्ति(त्ति) कर्तर्याशुकरोति । न च कर्मणि वाक्यार्थ(र्थे) किञ्चित् करोति । उभयसिद्ध(द्धं) मत[म्] । निराकारमपि ज्ञानं विषयेणैव नीलपीतादिना नीलज्ञानम् [पीतज्ञानम्] इति प्रत्ययव्यपदेशकारकमेव(वं) 'ज्ञातो घटः' इति ज्ञानक्रिययैव 'ज्ञातः' इति प्रत्ययव्यपदेशकारकमिति । एवमनभ्युपगमे 'कृतो घटः' इत्यादावपि कृतिजनितधर्माधारा(र)त्वप्रसङ्गः, न चैतत् त्वयेष्यत इति समुदायार्थः । एतेन व्यवहारान्यथानुपपत्त्याऽस्ति कश्चिदतिशये(यो) वि[षये] [सं]ज्ञाकाल इति । तस्यैव ताव[त्] संज्ञाकालादवगम्यते इति न्यायेन ज्ञाततेत्यादिभिः पदैर्निरूव्य(प्य)त इति निरस्तिः । व्यवहारस्यान्यथानुपपन्नत्वात् । न च वाच्यं ज्ञातस्य ज्ञातृसम्बन्धित्वात् तस्य व्यवह्(ह)र्तृत्व[म]नुपपद्यताम्, विषयस्तु पूर्व(र्वं) विशेषात् कथं व्यवहर्तव्य इति । तस्यैकस्यात्मसमवायादात्मधर्मत्ववद् विषयनिरूपणीयत्वेन [114A], न स्वभावतो विषयधर्मत्वव्युत्पादनादिति । असम्बद्धयो(योः) धर्मधर्मिभावेस्तु(वस्तु) कथमित्यवं-(व)शिष्यते । तदाशङ्कते - **कथमिति** । परसमवेतक्रियाजनितफलशालित्वेन घटः कर्मभावतामियात् न त्वा(त्व)न्यथापीति । कर्मत्वान्यथानुपपत्त्यापि ज्ञाततेकल्पनमनोरथमप्युत्क(त्था)प्य निराकरोति - **एतेनेति**। **विनाश्यवदिति** । न हि परसमवेतक्रियाफलभागित्वं कर्मत्वम्, आत्मानं जानामीत्याद्यव्यापनात्, कर्तृव्यापारविषयः करणमिति । तत(तः) करणव्यापारविषयः कर्मेति कर्मलक्षणं वक्तव्यम् । तथा च न किञ्चिदनुपपन्नम्। **स्वाभाविकेति** । पटस्य यदि विनाशरूपफलनिरूपकत्वमेव फलाश्रयत्वं तद(दा) ज्ञाने(ज्ञान)निरूपकत्वा-

(त्व)मेव ज्ञानाश(श्र)यत्वमिति तुल्यम् । एवं ताव[द्] ज्ञाततावादी तद्भावावेदकप्रमाणसम्भवेन निराकृतः ।

110. ननु ज्ञानमतीन्द्रियत्वादसाधारणकार्यानुमेयं तदभावे कथमनुमीयेत, अप्रतीतं च कथं व्यवहारपथमवतरेदिति ज्ञानव्यवहारान्यथानुपपत्त्या ज्ञाततताकल्पनम् । तदप्यसत् । परस्पराश्रयप्रसङ्गात् । ज्ञाततया हि ज्ञानमनुमीयेत, ज्ञाते च तद्व्यवहारान्यथानुपपत्तिस्तां ज्ञापयेत् । कुतश्च ज्ञानमतीन्द्रियम् ? इन्द्रियेणानुपलभ्यमानत्वादिति चेत् । न । अनुमानोपन्यासे साध्याविशिष्टत्वात्, अनुपलब्धिमात्रोपन्यासे तु योग्यताऽविशेषिताऽसौ कथमैन्द्रियकोपलम्भाभावं गमयेत्, तद्विशेषणे तु कथमतीन्द्रियं ज्ञानमिति । तथाविधज्ञाततानाश्रयत्वादिति चेत्, न । आश्रयासिद्धेः । व्यवहारान्यथानुपपत्त्यैव सिद्ध आश्रय इति चेत्, न । ज्ञानहेतुनैव तदुपपत्तेः । तस्यात्ममनःसंयोगादिरूपस्य सत्त्वेऽपि सुषुप्तिदशायामर्थव्यवहाराभावान्नैवमिति चेत्, न । तावन्मात्रस्य व्यवहाराहेतुत्वात् । अन्यथा ज्ञानस्वीकारेऽपि तुल्यत्वात् । स्मरणान्यथानुपपत्त्येति चेत्, न । तस्याप्यसिद्धेः ।

110. पुनरपि प्रमाणान्तराभिमानेन प्रत्यवतिष्ठते - **नन्विति** । ज्ञानेऽज्ञाते ज्ञाताव्यवहारो न भवति, घटेऽज्ञाते घटव्यवहारवत्, ज्ञानज्ञानं तु मानसमतोऽन्यथोपपत्तिरत्रापीत्याशयवान् यथोक्तमेव तावद् दूषयति — **परस्परेति** । ननु च ज्ञानव्यवहारान्यथानुपपत्त्या ज्ञाततात्रप्रत्यक्षत्वपरिकल्पनमस्तु, तथा च [त]त्प्रत्यक्षेण तावत् प्रथमं ज्ञातता [प्रतीयते], तथा च प्रतीयमानया तया ज्ञानव्यवहारो जन्यते, स च ज्ञानव्यवहारोऽन्यथानुपपद्यमानो ज्ञा[त]तायाः प्रत्यभिज्ञानविषयतां परिकल्पयतीति । यदि हि निःसंदिग्धं प्रत्यक्षादर्थापत्तिर्गरीयसी, यदा तु प्रत्यक्षत्वमेव परस्परविवादाक्रान्ततया संदिग्धं तदा तद्विषयभूताऽपि संदिग्धैव । तथा च कुतः तथाज्ञान(नं) कथं च ज्ञाताव्यवहार इति । [114B]परस्पराश्रयो भवति । स्वसिद्धान्तावष्टम्भमात्रस्मृत्याऽऽह - **कुतश्चेति**। कथमै(मि)न्द्रियजन्योपलम्भस्याभावं गमयेत् ज्ञानाप्रत्यक्षवादीनामुपलम्भस्यातीन्द्रियत्वादित्यर्थः । **तद्विशेषणे** [इ]ति। योग्यताविशेषणे त्वित्यर्थः । **कथमितीति** । इन्द्रियग्रहणयोग्या(ग्य)त्व अभ्युपगम्यमाने ज्ञानस्य घटादिवत् प्रत्यक्षत्वेऽतीन्द्रियत्वमनुपपन्नमित्यर्थः । ज्ञानमतीन्द्रियं, 'साक्षात्कृतोऽयम्' इति प्रत्ययविषयज्ञाततानाश्रयत्वात्, परमाणुवत्, इत्याशयवान् शङ्कते — **तथाविधेति** । ज्ञानमतीन्द्रियमिति साध्यं प्रत्यक्षवत्वावो(क्षत्वाभावादु)क्तमित्याशयः । इदमप्यनुमानं दूषयति - **नेति** । ज्ञानस्याप्रत्यक्षत्वे मानान्तर(रा)संभवेऽसिद्धम् आश्रयासिद्धं ज्ञानमित्यर्थः । आश्रयसिद्ध्यर्थमर्थापत्तिमाशङ्क्यान्यथोपपत्त्या निषेधति — **व्यवहारेति चेत्** तर्हि **तदुपपत्तेरिति**। व्यवहारोपपत्तेरित्यर्थः । ज्ञानहेतुसद्भावेऽप्यर्थवहाराभावात् । न ज्ञानहेतुताऽन्यथोपपत्तिरित्याशङ्क्य निराकरोति - **तस्येति** । एवमनङ्गीकुर्वाणं प्रति बाधकमाह - **अन्यथेति** । आत्म[म]नःसंयोगस्य ज्ञानहेतुत्वात् सुषुप्तौ ज्ञानमेव किं नोत्पद्यत इति समानोऽनुयोगः । तावन्मात्रस्याहेतुत्वादिति चेत् तर्हि यावती सामग्री ज्ञानमुपजनयति तावत्येव व्यवहारमुपपादयिष्यति । कृतमन्तर्गडुना ज्ञानेनेति ज्ञानाप्रत्यक्षवादीनां ज्ञानमेव न सिद्ध्येदिति भावः । मा भूदुक्तप्रमाणा(ण)वेद्यं ज्ञानम्, प्रमाणान्तरवेद्यं भविष्यतीत्याशङ्कते - **स्मर[115A]णेति**। स्मरणस्यापी(पि) ज्ञानत्वेनातीन्द्रियत्वादप्रतीतेरिति परिहरति - **न, तस्येति** ।

111. अस्ति तावद् व्यवहारनिमित्तं किञ्चिदिति चेत् । किमतः ? न ह्येतावता ज्ञानं तदिति सिद्ध्यति, तस्यैवासिद्धेः । तथापि नियतस्य कर्तुः प्रवृत्तेः कर्तृधर्मेणैव केनचित् प्रवृत्तिहेतुना भवितव्यमिति चेत् । अस्त्विच्छा प्रत्यक्षसिद्धा, न तु ज्ञानमिति । सैव कथं नियताधिकरणे उत्पद्यतामिति चेत्, न ।

ज्ञानाभ्युपगमेऽपि तुल्यत्वात् । स्वहेतोः कुतश्चिदिति चेत् । तत एव इच्छा अस्तु, किं ज्ञानकल्पनयेति । स्यादेतत् । प्रकाशमाने खल्वर्थे तदुपादित्सादिरुपजायते, न तु सुषुप्त्यवस्थायामप्रकाशमानेऽप्यर्थे इत्यनुभवसिद्धम् । तत इच्छायाः कारणं विलक्षणमेव किञ्चित् परिकल्पनीयं यस्मिन् सति सुष्वाप-लक्षणमौदासीन्यमर्थविषयमात्मनो निवर्तते इति चेत् । हन्तैवं सुष्वापनिवृत्तिमनुभवसिद्धां प्रतिजानानेन ज्ञानमेवापरोक्षमिष्यते । अचेतयन्नेव हि सुषुप्त इत्युच्यते, अचैतन्यनिवृत्तिरेव हि चैतन्यं ज्ञानमिति । तथा च कालात्ययापदिष्टो हेतुः । एतेन क्षणिकत्वादिति निरस्तम् । अपि च किमिदं क्षणिकत्वं नाम ? यदि आशुतरविनाशित्वम्, तदानैकान्तिकम् । अथैकक्षणावस्थायित्वम्, तदसिद्धं प्रमाणाभावात् ।

111. ननु प्रवृत्तिरूपव्यवहारस्तावत् प्रत्यक्षसिद्धतयाऽशक्यापह्नवोऽतस्त[द्]व्यवहारान्यथानुपपत्तिनिमित्तं किञ्चिदुपकल्पयिष्यति । तत्त्वज्ञानकार्यमिति ज्ञानस्यासिद्धिरित्याशयवानाशङ्कते - **अस्ति तावदि**ति । **तदि**ति व्यवहारनिमित्तमिति । तस्यैवासिद्धिरित्यर्थः । ज्ञानसिद्धौ हि व्यवहारनिमित्तस्य तज्जन्यतासिद्धिः, त[द]सिद्धौ व्यवहारनिमित्ताज्ञान(त्ताजन्यता)सिद्धिरिति भावः । ननु कर्तृ[धर्म]प्रवृत्तेः कर्तृधर्मकार्यत्वात् कर्तृधर्मश्च ज्ञानमेवेति मन्वानः पुनः शङ्कते – **तथापी**ति । समाधते - **अस्त्विच्छे**ति । एतत् तव ज्ञानाप्रतीतावतीन्द्रिय[त्व]-साधनस्याश्रयासिद्धिं प्रतिजा(ज्ञा)तां सन् समर्थ्य संप्रति ज्ञानाप्रतीतावतीन्द्रियत्वसाधनस्य कालात्यापदिष्टत्वं वक्तुमुपक्रमे(म)त(ते) – **स्यादेतदि**ति । ननु पूर्वोक्तप्रमाणस्य हेत्वाभावः(स)ता, ज्ञानस्यातीन्द्रियत्वेऽनुमानमुच्यते परैस्तत् सर्वं पूर्वन्यायेनाश्रयासिद्धिकालात्ययापदिष्टत्वाभ्यामननुमानमिति मन्तव्यम् ।

**112. ननु स्थायिविज्ञानं यादृशमर्थक्षणं गृह्णदुत्पद्यते, द्वितीयेऽपि क्षणे किं तादृशमेव गृह्णाति, अन्यादृशं वा, न वा कमपि इति । न प्रथमः । तस्य क्षणस्यातीतत्वात् । प्रत्यक्षज्ञानस्य च वर्तमानाभत्वात् । न चातीतमेव वर्तमानाभतयोल्लिखति, भ्रान्तत्वप्रसङ्गात् । न द्वितीयः, विरम्य व्यापारायोगात् । प्रथमतोऽपि तथाभ्युपगमेऽनागतावेक्षणप्रसङ्गात् । न तृतीयः । ज्ञानत्वहानेरिति महाव्रतीयाः । तदसत् । ज्ञानं गृह्णातीत्यस्यैवार्थस्यानभ्युपगमात् । अपि तु तदेव ग्रहणमित्यभ्युपगमः । तथा च ज्ञानं प्रथमे क्षणे यमर्थमालम्ब्य जातं द्वितीयेऽपि क्षणे तदालम्बनमेव तन्न वेति प्रश्नार्थः । तत्र तदालम्बनमेव तदिति परमार्थः । न चैवं भ्रान्तत्वम् । विपरीतानवगाहनात् । तथापि ज्ञेयनिवृत्तौ कथं ज्ञानानुवृत्तिः, तदनुवृत्तौ वा कथं ज्ञेयनिवृत्तिरिति चेत् । किमस्मिन्ननुपपन्नम् । न हि ज्ञानमर्थ-श्चेत्येकं तत्त्वमेकायुष्कं वेति । सत्यपि वा क्षणिकत्वे कथमप्रत्यक्षम् ? इत्थं यथोच्यते – न स्तप्रकाशम्, वस्तुत्वात्, इतरवस्तुवत् । न च ज्ञानान्तरग्राह्यम्, ज्ञानयौगपद्यनिषेधेन समानकालस्य तस्याभावात् । ग्राहककाले ग्राह्यस्यातीतत्वेन वर्तमानाभत्वानुपपत्तेः । ग्राह्यकाले च ग्राहकस्यानागतत्वात् इति चेत् । नन्वेवं ज्ञाततापि न प्रत्यक्षा स्यात्, क्षणिकत्वात् । कथम् ? इत्थम् – न स्वप्रकाशा वस्तुत्वात् । न जनकग्राह्या, अनागतत्वात्, विरम्यव्यापारायोगाच्च । न समसमयज्ञानग्राह्या, ज्ञानजन-केन्द्रियसम्बन्धानुभवात् । न च तदुत्तरज्ञानग्राह्या, तदानीमतीतत्वादिति । क्षणिकत्वमेव तस्याः कुत इति चेत् । त्वदुक्तयुक्तेरेव । तथाहि – यं क्षणमाश्रित्य जाता ततः परमपि तमेवाश्रयतेऽन्यं वा, न वा कमपि । तत्र न प्रथमः । तस्य तदानीमसत्त्वात् । न द्वितीयः । अप्रतिसंक्रमात् । एक-क्षणावगाहिनि च ज्ञाने तदन्यक्षणाश्रयज्ञाततापफलत्वेन भ्रान्तत्वप्रसङ्गात्, रजतावगाहिनि पुरोवर्तिवृत्ति-ज्ञाततापफल इव । न चान्यमपि क्षणं ज्ञानमवगाहते, तदानीं तस्यासत्त्वात् । न तृतीयः । निःस्वभाव-

ताप्रसङ्गात् । न ह्यसौ तदानीं तदीयान्यदीया वेति । अतीतेनापि तेनैव क्षणेनोपलक्षितानुवर्तते इति चेत् । एवं तर्हि वर्तमानार्थता प्रकाशस्य न स्यात् । अन्यथा ज्ञानस्यापि तथानुवृत्तेः को दोषः । न हि वर्तमानार्थप्रकाशसम्बन्धमन्तरेण ज्ञानस्यान्या वर्तमानावभासता नाम । अर्थनिरपेक्षप्रकाशनानुवृत्तिमात्रेण तथात्वे भूतभाविविषयस्यापि ज्ञानस्य तथाभावप्रसङ्गात् । अथ मा भूदयं दोष इति स्थूल एव वर्तमानः प्रकाशेनाश्रीयते इत्यभ्युपगमः, तदा तज्ज्ञानस्यापि स एव विषय इति तस्यापि न क्षणिकत्वमिति ।

112. ननु ज्ञानस्यानेकक्षणावस्थायित्वे बाधकसंभवादेककाल[क्षणा]वस्थानसिद्धौ कुतोऽसिद्धिः क्षणिकताया इति मन्वानोऽनेकक्षणावस्थायित्वबाधकमाह - **नन्विति** । यदीति शेषः । **यादृशं** प्र[थ]मक्षणावच्छिन्नमित्यर्थः । **तादृशमेव** प्रथमक्षणावच्छिन्नमेव । **अन्यादृशं** द्वितीयक्षणावच्छिन्नमित्यर्थः । **न वा कमपीति** न प्रथमक्षणावच्छिन्नम्, न द्वितीयक्षणावच्छिन्नम् इत्यर्थः । न च प्रथमक्षणावच्छिन्नत्वेन घटादयोऽनुभूयन्ते किन्तु घटत्वाद्यवच्छिन्नत्वेन, तथा चानेककालावस्थानेऽपि ज्ञानस्य नोक्तदोष इत्याशयवान् समाधत्ते — **तदसदिति** । प्रथमक्षणावभा[115B]साभ्युपगमेन शङ्कते । **ज्ञेयनिवृत्तौ** प्रथमक्षणरूपज्ञेयनिवृत्ताविवत्यर्थः । **तदनुवृत्तौ वा** ज्ञानानुवृत्ताविवत्यर्थः । नाक्र(त्र) क्षणावभासोऽस्तीत्युक्तम् । घटादयो हि भासन्ते । न च प्रचुरतरकालावस्थायिनां तेषां निवृत्तिः, ज्ञानविनाशे तेषामवस्थानसंभवात्, तस्मात् प्रथमक्षणावभासमभ्युपगम्य तन्निवृत्तावपि ज्ञानानुवृत्तिः ज्ञानानुवृत्तौ ज्ञेयनिवृत्तिरित्याशयवान् परिहरति — **किमस्मिन्निति** । एवं तावदुक्तन्यायेनाक्षणिकत्वा(त्वं) विज्ञानस्येति समर्थितम्, संप्रति क्षणिकत्वाभ्युपगमेऽपि नातीन्द्रियत्वमिति प्राकट्यप्रतिबन्दिद्वारेण समर्थयति - **तथानुवृत्तरिति**। अतीतेनापि क्षणेनोपलक्षितस्य वर्तमान(ना)[र्थ]तयाऽनुवृत्तेरित्यर्थः । ननु ज्ञातता[पक्षे] अर्थनिरपेक्षवर्तमानज्ञाततासम्बन्धमात्रेणैव तज्जनकत्वा(स्य) ज्ञानस्य वर्तमानाभू(भ)ताऽर्थापि(त्य)य(ये)ऽप्युपपद्यते । अन्वये (त्वन्नये) त्य(अ)र्थस्यातीतत्वा[द्] ज्ञाततायाश्रयानभ्युपगमात् कथमुपपद्यत इत्यतोऽतिप्रसङ्गापादनेन समीकर्तुमाह - **न हि वर्तमानार्थेति** ।

113. ननु ज्ञानमैन्द्रियकं चेद् विषयसञ्चारो न स्यात् । संजातसम्बन्धत्वात् । न च जिज्ञासानियमान्नियमः । तस्याः संशयपूर्वकत्वात् । तस्य च धर्मिज्ञानपूर्वकत्वात् । धर्मिणश्च सन्निधिमात्रेण ज्ञाने जिज्ञासापेक्षणे वा उभयथाऽप्यनवस्थानादिति । तन्न । ज्ञाततापक्षेऽपि तुल्यत्वात्, तस्या अपि हि ज्ञेयत्वे तत्परम्पराज्ञानापाताज्जिज्ञासानियमस्य च तद्वदनुपपत्तेः । न च इन्द्रियसम्बन्धविच्छेदाद् विराम इति युक्तम् । आत्मप्राकट्याव्यापनात् । स्वभावत एव काचिदसावजिज्ञासितापि ज्ञायते, न तु सर्वेति चेत्, तुल्यम् । प्रागुत्पन्नज्ञाततास्मरणजनितजिज्ञासः समुन्मीलितनयनः सञ्जातज्ञानसमुत्पादितप्राकट्यं जिज्ञासुरेव प्रतिपद्यते इत्यतो नानवस्थेति चेत्, तुल्यमेतत् । ननु ज्ञानं न सविकल्पकग्राह्यम्, तस्य निर्विकल्पकपूर्वकत्वात् निर्विकल्पकगृहीतस्य तावत्कालानवस्थानात् तस्य तेनैव विनाशात् । नापि केवलनिर्विकल्पकवेद्यम् । तस्य सविकल्पकोन्नेयत्वेन तदभावे प्रमाणाभावात् । न च समवायाभाववद् निर्विकल्पकनिरपेक्षसविकल्पकगोचरत्वं ज्ञानस्येति साम्प्रतम् । तयोर्विशेषणांशस्य प्राग्ग्रहणादनुमानादिवत् तदुपपत्तेः । प्रकृते तु ज्ञानत्वादेरनुपलब्धेरगृहीतविशेषणायाश्च बुद्धेर्विशेष्यानुपसंक्रमात् कथमेवं स्यात् । न । उत्पन्नमात्रस्यैव बाह्यविषयज्ञानस्यालोचनात् । ततस्तत्पुरःसरं प्रथमत एव तज्जातीयस्य ज्ञानान्तरस्य विकल्पनात् । इन्द्रियसन्निकर्षस्य तदैव विशेषणग्रहणलक्षणसहकारिसम्पत्तेः । व्यक्त्यन्तरसमवेतमपि

हि सामान्यं गृहीतं तदेवेत्युपयुज्यते, अन्यथा अनुमानादिविकल्पानामनुत्पादप्रसङ्गः । तद्गतस्य विशेषणस्याग्रहणात्, अन्यगतस्य चानुपयोगात्, किं लिङ्गग्रहणसहकारि स्यादिति ।

113. एवं तावद् ज्ञानस्यातीन्द्रियत्वात् साधननिराकरणं कृतम्, अथैन्द्रियकत्वे परोक्तबाधकमुव्व(द्भा)व्य साधनं वक्तव्यमिति मन्वानो बाधकमाशङ्कते - **नन्वि**ति । **जिज्ञासापेक्षणे वे**ति । जिज्ञासा हि सामान्यतोऽवगते धर्मिणि विशेषतश्चापरिज्ञाते भवति । ततश्च जिज्ञासासिद्ध्यर्थं सामान्येन ज्ञानानुभवो वाच्यः । तस्यापि च सामान्येन ज्ञानानुभव[स्य] सिद्ध्यर्थं जिज्ञासा वाच्या । साऽपि च सामान्यानुभवपूर्विका, मा(सोऽ)पि च जिज्ञासाधीनजन्मेति पूर्वपूर्वजिज्ञासापेक्षायामनवस्थाप्रसङ्गः । किञ्चिद् ज्ञानेन जिज्ञासितं ज्ञायते किञ्चित्त्वज्ञातमेव विनश्यतीति अनियमेन पूर्वदोषानुषङ्गः, अन्यथा ज्ञाततापक्षेऽपि समानमित्याशयवान् समाधानमुपक्रमते – **तन्ने**ति । पुनर्ज्ञानप्रत्यक्षतायाः प्रकारान्तरेण बाधकमाशङ्क्यते – **न त्वि**[116A]ति । **समवायाभाववदि**ति समवायवदभाववच्चेत्यर्थः । अत्रापि किञ्चिद् ज्ञानं निर्विकल्पकैकवेद्यं, किञ्चित् सविकल्पकैकवेद्यं, अवेद्यं च किञ्चिदित्यनियमस्वीकारे पूर्वोक्तदोषानवकाश इति हृदि निधाय परिहरति – **ने**ति । **आलोचनादि**ति । आलोचनं यतः ततस्तत्पुरस्सरमिति ने(ज्ञे)यम् । न च ज्ञानान्तरविकल्पोऽपि कथं निर्विकल्पकमन्तरेणेति वाच्यम्, तस्यापि विकल्पान्तरपूर्वकत्वादित्येवमादित्वात् । न चे(चै)वं, घटादिविकल्पोऽपि न किकल्पपूर्वक इति जितं सविकल्पकैकप्रमाणवादिभिरिति चेत्, भवेदेवं यदि जातिरेव विशेषणं स्यात् । प्रतिधर्मि व्यभिचारिणां नीलादीनामपि विशेषणत्वात् । अतस्तदर्थमवश्यं कल्पनीयं निर्विकल्पकं सामान्यमप्युपनयति । सन्निहितपरित्यागे व्यवहितपरिग्रहस्य गुरुत्वात् । अपि च निर्विकल्पकपृष्ठभाविसविकल्पग्राह्यमेव ज्ञानम् । तथाहि – आत्ममनःसंयोगस्य बुद्ध्यात्मसमवायस्य च पूर्वसिद्धत्वेन [उत्पन्नं] ज्ञानं मनसा सम्बद्धं चेत्येकः कालः । ततो निर्विकल्पकस्योत्पादो ग्राह्यज्ञानस्य विनश्यत्ता विकल्पस्योत्पद्यमानतेत्येकः कालः । ततो विकल्पस्योत्पादः, निर्विकल्पकस्य विनश्यत्ता ग्राह्यज्ञानस्य विनाश इत्येवमसमानकालत्वेऽप्यव्यवहितपूर्वापरकालभावित्वात् कार्यकारणभावस्य विषयविषयिभावस्य द्वित्वतद्बोधवद् विन[श्य]त्तया [त]द(द्) विनश्यत(ति) घटादि सन्निकर्षानन्तरं च ज्ञानप्रत्ययवद् वानुपपत्तेरभावादिति रहस्यम् । ननु यदा निर्विकल्पकवेद्यमेकं ज्ञानमपरं च सविकल्पकवेद्यं तदा व्यक्तंतर(व्यक्त्यन्तर)परिगृहीतेन व्यक्तेतरे(व्यक्त्यन्तरे) ज्ञानजातीयताविशिष्टविकल्पोत्पादस्य संभवादित्युक्तमनुपपन्नें(न्नं) चैतद्विकल्पानुपपत्तेः । ज्ञानत्वं किं ग्राह्य[116B]शुक्तिसमवेतत्वेन गृहीतविशेषणमन्यव्यक्तिसमवायि(वेत)त्वेन वा ? न तावदन्यव्यक्तिसमवायि(वेत)त्वेन । न हि कलशान्तरसमवायि(वेत)त्वेन गुणकृपा(क्रिया)दयोऽनुभूताः कलशान्तरे विशिष्टप्रत्ययमुत्पादयन्तो दृष्टाः, नापि तत्समवायिक(वेत)त्वेन, तथा सति तदुत्पत्त्यनन्तरं ज्ञानव्यक्तेर्नाशात् प्रत्यक्षत्वानुपपत्तेरिति हृदि निधायाह - **व्यक्त्यन्तरे**ति । व्यक्त्यन्तरे स्वरूपेण गृहीतं ज्ञानत्वं व्यक्त्यन्तरोपरक्तबुद्ध्युत्पत्वा(त्तौ) उपयुज्यते, यथा पर्वतोऽग्निमानिति विकल्पोत्पत्तौ । तत्रापि शक्यते वक्तुं किं व्यक्त्यन्तरं(रे) परिगृहीतं वह्निस्व(त्व)रूप(पं) पर्वतोऽग्निमानिति विकल्पा(ल्पो)त्पत्तौ बीजं पर्वतनिष्ठतया वा [परिगृहीतम्] । न तावदाद्यः, न ह्यत्र परिगृहीतं विशेषणमन्यत्र विशिष्टप्रत्ययमुत्पादयतीति त्वायवो(त्वया चो)क्तत्वात् । न द्वितीयोऽनुमानविकल्पोत्पत्तेः पूर्वं विशेषणस्य दहनस्यागृहीतत्वात्, तस्माद् व्यक्त्यन्तरगृ[ही]तमपि वह्नित्वरूपं वर्तते स्वोपरक्तविशिष्टबोधोत्पत्तावुपयुज्यते । विशेषणस्याभिन्नजातीयत्वादिति वाच्यम् । अनन्यगतिकत्वादेवं तर्हि ज्ञानत्वस्य विशेष[ण]स्याभिन्नत्वात् सुतरां विशिष्टप्रत्ययोत्पत्तानु(वु)पयोग इत्याशयवानाह - **अन्यथे**ति। **तद्गतस्ये**ति पर्वतग[त]स्येत्यर्थः ।

114. एतेन शब्दादिप्रत्यक्षं व्याख्यातमिति । स्यादेतत् । विषयनिरूप्यं हि ज्ञानमिष्यते । न चातीन्द्रियस्य परमाण्वादेर्मनसा वेदनमस्ति । न चागृहीतस्य विशेषणत्वम् । न च नित्यपरोक्षस्यापरोक्षविशिष्टबुद्धिविषयत्वं व्याघातादिति । न । बह्वेन्द्रियग्राह्यस्याग्राह्यस्य वा पूर्वज्ञानोपनीतस्यैव मनसा वेदनात् । अन्यथातीन्द्रियस्मरणस्याप्यनुत्पत्तिप्रसङ्गात् । इयांस्तु विशेषः – तस्मिन् सति तद्बलादेव, असति तु तज्जनितवासनाबलात् । न चैवंसति स्मरणमेतत् । अगृहीतज्ञानगोचरत्वात् । न च विषयांशे तत् तथा स्यादिति युक्तम् । अवच्छेदकतया प्रागवस्थावदवभासनात् ।

114. ज्ञानस्य निर्विकल्पकवेद्यत्वप्रकारस्तु(स्तू)क्तमन्यत्राप्यतिदिशन्ति – **एतेने**ति । यथाह - व्यक्त्यन्तरगृहीतं ज्ञानत्वं व्यक्त्यन्तरविषयविकल्पोत्पत्तौ निमित्तमेवं गकारादिव्यक्त्यन्तरविकल्पोत्पत्तौ निमित्तमित्यर्थः । ननु ज्ञानस्यार्थावच्छिन्नस्य मानसप्रत्यक्षत्वे नातीन्द्रियार्थविषयज्ञानस्य मानसप्रत्यक्षत्वं, तथा च त[द्] दृश्यते, नेतरज्ञानस्यापि मानस्य(स)प्रत्यक्षत्वनिषेध इत्याशयवान् परः शङ्कते – **स्यादेतदि**ति । ज्ञानान्तरमन्तर्मुखतया सुखादिवद् विषयनिरपेक्षमेव गृह्यते । अथवा परमेश्वरे ज्ञानस्य[117A] स्वीकारेऽपि स्वसंवेदनापत्तिर्दुष्परिहारेति । एकज्ञानस्य स्वेतरपदार्थावगाहिनो द्वितीयज्ञानावगाहनसंभवे द्वितीयेन प्रथमज्ञानग्रहणाभ्युपगमे विषयानवच्छेदस्वीकार(रः) स्वात्मनोऽपि पूर्वज्ञानविषयस्य ग्रहणसम्भवात् । इतरथा विषयान्नवि(नव)च्छिन्नस्य ज्ञानस्य ग्रहणेन विषयभूतस्य स्वात्मनो ग्रहण(णं) निरन्तरं स्वसंवेदनत्वमिति । यद्यपि परमार्थतत्त्वाद्यदीश्वरज्ञानस्य विषयावच्छिन्नस्य ग्रहसा(ण)मभ्युपगम्य पूर्वोक्तदोषं परिहरति – **न बाह्ये**ति । ज्ञानद्वारा ब(बो)धो बहिः प्रवर्तते इन्द्रियद्वारेण रूपादौ, तथावतिग(वगति)जनितलिङ्गबोधस्य मानसत्वाभ्युपगमे नोक्तदोषापत्तिरि[ति] तात्पर्यम् । यदि च ज्ञानसंस्काराद्यपेक्षमपि मनो बाह्येन्द्रिये न प्रवर्तते ततः व(त)त्कारणिका स्मृतिरतीन्द्रिया(ये) विषये न स्यादिति बाधकमाह – **अन्यथातीन्द्रिये**ति । ननु यदि ज्ञानादनुव्यवसायः स्मरणं च स्याताम् तदाऽनुव्यवसायः साक्षात्कारवान् स्मरणं तु विपरीतमित्येतत् कुत इत्याह – **इयांस्त्वि**ति । **तस्मिन् सति** ज्ञाने सतीति । तस्मादेव ज्ञानादेवानुव्यवसायोऽत इन्द्रियार्थसन्निकर्षजत्वेनापरोक्षानुव्यवसाय इत्यभिप्रायः । असति तु ज्ञान इति बोद्धव्यम् । अतुः(तः) संस्कारातिरिक्तसन्निकर्षविरहात् परोक्षं भवति स्मरणमित्यभिप्रायः । न तु बहिरिन्द्रियलिङ्गादिविषयत्वाद् अनुव्यवसायस्य गृहीतगोचरत्वेन स्मरणमेव स्यादित्याशयवानाशङ्कते - **न चैवमि**ति **एतदि**ति । मनसा बहिरिन्द्रियानुभवोपनीतार्थग्रहणमिति परिहरति [117B] – **अगृहीते**ति । अगृहीतं च तत् ज्ञानं चागृहीतज्ञानम्, तद्गोचरो यस्यानुव्यवसायस्तस्य भावस्तत्त्वं, तस्मादिति । पूर्वोक्ताभिप्रायेण पुनराशङ्कते - **न चे**ति । परिहरति - **अवच्छेदकतये**ति । यथा प्रागवस्थास्मरणसहकारिणा चक्षुषा जनिते प्रत्यभिज्ञाने प्रागवस्थायाः संयुक्तविशेषणतया स्फुरणमभ्युपेयते तथा व्यवसायसहकारिणा मनसा जनितोऽनुव्यवसायः संयुक्तसमवेतविशेषणतया विषयस्फुरणेऽपि न तत्र तस्य स्मरणत्वं प्रत्यभिज्ञानेन प्रागवस्थायामिवेत्यर्थः ॥छ॥

115. न प्रत्यभिज्ञानमपि ग्रहणस्मरणाकारम् । विरोधात् । अथ ग्रहणस्मरणयोः कियती सामग्री ? अधिकोऽर्थसन्निकर्षो ग्रहणस्य, संस्कारमात्रं सन्निकर्षः स्मरणस्य । अथ ग्रहणत्वेऽपि कुत एतदपरोक्षाकारम् ? कारणान्तरनिरपेक्षेण संस्काराधिकसन्निकर्षवतेन्द्रियेण जनितत्वात् । अथ कः सन्निकर्षः ? ज्ञानेन संयुक्तसमवायः, तदर्थेन संयुक्तसमवेतविशेषणत्वमिति । मनसो निरपेक्षस्य बहिर्व्यापारेऽन्धबधिराद्यभावप्रसङ्ग इति चेत् । अत्रापि ज्ञानावच्छेदकं प्रति नायं दोषः । न च ज्ञानापेक्षया बहिरित्यस्ति । नापि तद्विषयापेक्षया निरपेक्षत्वम्, तस्यैव ज्ञानस्यापेक्षणात् । अथापि ज्ञानं

प्रत्यक्षमित्यत्र किं प्रमाणम् ? प्रत्यक्षमेव । यदसूत्रयत् – 'ज्ञानविकल्पानां भावाभावसंवेदनादध्यात्मम्' [न्यायसू. ५.१.३१] इति ।

115. ननु प्रत्यभिज्ञानस्यापि पूर्वावस्थायां स्मृतित्वमित्याशङ्क्य परिहरति – **न चे**ति । नन्वसतो गृहीतग्राहित्वात् प्रत्यभिज्ञायाः स्मृत्यंशानभ्युपगमे ग्रहणे(ण)स्मरणयोर्नि(र्वि)भागो दुःख(दुरव)धार[ण] इत्याशयवान् शङ्कते - **अथे**ति **अधिक** इत्यादि । ननु तथापि साक्षादिन्द्रियासन्निकृष्टविषयत्वादनुव्यवसायस्य कथं साक्षात्कारित्वमित्याशयवान् पृच्छति – **अथे**ति । इन्द्रियसन्निकृष्टविषयत्वादेवापरोक्षाकारोऽनुव्यवसाय इत्युत्तरमाह - **कारणे**ति । इन्द्रियेण मनसा जनितत्वा[त्], किंविशिष्टेन ? करणान्तरनिरपेक्षेणेति । यत्र हि लिङ्गशब्द-सादृश्यसापेक्षं मनो ज्ञानमुपादत्ते तत्र परोक्षाकारमिति, तद(द्)व्यवच्छेदः संस्काराधिकेत्यादिना, संस्कारमात्रमपेक्ष-माणस्मरणस्य न साक्षात्कार इति तद्व्यवच्छेदः न तु संस्काराधिकसन्निकर्षे[ण], संस्काराधिकसन्निकर्ष एवेन्द्रियस्य मनसो नोपपद्यत इति उक्तमित्याशयवानाक्षिपति – **क** इति । समाधत्ते – **ज्ञानेन**[118A]त्यादिना विशेषणत्वमित्यनेन ने(न) त्वन्यत्रेन्द्रियसापेक्षं मनो बहिः प्रवर्तते इति दृष्टम् । नन्वितरनिरपेक्षम् । अथानु-व्यवसायजनकमनसः कथमितरनिरपेक्षस्य बहिः प्रवर्तनम् । तथात्वे अन्धबधिराद्यभाव इति पूर्वमाशङ्कते – **मनस** इति । **अत्रापी**ति । यदि जनितव्यवसाये सापेक्षस्य मनसो बहिः प्रवर्तने नोक्तदोषापत्तिरिति समाधत्ते - **ज्ञानावच्छेदकमि**ति । ज्ञानाग्रहणप्रार्थिणोऽनुव्यवसायो(ये) न स्वातन्त्र्येण [पू]र्वग्रहणरूपमिति समाधानान्तरमाह – **न चे**ति । ज्ञानस्योभेयसिद्धस्य प्रत्यक्षत्वाप्रत्य[क्ष]त्वविप्रतिपन्ना(त्ता)वप्रत्यक्षत्वे साधकप्रमाणविरहा(ह)बाधक-प्रमाणसद्भावाभ्यास(म)प्रत्यक्षत्वनिषेधेन परपक्षनिषेधादेव पर(स्व)पक्षसिद्धिरिति मन्वानो नैयायिकं पृच्छति – **अथापी**ति । अत्र सूत्रकारोक्तं मानसप्रत्यक्षमेव ज्ञानप्रत्यक्षत्वे प्रमाणयति - **प्रत्यक्षमेवे**ति । **ज्ञानविकल्पानां** [ज्ञान]भेदानां प्रात्यक्षिकलैङ्गिकौपम्यशब्दानां भावाभावौ संवेद्येते । अस्ति मे प्रात्यक्षिकं ज्ञानमानुमानिकमौप-मानिकं शाब्दं वेति, नास्ति मे प्रात्यक्षिकं ज्ञानमित्यादिकमित्याका[ङ्]क्ष(क्षा)यामाह - **अध्यात्मं** मानसमित्यर्थः । अत्र न्यायरुचिं प्रत्यनुमानमुच्यते – ज्ञानं मानसप्रत्यक्षमाशुविनाश्यात्मविशेषगुणत्वात् सुखवत् ।

116. ननु नेश्वरज्ञानं प्रमा, नित्यत्वेनाफलत्वात् । नापि प्रमाणम् । अकारकत्वात् । अत एव च न तदाश्रयः प्रमातेति । उच्यते –

मितिः सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥५॥

समीचीनो ह्यनुभवः प्रमेति व्यवस्थितम् । तथा च अनित्यत्वेन विशेषणमनर्थकम् । नित्यानुभव-सिद्धौ तद्व्यवच्छेदस्यानिष्टत्वादसिद्धौ च व्यवच्छेद्याभावात् । न चेदमनुमानम्, आश्रयासिद्धिबाध-योरन्यतराक्रान्तत्वात् । न तत्प्रमाकरणमिति त्विष्यत एव, प्रमया सम्बन्धाभावात् । तदाश्रयस्य तु प्रमातृत्वमेतदेव यत् तत्समवायः । कारकत्वे सतीति तु विशेषणं पूर्ववन्निरर्थकमनुसन्धेयम् । यद्येवम् 'आप्तप्रामाण्यात्' [न्यायसू० २.६.६७] इति सूत्रविरोधः । तेन हीश्वरस्य प्रामाण्यं प्रतिपाद्यते, न तु प्रमातृत्वमिति चेत्, न । निमित्तसमावेशेन व्यवहारसमावेशाविरोधात् । प्रमासमवायो हि प्रमातृव्यवहार-निमित्तम्, प्रमया त्वयोगव्यवच्छेदेन सम्बन्धः प्रमाणव्यवहारनिमित्तम्, तदुभयं चेश्वरे । अत्रापि कार्ययेति विशेषणं पूर्ववदनर्थकमूहनीयम् ।

116. प्रत्यक्षत्वानुपपत्तौ वस्तुत्वात् सुखवदेव प्रकारान्तरेणेतरज्ञानस्वभावकरणकर्तृव्युत्पत्तिमभ्युपेत्य प्रमात्वं प्रमाणत्वं प्रमातृत्वं च निषेधतीति उक्तम् । तर्का(र्क)परिशु[118B]द्धिविभवेऽपि तु अफलत्वादफलरूपत्वादित्यर्थः । ईश्वरज्ञानं न प्रमाणमिति त्विष्टमेवास्माकमफलत्वं च । तथाप्युक्तप्रमाणयोगे च सर्वमुपपद्यते इति नोक्तदोष इत्याह — **मिति**रित्यादि । कुत एव[म्] । पूर्वोक्तव्यवस्थापितप्रमाणलक्षणं स्मारयति - **समीचीनो ही**ति । **अनित्ये**ति विशेषणं संभवव्यभिचाराभ्यामुपदया[१] नान्यथेति मन्वान आह - **तथा चे**ति । न तु नेश्वरज्ञानं प्रमा फलरूपत्वादित्यत्रानुमानिकं दूषणमित्यत आह — **न तदि**ति । सिद्ध्यसिद्ध्योरुभयोरपि व्यवच्छेद्याभावादित्यर्थः । ननु यदीश्वरस्य प्रमातृत्वं तदा तत् प्रमाण(णं) न । 'आप्तप्रामाण्यात्' इति सूत्रप्रतीकारं विरोधमाशङ्क्यते - **यद्येवमि**ति । यद्यपि 'आप्तप्रामाण्यात्' इति सूत्रमाप्तानां प्रमासमवायाभिप्रायेण सङ्गच्छते तथापीश्वरा(र)प्रमाणव्यवहारनिमित्तसद्भावेन यथाश्रुतसूत्रान्यथाकरण(णं) व्याख्यातृणामुचितमित्याशयवान् परिहरति - **न निमित्ते**ति । नन्वयोगव्यवच्छेदेन किमात्यन्तिकयोगोऽभिमतः कादाचित्कयोगो वा । आद्ये चक्षुरादीनामात्यन्तिकयोगविधुराणां सर्वजनसिद्धप्रामाण्ये(ण्यं) न स्यादित्यव्यापकनिमित्तं कथमाद्रियामहे । द्वितीयेऽपि परमेश्वरस्य सदा प्रमायुक्तस्यासंभवेनैवाव्यापकमिति न द्वि(वि)द्वज्जनमनोहरं निमित्तमिति नाङ्गीकुर्मः । नैवमनवबोधात् । चक्षुरादीनामपि न सर्वदा प्रमाणत्वमस्ति किन्तु चरमसहकारिप्राप्तिसमये । तथा च विशेषौ । तदेव सामान्यमिह विवक्षितम् । अतो विशेषो विशेषे व्यवतिष्ठते । स च लोके [119A] तस्मिन् सति प्रमाणं जायत इति, त(स) चः(च) साकारः, अन्यत्र तु यस्मिन् विद्यमाने प्रमा न विद्यत इति न भवतीति । न किञ्चिदनुपपन्नमिति । सामान्यं तु प्रमा(म)या त्वयोगव्यवच्छेदेन सम्बन्धः । समवाय(यः) कार्यकारणभावोऽन्यतरस्वभाव इति बोद्धव्यम् । ननु कार्य(र्यं) प्रमासमवायस्तदयोगव्यवच्छेदे लोकव्यवहार(रः) निमित्तमिति कथं परमेश्वरे तद्व्यवहार इत्यत आह - **अत्रापी**ति पूर्ववदिति । सिद्ध्यसिद्ध्योरुभयोरपि व्यवच्छेद्याभावादित्यर्थः ।

117. स्यादेतत् — प्रमीयतेऽनेनेति प्रमाणम्, प्रमिणोतीति प्रमातेति कारकशब्दत्वमनयोः, तथा च कथमकारकमर्थ इति चेत् । न । एतस्य व्युत्पत्तिमात्रनिमित्तत्वात् । प्रवृत्तिनिमित्तं तु यथोपदर्शितमेव व्यवस्थापनात् । अन्यथा अस्मदादिषु न प्रमातृव्यवहारः स्यात्, सर्वत्र स्वातन्त्र्याभावात् । करणव्यवहारस्तु अन्यत्र यद्यप्यन्यनिमित्तकोऽपि, तथापीहोक्तनिमित्तविवक्षयैवेति । एवं तर्हि पञ्चमप्रमाणाभ्युपगमेऽपसिद्धान्तः । न हि तत् प्रत्यक्षमनुमानमागमो वा, अनिन्द्रियलिङ्गशब्दकरणत्वात् । न, साक्षात्कारिप्रमावत्तयः प्रत्यक्षान्तर्भावात् इन्द्रियार्थसन्निकर्षोत्पन्नत्वस्य च लौकिकमात्रविषयत्वात् ।

117. **अनयोः** प्रमातृ-प्रमाणशब्दयोः **कथमकारकमर्थ** इत्यर्थः । उभयशब्दोऽपि प्रमातृशब्दसमर्थनं करोति । **एतस्ये**ति **अन्यथे**ति । यदि प्रमाकर्तृत्वेन प्रमातृत्वं तदा अस्मदादीनामाद्यप्रमां प्रत्यकर्तृत्वात् प्रमातृत्वं लोकप्रसिद्धं न स्यादित्यर्थः । प्रमाशब्दं समर्थयति — **करणे**ति । **अन्यथे**(त्रे)ति लोके । **अन्यनिमित्तकोऽपी**ति । अयोगव्यवच्छेदेन जनकत्वनिमित्तकोऽपीति । एतेन कारकविशेष[वाचकः] प्रमाणशब्दः परमेश्वरे न वर्तते किन्त्वन्यथेत्युक्तं भवति । ननु तथापीश्वरप्रमाणं भवतोक्तप्रमाणेषु नान्तर्भवति, तथा च पञ्चमप्रमाणाभ्युपगमः स्यादित्याशङ्क्यते — **एवं तर्ही**ति । साक्षात्कारिप्रमया त्वयोगव्यवच्छेदेन सम्बन्धसम्भवे प्रत्यक्षप्रमाणा[न्त]र्भावान्नोक्तदोषावकाश इति परिहरति — **ने**ति । यथाश्रुतं सूत्रं तु लौकिकप्रत्यक्षपरमित्याह — **इन्द्रियार्थे**ति ।

---

१. पाठो भ्रष्टः ।

118. स्यादेतत् – तथापीश्वरज्ञानं न प्रमा, विपर्ययत्वात् । यदा खल्वेतदस्मदादिविभ्रमानालम्बते, तदैतस्य विषयमस्पृशतो न ज्ञानावगाहनसम्भव इति तदर्थोऽप्यालम्बनमभ्युपेयम्, तथा च तदपि विपर्ययः, विपरीतार्थालम्बनत्वात् । तदनवगाहने वा अस्मदादेर्विभ्रमानविदुषस्तदुपशमायोपदेशानामसर्वज्ञपूर्वकत्वमिति । न । विभ्रमस्याप्रामाण्येऽपि तद्विषयस्य तत्त्वमुल्लिखतोऽभ्रान्तत्वात् । अन्यथा भ्रान्तिसमुच्छेदप्रसङ्गः । प्रमाणाभावात् । तथाप्यारोपितार्थावच्छिन्नज्ञानालम्बनत्वेन कथं न भ्रान्तत्वमिति चेत् । न, यद् यत्र नास्ति तत्र तस्यावगतिरिति भ्रान्त्यर्थत्वात् एतदालम्बनस्य चैवमुल्लिखितः सर्वत्र यथार्थत्वात् । न हि न तद्रजतम्, नापि तत्रासत्, नापि तन्नावगतमिति ।

साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः ।
लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिवः ॥६॥

॥ इति चतुर्थः स्तबकः ॥

118. पुनः परेषामीश्वरविद्वेषीणामाक्षेपमुत्थाप्य परिहरति - **स्यादेतदिति** । **प्रमाणा**[119B]**भावादिति**। तस्मिंस्तदिति प्रत्ययो ह्यभ्रान्तिलक्षणम्, अस्ति चैतदत्र यद् व्यज्यति(ते) न हि तद् रजतमित्यादि एवमपि भ्रान्तत्वे वा भ्रान्तिसमुच्छेदप्रसङ्ग इत्यर्थः । सकलपरिच्छेदार्थमीश्वरस्तुतिव्याजेन सङ्कलयति - **साक्षादिति** । यस्य भूतार्थानुभवे विषयतया प्रविष्टो निःशेषचित्रवस्तूनां क्रमो यस्मिन् सोऽस्मन्मते शिवः प्रमाणं, नाप्रमाणमिति कण्ठतः परनिरासः । प्रमाणं साक्षात्कारणमिति ध्वनिः ।

इति परमपाशुपताचार्यश्रीवामेश्वरध्वजविरचिते
न्यायकुसुमाञ्जलिनिबन्धे चतुर्थः परिच्छेदः समाप्तः ॥

मिथ्याज्ञानतमिस्रमुद्रितदृशः संसारदुःखाकुलान्
लोकान् दर्शयितुं सुमार्गमभितो न्यायागमैर्व्यञ्जितम् ।
श्रीवामध्वजनामधेयमुनिना विद्यावतामर्चिता
टीकेयं कुसुमाञ्जलेर्विरचिता चेतश्चमत्कारिणी ॥

शुभमस्तु । मिश्रशूलपाणिसुतउपाध्यायश्रीमहादेवस्य पाठार्थं तीरभुक्ति सं० चौसावास्तीकठक्कुर श्रीमाधवेन लिखितमिदम्। यथा दृष्टं तथा लिखितमिदम् । शुभमस्तु सर्व जगतां परहृदः ।

पञ्चमः स्तबकः

119. तत्साधकप्रमाणाभावदिति पञ्चमीं विप्रतिपत्तिं निराकर्तुमपन्यस्यति – नन्वीश्वरे प्रमाणोपपत्तौ सत्यां सर्वमेतदेवं स्यात् तदेव तु न पश्याम इति चेत् । न ह्येष स्थाणोरपराधो यदेनमन्धो न पश्यति । तथाहि –

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥१॥

क्षित्यादि कर्तृपूर्वकं कार्यत्वादिति ।

न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धो न दुर्बलैः ।
सिद्ध्यसिद्ध्योर्विरोधो नो नासिद्धिरनिबन्धना ॥२॥

119. ॥ ॐ नमः शिवाय ॥

श्रुतिवेद्यं जगन्नाथं न्यायवेद्यमुमापतिम् ।
ध्यानवेद्यं विरूपाक्षं प्रणमामि महेश्वरम् ॥

तदेवमीश्वरप्रतिपादकप्रमाणयुगे परैरुक्तां तर्कापरिशुद्धिं विस्तरतो निराकृत्य सम्प्रति बौद्ध-चार्वाक-मीमांसकोक्तसंदिग्धव्यतिरेकित्वासिद्धव्याप्तिकथा(त्वा)प्रयोजकत्वैरुक्तं दूषणाभासमिति हृदि निधाय पञ्चमीं विप्रतिपत्तिं निराकतुमुपन्यस्यति – **नन्वीश्वरे** इति । [120A] ननु पद-युग-वाक्य-प्रमाणसम्भवे कथं तदभाव इति मनसि निधायोक्तरूपाभिप्रायेणाह – **तदेव त्वि**ति । यद्यप्युक्तं दोषवर्जितं कार्यत्वादिकं तथाप्यसंत(सत्त)र्काभ्यासवासनादोषचित्तानां दोषपरिस्फुरणमित्याशयवानुपहासपूर्वकं हृदि स्थितं प्रमाण(णं) प्रकटयति - **न ह्येष** इति। कार्यायोजनादयो व्याप्तिपक्षधर्मतोपेतास्तर्कासहायाः कर्तारं, नित्यज्ञानादयो यद्य(द)धिकरण(णं) सर्वज्ञं साधयतो न नास्तिकैः शक्या निराकर्तुमिति विवरणे स्पष्टीभविष्यति । कार्यत्वहेतोः धर्मिणं साध्यधर्मं च दर्शयति - **क्षित्यादी**ति । विवादाध्यासितं सकर्तृकमित्यर्थः । तेन न भागासिद्धिरंशतः सिद्धसाधनं वा दृष्टान्ताभासो वा । **कर्तृपूर्वकमि**ति उपादानादिगोचरापरोक्षज्ञानचिकीर्षा, प्रयत्नधा(द्वा)रपूर्वकमिति न सिद्धसाधनावकाशः, कार्यत्वं च कारणाधीनात्मलाभत्वाभावित्वोत्पत्तिमत्त्वादिशब्दवाच्यमुभयसिद्धं साधनत्वेन विवेचनीयमिति । न साध्याविशिष्टत्वम् । ग्रन्थत्वान्मू(त्वान्यू)नत्वमदोषः, कथायामेव तत्तस्योचितत्वादिति । अनुमानमुक्त्वा संक्षेपतो हेत्वाभासोद्धारव्याजेन पराभिमतं संदिग्धव्यतिरेकित्वादिकमुद्धरति – **न बाध** इति । न च वाच्यं बाधस्य तृतीयपरिच्छेदे निराकृतत्वादिह निराकरणमनुपपन्नमिति । तत्र प्रधानतो योग्यानुपलब्धिबाधस्य निराकृतत्वात्, इह चानुमानस्यैव निराकारिष्यमाणत्वादिति । अस्य कार्यत्वस्य धर्मिसिद्ध्यर्थमन्यैर्हेतुभिरुपजीव्यत्वादित्यर्थः । **प्रतिबन्धः** प्रतिरोधः सत्प्रतिपक्षत्वमि[120B]ति यावत् । तुल्यबलौ हि मिथः सत्प्रतिपक्षौ भवतः, न हीनोत्तम-

बलौ । न हि भवति तरक्षुः प्रतिपक्षो हरिणशावकस्य । दुर्बलैः हीनबलैरित्यर्थः । विरुद्धमात्रस्यासंभवाद् विशेष-विरोधमाशङ्क्याह - **सिद्ध्यसिद्ध्योरिति** । अभिमतविशेषसिद्ध्यसिद्ध्योः सहोपलम्भविरोधिविशेषानुपलम्भाभ्यां विरोधस्य बाधितत्वेन प्रत्येतुमशक्यत्वयोरंजले पावमानत्वादित्यर्थः । **नासिद्धिरिति** । संदिग्धव्यतिरेकित्वा-प्रतीतव्याप्तिकत्वोपाधिभिरसिद्धिर्नेति । अत्रोपपत्तिः - **अनिबन्धनेति** । विपक्षे बाधकोपदर्शनव्याप्तिप्रतीत्युपायो-पदर्शनोपाधिविरहव्युत्पादनेन नैव दोषावकाश इति समुदायार्थः ।

120. तथाहि – अत्र ये शरीरप्रसङ्गमुद्घाटयन्ति कस्तेषामाशयः ? किमीश्वरं पक्षयित्वा कर्तृत्वाच्छरीरित्वम्, ततः शरीरव्यावृत्तेरकर्तृत्वम् । अथ क्षित्यादिकमेव पक्षयित्वा कार्यत्वाच्छरीरिकर्तृ-कत्वम् । यद्वा शरीराजन्यत्वादकार्यत्वम्, परव्याप्तिस्तम्भनार्थं विपरीतव्याप्त्युपदर्शनमात्रं वेति । तत्र प्रथमद्वितीययोराश्रयासिद्धिबाधापसिद्धान्तप्रतिज्ञाविरोधः । तृतीये तु व्याप्तौ सत्यां नेदमनिष्टम्, असत्यां तु न प्रसङ्गः । चतुर्थे बाधानैकान्तिकौ । पञ्चमे त्वसमर्थविशेषणत्वम् । षष्ठेऽपि नागृह्यमाणविशेषया व्याप्त्या बाधः । न चागृह्यमाणविशेषव्याप्त्या गृह्यमाणविशेषायाः सत्प्रतिपक्षत्वम् । अस्ति च कार्य-त्वव्याप्तेः पक्षधर्मतापरिग्रहो विशेषः । कर्ता शरीरी, विपरीतो न कर्तेति चानयोस्तद्विरहः ।

120. श्लोकार्थं व्याख्यातुं परोक्ताभिप्रायं यथासंभवं विकल्पयति । अत्रानुपलब्धिर्हि सत्तया वा बाधिका भा(भ)वेत् ज्ञाता वा । नाद्यः, भिन्नविषयत्वात् । कर्तुरेवानुपलब्धिरिति तु प्राग्निरस्तम् । वाद्यविवक्षित-समुदायानुपलम्भेन च विरोधाद्यभिधानेऽतिप्रसङ्गात् । ज्ञाता त्वनुपलब्धिर्लिङ्गान्तरविरोधिनीत्यादि । पक्षादिप्र-विभागं पृच्छति - **किमीश्वरमिति** । ईश्वरस्य धर्मित्वे प्रमाणतोऽप्रतिपत्तिप्रतिपत्तिभ्यामाश्रयासिद्धिबाधौ । ईश्वर-विद्वेषिणः परस्य कर्तृत्वाच्छरीरित्वाभ्युपगमेऽपसिद्धान्तः । ईश्वरः शरीरी ईश्वरोऽकर्ता इत्यत्र प्रतिज्ञापदयोर्विरोधः । ईश्वरपदस्याशरीरिदेवताविधायकत्वात् जगत्कर्त्रभिधायकत्वादेवेत्यर्थः । शरीरिकर्तृविरहेऽप्यङ्कुरादेः कार्यत्व-दर्शनेनानैकान्ति[121A]कत्वमिति हृदि निधायाह – **तृतीये त्विति** । **असत्यामिति** कार्यत्वस्य शरीरिकर्तृकत्वे साध्य इत्यर्थः । **चतुर्थ** इति । सर्वस्य क्षित्यादयेपाद(क्षित्यादेः) पक्षत्वे वो(बा)धः, कस्यचिदपक्षत्वेऽनेकान्त इति बाधानेकान्ताविति्यर्थः । **पञ्चमे त्वसमर्थविशेषणत्वम**जन्यत्वोपाधिविद्यमानत्वे न शरीरविशेषणं समर्थमित्यर्थः । यत्तूक्तं **परव्याप्तिस्तम्भनार्थमिति** तत्र स्तम्भनमिति बाधः प्रतिरोधो वा विवक्षितः । उभयमपि नोपपद्यते इति । यथाक्रममाशङ्क्य दर्शयति - **षष्ठेऽपी**त्यादि । ननु कथं गृह्यमाणविशेषणत्वमित्यत आह - **अस्ति चे**ति । [चो] हि यस्मादर्थः । **अनयोस्तद्विरह** इति पक्षधर्मताविरह इत्यर्थः । तथाहि – यः कर्ता स शरीरी, योऽशरीरी नासौ कर्ता इत्यत्र कर्ता चायमशरीरी चायमिति पक्षधर्मता नास्ति ।

121. ननु यद् बुद्धिमद्धेतुकं तच्छरीरहेतुकमिति नियमे यच्छरीरहेतुकं न भवति तद्बुद्धिमद्धे-तुकमपि न भवति इति विपर्ययनियमोऽपि स्यात्, तथा च पक्षधर्मताऽपि लभ्यते इति चेत् । न, गगनादेः सपक्षभागस्यापि सम्भवात् केवलव्यतिरेकित्वानुपपत्तेः । अन्वये तु विशेषणासामर्थ्यात् हेतुव्यावृत्तिमात्रमेव हि तत्र कर्तृव्यावृत्तिव्याप्तम्, न तु शरीररूपहेतुव्यावृत्तिरित्युक्तम् । व्याप्तश्च पक्षधर्म उपयुज्यते, न त्वन्योऽतिप्रसङ्गात् ।

१-१. अर्थो न स्पष्टः । पाठः संदिग्धः ।

121. धर्मत्वे तु स्यादित्याशयवानाशङ्कते - **ननु यदिति** । **तथा चेति** विपर्ययनियमे शरीराजन्यत्वस्य क्षित्यादिधर्मत्वेनोभयसिद्धत्वादिति पक्षधर्मत्वलाभ इत्यर्थः । निरुपाधिसाध्यसंबन्धस्य पक्षे प्रतीतिः पक्षधर्मता । न च प्रकृतस्य निरुपाधिः साध्यसम्बन्धः किन्त्वजन्यत्वोपाधिविद्यमानत्वेन । पुनरपि न पक्षधर्मत्वमित्याशयवान् परिहरति - **न गगनादेरिति** । ननु विशेषणासामर्थ्यादित्यसङ्गतम् । व्यभिचारव्यावर्तनफलाभावेऽपि धर्मिसम्बन्धासिद्धिपरिहारेण फलवतः समर्थत्वात् । न चासिद्धिपरिहारार्थं न विशेषणं दृष्टमिति वाच्यम् । रूपादिषु मधे(मध्ये) रूपस्यैव व्यञ्जकत्वादित्यादावसिद्धिपरी(रि)हारार्थतोपलब्धेरित्यत आह - **हेतुव्यावृत्तीति** । स्वरूपा[121B]परिहरतो व्याप्यत्वासिद्धिप्राप्तेरिति तात्पर्यम् । द्विधा हि प्रतिबन्धः - कर्तृधर्मः [कर्मधर्म]श्च । तत्र प्रथमः – तस्मिन् सति भवत्येवेत्येवंरूपो व्यापकाभावे व्याप्यधर्मो न भवेदिति वह्निमात्रेण निरूप्यते, न त्वव्यभिचारिभिरप्यार्द्रेन्धनवत्त्वादिभिः । विशेषेऽफलत्वात् । एवं तत्रैव भवतीत्येवंरूपः कर्मधर्मोऽप्यव्यभिचारिलिङ्गमात्रेण निरूप्यते, न त्वव्यभिचारितामात्रेणालोकवत्त्वादिना विशिष्टः, न खल्वालोकधूमत्वादिति प्रामाणिकाः प्रयुञ्जते । तथेहाप्यजन्यत्वमात्रस्यैव कर्तृत्वाव्यभिचारेण प्रतिबन्धग्रहसमय एव विशेषणासामर्थ्यं विवक्षितमित्यजन्यत्वोपाध्युपजीवित्वेन शरीराजन्यत्वमप्रयोजकमिति फलितार्थः । ननु तथापि धर्मसम्बन्धासिद्धिपरिहारार्थ(र्थं) विशेषण(णं) भविष्यतीत्यत्र न किञ्चिदुक्तमित्यत आह – **व्याप्तश्चेति** । सत्यं साधितो धर्मिसम्बन्धः, त(न) त्वेवंविशिष्टस्य व्याप्तिरस्तीत्यर्थः । पक्षधर्मस्य न व्याप्तिः व्याप्तस्य च न पक्षधर्मत्वमिति भावा(वः) ।

122. एतेन तद्व्यापकरहितत्वादिति सामान्योपसंहारस्यऽसिद्धत्वं वेदितव्यम् । न हि यद्व्यावृत्तिर्यदभावेऽन्वयव्यतिरेकाभ्यामुपसंहर्तुमशक्या, तत् तस्य व्यापकं नामेति । विशेषविरोधस्तु विशेषसिद्धौ सहोपलम्भेन तदसिद्धौ मिथो धर्मिपरिहारानुपलम्भेन निरस्तो नाशङ्कामप्यधिरोहतीति । स्यादेतत् । अस्ति तावत् कार्यस्यावान्तरविशेषो यतः शरीरिकर्तृकत्वमनुमीयते, तथा च तत्प्रयुक्तामेव व्याप्तिमुपजीवेत् कार्यत्वसामान्यमिति स्यात् ।

122. ननु शरीराजन्यत्वं प्रयोजकमस्तु । विवादपदमकर्तृकम् । कर्तृव्यापकरहितत्वादित्यु(त्य)दुष्टमेवेत्यत आह – **एतेनेति** । दृष्टान्ते विशेषणासामर्थ्यप्रतिपादनेनाशरीरस्य व्यापकत्वासिद्ध्या तद्रहितत्वमसिद्धमित्यर्थः । एतदेव दर्शयति – **न हीति** । **यद्व्यावृत्तिः** शरीरव्यावृत्तिः । **यदभावे** कर्त्रभावे च तच्छरीरं तस्य कर्तुर्व्यापकमित्यर्थः । [122A] स एव हि तस्य व्यापको भवति यद्भावो यस्याभावे साध्य(ध्ये) अन्वयिनि च दृष्टान्ते विद्यमाने अन्वयव्यतिरेकाभ्यां पक्षे उपसंहर्तुं शक्यते, यथा वह्नेरभावे धूमाभावः । न चैवं प्रकृते अन्वयिनि दृष्टान्ते विशेषणसामर्थ्यवाचोयुक्त्या तस्यां त्स(त)स्याप्रयोजकत्वविभावनादिति । प्रकाशप्रयोजकतायां अन्वयाप्रयोज[क]त्वाव्यभिचारादित्यर्थः । **सिद्ध्यसिद्ध्योरित्यादि** विधते(त्ते)-**विशेषनि(वि)रोधस्त्विति** । **विशेषसिद्धाविति** व्याप्तिपक्षधर्मताभ्यां समानीयमानशरीरित्वाशरीरित्वविशेषसिद्धौ रूपरसवत् सहोपलभ्यमानत्वान्नाशङ्कामधिरोहति । तदसिद्धौ विशेषद्वयाप्रतीतौ **मिथो धर्मिपरिहारो**ऽन्योन्यधर्मिप्रतिक्षेपस्तस्या**नुपलम्भेनापि** [**निरस्तो** विशेषविरोधो] नाशङ्कामधिरोहति । एतदुक्तं भवति ययोर्गोत्वाश्वत्ववत् परस्परधर्मिपरिहारेणैवावस्थानमुपलभ्यते तयोरेव परस्पराभावाव्यभिचारिणोः विरोधो नान्यथेति स्थितिरित्यर्थः । किञ्च, किमशरीरादिमत्कर्तृत्वस्य कार्यत्वेन विरोधः कार्यत्वस्य वा तेन उताशरीरादिरित्यादिकर्तुः अथवा तद्धर्मभूतयोः शरीरित्वकर्तृत्वयोर्विरोधः । तत्र प्रथमे तावद् व्यक्तमेव दूषणम् । द्वितीये तु किं भिन्नव्यक्तिकतया विरोधः एकव्यक्तिकतया वा । तत्र प्रथमे न किञ्चिद् दूषणम् । एकव्यक्तिकतापि प्रमाणसिद्धाऽभ्युपगमसिद्धा वा व्याप्तिपक्षधर्मता-

सामर्थ्यसिद्धा वा व्याप्तिपक्षधर्मतयोरपि केवलयोः साध्यसमुच्चितयोर्वा । न तु प्रमाणसिद्धि(द्धे)ऽभ्युपगमसिद्धे वा सहोपलम्भेन विरोधः । केवलयोर्व्याप्तिपक्षधर्मतयोरसाधकत्वान्न विरोधसिद्धिः । समुच्चितयोस्त्वसंभव एव । न हि शरीरिणि[122B] कर्तरि साध्येऽङ्कुरादिषु पक्षधर्मता संभवति । नापि कर्तृत्वाशरार(रीरि)त्वयोर्विभिन्न-व्यक्तिकयोर्विरोधः [त]स्याकिञ्चित्करत्वात् । एकधर्मितया त्वस्मदादा[व]नुपसंक्रि(हि)यमाणस्य विरोधस्यादूषण-त्वात् । ईश्वरे तूपसंह्रियमाणस्य विरोधस्यासिद्धेः धर्मिणोऽसिद्धत्वात् धर्मिसिद्धौ वा सहोपलम्भेन विरोधस्य बाधितत्वात् । नासिद्धिरनिबन्धनेऽपि पूर्वोक्तं समं(मा)धयितु(तृ)परां(रो)क्तमुपाधि(धिं) न(नि)राचे(चि)का(की)-षु(र्षु)रुपन्यस्य ----------[१] साधनसामान्याव्यापकतया चोपाधिलक्षणयोगानु(दु)पाधित्वमित्यभिमानः पद(र)स्येति तात्पर्यार्थः । तदेतत् परा(रोऽ)भिग[न्]तुमुत्स.....[२] त्वादिति ।

123. न स्यात् । न हि विशेषोऽस्तीति सामान्यमप्रयोजकम् । तथा सति सौरभकटुत्वनीलि-माऽऽदिविशेषे सति न धूमसामान्यमग्निं गमयेत् । किं नाम साधकसामान्ये साध्यसामान्यमाश्रित्य प्रवर्तमाने तद्विशेषः साध्यविशेषव्याप्तिमाश्रयेत्, न तु विशेषे सति सामान्यमकिञ्चित्करम् । तस्यापि विशेषान्तरापेक्षयाऽकिञ्चित्करत्वप्रसङ्गात् । सौरभादिविशेषं विहायापि धूमे वह्निर्दृष्टः, न तु विशेषं विहाय कार्ये कर्तेति चेत् । न । कार्यविशेषः कारणविशेषे व्यवतिष्ठते, न तु कार्यकारणसामान्ययोः प्रतिबन्धमन्यथाकुर्यादिति । किं न दृष्टं कार्यं कारणमात्रे अङ्कुरो बीजे तद्विशेषो धान्ये तद्विशेषः शालौ तद्विशेषः कलमे इत्यादि बहुलं लोके । क्व वा दृष्टमणुद्रव्यारभ्यं द्रव्यं नित्यरूपाद्यारब्धं रूपादि । तथापि सामान्यव्याप्तेरविरोधात् सिद्ध्यत्येव । अवश्यं चैतदेवमङ्गीकर्तव्यम् ।

123. उपाधिलक्षणविरहमाह – **न हि विशेष** इति । तस्य तद्विशेषत्वेनैव तत्साध्यसामान्यव्यापकत्वम्, न हि त[स्]योपाधिसलक्षणायोगादित्यर्थः । तथाहि यो यस्याव्यवहिता[व]वान(न्त)रसामान्यविशेषौ नासौ तत्साध्यसामान्यव्यापको यथा गोत्वाद् विषाणित्वाद् वौ(गौः) शाबले.....[३] अन्यथा चेलू(चैत)द्विशेषानुपपत्तिरिति । ननु विशेषस्यासाध्यसामान्यव्यापकत्वे यथा शाबलेयपरिहारेण बाहुलेयत्वादौ विषाणित्वं तथा शरीरकार्यपरिहारेण अन्यत्रापि कर्ता दृश्येतेत्याशङ्कते – **सौरभादी**ति । अत्र दृश्येतेत्युपलभ्येतेत्येतावन्मात्रविवक्षिता(तम्) इन्द्रिय-सम्बन्धा[द्] गृह्येतेति [वा] । आद्ये अनुज्ञातरमाह – किं न दृष्टम् ? दृष्टमेवेत्यर्थः । कार्यकारणसामान्ययोः प्रतिबन्धादनुमान इति शेषः । ननु तद्विशेषस्यौपाधिकत्वशङ्क्या त्वसौ शिथिलीकृत इत्यत आह - **कार्यविशेष** इति । न प्रतिबन्धमन्यथा कुर्यादिति विशेषत्वेन साध्व(ध्य)स्मृता[व]न्यव्यापकं(क)वा(त्वा)योगादित्यर्थः । एतदेवोदाहरणान्तरेण [123A] स्पष्टयितुमाह - **कार्यमि**ति । द्वितीये तु उत्तरमाह - **क्व वे**ति । अत्रापि हि कार्यद्रव्यं कारणद्रव्यं त्वित्यत्र कार्यद्रव्यत्वावान्तरसामान्यविशेषो यतो मह[द्]द्रव्यजन्यत्वमनुनी(मी)यते । तत्प्रयुक्तामेव व्याप्तिमुपजीवत्कार्य --- द्व्यणुकत्र्यणुकयोः कारणद्रव्यपूर्वकत्वं साधयेत् । तत्र समवायिकारणाभावे-ऽसमवायिनिमित्तयोरप्यनुपपत्तौ कार्यानुत्पत्तिप्रसङ्गलक्षणतर्कविरोधान्नैवमिति चेते(त्) तुल्यमत्रापि । अचेतनाना(नां) चेतनव्यापारमव(न्त)रेणाप्यु(प्य)प्रव(वृ)त्तेः । प्रवृत्तौ वा स्वातन्त्र्येण चेतनत्वप्रसङ्गात् । घटादेवा(र्वा) चेतनव्यापारे-(र)मन्तरेण कदाचिदुत्पादप्रसङ्गाच्च । नि(वि)शेष एवायं नियम इति चेत् तर्हि कार्यविशेष एव कारणत्रय-

---

१-२. The copyst has left blank space in the ms.

३. The copyst has left blank space in the ms.

पूर्वकस्तदन्यस्त्वदृष्टमात्रादेव भविष्यति(ती)ति । [1]गण द्व्यणुकादिभिः । उक्तं च अङ्कुरादावदृष्टे स्तु(तु) यदि शङ्का समैव सा त्र्यणुकस्याणुहेतुत्वे, न चैषापि विरोधिनी, एतेन साधनावान्तरसामान्यं यत्र यत्रोपाधित्वेन परैरुच्यते तत्रोक्तप्रकारेण परिहृतं वेदितव्यम् । एवं विशेषानुपाधित्वमुपपादितं परमङ्गीकारयति । **तथापी**ति । किं बहुना, साधनविशेषस्य साधनसामान्य(न्यं) प्रत्यनुपाधित्वादुपाधित्वे वा सर्वानुमानविलयात् । सर्वानुमाने एवं वक्तुं सुलभत्वात् । कार्यकारणानुमाने कार्यविशेषस्योपाधे(धेः) सुवचन्नात(नात्) । एवं यत्सिद्धये यत्साधनमुच्यते [123B] तत्र विशेषस्योपाधेः वकुर्व्व(वक्तुं) सुकरत्वादित्याशयवानाह — **अवश्ये**ति ।

124. अन्यथा कार्यत्वस्याकस्मिकत्वप्रसङ्गात् । स्यादेतत् । अन्वयव्यतिरेकि तावदिदं कार्यत्वमिति परमार्थः । तत्राकाशादेर्विपक्षात् किं कर्तृव्यावृत्तेः कार्यत्वव्यावृत्तिराहोस्वित् कारणमात्रव्यावृत्तेरिति संदिह्यते । तदसत् । कर्तुरपि कारणत्वात् । कारणेषु चान्यतमव्यतिरेकस्यापि कार्यानुत्पत्तिं प्रति प्रयोजकत्वादन्यथा कारणत्वव्याघातात् । कारणादिविशेषव्यतिरेकसन्देहप्रसङ्गाच्च । कथं हि निश्चीयते किमाकाशात् कारणव्यावृत्त्या कार्यत्वव्यावृत्तिः उत करणव्यावृत्त्या । एवं किमुपादानव्यावृत्त्या, किमसमवायिव्यावृत्त्या, किं निमित्तव्यावृत्त्येति । कार्यत्वात् करणमुपादानमसमवायि निमित्तं वा बुद्ध्यादिषु न सिद्ध्येत् । कर्तुः कारणत्वे सिद्धे सर्वमेतदुचितम्, तदेव त्वसिद्धमिति चेत् । किं पटादौ कुविन्दादिरकारणमेव कर्ता, प्रस्तुते वोदासीन एव साधयितुमुपक्रान्तः । तस्माद् यत्किञ्चिदेतदपीति । ननु कर्ता कारणानामधिष्ठाता साक्षाद् वा शरीरवत्, साध्यपरम्परया वा दण्डादिवत् ? तत्र न पूर्वः, परमाण्वादीनां शरीरत्वप्रसङ्गात् । न द्वितीयः, द्वाराभावात् । न हि कस्यचित् साक्षादधिष्ठेयस्याभावे परम्परया अधिष्ठानं सम्भवति । यदयं प्रमाणार्थः — परमाण्वादयो न साक्षात् चेतनाधिष्ठेयाः, शरीरेतरत्वात् । यत् पुनः साक्षात् अधिष्ठेयं न तदेवम्, यथास्मच्छरीरमिति । नापि परम्परया अधिष्ठेयाः, स्वव्यापारे शरीरानपेक्षत्वात्, स्वचेष्टायामस्मच्छरीरवत् । व्यतिरेकेण वा दण्डाद्युदाहरणम् । एवं क्षित्यादि न चेतनाधिष्ठितहेतुकं शरीरेतरहेतुकत्वादित्यतिपीडया सत्प्रतिपक्षत्वम् । अपि च पटादौ कुविन्दादेः किं कारकाधिष्ठानार्थमपेक्षा, तेषामचेतनानां स्वतोऽप्रवृत्तेः, आहो कारकत्वेन ? न पूर्वः, तेषां परमेश्वरेणैवाधिष्ठानात् । न ह्यस्य ज्ञानमिच्छा प्रयत्नो वा वेमादीन् न व्याप्नोतीति सम्भवति । न चाधिष्ठितानामधिष्ठात्रन्तरापेक्षा तदर्थमेव । तथा सत्यनवस्थानादेवाविशेषात् । न द्वितीयः । अधिष्ठातृत्वस्यानङ्गत्वप्रसङ्गे दृष्टान्तस्य साध्यविकलत्वापत्तेः । न च हेतुत्वेनैव तस्यापेक्षाऽस्त्विति वाच्यम् । एवं तर्हि यत् कार्यं तत् सहेतुकमिति व्याप्तिः, न तु सकर्तृकमिति । तथा च तथैव प्रयोगे सिद्धसाधनात् । किञ्च अनित्यप्रयत्नपूर्वकत्वप्रयुक्तां व्याप्तिमुपजीवत् कार्यत्वं न बुद्धिमत्पूर्वकत्वेन स्वभावप्रतिबद्धम् । न ह्यनित्यप्रयत्नोऽपि बुद्ध्या शरीरवत् कारणत्वेनाऽपेक्ष्यते येन तन्निवृत्तावप्यकार्यबुद्धिर्न निवर्तते इति ।

124. बाधकान्तरमाह - **अन्यथे**ति । कार्यत्वमभूत्वा भावित्व[म्] । तत्र किं प्रयोजकत्वम् । ने(न) तावदुपादानमसमवायि वा प्रध्वंसेऽसम्भवात् । तस्मात् सहकारिप्रयुक्तम् । तत्रापि किमचेतनमात्र[प्र]युक्तमुत चेतनप्रयुक्तमपि । तत्र न प्रथमः । उभयोरपि चेतनाचेतनयोस्तुल्ययोगक्षेमत्वात् । अन्वयव्यतिरेकयोर्विशेषानुपलम्भात् ।

---

१. पाठो भ्रष्टः ।

यदि चेतनस्याप्रयोजकत्वम् अचेतनस्यापि स्यात् । तथा चाकस्मिकत्वं स्यादित्यर्थः । यदि च व्यतिरेकसंदेहवशेन व्याप्तिविरहात् प्रकृतमनुमानाभासः तदा तादृशव्यतिरेकसंदेहः कार्यकारणतद्विशेषानुमानेषु कर्तुं शक्यते इति तदप्यनुमानाभास इति शङ्कोत्तराभ्यामादर्शयति - **स्यादेतदि**त्यादिना । संप्रति प्रकारान्तरेण सं(सत्)प्रतिपक्षमभिधातुं भूमिमारचयति - **नन्वि**ति । सिद्धसाधनमभिधातुं पीठमारचयति — **अपि चे**ति । उपाधिमाशङ्कते — **किञ्चे**ति। यत्व(त्र) बुद्धिमत्पूर्वकत्वे साध्ये शरीरपूर्वकत्वमुपाधिरित्यत्र **वाचस्पति**वचो चत(चेत्) शरीरपूर्वकत्वस्यापि बुद्धिगतकार्यत्वोपाधिप्रयुक्तत्वेन साध्यसामान्याव्यापकतयोपाधिलक्षणायोगात् क(का)र्या बुद्धिः कारणतया शरीरमपेक्षते, तन्निवृत्तौ च निवर्तते । अकार्या तु बुद्धिस्तन्निवृत्तावपि न निवर्तते । तदेतन्नि(न्नो)पाधि(धिः) संभवेत्। बन्ध(बुद्धेः) नित्यप्रयत्नपूर्वकत्वे शङ्क्यमाने प्रकृतकार्यकारण[124A]भाववैपरीत्यादनित्यप्रयत्न[पूर्व]कस्य नित्यानित्यसाधारणज्ञानमात्रपूर्वकत्वेन स्वभावप्रतिबन्धादुपाधिलक्षणायोगात् । न त्वेवं शरीरपूर्वकस्य स्व(स)म[न]न्तरकारणत्व-साध्यगतकार्यत्वाभ्यामुपाधिभ्यां साध्य एव(वा)सौ [उ]पाधित्वादित्याशयवानाह - **न हीति** । अयमर्थः - यथा शरीरनिवृत्तावप्यकार्या वदि(बुद्धि)र्न निवर्तते तथा अनित्यप्रयत्ननिवृत्तावप्यकार्या बुद्धिर्न निवर्तयिष्यत इति । न हि शरीरं बुद्ध्या कारणत्वेनापेक्षितं, ते(ये)न कार्यबुद्धिनिवृत्तिः शरीरनिवर्तने इति उ(यु)क्तम् । न पुनरनित्यप्रयत्नो बुद्ध्या कारणत्वेनापेक्षितो येनानित्यप्रयत्ननिवृत्तौ कार्या बुद्धिर्निवर्तते न नित्येति स्यात्, एवमपि यदि बुद्ध्या व्यापकत्वेनेति प्रयत्नोऽपीति । शरीरवदिति द्वितीयासमर्थाद्वतिः । शरीरं यथा न तथा प्रयत्नः कारणतयेत्यर्थः । **तन्निवृत्तावपी**ति । अनित्यप्रयत्ननिवृत्तावपीत्यर्थः । अकार्या यतः अतो बुद्धिर्न निवर्तेतेत्यभिधीयतामिति ।

125. तदेतत् प्रागेव निरस्तप्रायं नोत्तरान्तरमपेक्षते । तथाहि — साक्षादधिष्ठातरि साध्ये परमाण्वादीनां शरीरत्वप्रसङ्ग इति किमिदं शरीरत्वं यत् प्रसज्यते ? यदि साक्षात् प्रयत्नवदधिष्ठेयत्वं तदिष्यते एव । न च ततोऽन्यत् प्रसञ्जकमपि । अथेन्द्रियाश्रयत्वम् ? तन्न । तदवच्छिन्नप्रयत्नोत्पत्तौ तदवच्छिन्नज्ञानजननद्वारेणेन्द्रियाणामुपयोगात् । अनवच्छिन्ने प्रयत्ने नायं विधिः । नित्यत्वात् । अत एव नार्थाश्रयत्वम् । न हि नित्यज्ञानं भोगरूपमभोगरूपं वा यत्नमपेक्षते तस्य कारणविशेषत्वात् । न च नित्यसर्वज्ञस्य भोगसम्भावनाऽपि । विशेषादर्शनाभावे मिथ्याज्ञानानवकाशे दोषानुत्पत्तौ धर्माधर्मयोरसत्त्वात् । तस्मात् साक्षात्प्रयत्नानधिष्ठेयत्वात् स्वव्यापारे तदनपेक्षत्वाच्चेति द्वयं साध्याविशिष्टम् । अनिन्द्रियाश्रयत्वादभोगायतनत्वात् स्वव्यापारे तदनपेक्षत्वाच्चेति त्रयमप्यन्यथासिद्धम् । अभोगायतनत्वादनिन्द्रियाश्रयोऽपि, भोक्तृकर्मानुपग्रहादभोगायतनमपि, स्पर्शवद्वेगवद्द्रव्यानुद्यत्वात् तदनपेक्षमपि स्यात् । अचेतनत्वाच्चेतनाधिष्ठितमपि स्यादिति को विरोधः ।

125. सोलु(ल्लु)ठं(ण्ठं) समाधिमाह - **तदेतदि**ति । विशेषस्य विशेषमात्रं प्रति प्रयोग(ज)कत्वादित्यादिनैव । **किमिदमि**ति । साक्षात्प्रयत्नाधिष्ठेयत्वं वा इन्द्रियाश्रयत्वं वा अर्थाश्रयत्वं वा । अत्र प्रसङ्गदशायामेव यथासंभवं दूषणमाह — **यदि साक्षादि**ति। इष्टापादनमित्यर्थः । तथा साध्या[124B] विशिष्टतापीत्याह — **न चे**ति । द्वितीये तु प्रयत्ननित्यत्वमात्रमिन्द्रियाश्रयस्य । साक्षात्प्रयत्नाधिष्ठेयत्रो(त्वो)पपत्तौ व्याप्तिशैथिल्यमित्याह - **तदवच्छिन्ने**ति । साक्षात्प्रयत्नाधिष्ठेयत्वेऽपि तस्यैवेन्द्रियाश्रयत्वं, येन [यद]वच्छिन्ने आत्मनि प्रयत्नः य(त)दवच्छिन्नात्मज्ञानेनेन्द्रियकार्येण [भोगो] जनयितव्यः। अकार्यौ तु ज्ञानप्रयत्नाविन्द्रियाश्रयमन्तरेणापि स्यातामिति

न कश्चित् विरोध इत्यर्थः । ननु च प्रागेवा[न]योः साक्षात्प्रयत्नाधिष्ठेयत्वमस्ति, न च तदवच्छिन्नप्रयत्नोत्पत्ता-विन्द्रियाणामुपयोगोऽस्ति । प्राणसञ्चारणेच्छायास्वजोवर(च्छायास्तु ज्ञानोत्तर)समीहिता साधनता ज्ञानयोगित्वात् । समीहितसाधनानत(साधनता)ज्ञानस्य चानुमानिकत्वात् । न हि प्राणसञ्चारणं तत्समीहितसाधनताज्ञानं च लिङ्गं विना भवितुमर्हतः । नैव कार्य(र्यं) साक्षात्प्रयत्नाधिष्ठेयत्वप्रसक्तमिदं शरीरत्वम् । ननु साक्षात्प्रयत्नाधिष्ठेयत्वप्रयुक्तमिदं शरीर[म्] । ननु साक्षात्प्रयत्नाधिष्ठेयत्वप्रयुक्तमित्युपाध्युद्भावने अस्य तात्पर्यादित्यनाकुलमेतदिति । न तृतीयेऽपि व्याप्तिशैथिल्यमिति वक्तुमाह - **अत एवे**ति । सोपाधिसम्बन्धशालित्वादित्यर्थः । क उपाधिरित्यर्थ(त) [125A] आह - **न ही**ति । ज्ञानानित्यत्वमित्यर्थः । भोगमित्यादिकर्तृपदे आयतनकर्मेत्यर्थः । - - - - - - - -[१] । **तस्ये**ति यावदित्यर्थः । तथाऽत्रैव भोक्तृकर्मोपग्रहमुपाधिमादेशयितुं भूमिमार[च]यति - **न च नित्ये**ति। नित्यसर्वविषयज्ञानवदित्यर्थः । तेन न साक्षात्प्रयत्नाधिष्ठेयत्वप्रयुक्तमर्थाश्रयत्वं किन्तु भोक्तृकर्मोप-ग्रहप्रयुक्तमित्यर्थः । तस्मात् प्रसङ्गदूषणैरेतदनुग्राह्यो [हेतुरपि दूषितः] । परमाण्वादयो न साक्षाद् चेतनाधिष्ठेयाः शरीरेतरत्वात्, नापि परम्पराधिष्ठेयाः स्वव्यापारे शरीरानपेक्षत्वादिति हेतुदूषितादित्याशयवानुपसंहरति — **तस्मादि**ति। परमाण्वादयो न साक्षाच्चेतनाधिष्ठेयाः स्वशरीरेतरत्वादित्यत्र यदा 'शरीर'शब्देन साक्षात्प्रयत्नाधिष्ठेयत्वमपेक्षितं तदा शरीरेतरत्वात् प्रयत्नाधिष्ठितेतरत्वादित्यर्थः संपद्यते । तथा च साध्याविशिष्टत्वमित्यर्थः । एवं च **स्वव्यापारे तदनपेक्षत्वात्** स्वव्यापारे साक्षात्प्रयत्नाधिष्ठेयत्वानपेक्षत्वादित्यर्थः संपद्यते । इदमेव च परम्परानधिष्ठेयत्वमतः साध्याविशिष्टत्वम् । **अनिन्द्रिये**ति । परमाण्वादयो न साक्षाच्चेतनाधिष्ठेयाः शरीरेतरत्वादिन्द्रियाश्रये[त]रत्वादिति यदा पदार्थः तदा परमाण्वादीनामनिन्द्रियाश्रयत्वमित्यन्यथासिद्धः(द्धम्) । शरीरे[125B]त[र]था(त्वा)[द्] भोगायतनेतरत्वादित्यर्थः । तदा भोक्तृकर्मानुपग्रहात् परमाण्वादीनामभोगायतनत्वमचेतनत्वाच्चेतनाधिष्ठितत्वं स्यादित्यन्यथासिद्धिः । स्वव्यापारे शरीरानपेक्षस्यापि परमाण्वादेः स्पर्शवद्वेगवद्द्रव्यमुत्प(त्पादक)तया परस्परानधिष्ठेयत्वं च स्यात्, स्वशरीरानधिष्ठेयत्वं वेत्यन्यथासिद्धिः ।

126. तथा च साक्षात् प्रयत्नाधिष्ठितेतरजन्यत्वादिति साध्यसमः । इन्द्रियाश्रयेतरजन्यत्वाद् भोगायतनेतरजन्यत्वादिति द्वयमप्यन्यथासिद्धम् । कार्यज्ञानाद्यनपेक्षत्वाच्छरीरेतरजन्यमपि स्यात् । अचेतन-हेतुकत्वाच्चेतनाधिष्ठितमपीति को विरोधः । अप्रसिद्धविशेषणश्च पक्षः । न हि चेतनानधिष्ठितहेतुकत्वं क्वचित् प्रमाणसिद्धम् । न च चेतनाधिष्ठितहेतुकत्वनिषेधः साध्यः, हेतोरसाधारण्यप्रसङ्गात् । गगनादेरपि सपक्षाद् व्यावृत्तेः । यत् पुनरुक्तम् — कुविन्दादेः पटादौ कथमपेक्षेति । तत्र कारणतयेति कः सन्देहः । किन्तु कारकत्वमेव तस्य ज्ञानचिकीर्षाप्रयत्नवतो न स्वरूपतः । तदेव चाधिष्ठातृत्वम् । यत्तु अधिष्ठिते किमधिष्ठाननेनेति । तत् किं कुविन्द उद्धार्यते, ईश्वरो वा, अनवस्था वाऽऽपाद्यते । न प्रथमः । अन्वय-व्यतिरेकसिद्धत्वात् । न द्वितीयः । परमाण्वदृष्टाद्यधिष्ठातृत्वसिद्धौ ज्ञानादीनां सर्वविषयत्वे वेमाद्यधिष्ठान-स्यापि न्यायप्राप्तत्वात् । न तु तदधिष्ठानार्थमेवेश्वरसिद्धिः । न तृतीयः । तस्मिन् प्रमाणाभावात् । तथाप्येकाधिष्ठितमपरः किमर्थमधितिष्ठतीति प्रश्ने किमुत्तरमिति चेत् । हेतुप्रश्नोऽयं प्रयोजनप्रश्नो वा ? नाद्यः । ईश्वराधिष्ठानस्य नित्यत्वात् । कुविन्दाद्यधिष्ठानस्य स्वहेत्वधीनत्वात् । न द्वितीयः । कार्यनिष्पाद-नेन भोगसिद्धेः स्पष्टत्वात् । एकाधिष्ठाननैव कार्यं स्यादिति चेत् । स्यादेव । तथापि न सम्भेदेऽन्य-तरवैयर्थ्यम् । परिमाणं प्रति सङ्ख्यापरिमाणप्रचयवत् प्रत्येकं सामर्थ्योपलब्धौ सम्भूयकारित्वोपपत्तेः ।

१. The copyst has left the blank space.

अस्ति तत्र वैजात्यमिति चेत् । इहापि किञ्चिद् भविष्यतीति । न चाकुर्वतः कुलालादेः कायसंक्षोभादिसाध्यो भोगः सिद्ध्येदिति तदर्थमस्य कर्तृत्वमीश्वरोऽनुमन्यते, तदर्थमात्रत्वादैश्वर्यस्येति । यत्त्वनित्यप्रयत्नेत्यादि । भवेदप्येवं यदि अनित्यप्रयत्ननिवृत्तावेव बुद्धिरपि निवर्तेत, न त्वेतदस्ति, उदासीनस्य प्रयत्नाभावेऽपि बुद्धिसद्भावात् । हेतुभूता बुद्धिर्निवर्तते इति चेत्, न । उदासीनबुद्धेरपि संस्कारं प्रति हेतुत्वात् । कारकविषया बुद्धिर्निवर्तते इति चेत्, न । उदासीनस्यापि कारकबोद्धृत्वात् । न हि घटादिकमकुर्वन्तश्चक्रादिकं नेक्षामहे । हेतुभूता कारकबुद्धिर्निवर्तते इति चेन्न । अयतमानस्यापि दुःखहेतुभूताया अपि तद्धेतुकण्टकस्पर्शबुद्धेरभावात् । चिकीर्षाहेतुभूतोऽनुभवो निवर्तते इति चेत्, न । केनचिन्निमित्तेनाकुर्वतोऽपि चिकीर्षातद्धेतुबुद्धिसम्भवात् । अनपेक्षकृतिहेतुचिकीर्षाकारणं बुद्धिर्निवर्तते इति चेत्, न तर्हि बुद्धिमात्रम् । तथा चानित्यप्रयत्नहेतुकत्वप्रयुक्तं विशिष्टप्रयत्नचिकीर्षाहेतुबुद्धिमत्पूर्वकत्वमिति तन्निवृत्तौ तदेव निवर्ततां, न तु बुद्धिमत्पूर्वकत्वमात्रम्, तत्र तस्याप्रयोजकत्वादिति बुद्धिमत्पूर्वकत्वसाध्यपक्षे परीहारः । सकर्तृकमिति प्रयत्नप्रधानपक्षे शङ्कैव नास्ति, तस्यैव तत्रानुपाधित्वात् ।

126. एवं क्षित्यादि [न] चेतनाधिष्ठितहेतुकं शरीरेतरजन्यत्वादित्यपि, यद्यपि एवमेव विकल्प्य दूषयितुमुपक्रमते – **तथा चे**ति । ननु ज्ञाननित्यत्वसिद्धौ सर्वमेतदेवं स्यात् । तदेवासिद्धम् । न च संभाव्यत इति वाच्यम् तस्याशश(स्याश्रय)पर्यायत्वात् । उभयथा दर्शनमन्तरेणानुत्पादान(त्) । न च पक्षधर्मताबलादाभिप्रायिकोऽयं विशेषः सिद्ध्यतीति वाच्यम्, अभिप्रायोऽपीच्छा ज्ञानं वेत्युभयस्यानुपपत्तेरिति चेत् नैवं द्रव्यगुणावित्यनयोरपि प्रतिबन्धितुल्यत्वात् । आप्यपरमाणुतद्गतरूपादिनित्यरूपतापि न सिद्ध्येत तद्गतरूपाद्यवैलक्षण्यान्यथानुपपत्तेः । अकार्यद्रव्यगुणगतकार्यत्वोपाधित्वयुक्तत्वान्नैवमिति चेत् । न द्व्यणुकस्याप्यसिद्धेः । कार्यद्रव्यजन्यत्वादिप्रयुक्तत्वाद् द्रव्यकार्यजातीयताया इति वाचाटवचसः सावकाशत्वादत्रापि कार्यद्रव्यगतमहत्त्वमुपाधिरिति चेत् । न साध्यसामान्य[126A]व्यापकत्वासिद्धौ संभाव्यत इति चेत् मैवमुच्चैर्ब्रूयाः । दूषणान्तरमाह – **अप्रसिद्धे**ति । ननु चेतनाधिष्ठितहेतुकं तावदन्यत्रावगतमत एव निषेधः स ज्ञक(शक्य)साधनः प्रतीतस्य प्रातियोगिकत्वादित्यत्र आह – **न चे**ति । कुत इत्यत आह – **गगनादेरपी**ति । तृतीये प्रमाणाभावात् । यथाहि कुविन्दाधिष्ठानमन्वयव्यतिरेकाभ्यां सिद्ध्यति य(त)था वे(चे)श्वराभिधा(धिष्ठा)नं ज्ञानादिनित्य[तया] सर्वविषयत्वादर्थात् न तथाधिष्ठात्रन्तरकल्पनायां प्रमाणमस्ति यतोऽनवस्था स्यादित्यर्थः । **उदासीनस्ये**ति कारकाद्यव्यापारयतः । **उदासीनबुद्धेरि**ति कर्मधारयः । हेतुभूता चासौ कारकविषया बुद्धिश्चेति सा तथा । **तद्धेतुकण्टके**ति दुःखहेतुश्चासौ कण्टकस्पर्शश्चेति स तथा, तस्य बुद्धेरित्यर्थः । **तस्ये**ति [अ]नित्यप्रयत्नस्येत्यर्थः । प्रयोजकत्वे उदासीनबुद्धेर्निवृत्तिप्रसङ्गात् । तदनेन प्रबन्धेन परिहारो यो बुद्धिमत्पूर्वकमिति साध्यं प्रतिजानीते तदनुकूलतया कृतः । यदा तु सकर्तृकप्रधानीभूतविषयतया प्रधानीभूतबुद्धिमत्पूर्वकत्वं प्रतिजानीते तदा अनित्यप्रयत्नस्योपाधित्वशङ्कापि नास्तीत्याह – **बुद्धिमत्पूर्वकमि**ति । कुत इत्यत आह – **तस्यैवे**ति ।

127. एतेन शरीरसम्बन्धे बुद्धिगतकार्यत्ववद् बुद्धिसम्बन्धे प्रयत्नगतकार्यत्वमुपाधिरिति निरस्तम् । यो हि बुद्ध्या शरीरवच्छरीरनिवृत्त्या बुद्धिनिवृत्तिवद् वा प्रयत्नेन बुद्धिं बुद्धिनिवृत्त्या प्रयत्ननिवृत्तिं साधयेत्, स एवं कदाचिदुपलभ्यः । वयं त्ववगतहेतुभावं कलितसकलशक्तिकारकप्रयोक्तारं कार्यादेवानुमिमाना नैवमास्कन्दनीयाः, तत्र तस्यानुपाधित्वात् । न च प्रयत्न आत्मलाभार्थमेव मतिमपेक्षते ।

विषयलाभार्थमप्यपेक्षणात् । ततः प्रयत्नाद् बुद्धिः, तन्निवृत्तेश्च प्रयत्ननिवृत्तिः सिद्ध्यत्येवेति विस्तृतमन्यत्र । कार्यबुद्धिनिवृत्त्या तु कार्य एव प्रयत्नो निवर्तते, न नित्यः । नित्ये च प्रयत्ने नित्यैव बुद्धिः प्रवर्तते, नानित्या । न हि तया तस्य विषयलाभसम्भवः । शरीरादेः प्राक् तदसम्भवे देहानुपपत्तौ सर्वानुपपत्तेः । शरीराजन्यत्ववच्चानित्यप्रयत्नाजन्यत्वमिति संक्षेपः ।

तर्काभासतयाऽन्येषां तर्काशुद्धिरदूषणम् ।
अनुकूलस्तु तर्कोऽत्र कार्यलोपो विभूषणम् ॥३॥

127. ननु तथापि प्रधानीभूतप्रयत्नपू[126B]र्वकत्वसाध्यपक्षेऽप्यप्रधानीभूता बुद्धिः कुतः सेत्स्यति । प्रयत्नादेवेति चेत्, न, शरीरसम्बन्धे ज्ञानगतकार्यत्ववद् बुद्धिसम्बन्धेऽपि प्रयत्नगतकार्यत्वस्योपाधेः सुवचत्वात्, तथा च प्रयत्नमात्रशाली कर्ता प्राप्त इत्याशङ्क्य निराकरोति — **एतेने**ति । प्रयत्नानित्यत्वस्यानुपाधित्वेन कुतो निरस्तमित्यत आह - **यो ही**ति । ईश्वरः शरीरी बुद्धिमत्त्वात्, ईश्वरो न बुद्धिमान् अशरीरित्वादित्येवमादि यः साधयति तं प्रति बुद्धि[गत]कार्यत्वमुपाधिरुद्भाव्यते । तथा च यः प्रयत्नेन बुद्धिं साधयति - ईश्वरो बुद्धिमान् प्रयत्नवत्त्वात्, ईश्वरो निष्प्रयत्नो बुद्धिशून्यत्वादिति तं प्रति प्रयत्नगतकार्यत्वं बुद्धिसाधने उपाधिरुद्भाव्यते । यदा तु कार्यत्वं प्रति साधनमुच्यते तदा कार्यगतेनोपाधिना तद् दूषणीयम् न तु प्रयत्नगतेन, व्यधिकरणस्यादूषणत्वात् । **वयं त्वि**ति । तथाऽस्य कार्यस्य प्रयत्नेनैव ज्ञानेच्छाभ्यामा(म)पि स्वाभाविक एव संबन्ध इति नोपाधिशङ्का । न चैव(वं) तथैव शरीरसम्बन्धप्रयोमोप्रीति(गोऽपीति) वाच्यते व्यापारविरामेऽपि बहिरन्तश्च शाखाभंगध्यानावृत्त्या[1] - - [2]दर्शनादित्यर्थः । कुत इत्यत आह — **तत्रे**ति । स्वभावमात्रनियतसाहित्ये ज्ञानादिसमुदाये साध्यो(ध्ये) । **तस्ये**ति कार्यत्वस्य । 'न तु विवादपदमकर्तृक[म्] अनित्यप्रयत्नाजन्य[127A]त्वात् गगनवत्' इति प्रतिरोधानुमानं भविष्यतीत्यत आह — **शरीरे**ति । असमर्थविशेषणत्वादित्यर्थः । परा(रो)क्तर्काणां पूर्वोक्तानामाभासता(तां) संसाधयन् प्रकृते सकलोपाधिशङ्कानिराकरणपटीयान् अनुकूलस्तर्कोऽस्तीति प्रतिपादयति । **तर्काभासे**त्यादि सुबोधमिति ।

128. कारकव्यापारविगमे हि कार्यानुत्पत्तिप्रसङ्गः । चेतनाचेतनव्यापारयोर्हेतुफलभावावधारणात् कारणान्तराभावे इव कर्त्रभावे कार्यानुत्पत्तिप्रसङ्गः, कर्तुरपि कारणत्वात् । यस्त्वाह — प्रत्यक्षानुपलम्भाभ्यां तदुत्पत्तिनिश्चयो दृश्ययोरेव, न त्वदृश्ययोः । प्रत्यक्षस्यानुपलम्भस्य च तावन्मात्रविधिनिषेधसमर्थत्वात्, धूमाग्निवत्, कम्पमारुतवच्च । न हि धूमः कार्योऽनलस्येति उदर्यस्यापि, न हि शाखाकम्पो मातरिश्वन इति स्तिमितस्यापि स्यात्, किन्तु भौमस्पृश्ययोरेव । तथेहापि शरीरवत एव कारणत्वमवगन्तुमुचितम्, नान्यस्येति । तदसत् । प्रत्यक्षानुपलम्भौ हि दृश्यविषयावुपायस्तदुत्पत्तिनिश्चिये, न तु दृश्यतैव तत्रोपेया । किं नाम दृश्याश्रितं सामान्यद्वयम् । तदालीढस्य हि तदुत्पत्तिनिश्चये दृश्यमदृश्यं वा सर्वमेव तज्जातीयं तदुत्पत्तिमत्तया निश्चितं भवति । यथा स्पर्शरूपरसगन्धानामुत्तरोत्तरनिमित्ततायां तव, अस्माकं चातीन्द्रियसमवायादिसिद्धौ । न चेदेवमुदाहृतयोरेव दहनपवनयोरालोकरूपवतोस्तदुत्पत्तिनिश्चये कथमनालोकनिरस्तरूपयोः सिद्धिर्यदुदर्यस्तिमितसाधारणी सिद्धिः स्यात् इति । तद्धवेदप्येवं यदि

---

१. अर्थो न स्पष्टः ।

२. The copyst has left the blank space.

शरीरादिकं विना कार्यमिव भौमं स्पर्शवद्वेगवन्तं च विनाऽग्निमात्रात् पवनमात्राद् वा धूमकम्पौ स्याताम्, न त्वेवम् । न चैवं चेतनव्यभिचारोऽपि शक्याभिधान इत्यलं बालप्रलापानां समाधानैः । तदुत्पत्तेरसिद्धावपि तत्तदुपाधिविधूननेन स्वाभाविकत्वस्थितौ यदि कर्तारमतिपत्य कार्यं स्यात् स्वभावमेवातिपतेदिति कार्यविलोपप्रसङ्ग इति । एतच्च सर्वमात्मतत्त्वविवेके निपुणतरमुपपादितमिति नेह प्रतन्यते । एवं च सिद्धे प्रतिबन्धे न प्रतिबन्ध्यादेः क्षुद्रोपद्रवस्यावकाशः । प्रतिबन्धसिद्धाविष्टापादनात् । तदसिद्धौ तत एव तत्सिद्धेरप्रसङ्गादिति । ननु तस्य सर्वदा सर्वत्राविशेषे कार्यस्य सर्वदोत्पत्तिप्रसङ्ग इति निरपेक्षेश्वरपक्षे दोषः, सापेक्षे उपेक्षणीय एवास्त्विति बालस्य प्रदीपकलिकाक्रीडयैव नगरदाहः । तन्न । स्थेमभाजो जगत एवाकारणत्वप्रसङ्गात् । ॐ इति ब्रुवतः सौगतस्य दत्तमुत्तरं प्राक् ।

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥

तमिममर्थमागमः संवदति, विसंवदति तु परेषां विचारम् –

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥

अत्र प्रथमेन सर्वज्ञत्वम्, चक्षुषा दृष्टेरुपलक्षणात् । द्वितीयेन सर्ववक्तृत्वम्, मुखेन वागुपलक्षणात् । तृतीयेन सर्वसहकारित्वम्, बाहुना सहकारित्वोपलक्षणात् । चतुर्थेन व्यापकत्वम्, पदा व्याप्तेरुपलक्षणात् । पञ्चमेन धर्माधर्मलक्षणप्रधानकारणत्वम्, तौ हि लोकयात्रावहनाद् बाहू । षष्ठेन परमाणुरूपप्रधानाधिष्ठेयत्वम्, ते हि गतिशीलत्वात् पतत्रव्यपदेशाः – पतन्तीति । सन्धमति, सञ्जनयन्निति च व्यवहितोपसर्गसम्बन्धः । तेन संयोजयति समुत्पादयन्नित्यर्थः । द्यावा इत्यूर्ध्वसप्तलोकोपलक्षणम्, भूमीत्यधस्तात्, एक इत्यनादितेति । स्मृतिरपि – अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इत्यादि । एतेन ब्रह्मादिप्रतिपादका आगमा बोद्धव्याः ।

128. संप्रति बौद्धमुत्थाप्य निराचष्टे - **यस्त्विति** । **न चेदेवमिति** । प्रभाशालिन एव दहनस्य धूमः कार्यो दृष्ट इति । कथमप्रभः कारीषादिः सिद्ध्यति । एवंरूपं वेगस्पर्शाधिष्ठानस्येवान्यत्रकार्यजनकत्वमुपलब्धमिति । कथमरूपस्य पवनस्य सिद्धिः । दहन-पवनयोः कथमनालोकनिरस्तरूपयोरिति योजना । **आलोकरूपवतोरिति** साध्यं विहायान्यत्रेति बोद्धव्यम् । तदेवं कर्तुः कारणत्वसिद्धिपुरस्करणमन्तरेण[1] कार्यलोपप्रसङ्गमुक्त्वा संप्रति तदुत्पत्तेः प्रत्यक्षानुपलम्भसाधनीयत्वात् तयोश्च दृश्यादृश्यविषयत्वात् कर्तुश्च तत्साधारण्या[त् त]त्कारणत्वसिद्धि-(द्धा)वपि प्रकारान्तरेण विपक्षे कार्यलोपप्रसङ्गं वक्तुमाह – **तदुत्पत्तेरसिद्धावपीति** । ननूपाधिविधूननमेकत्वकारां-(मेव तु कथं) सेत्स्यतीत्याह - **एतच्च सर्वमिति** । विस्तरतयोपाधिनिरसनं **बौद्धधिक्कारे**[2] द्रष्टव्यमित्यर्थः । **तदसिद्धाविति** । [तत एव] प्रतिब[न्]धासिद्धेरेवेत्यर्थः । **तद(त्)सिद्धेः** साधकत्वादिसिद्धेरप्रसङ्गः इति शशविषाणादेरिति शेषः । **दत्तमुत्तरमिति** । व्यापकस्यापि नित्यस्येत्यादिना । तमेव त(तु) न्याध(य)सिद्धमर्थे(र्थं) वेदशास्त्राविरोधेन प्रामाणिकमिति मन्वादि[127B]स्मृतिसंवादेन दृढयति - **आर्षमिति** । विस्तरतो वेदाविरोधमेव

१. 'कारणत्वसिद्धौ प्रकारान्तरेण' इति पाठः समीचीनः ।
२. आत्मतत्त्वविवेके ।

दर्शयितुमाह - **तमिममिति** । शेषमतिरोहितम् ।

129. आयोजनात् खल्वपि –

स्वातन्त्र्ये जडताहानिर्नादृष्टं दृष्टघातकम् ।
हेत्वभावे फलाभावो विशेषस्तु विशेषवान् ॥४॥

परमाण्वादयो हि चेतनायोजिताः प्रवर्तन्ते अचेतनत्वाद् वास्यादिवत् । अन्यथा कारणं विना कार्यानुत्पत्तिप्रसङ्गः । अचेतनक्रियायाश्चेतनाधिष्ठानकार्यत्वावधारणात् । क्रियाविशेषविश्रान्तोऽयमर्थः न तु तन्मात्रगोचरः । चेष्टा हि चेतनाधिष्ठानमपेक्षते इति चेत् । अथ केयं चेष्टा नाम ? यदि प्रयत्नवदात्मसंयोगासमवायिकारणिका क्रिया, प्रयत्नमात्रकारणिकेति वा विवक्षितम् । तन्न । तस्यैव तत्रानुपाधित्वात् । अथ हिताहितप्राप्तिपरिहारफलत्वं तत्त्वम् । तन्न । विषभक्षणोद्बन्धनाद्यव्यापनाद् इष्टानिष्टप्राप्तिपरिहारफलत्वमिति चेत् । कर्तारं प्रत्यन्यं वा ? उभयथापि परमाण्वादिक्रियासाधारण्याद्-विशेषः । भ्रान्तसमीहाया अतथाभूताया अपि चेतनव्यापारापेक्षणाच्च । शरीरसमवायिक्रियात्वं तदिति चेत्, न । मृतशरीरक्रियाया अपि चेतनपूर्वकत्वप्रसक्तेः । जीवत इति चेत्, न । नेत्रस्पन्दादेश्चेतनाधिष्ठानाभ्युपगमप्रसङ्गात् । स्पर्शवद्द्रव्यान्तराप्रयोगे सतीति चेत्, न । ज्वलनपवनादौ तथाभावाभ्युपगमापत्तेः । शरीरस्य स्पर्शवद्द्रव्यान्तराप्रयुक्तस्येति चेत्, न । चेष्टयैव शरीरस्य लक्ष्यमाणत्वात् । सामान्यविशेषश्चेष्टात्वं यत उन्नीयते प्रयत्नपूर्विकेयं क्रियेति चेत्, न । क्रियामात्रेणैव तदुन्नयनात् । भोक्तृबुद्धिमत्पूर्वकत्वं यत इति चेत्, तर्हि तद्विश्रान्तत्वमेव तस्य । न चैतावतैव क्रियामात्रं प्रत्यचेतनमात्रस्य चेतनाधिष्ठानेन व्याप्तिरपसार्यते । विशेषस्य विशेषं प्रति प्रयोजकतया सामान्यव्याप्तिं प्रत्यविरोधकत्वात् । अन्यथा सर्वसामान्यव्याप्तेरुच्छेदादित्युक्तम् । एतेनाशरीरत्वादिना सत्प्रतिपक्षत्वमपास्तम् । अत्राप्यागमसंवादः –

यदा स देवो जागर्ति तदेदं चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥
अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥
मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥ इत्यादि ॥

अत्र जागरस्वापौ सहकारिलाभालाभौ । ईश्वरप्रेरणायामज्ञत्वमप्रयतमानत्वं च हेतू दर्शितौ परमाण्वादिसाधारणौ । स्वर्गश्वभ्रे चेष्टानिष्टोपलक्षणे । एतदेव सर्वाधिष्ठानमुत्तरत्र विभाव्यते मयेत्यादिना । न केवलं प्रेरणायामहमधिष्ठाता, अपि तु प्रतिरोधेऽपि । यो हि यत्र प्रभवति स तस्य प्रेरणावद् धारणेऽपि समर्थः । यथाऽर्वाचीनः शरीरप्राणप्रेरणधारणयोरिति दर्शितं तपामीत्यादिना । धृतेः खल्वपि । क्षित्यादिब्रह्माण्डपर्यन्तं हि जगत् साक्षात् परम्परया वा विधारकप्रयत्नाधिष्ठितं गुरुत्वे सत्यपतनधर्मकत्वाद् वियति विहङ्गमशरीरवत् तत्संयुक्तद्रव्यवच्च । एतेनेन्द्राग्नियमादिलोकपालप्रतिपादका अप्यागमा व्याख्याताः । सर्वावेशनिबन्धनश्च सर्वतादात्म्यव्यवहारः 'आत्मैवेदं सर्वम्' इति । यथैक एव मायावी

अश्वो वराहो व्याघ्रो वानरः किन्नरो भिक्षुस्तापसो विप्र इत्यादि । अदृष्टादेव तदुपपत्तेरन्यथासिद्धमिदमिति चेत्, तद्भावेऽपि प्रयत्नान्वयव्यतिरेकानुविधानेन तस्यापि स्थितिं प्रति कारणत्वात् । कारणैकदेशस्य च कारणान्तरं प्रति अनुपाधित्वात्, उपाधित्वे वा सर्वेषामकारणत्वप्रसङ्गात् । शरीरस्थितिरेवं न त्वन्यस्थितिरिति चेत् । न । प्राणेन्द्रिययोः स्थितेरव्यापनात्, प्राङ्न्यायेनापास्तत्वाच्च । अत्राप्यागमः – 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः' इति । प्रशासनं दण्डभूतः प्रयत्नः ।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ इति स्मृतिः ।

अत्रोत्तमत्वमसंसारित्वं सर्वज्ञत्वादि च । परमत्वं सर्वोपास्यता । लोकत्रयमिति सर्वोपलक्षणम् । आवेशो ज्ञानचिकीर्षाप्रयत्नवतः संयोगः । भरणं धारणम् । अव्ययत्वमागन्तुकविशेषगुणशून्यत्वम् । ऐश्वर्यं संकल्पाप्रतिघातः इति । एतेन कूर्मादिविषया अप्यागमा व्याख्याताः । संहरणात् खल्वपि । ब्रह्माण्डादिद्व्यणुकपर्यन्तं जगत् प्रयत्नवद् विनाश्यं विनाश्यत्वात् पाट्यमानपटवत् । अत्राप्यागमः –

एष सर्वाणि भूतानि समभिव्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं सम्भ्रामयति चक्रवत् ॥
सर्वभूतानि कौन्तेय ! प्रकृतिं यान्ति मामिकीम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ इत्यादि ॥

एतेन रौद्रमंशं प्रतिपादयन्तोऽप्यागमा व्याख्याताः ।

129. **आयोजनादि**ति । परमाण्वादयो हि द्व्यणुकाद्यन्यथानुपपत्त्या प्रवर्तन्त इत्यविवादमेव, प्रवृत्तिरेषां स्वातन्त्र्येण वा स्याद् अदृष्टमात्रादेव वा चेतनव्यापारसहिताद् वा । आद्ये स्वातन्त्र्य इति । प्रवृत्ताविति शेषः । द्वितीये **नादृ[ष्ट]मि**ति । अन्यथा द्व्यणुकादीनामपि तन्मात्रादेवोत्पत्तिप्रसङ्गादित्युक्तम् । अतस्तृतीयः परिशिष्यत इति भावः । नन्वत्रापि विपक्षे किं बाधकमित्यत आह – **हेत्वभाव** इति । हेतोश्चेतन[व्यापार]स्यान्यत्रोपलब्धस्याभावे क्रियारूपफलाभाव इत्यर्थः । क्रियाविशेषप्रयुक्तं चेतनपूर्वकत्वमिति शङ्कामपाकर्तुमुक्तम् – **विशेषस्त्वि**ति । एतदेव विवृणोति – **परमाण्वादयो ही**ति । विशेषस्त्वित्यादि संगमयितुमाशङ्कते – **क्रियाविशेषे**ति । परिहरति – **न, तस्यैवेति** । प्रयत्नवदात्माल(त्मसं)योगासमवायिकारणकत्व एव हि परमाण्वादिक्रियाणां तेषां चेतनायोजितत्वं साध्यमित्यर्थः । क्रियाविशेषस्य हि प्रयत्नपूर्वकत्वमित्याशङ्क्य निराकरोति – **अथे**ति । न चेष्टानिष्टप्राप्तिपरिहारफलत्वं क्रियाविशेषतः । कुत इत्यत आह – **उभयथापी**ति । तत्क्रियाया अस्मदादेरीश्वरस्य चेच्छाविषयीभूतार्थहेतुत्वादित्यर्थः । अत्रैव दूषणान्तरं समुच्चिनोति – **जीवत** इति । जीवच्छरीरक्रियात्वमिति किं शरीरान्तर्थं(र्व)तिक्रियात्वमात्रं चेष्टा शरीरसमवायिक्रियात्वमेव वाभिप्रेतम् । आद्ये दूषणमाह [128A]– न **नेत्रे**ति । अत्र शङ्कते – **स्पर्शे**ति । बाहुनेत्रस्फुरणादीनां स्पर्शवद्वायुनोद्यत्वादित्यर्थः । तदा न सत्प्रतिपक्षत्वम् । चेतनाधिष्ठेयत्वे साध्यतद्विपर्ययसाधनस्य प्रतिपक्षत्वम्, न च तद्विशिष(ष्ट)विपर्ययसाधनस्य । अशरीरत्वं च शरीराधिष्ठेयत्वे प्रयोजकम्, ननु (न तु) चेतनाधिष्ठेयत्वमात्रे । विह[ङ्]गमादिसंयुक्तद्रव्यान्तरेणानैकान्तिकत्वं साध्यान्तभा(र्भा)वे नेति रा(आ)चष्टे [**साक्षात्**] **परम्परया** वेति । **एतेने**ति धारकप्रयत्नधृतत्वव्युत्पादनेन । व्याख्याताः मुख्यार्थतयेति भावः ।

नन्विन्द्रादिदेवता[भेदा]भिधायकागम[स्य] मुख्यार्थत्वेऽभेदप्रतिपादकागमविरोध इत्यत आह - **सर्वावेशे**ति । आवेशो ज्ञानचिकीर्षाप्रयत्नय(व)तः संयोगः । **प्राग् ज्ञायेते**ति(**प्राङ्न्यायेन**) विशेषस्तु विशेषवानिति न्यायेनेत्यर्थः । धृत्यादेरित्यादिपदग्राह्यं हेतुं दर्शयति-**संहरणात् खल्वपी**ति । सर्गादावित्यर्थः ।

130. पदात् खल्वपि –

कार्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः ।
विच्छेदेन पदस्यापि प्रत्ययादेश्च पूर्ववत् ॥५॥

पदशब्देनात्र पद्यते गम्यते व्यवहाराङ्गमर्थोऽनेनेति वृद्धव्यवहार एवोच्यते । अतोऽपीश्वरसिद्धिः । तथाहि – यदेतत् पटादिनिर्माणनैपुण्यं कुविन्दादीनाम्, वाग्व्यवहारश्च व्यक्तवाचाम्, लिपितत्क्रमव्यवहारश्च बालानाम्, स सर्वः स्वतन्त्रपुरुषविश्रान्तो व्यवहारत्वात् निपुणतरशिल्पिनिर्मितापूर्वघटघटनानैपुण्यवत्, चैत्रमैत्रादिपदवत्, पत्राक्षरवत्, पाणिनीयवर्णनिर्देशक्रमवच्चेति । आदिमान् व्यवहार एवम्, अयं त्वनादिरन्यथापि भविष्यतीति चेत्, न । तदसिद्धेः । आदिमत्तामेव साधयितुमयमारम्भः । न चैवं संसारस्यानादित्वभङ्गप्रसङ्गः । तथापि तस्याविरोधात् । न हि चैत्रादिव्यवहारोऽयमादिमानिति भवस्याप्यनादिता नास्ति, तदनादित्वे वा न चैत्रादिपदव्यवहारोऽप्यादिमानिति । अस्त्ववर्वाग्दर्शी कश्चिदेवात्र मूलमिति चेत्, न । तेनाशक्यत्वात्, कल्पादावादर्शाभासस्याप्यसिद्धेः । साधितौ च सर्गप्रलयौ । ननु व्यवहारयितृवृद्धः शरीरी समधिगतः, न च ईश्वरस्तथा, तत्कथमेवं स्यात् । न । शरीरान्वयव्यतिरेकानुविधायिनि कार्ये तस्यापि तद्वत्त्वात् । गृह्णाति हि ईश्वरोऽपि कार्यवशाच्छरीरमन्तरान्तरा, दर्शयति च विभूतिमिति । अत्राप्यागमः – 'पिताऽहमस्य जगतो माता धाता पितामहः ।' तथा –

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ ! सर्वशः ॥
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ॥ इति ॥

एतेन 'नमः कुलालेभ्यः कर्मारिभ्यः' इत्यादि यजूंषि बोद्धव्यानि ।

प्रत्ययोऽपि । प्रत्ययशब्देनात्र समाश्वासविषयप्रामाण्यमुच्यते । तथा च प्रयोगः – आगमसंप्रदायोऽयं कारणगुणपूर्वकः प्रमाणत्वात्, प्रत्यक्षादिवत् । न हि प्रामाण्यप्रत्ययं विना क्वचित् समाश्वासः । न चासिद्धस्य प्रामाण्यस्य प्रतीतिः । न च स्वतः प्रामाण्यमित्यावेदितम् । न च नेदं प्रमाणम्, महाजनपरिग्रहादित्युक्तम् । न चासर्वज्ञो धर्माधर्मयोः स्वातन्त्र्येण प्रभवति । न चासर्वज्ञस्य गुणवत्तेति निःशङ्कमेतत् ।

130. ननु विनाशविशेष एव प्रयत्नपदार्थ(त्नपूर्व)कोऽन्यस्त्वन्यथा भविष्यतीत्याशङ्क्याद्वितत्र(ङ्क्य वृत्त)-समाधानं क्रव्यांण(कुर्वाण) एव [ग्रन्थलाघवाय] वर्तिष्यमाणो(णे)ऽतिदिशति - **पदस्यापी**ति । निरुपाधित्वमित्यनुषग(षङ्ग)नीयम् 'ननु' पदं । वृद्धव्यवहारः स चादिमान् स्वतन्त्रपुरुषपूर्वकोऽयं त्वनादिरन्यथापि भविष्यतीत्यत आह - **विच्छेदेन** । प्रलयविच्छेदेनानादित्वानुपपत्तेरित्यर्थः । **प्रत्ययादे**रिति । [128B] 'आदि'शब्दात् श्रुतेश्च । **पूर्ववदि**ति । निरुपाधित्वमित्यर्थः । साध्येऽत्र दृष्टान्तत्रयं यथासङ्ख्यं दर्शयति –

निपुणतरेत्यादि । **पिताऽहमस्ये**त्यादि । ब्रह्मणोऽप्यहमेव पिता माता धातेत्यादि । यद्यहं कर्मणि न वर्तेयं त[दा] इमे लोका उत्सीदेयुरिति । व्यवहितसम्बन्धः । लोक्यत इति लोकाः प्रामाणिकव्यवहारा इत्यर्थः । कुत इत्यत आह - **यतो मम वर्त्मे**ति । **एतेने**ति । घटादिव्यवहारस्य स्वतन्त्रपुरुषपूर्वकत्वव्युत्पादनेन कुलालकर्मानादिदेहवतो महेश्वरस्यैव तथाभावादित्यर्थः । **प्रत्ययादि**ति । 'प्रत्यय'शब्दः समाश्वासपर्यायः, स्वविषयप्रामाण्यं लक्षयति प्रत्ययशब्देनेति । लक्षणबीजमविनाभावमाह — **न ही**ति । न तु प्रमाणत्वादित्यसिद्धमित्यत आह — **न चे**ति । न चाप्रतीतौ प्रामाण्यस्य पारलौकिकफले कर्मणि प्रेक्षावतः प्रवृत्त्युपपत्तिरित्यर्थः । ननु तथापि तेन कारणगुणपूर्वकेणैव भवितव्यमित्यत्र किं नियामकमित्यत आह — **न च स्वत** इति । ननु तथापि प्रमाणत्वाद् गुणवद्वक्तृमात्रं सिद्धयेत सर्वज्ञस्तु कुतः सेत्स्यतीत्यत आह - **न चासर्वज्ञ** इति ।

131. श्रुतेः खल्वपि । तथाहि — सर्वज्ञप्रणीता वेदाः, वेदत्वात् । यत् पुनर्न सर्वज्ञप्रणीतं नासौ वेदो यथेतरवाक्यम् । ननु किमिदं वेदत्वं नाम ? वाक्यत्वस्यादृष्टविषयवाक्यत्वस्य च विरुद्धत्वात्, अदृष्टविषयप्रमाणवाक्यत्वस्य चासिद्धेः, मन्वादिवाक्ये गतत्वेन विरोधाच्चेति चेत्, न । अनुपलभ्यमानमूलान्तरत्वे सति महाजनपरिगृहीतवाक्यत्वस्य तत्त्वात् । न ह्यस्मदादीनां प्रत्यक्षादि मूलम् । भ्रमविप्रलिप्से, महाजनपरिग्रहादित्युक्तम् । नापि परम्परैव मूलम्, महाप्रलये विच्छेदादित्युक्तम् । अन्वयतो वा । वेदवाक्यानि पौरुषेयाणि वाक्यत्वात्, अस्मदादिवाक्यवत् । अस्मर्यमाणकर्तृकत्वान्नैवमिति चेत्, न । असिद्धेः ।

अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते ॥

'वेदान्तकृद्वेदविदेव चाहम्' इति स्मृतेः । तस्मात् 'यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे' इत्यादिश्रुतिपाठस्मृतेश्च ।

131. **श्रुते**रिति । **वेदत्वादि**त्यर्थः । ननु सर्वज्ञनिर्मिता सर्वज्ञप्रणीता वेत्यर्थो विवक्षितः । नाद्यः, तथा चाङ्कुरादिः(देः) सर्वज्ञनिर्मितात् सपक्षादपि व्यावृत्त[229B]त्वेनासाधारण्यमिति । न, सपक्षाभावाभ्युपगमेन व्यतिरेकिणः सर्वत्र प्रवृत्तिस्वीकारात् निश्चितसाध्यधर्मा धर्मी सपक्षः, न चाङ्कुरादेस्तथात्वं निश्चितं यत उक्तदोषः । न च कार्यत्वानुमानापेक्षं सर्वज्ञप्रणीतत्वानुमानः यतः परस्परनिरपेक्षमेव हि कार्यत्वादिकं सर्वज्ञं साधयति । न च संदिग्धसाध्येषु निश्चितसाध्यता मु(उ)क्ता । न च सर्वज्ञप्रतीतौ सपक्षता । न च सर्वज्ञः । न किञ्चिदभ्युपगतं परैः । अतोऽन्यदो(दु)दाहरणसंभवाद् व्यतिरेकोदाहरणमाह - **यत् पुनरि**ति । आभासविनाशपूर्वकं वेदत्वं हेतुत्वं समर्च्चयते - **नन्वि**ति । **विरुद्धत्वादि**ति । विप्रलम्भकवाक्यस्याप्यदृष्टविषयत्वात् । पक्षविपक्षयोर्वर्तमानो हेतुर्विरुद्धः । **वाक्यत्वादि**ति समृ(संगृ)हीतहेतु(तुं) व्याचष्टे । वाक्यत्वादिति हेतुतो वेदान् पक्षीकृत्य सर्ववित्साधनीय [इति] भावः । अत्र परः सत्प्रतिपक्षत्वं यथाश्रुतेन व्यतिरेकेणे(ण) वोपाध्युद्भाव[ने]न वा स्मरणानुपलब्धिबाधतो वेति दूषणमाशङ्कते - **अस्मर्यमाणे**ति । तृतीयमपि नोत्प(नोपप)द्यत इत्याशयवानाह - [अ]**सिद्धेरिति**। असिद्धेन न सत्प्रतिपक्षत्वम् । न च साधनव्यापकस्योपाधित्वम् । न चासिद्धाया अनुपलब्धि(ब्धे)र्बाधकत्वमिति रहस्यम् । अपि चोपाधिपक्षेऽनुभूतविस्मृतवक्तृकवाक्यस्यापौरुषेयत्वप्रसङ्गः । तथाऽनुभूयमाननानुभूतचरवक्तृकं

संप्रतितनं वाक्यं च भवतीत्यादिवाक्ययोरपौरुषेयत्वप्रसङ्गात् । तथा च साध्याव्यापकतया[129B] नोपाधिरित्युपाधौ विशेषदोषम् । 'एतेनैव वेदस्याध्ययनं पूर्वाध्ययनपूर्वकं वेदाध्ययनत्वात् अधुनातनाध्ययनं यथा' इति निरस्तम् । अतः सिद्धसाधनादन्यत्र हेतोरसिद्धत्वाच्च । ननु वेदकर्तृस्मृतिर्या साऽर्थवादनिबन्धना न तु पारम्पर्येणाभियुक्ता ।

132. अर्थवादमात्रमिदमिति चेत्, न । कर्तृस्मरणस्य सर्वत्राविध्यर्थत्वात् । तथा चास्मरणे कालिदासादेरस्मरणात् । एवं च कुमारसम्भवादेरकर्तृकत्वप्रसङ्गः । अनैकान्तिकत्वं वा हेतोः । प्रमाणान्तरागोचरार्थत्वात् सत्प्रतिपक्षत्वमिति चेत्, न, प्रणेतारं प्रत्यसिद्धेः । अन्यं प्रत्यनैकान्तिकत्वात् । आकस्मिकस्मितबीजसुखानुस्मृतेः कारणविशेषस्यान्यं प्रति प्रमाणान्तरागोचरस्यापि तेनैव वक्त्रा प्रतिपाद्यमानत्वात् । वक्तैव प्रकृते न सम्भवति । हेत्वभावे फलाभावात् । चक्षुरादीनां तत्रासामर्थ्यात् । अस्मदादीन्द्रियवत् । मनसो बहिरस्वातन्त्र्यात् । न । चेतनस्य ज्ञानस्येन्द्रियस्य मनसो वा पक्षीकरणे आश्रयासिद्धेः प्रागेव प्रपञ्चनात् । नित्यनिराकरणे चासामर्थ्यात् । परमाण्वादयो न कस्यचित् प्रत्यक्षाः तत्सामग्रीरहितत्वादिति चेत्, न । द्रष्टारं प्रत्यसिद्धेः । अन्यं प्रति सिद्धसाधनात् । तथापि वाक्यत्वं न प्रमाणम् । अप्रयोजकत्वात् । प्रमाणान्तरगोचरार्थत्वप्रयुक्तं तत्र पौरुषेयत्वम्, न तु वाक्यत्वप्रयुक्तम् । न । सुगताद्यागमानामपौरुषेयत्वप्रसङ्गात् । प्रमाणवाक्यस्य सत इति चेत्, न । प्रणेतृप्रमाणान्तर-गोचरार्थत्वस्य साध्यानुप्रवेशात् ।

132. अध्येतारः कर्तारं स्मरतीत्याशङ्कते – **अर्थवादे**ति । अयमभिप्रायः । अर्थवाद इति 'आदित्यो यूपः' इत्यादिवन्मुख्यार्थेऽप्रमाणम्, स्तुतित्वात् किमविध(ध्य)र्थोऽयं वा । न प्रथमो बाधकाभावेन । अन्यथा यन्न दुःखेन सञ्चित्त(सम्भिन्न)मित्यादिवाक्यानां स्वार्थपरित्यागेन साधुसम्पादितम् । ब्राह्मणवाक्यानामुपदेशरूपत्वात् । द्वितीये तु न किरि(ञ्चि)द्वी(द्बा)च्य(ध्य)ते इत्याशयवानाह - न, कर्तृस्मरणस्येति । न चाविध्यङ्गता(त)याऽप्य-प्रमाणमुक्तदोषप्रसङ्गात् प्रत्यक्षाद्यप्रामाण्यप्रसङ्गादिति भावः । अनैकान्तिकत्वमुक्तं स्पष्टीकरोति । **आकस्मिके**ति । दृष्टकारणोपहारमन्तरेण जातस्मितस्य यद् बीजं सुखानुस्मरणलक्षणं कारणं [त]स्येत्यर्थः । ननु हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा । - - प्रागुक्तम् 'विषयपरतन्त्रो बहिर्धर्मो न' इति । सर्वज्ञो वेदकर्ता न संभावनामात्रास्पदमपीति **मण्डनोक्त**माशङ्कते – **वक्तैवे**ति । ईश्वरस्तज्ज्ञानं वा तन्मनो वा नास्ती(नाती)न्द्रियार्थ-दर्शि(र्शी) नातीन्द्रियविषयं नातीन्द्रिये प्रवर्तते पुरुषत्वात् ज्ञानत्वात् मनस्त्वात् अस्मदादिज्ञानादि[वत्] मनोवदिति प्रयोगाः । एतदपि पागेव निरस्तमित्याह - **न, चेतनस्ये**त्यादि । अपि चैवं कारणा[130A]भावात् कार्यज्ञानं मोपजायताम् अकार्यज्ञानं तु कुतो निवर्त्यतामित्याशयवानाह – **नित्ये**ति । बो(बा)धकान्तरमाशङ्क्य निराकरोति – **परमाण्वादय** इति । वाक्यत्वस्याप्रयोजकतामाशङ्क्य निषेधति – **तथापी**ति । प्रमाणान्तरगोचरार्थत्वमुपाधिरिति किं निर्विशेषणम् उत प्रमाणस्य सत इति विशेषितं वा । नाद्यः, सुगताद्यागमानां पौरुषेयाणामपि प्रमाणान्तरगो[च]रत्वविरहिणा(णां) प्रमाणान्तरगोचरार्थत्वस्य साध्याव्यापकतयाऽनुपाधित्वादित्याह – **नेति** । द्वितीये तु साध्यादभिन्नत्वे साध्याव्यापकत्वाद् भेदनिबन्धनत्वाद्वा व्याप्यव्यापकभावस्येति नोपाधित्वमित्याह – **न, प्रणेतृप्रमाणे**ति ।

133. स्वतन्त्रपुरुषप्रणीतत्वं हि पौरुषेयत्वम् । अर्थप्रतीत्येकविषयौ हि विवक्षाप्रयत्नौ स्वात-न्त्र्यम् । मन्वादिवाक्यस्यापौरुषेयत्वप्रसङ्गाच्च । तदर्थस्य शब्देतरप्रमाणागोचरत्वात् । प्रयुज्यमानवाक्ये-

तरगोचरार्थत्वमात्रमिति चेत्, न । तस्य वेदेऽपि सत्त्वात्, एकस्याप्यर्थस्य शाखाभेदेन बहुभिर्वाक्यैः प्रतिपादनात् । अस्त्वेवं, न तु तेषां मिथो मूलमूलीभाव इति चेत्, न । उक्तोत्तरत्वात् । संख्याविशेषात् खल्वपि । द्व्यणुकत्र्यणुके तावत् परिमाणवती द्रव्यत्वात् । तच्च परिमाणं कार्यं कार्यगुणत्वात् । न च तस्य परमाणुपरिमाणं द्व्यणुकपरिमाणं वा कारणम् । नित्यपरिमाणत्वात्, अणुपरिमाणत्वाच्च, अन्यथा अनाश्रयकार्योत्पत्तिप्रसङ्गात् । द्व्यणुकस्य महत्त्वप्रसङ्गाच्च त्र्यणुकवत् अण्वारभ्यत्वाविशेषात् । तत्र कारणबहुत्वेन महत्त्वे अणुपरिमाणस्यानारम्भकत्वस्थितेः । अणुत्वमेव महदारम्भे विशेष इत्यपि न युक्तम् । महतो महदनारम्भप्रसङ्गात् । अणुत्वमहत्त्वयोर्विरुद्धतया एकजातीयकार्यानारम्भकत्व-प्रसङ्गात् । बहुभिरपि परमाणुभिर्द्वाभ्यामपि द्व्यणुकाभ्यामारम्भप्रसङ्गाच्च ।

133. ननु किमिदं पौरुषेयत्वम् ? – किं साक्षात् स्वतन्त्रपुरुषपूर्वक[त्वं] परम्परया स्वतन्त्रपुरुषपूर्वकत्वं वा । न तावदाद्यः, परम्परापूर्वेप(पूर्वकेषु) वाक्येषु तदभावेन वाक्यत्वस्य व्यभिचारित्वात् । नापि द्वितीयः, प्राथमिकवाक्ये तदभावे[न] व्यभिचारित्वात् । किं स्वातन्त्र्यं वाक्यानुकूलविवक्षादिमत्त्वम् ? तदा सर्वत्रसम्भवात् सिद्धसाधनम् । अथ सर्वविषयज्ञानादिशालित्वं तदा दृष्टान्ताभाव इत्याशयसहिता(तः) कारीषं[१] दूषणं हृदि निधाय साध्यानुप्रवेशं दर्शयितुं साध्यं विवेचयति **स्वतन्त्रे**त्यादिना । **स्वातन्त्र्यमि**त्यनेन आदर्शनभूतानुपूर्वीविज्ञान-रहितस्य वाच्यवाचकत्वं स्वातन्त्र्यम्, तच्च साक्षात् परम्पराविशेषेणोदासीनसाध्यमिति न व्यभिचार इति त(ता)त्पर्य[म्] इति । स्वातन्त्र्यमित्यथवा आदिभूतं वाक्यं पक्षीक्रियते । आदिभूतं वेदा(द)वाक्यं स्वतन्त्र-पुरुषपूर्वकं वाक्यत्वात् । अभिन्नवा[130B]चकविनिर्मितप्रथमवाक्यवत् । इयं च वाक्यपरम्परा आदिवाक्यवती वाक्यपरम्परात्वात् । **कालिदास**कृतवाक्यपरम्परावत् । किञ्च, प्रमाणान्तरगोचरार्थत्वं किं शब्देतरप्रमाणान्तरगोचरा-र्थत्वं वा मानान्तरगोचरार्थत्वमात्रं वा मूलभूतमानान्तरगोचरार्थत्वं वा । साध्यव्यापकतया नाद्यस्योपाधित्वमित्याह – **मन्वादी**ति । द्वितीयमाशङ्क्य साधनव्यापकतया नोपाधिरिति परिहरति – **प्रयुज्यमाने**त्यादिना । तृतीय-स्यापि साधनव्यापकतया नोपाधित्वमित्याशङ्क्य परिहरति – **अस्त्वेवमि**ति । **न, उक्तोत्तरत्वात्** । प्रणेतृमूल-भूतप्रमाणान्तरगोचरार्थत्वस्यासिद्धेरन्यं प्रत्यनैकान्तिकत्वादित्यनेन ग्रन्थेनेत्यर्थः । **सङ्ख्याविशेषाच्चे**ति । व्याख्या-तुमुपक्रमते द्व्यगुणकत्र्यणुके तावदिति । द्व्यणुकपरिमाणमादाय विचारयति – **न च तस्ये**ति । । द्व्यणुकपरिमाणस्येत्यर्थः । **नित्यपरिमाणत्वादि**ति आकाशपरिमाणवदिति शेषः । यदि च वैयात्वात् परो ब्रूयात् परममहत्परिमाणमेव नास्तीत्यतोऽपरितोषाद् द्वितीयहेतुमाह – **अणुपरिमाणत्वाद्** मनःपरिमाणवदिति । स्वसिद्धेनो-भयसिद्धेनैकपरमाणुपरिमाणवदिति द्रष्टव्यम् । ननु द्रव्यानारम्भकपरिमाणत्वप्रयुक्तं हि गगनपरिमाणस्यानारम्भकत्वमेवं मनःपरिमाणस्यापि । या(य)दि नित्यपरिमाणत्वेनानारम्भकत्वमणुपरिमाणत्वेन वा तदा नित्यसङ्ख्यात्वेन च सङ्ख्याया अप्यनारम्भकत्वं सङ्ख्यात्वमुपाधिस्तत्रापि द्रव्यानारम्भकपरिमाणत्वे उपाधिरिति समानम् । मैवम् अनारम्भकपरिमाणस्यापि द्व्यणुकपरिमाणस्य परिमाणानारम्भकत्वदर्शनेन साध्याव्यापकत्वेन अनुपाधित्वात् । तथाहि [131A] अ[णु]परिमाणं तावन्न त्र्यणुकपरिमाणस्यासमवायिकारणम्, तथा द्व्यणुकपरिमाणस्यापि, महज्जातीयताप्रसङ्गात् । अणुपरिमाणादनारभ्यमहज्जातीयत्वोपलम्भा[द्] द्व्यणुकपरिमाणमपि तज्जातीयं स्यात् । तस्मादेतद्बाधक[व]शेन न द्व्यणुकपरिमाणं परिमाणान्त[रा]रम्भकम् । अतो ना(नो)क्तमुपाधिरित्याशयवान्

---

१. अर्थो न स्पष्टः ।

विपक्षे बाधकमाह – **अन्यथे**ति । यदि द्व्यणुकपरिमाणमारम्भकं स्यात् तदा परिमाणस्य सजातीयप्रकृष्टपरिमाण-जनकत्वप्रतिबन्धा[द्] द्व्यणुकपरिमाणजनकत्वं वक्तव्यम् । न च परमाणोरपि परमसूक्ष्मपरिमाणस्याश्रयभूतं किञ्चिद् वस्तु विद्यते । अतः परमाणुपरिमाणात् परं सूक्ष्मं परिमाणमुत्पद्यमानम् अनाश्रयं स्यात् । न चानाश्रयं कार्यमस्तीत्यनाश्रयकार्योत्पत्तिप्रसङ्ग इत्यर्थः । अणुपरिमाणस्य परिमाणारम्भकत्वे बाधकान्तरमप्याह - **द्व्यणुक-स्ये**ति । यदि द्व्यणुकपरिमाणं महत्त्वकारणं स्यात् तदा द्वयणुकेऽपि महत्त्वपरिमाणं प्रसज्येत । अथ त्र्यणुके बहुत्वं महत्त्वारम्भकं तदा तत्रैवाणुत्वमनादृत्य बहुत्वसङ्ख्यैय(व) तावदारम्भिका सिद्धेत्यनारम्भकमणुत्वमिति । त्वयैव समर्थितमित्याह – **तत्र कारणे**ति । किञ्चाणुत्वस्य महत्त्वारम्भकत्वमवधारणेन वा व्यवस्था(स्थ)या वा। प्रथममाशङ्क्य दूषयति - **अणुत्वमेवे**ति । व्यवस्था(स्थां) दूषयति - **अणुत्वमहत्त्वयोरि**ति । अणुत्वमहत्त्वयोर्विरुद्धतया विरुद्धजातीयतयाऽणुत्वपरिहारेण महत्त्वान्महत्त्वोत्पत्तिदर्शनात् महत्त्वव्यभिचारेणाणुत्वा-[131B]न्महत्त्वोत्पत्तिदर्शनान्नोभयोरपि कारणत्वमुपपद्यत इत्यर्थः । यदि च सङ्ख्या न कारणं किन्त्वणुपरिमाणं तदा [ब]हुभिरपि परमाणुभिर्द्वाभ्यामपि द्व्यणुकाभ्यां त्र्यणुकारम्भप्रसङ्ग इत्यत आह - **बहुभिरपी**ति ।

134. एवं सति को दोष इति चेत् । परमाणुकार्यस्य महत्त्वप्रसङ्गः । कारणबहुत्वस्य तद्धेतुत्वात् । अन्यथा द्वाभ्यां त्रिभिश्चतुर्भिरित्यनियमेनाप्यण्वारम्भे तद्वैयर्थ्यप्रसङ्गात् । अणुन एव तारतम्याभ्युपगमस्तु संख्यामवधीर्य न स्यात् । अस्तु महदारम्भ एव त्रिभिरिति चेत्, न, महतः कार्यस्य कार्यद्रव्यारभ्यत्वनियमात् । तथापि वा तारतम्ये संख्यैव प्रयोजिकेति । न च प्रचयोऽपेक्षणीयोऽवयवसंयोगस्याभावात् । तस्मात् परिमाणप्रचयौ महत एवारम्भकाविति स्थितिः । अतोऽनेकसंख्या परिशिष्यते । सा अपेक्षाबुद्धिजन्या, अनेकसंख्यात्वात् । न चास्मदादीनामपेक्षाबुद्धिः परमाणुषु सम्भवति । तद् यस्यासौ सर्वज्ञः । अन्यथा अपेक्षाबुद्धेरभावात् संख्याऽनुत्पतौ तद्गतपरिमाणानुत्पादेऽपरिमितस्य द्रव्यस्यानारम्भकत्वात् त्र्यणुकानुत्पत्तौ विश्वानुत्पत्तिप्रसङ्गः । अस्मदादीनामेवानुमानिक्यपेक्षाबुद्धिरस्त्विति चेत्, न । इतरेतराश्रयप्रसङ्गात् । जाते हि स्थूलकार्ये तेन परमाण्वाद्यनुमानम्, तस्मिन् सति द्व्यणुकादिक्रमेण स्थूलोत्पत्तिः । अस्तु अदृष्टादेव परिमाणम्, कृतमपेक्षाबुद्ध्येति चेत् । न । अस्तु तत एव सर्वम्, किं दृष्टकारणेनेत्यादेरसमाधेयत्वप्रसङ्गादिति ।

134. इष्ट एवायमर्थ इति शङ्कते - **एवमि**ति । दोषमाह – **परमाण्वि**ति । परमाणुकार्यस्य महत्त्व-प्रसङ्गः । कारणबहुत्वस्यान्यत्र महत्त्वहेतुत्वेन निरूपित[त्वात्] अत्रापि च कारणबहुत्वोपलभ्यमानत्वात् । ननु परमाणुभ्यामारब्धस्यैव परमाणुभिरप्यारम्भे अणुत्वमेव भविष्यतीत्यत्र बाधकमाह - **अन्यथे**ति । नन्वणूनां सङ्ख्यावैचित्र्यमणुपरिमाणतारतम्यसंपादनाय भविष्यतीत्याशङ्क्य परिहरति - **अणुन एवे**ति । तथापि तारतम्ये सङ्ख्यैव प्रयोजिकेत्यर्थः । यदा च द्व्यणुकबहुत्वं त्र्यणुकमहत्त्वारम्भकं तदा [त]दुत्पत्तावपेक्षाबुद्धिर्वक्तव्या । सा च नास्मदादीनामपरोक्षा संभवति द्व्यणुकानामतीन्द्रियत्वात् । नाप्यानुमानिकी लिङ्गाभावात् । न च कार्थ(र्य)लिङ्गम्, तस्य महोत्त्वोत्पत्तेः पूर्वमत्यन्तपरोक्षत्वात् । तद् यस्य द्व्यणुकविषयिण्यपरोक्षाकारा बुद्धिः स परमेश्वर इत्याह - **तद् यस्यासौ स सर्वज्ञ** इति । प्रयोगस्तु – द्व्यणुकबहुत्वं कस्यचिदपेक्षाबुद्धिजन्यम्, बहुत्वात्, पटगतबहुत्ववत् । त्र्यणुकमहत्त्वं बहुत्वसङ्ख्याजन्यम्, परिमाणप्रचयानपेक्षत्वे सति महत्त्वात्, त्रितन्तुमहत्त्ववदिति । यदि पक्षे बाधकमाह - **अन्यथे**त्यादिना । सुबोधमितरत् ।

135. अथवा कार्येत्यादिकमन्यथा व्याख्यायते –

उद्देश एव तात्पर्यं व्याख्या विश्वदृशः सती ।
ईश्वरादिपदं सार्थं लोकवृत्तानुसारतः ॥६॥

आम्नायस्य हि भाव्यार्थस्य कार्ये पुरुषप्रवृत्तिनिवृत्ती । भूतार्थस्य तु यद्यपि नाहत्य प्रवर्तकत्वं निवर्तकत्वं वा, तथापि तात्पर्यतस्तत्रैव प्रामाण्यम् । तथाहि विधिशक्तिरेवावसीदन्ती स्तुत्यादिभिरुत्तभ्यते । प्रशस्ते हि सर्वः प्रवर्तते, निन्दिताच्च निवर्तते इति स्थितिः । तत्र पदशक्तिस्तावदभिधा, तद्बलायातः पदार्थः । आकाङ्क्षादिमत्त्वे सति चान्वयशक्तिः पदानां पदार्थानां वा वाक्यम्, तद्बलायातो वाक्यार्थः । तात्पर्यार्थस्तु चिन्त्यते – तदेव परं साध्यं प्रतिपाद्यं प्रयोजनमुद्देश्यं वा यस्य तदिदं तत्परम्, तस्य भावः तत्वम्, तद् यद्विषयं स तात्पर्यार्थ इति स्यात् । तत्र न प्रथमः, प्रमाणेनार्थस्य कर्मणोऽसाध्यत्वात् । फलस्य च तत्प्रतिपत्तितोऽन्यस्याभावात् । प्रशस्तनिन्दितस्वार्थप्रतिपादनद्वारेण प्रवृत्तिनिवृत्तिरूपं साध्यं परमुच्यते इति चेत्, न । 'गङ्गायां घोषः' इत्यत्र तीरस्याप्रवृत्तिनिवृत्तिरूपस्यासाध्यस्यापि परत्वात् । तीरविषये प्रवृत्तिनिवृत्ती साध्ये इति तीरस्यापि परत्वमिति चेत्, न । स्वरूपाख्यानमात्रेणापि पर्यवसानात् । न द्वितीयः । पदवाक्ययोः पदार्थतत्संसर्गौ विहाय प्रतिपाद्यान्तराभावात् । 'पदशक्ति-संसर्गशक्ती विना स्वार्थाविनाभावेन प्रतिपाद्यं परमुच्यते' इत्यपि न साम्प्रतम् । न हि यद् यच्छब्दार्थाविनाभूतं तत्र तत्र तात्पर्यं शब्दस्य, अतिप्रसङ्गात् । तदा हि 'गङ्गायां जलम्' इत्याद्यपि तीरपरं स्यात्, अविनाभावस्य तादवस्थ्यात् । मुख्ये बाधके सति तत् तथा स्यादिति चेत् । न, तस्मिन्नसत्यपि भावात् ।

'गच्छ गच्छसि चेत् कान्त ! पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान् ॥' इति, मुख्यार्थाबाधनेऽपि वारणे तात्पर्यम् । न च परं व्यापकमेव, अव्यापकेऽपि तात्पर्यदर्शनात् । तद् यथा 'मञ्चाः क्रोशन्ति' इति पुरुषे तात्पर्यम् । न च मञ्चपुरुषयोरविनाभावः, नापि पुरुषक्रोशनयोः । नापि तृतीयः । तद्धि प्रतिपाद्यापेक्षितं प्रतिपादकापेक्षितं वा स्यात् । नाद्यः, शब्दप्रामाण्यस्यातदधीनत्वात्, तथात्वे वाऽति-प्रसङ्गात् । यस्य यदपेक्षितं तं प्रति तस्य परत्वप्रसङ्गात् । तदर्थसाध्यत्वेनापेक्षानियम इति चेत् । न, कार्यज्ञाप्यभेदेन साध्यस्य बहुविधत्वे भिन्नतात्पर्यतया वाक्यभेदप्रसङ्गात् । धूमस्य हि प्रदेशश्यामलता-मशकनिवृत्त्याद्यनेकं कार्यम् । आर्द्रेन्धनदहनाद्यनेकं ज्ञाप्यम् । तथा चेह प्रदेशे धूमोद्गम इत्यभिहिते तात्पर्यतः को वाक्यार्थो भवेत्, चेतनापेक्षाया नियन्तुमशक्यत्वात् । नापि प्रतिपादकापेक्षितम्, वेदे तदभावात् । चतुर्थस्तु स्यात् । यदुद्देशेन यः शब्दः प्रवृत्तः स तत्परः, तथैव लोकव्युत्पत्तेः । तथाहि – प्रशंसावाक्यमुपादानमुद्दिश्य लोके प्रयुज्यते, तदुपादानपरम् । निन्दावाक्यं हानमुद्दिश्य प्रयुज्यते, तद् हानपरम्, एवमन्यत्रापि स्वयमूहनीयम् । तस्माल्लोकानुसारेण वेदेऽप्येवं स्वीकरणीयम्, अन्यथा अर्थवादानां सर्वथैवानर्थक्यप्रसङ्गात् । स चोद्देशो व्यवसायोऽधिकारोऽभिप्रायो भाव आशय इत्यन-र्थान्तरमिति तदाधारप्रणेतृपुरुषधौरेयसिद्धिः । तथा च प्रयोगः – वैदिकानि प्रशंसावाक्यानि उपादानाभिप्रायपूर्वकाणि, प्रशंसावाक्यत्वात्, परिणतिसुरसमाम्रफलमित्यादिलोकवाक्यवत् इति । एवं निन्दावाक्यानि हानाभिप्रायपूर्वकाणि, निन्दावाक्यत्वात्, परिणतिविरसं पनसफलमित्यादिवाक्यवत्,

अन्यथा निरर्थकत्वप्रसङ्गश्च विपक्षे बाधकमुक्तम् ।

135. परमेश्वरगोचरमननसाधकानां **कार्य(र्ये)त्यादिकं** [132A]सकललोकसिद्धमर्थं व्याख्याय संप्रति निर्म्मसरं(तर्कपुरःसरं) विचारनिपुणजनैकगोचरार्थतया शिष्यबुद्धिविशदीभावायं(य) सङ्ग्रहश्लोकव्याख्यानमुपक्रमते - **अथवेति** । पदार्थवाक्यार्थाभ्यां तात्पर्यार्थं भेदयितुं प्रस्तौति - **तत्रेति** । तदेव परं यस्य स्तुत्यादिवाक्यस्य **तदिदं तत्परम्**, तत्र परपदस्यार्थं विकल्पयति — साध्यं वा प्रतिपाद्यं वेत्यादिना । तत्र न प्रथमः । न तावत् परं साध्यमित्यर्थः । ननु प्रमाकरणतया प्रमाणस्य साध्यं फलमस्तीत्यत आह - **फलेति** । न द्वितीय इति । न प्रतिपाद्यं परमित्यर्थः । नापि तृतीयः । नापि प्रयोजनं परमित्यर्थः । तदर्थस्य साध्यत्वेनेति । शब्दस्य योऽर्थस्तस्य यत् साध्यं प्रतिपाद्यस्य चापेक्षितं तत् परमित्यर्थः । ननु प्रकरणविशेषात् तात्पर्यनियमेन वाक्यभेददोष इति चेत् । न । प्रकरणं हि साध्यं वा नियमयेत प्रतिपादकाभिप्रायं वा ? नाद्यः, अशक्यत्वात् । न हि धूमध्वजं जिज्ञासमानस्य प्रतीयमानधूमात् धूमकेतुप्रतीतिवत् मशकादिनिवृत्तिर्न भवतीति । द्वितीये त्वापाते(तो)ऽपेक्षितत्वेनाभिमतं पक्षं व्यवस्थापयति — **चतुर्थस्त्वित्यादिनेति** । नन्वस्तु पुरुषाभिप्रायः परार्थो लोके, वेदे तु प्रवृत्तिनिवृत्ती एवेति कृतमत्र स्वतन्त्रपुरुषपरिकल्पनयेति । नैवम् । दृष्टं हि तवा(ताव)ल्लौकिकवाक्य(क्ये) स्वतन्त्रपुरुषाभिप्रायसापेक्षतयाऽर्थविशेषप्रतिपादकत्वं, यथा लक्षणवाक्येषु । तदत्र चोदयि(य)[ति] — यत्र पदशक्ति-संसर्गशक्ती विहाय तात्पर्यबलेनार्थविशेषप्रतिपादनं तत्र लौकिकवाक्यमर्यादया स्वतन्त्रपुरुषाभिप्रायमपेक्षै(क्ष्यै)व युज्यते । न च वाच्यम् — अन्ये हि वैदिकाः शब्दाः लौकिकेभ्यः, तस्माल्लोकमर्यादया नैषामर्थप्रतिपादकत्वमिति । यतोऽनेनैव न्यायेन लौकिकान(ना)[132B]मर्थविशेषव्युत्पत्तिनिश्चयेऽपि वैदिकानां तद्विलक्षणत्वेनागृहीतव्युत्पत्तिकत्वादर्थाप्रतिपादकत्वप्रसङ्गः । तस्मात् तुल्यरूपत्वाद् वेदेऽपि वक्त्रभिप्रायानुमाने परमेश्वरोऽभिप्रायो(या)धार(रः) पुरुषविशेषः सिद्ध्यतीति हृदि निधायाह — **तथैव लोकव्युत्पत्तिरिति** । **तस्माल्लोकानुसार(रे)णेत्यादि** च ।

136. अपि च नो चेदेवम्, श्रुतार्थापत्तिरपि हीयेत । सिद्धो ह्यर्थः प्रमाणविषयः, न तु तेनैव कर्तव्यः । न च 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र 'रात्रौ भुङ्क्ते' इति वाक्यशेषोऽस्ति, अनुपलम्भबाधितत्वात् उत्पत्त्यभिव्यक्तिसामग्रीताल्वादिव्यापारविरहात् अयोग्यस्याशङ्कितुमप्यशक्यत्वात् । तस्मादभिप्रायस्थ एव परिशिष्यते, गत्यन्तराभावात् । स चेद् वेदे नास्ति, नास्ति श्रुतार्थपत्तिरिति तद्व्युत्पादनानर्थक्यप्रसङ्गः । तस्मात् कार्यात् तात्पर्यादप्युन्नीयते, अस्ति प्रणेतेति । आयोजनात् खल्वपि । न हि वेदादव्याख्यातात् कश्चिदर्थमधिगच्छति । न त्वेकदेशदर्शिनो व्याख्यानमादरणीयम् । 'पौर्वापर्यापरामृष्टः शब्दोऽन्यां कुरुते मतिम्' इति न्यायेनानाश्वासात् । त्रिचतुरपदकादपि वाक्यादेकदेशश्राविणोऽन्यथार्थप्रत्ययः स्यात्, किमुतातीन्द्रियादन्तरवाक्यसम्भेददुरधिगमात् । ततः सकलवेदवेदार्थदर्शी कश्चिदेवाभ्युपेयोऽन्यथा अन्धपरम्पराप्रसङ्गात् । स च श्रुताधीतावधृतस्मृतसाङ्गोपाङ्गवेदवेदार्थस्तद्विपरीतो वा न सर्वज्ञादन्यः सम्भवति । को ह्यप्रत्यक्षीकृतविश्वतदनुष्ठान एतावानेवायमाम्नाय इति निश्चिनुयात् । कश्चार्वाग्दृग् निःशेषाः श्रुतीर्ग्रन्थतोऽर्थतो वाऽधीयीत अध्यापयेद् वा । अत्रापि प्रयोगः — वेदाः कदाचित् सर्ववेदार्थविद्व्याख्याताः अनुष्ठातृमतिचलनेऽपि निश्चलार्थानुष्ठानत्वात्, यद् एवं तत् सर्वं तदर्थविद्व्याख्यातम्, यथा मन्वादिसंहितेति । अन्यथा त्वनाश्वासेनाव्यवस्थानादननुष्ठानमव्यवस्था वा भवेदनादेशिकत्वात् । अनुष्ठातार एवादेष्टार इति चेत् । न तेषामनियतबोधत्वात् । वेदवद् वेदानुष्ठानमप्यनादीति चेत्, न । तद्धि स्वतन्त्रं वा वेदार्थबोधतन्त्रं वा ? आद्ये निर्मूलत्वप्रसङ्गः । द्वितीये

त्वनियमापत्तिः । न ह्यसर्वज्ञाविशेषे पूर्वेषां तदवबोधः प्रमाणम्, न त्विदानींतनानामिति नियामकमस्ति ।

136. यदा वेदे पुरुषाभिप्रायो नाभ्युपगम्यते तदा श्रुतार्थापत्तेर्व्युत्पादनवैयर्थ्यमित्याह - **अपि चे**ति । **तस्मादभिप्रायस्थ** इति । ननु च स्वयं स्मृतानामेव पदानामनुच्चारितानामपि श्रुतपदैः सहैकार्थप्रतिपादनतात्पर्यवत्तापरिकल्पनमेव श्रुतार्थापत्तिविषयो भविष्यतीति न तु स्वतन्त्रपुरुषाभिप्रायविषयकल्पनेति चेत् । न, वेदे हि परस्परसमभिव्याहृतानामेकार्थप्रतिपादनतात्पर्यमुपलब्धम् । तत्र यदि समभिव्याहारमन्तरेणैकार्थप्रतिपादकत्वं स्यात् तदा निश्चित एव नियमो भाष्यते । तेषां च समभिव्याहारः स्वतन्त्रपुरुषोच्चारणविषयतया वा स्वतन्त्रपुरुषाभिप्रायविषयतया वेति । तदाधारपुरुषधौरेयसिद्धिरित्याशयवानाह – **गत्यन्तराभावादि**ति । **तद्विपरीतो वे**ति। अध्यापितधारितवेदवेदार्थ इत्यर्थः । तथा चेतिहासपुराणादिषु श्रूयते – भगवता परमेश्वरेण किल सर्गादौ मन्वादयो वेदादिकमध्याप्यन्ते । सर्ववेदार्थविद्या(द्व्या)[ख्या]तत्वमभिप्रेतम्, अन्यथा दृष्टान्तस्य संदिग्धसाध्याश्रयत्वप्रसङ्गात् । न त्वेकदेशदर्शिनो व्याख्यातादपि ग्रन्थान्तरात् शिष्याणामुपाध्यायबोधश्रद्धया प्रवर्तमानात्वा(नां) निश्चलानुष्ठानय(म)स्ति । न च तदनुष्ठानमूलस्य ग्रन्थस्य समस्ततदर्थविद्व्याख्यातत्वमित्यत आह - **अनुष्ठातृमतिचलनेऽपी**ति । न हि तत्रानुष्ठातृणामव्यवस्थितमतित्वमस्तीति । अनुष्ठातृमतिचलनादि(दी)ति तु केवलं सपक्षधर्मभूतमिति [133A] विशेष्यपदोपादानम् । अननुष्ठानमित्यत्र हेतुमाह - **अव्यवस्थानादि**ति । अर्थानिश्चयादिति शेषः । इतरच्च । अनियतमनुष्ठानं भवेदित्याह – **अ[न]नुष्ठान[म]व्यवस्था** वेति । अर्थनिश्चयाव्यवस्थानादिति शेषः । कुत इत्यत आह - **अनादेशिकत्वात्** इति । अनौपदेशिकत्वादित्यर्थः । न तु पूर्वपुरुषैर्यत्वा(षैर्यथा) गृहीतो वेदार्थस्तथा प्रमाणम्, इदानीन्तनानां न स्वतन्त्रस्तद्बोधो न प्रमेति न नियमो भविष्यतीत्याह – **न ह्यसर्वज्ञत्वाविशेष** इति ।

137. पदात् खल्वपि । श्रूयते हि प्रणवेश्वरेशानादिपदम्, तच्च सार्थकम्, अविगानेन श्रुतिस्मृतीतिहासेषु प्रयुज्यमानत्वात्, घटादिपदवत् इति सामान्यतः सिद्धे कोऽस्यार्थः ? इति व्युत्पित्सोर्विमर्शे सति निर्णयः, स्वर्गादिपदवत् ।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥

इत्यर्थवादात्, यव-वराहादिवद् वाक्यशेषाद् वा । तद् यथा ईश्वरप्रणिधानमुपक्रम्य श्रूयते –

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥ इति ॥

137. **यववराहादिवदि**ति । 'यवमयश्चरुर्भवति' 'वाराही चोपानहः' 'वैतसे कटे प्राजापत्यां(त्यं) चिनुयात्' इत्यत्र यववराहवेतसशब्देषु संशयः किमेते दीर्घशूक[शूक]रवञ्जुलानां वाचकाः उत कङ्गुवायसजम्बूनामिति। अत्र पूर्वपक्षः – म्लेच्छव्यवहारात् तावत् कङ्गवादावेव शक्तिर्निरूप्यते न यवादौ, आर्यव्यवहारास्तु(त्तु) यवादावेव शक्तिर्निरूप्यते न कङ्गवादिगोचरतयेति । वाक्यार्थेति यन्निदर्शनात् पदार्थानामध्यवसायः । न चोभयव्यवहारसामर्थ्यबलेनोभयत्रापि शक्तिरस्त्विति वाच्यम् । यस्मादेकत्र शक्तिकल्पनायामन्यत्र गौणतयापि प्रयोगसम्भवात् शक्तिकल्पनानुपपत्तिः । नन्वेकत्रापि शक्तिरवधार्यमाणा

किमार्यप्रसिद्धिगोचरा शक्तिरन्यत्र गौणी । न म्लेच्छप्रसिद्धिसिद्धैव शक्तिः पुनरार्यप्रसिद्धिगोचरा । अथ मतं यत्र वाक्यशेषोपबृंहणं तत्र शक्तिरवधार्यते, वाक्यशेषोपबृंहणं चार्यप्रसिद्धिसिद्धेष्विति । तदपि न मनोहरम्, यतो हि वाक्यशेषबलेन तात्पर्यमात्रमवधार्यते न तु शक्तिः । न च तात्पर्यशक्तिर्नियता, अशक्तिगोचरस्यापि तात्पर्यगोचरत्वदर्शनात्, यथा गङ्गापदस्य तीरे । न च वाक्यवि[शे]षादपि विशेषधीः । वाक्यशेषो हि - 'वराहं गावोऽनुधावन्ति' [133B] 'अप्सुजो वेतसः' इत्येवमाकारः । न च गोसादृश्यं शूरकस्यैव, न च जलजातत्वं वेतसस्यैव वा । अथ मतं वाक्यशेषं प्रचलिता(त)व्यवहाराच्छक्तिर्निरूप्यत इति । तदपि न सारम् । व्यवहारस्योभयत्रापि दर्शनात् । यथाहि क्वचिदार्यव्यवहारस्तथा म्लेच्छव्यवहारोऽपि क्वचिद् दृश्यते । न च योग्यतया विशेषावगतिः । उभाभ्यामपि चरूस(रुसं)भवात् । ततश्च शक्तेरज्ञानात् 'यवमयश्चरुर्भवति' इत्येवमादिवाक्यानां नित्यमनध्यवसितार्थत्वेन नित्यमप्रामाण्यमिति पूर्वपक्षः । अत्र सिद्धान्तसूत्रम् – शास्त्रस्य वा तन्निमित्तत्वादिति । शास्त्रस्था प्रसिद्धिरादरणीया, तन्निमित्तत्वादार्यव्यवहाराः । वाशब्दः पूर्वपक्षनिवृत्तौ । न चैवं पिकादिपदेष्वपि म्लेच्छप्रसिद्धेरनादरप्रसङ्गः । तत्र तेषामेवाभिप्रायायोगात् । तदुक्तम् - तत्र तत्त्वमभियोगविशेषान(त्) स्यादिति । प्रायसः(शः) पक्षिणो विषये म्लेच्छा एवाभियुक्ता इति । प्रकृते चार्याणामेवाभियोगात् । यथोक्तम् –

नवा(तथो)च्यन्ते क्वचिद् देशे यवा एव प्रियंगवः ।
जतून(नं) वेतसं प्राहुर्वराहं नै(चै)व वायसम् ॥ इति ॥

प्रकृते म्लेच्छप्रसिद्धैराचरणे वाक्यशेषविरोधश्च । तथाहि–

मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ।
वराहं गावोऽनुधावन्त्यप्सुजो वेतसः स्मृतः ॥

इत्यादि वाक्यशेषा दीर्घशूकशूकरवेतसेष्वर्यय(ष्वार्य)व्यवहारसामर्थ्यात् शक्तिप्रतीतिरुपपद्यते न तु म्लेच्छादिगोचरे प्रियङ्ग्वादौ । आमोदमानत्वाच्च कङ्गुना व्यवहारद्वयमहिमसमुपजातं संशय(यं) मनीषाद् उपितं वाक्यशेषविषयम(मु)न्मूलयति । निष्प्रतिपक्षार्यव्यवहारलिङ्गकानुमानाद् विशेषविषयशक्तिनिश्चयाद् 'यवमयश्चरुर्भवति' इत्येवमादिनाऽनुष्ठानस्योपपत्तेर्नात्राप्रामाण्यमिति न पूर्वप[134A]क्षावकाशः । पिकादिषु म्लेच्छप्रसिद्ध्यादरे न कश्चिद् वाक्यशेषविरोध इति संक्षेपः । तथेहापि **सर्वज्ञान(सर्वज्ञ)ता तृप्तिरित्येवमादि** वाक्यशेषसंवलितात् पदार्थलिङ्गकादनुमानादीश्वरादिपदानां पुरुषविशेषशक्तिरवधार्यत इत्यर्थः ।

138. एवम्भूतोऽर्थः प्रमाणबाधित इति चेत्, न । प्रागेव प्रतिषेधात् । तथापि न तत्र प्रमाणमस्तीति चेत् । स्वर्गे अस्तीति का श्रद्धा । न ह्युक्तविशेषणे सुखे किञ्चित् प्रमाणमस्त्यस्मदादीनाम् । याज्ञिकप्रवृत्त्यन्यथानुपपत्त्या तथैव तदित्यवधार्यते इति चेत्, न । इतरेतराश्रयप्रसङ्गात् – अवधृते हि स्वर्गरूपे तत्र प्रवृत्तिः, प्रवृत्त्यन्यथानुपपत्त्या च तदवधारणमिति । पूर्ववृद्धप्रवृत्त्या तदवधारणेऽयमदोष इति चेत्, न । अन्धपरम्पराप्रसङ्गात् । विशिष्टादृष्टवशात् कदाचित् कस्यचिदेवंविधमपि सुखं स्यादिति नास्ति विरोधः, तन्निषेधे प्रमाणाभावादिति चेत् । तुल्यमितरत्रापि । अत्रापि प्रयोगः – यः शब्दो यत्र वृद्धैरसति वृत्त्यन्तरे प्रयुज्यते स तस्य वाचकः, यथा स्वर्गशब्दः सुखविशेषे प्रयुज्यमानस्तस्य वाचकः, प्रयुज्यते चायं जगत्कर्तरीति । अन्यथा निरर्थकत्वप्रसङ्गे सार्थकपदकदम्बसमभिव्याहारानुप-

पत्तिरिति । एतेन रुद्र-उपेन्द्र-महेन्द्रादिदेवताविशेषवाचका व्याख्याताः । अपि च अस्मत्पदं लोकवद् वेदेऽपि प्रयुज्यते, तस्य च लोके नाचेतनेष्वन्यतमदर्थः, तत्र सर्वथैवाप्रयोगात् । नाप्यात्ममात्रमर्थः, परात्मन्यपि प्रयोगप्रसङ्गात् । अपि तु यस्तं स्वातन्त्र्येणोच्चारयति तमेवाह तथैवान्वयव्यतिरेकाभ्यामवसायात् । ततो लोकव्युत्पत्तिमनतिक्रम्य वेदेऽप्यनेन स्वप्रयोक्तैव वक्तव्यः, अन्यथाऽप्रयोगप्रसङ्गात् । न च यो यदोच्चारयति वैदिकमहंशब्दं स एव तदा तस्यार्थ इति युक्तम् । तथा सति मामुपासीतेत्यादौ स एवोपास्यः स्यात् । अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इत्युपाध्यायशिष्यपरम्परैवात्मन्यैश्वर्यं समधिगच्छेत्, तथा च उपासनां प्रत्युन्मत्तकेलिः स्यात् । लोकव्यवहारश्चोच्छिद्येत । तस्मान्नानुवक्ताऽस्य वाच्योऽपि तु वक्तैवेति स्थिते प्रयुज्यते वेदे अस्मच्छब्दः स्वप्रयोक्तृवचनः अस्मच्छब्दत्वाल्लोकवदिति । एवमन्येऽपि यः कः स इत्यादिशब्दाः द्रष्टव्याः । तेषां बुद्ध्युपक्रमप्रश्नपरामर्शाद्युपहितमर्यादत्वात्, तस्य च वक्तृधर्मत्वात् । बुद्ध्युपक्रमो हि प्रकृतत्वम्, जिज्ञासाऽऽविष्करणं च प्रश्नः, प्रतिसन्धानं च परामर्शः इति । एवं च संशयादिवाचका अप्युन्नेयाः । न च जिज्ञासासंशयादयः सर्वज्ञे प्रतिषिद्धा इति युक्तम् । शिष्यप्रतिबोधनायाहार्यत्वेनाविरोधात् । को धर्मः कथंलक्षणक इत्यादिभाष्यवदिति । एतेन धिगहो बत हन्तेत्यादयो निपाता व्याख्याताः ।

138. **प्रागेव प्रतिषेधादि**ति । प्रमाणबाधकस्य पूर्वपूर्वप्रमाणनिरपेक्षमुत्तरोत्तरप्रमाणमिति हृदि निधाय प्रमाणाभावमाशङ्क्योभयसिद्धस्वर्गतुल्यतया समाधाय प्रयोगमाह – **अत्रापी**त्यादिना **जगत्कर्तरी**त्यन्तेन । विपक्षे बाधकमाह – **अन्यथे**ति । को धर्म इति । 'अथातो धर्मजिज्ञासा' इति सूत्रमवतारयितुं शिष्यजिज्ञासामुपादाय कारिकाप्रथमपादभाष्यम् – 'को धर्मः कथंलक्षणकः कान्यस्य साधनानि' इत्यादि । तत्र यथेत्यर्थः । **एतेने**ति बुद्ध्याद्युपक्रमादीनां पक्षधर्मत्वेन । धिगादिशब्दार्थानामपि पक्षधर्मत्वादित्यर्थः । धिक्पदं निन्दामाचष्टे । निन्दा चाप्रशस्तज्ञानम् । 'अहो' आश्चर्यमाचष्टे अपूर्वोऽयम् अपूर्वोऽदृष्टपूर्वोऽयमिति । बुद्धिराश्रयी । बतपदं खेदमाचष्टे । दुःखानुभवश्च खेदः । हन्तपदं सोभन(संबोधन)माह । सम्बोधनं च संबोध्यविषयवक्तृज्ञानमिति ।

139. प्रत्ययादपि लिङादिप्रत्यया हि पुरुषधौरेयनियोगार्था भवन्तस्तं प्रतिपादयन्ति । तथाहि–

प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥७॥

प्रवृत्तिः खलु विधिकार्या सती न तावत् कायपरिस्पन्दमात्रम्, आत्मा ज्ञातव्य इत्याद्यव्यापनात् । नापीच्छामात्रम्, तत एव फलसिद्धौ कर्मानारम्भप्रसङ्गात् । ततः प्रयत्नः परिशिष्यते । आत्मज्ञानभूतदयादावपि तस्याभावात् । तदुक्तम् – 'प्रवृत्तिरारम्भः' इति । सेयं प्रवृत्तिर्यतः सत्तामात्रावस्थितात् नासौ विधिः, तत्र शास्त्रवैयर्थ्यात् । अप्रतीतादेव कुतश्चित् प्रवृत्तिसिद्धौ तत्प्रत्यायनार्थं तदभ्यर्थनाभावात् । न च प्रवृत्तिसिद्धौ तत्प्रत्यायनार्थं तदभ्यर्थनाभावात् । न च प्रवृत्तिहेतुजननार्थं तदुपयोगः, प्रवृत्तिहेतोरिच्छाया ज्ञानयोनित्वात् । ज्ञानमनुत्पाद्य तदुत्पादनस्याशक्यत्वात्, तस्य च निरालम्बनस्यानुत्पत्तेरप्रवर्तकत्वाच्च, नियामकाभावात् । तस्माद् यस्य ज्ञानं प्रयत्नजननीमिच्छां प्रसूते सोऽर्थविशेषस्तज्ज्ञापको वाऽर्थविशेषो विधिः प्रेरणा प्रवर्तना नियुक्तिर्नियोग उपदेश इत्यनर्थान्तरमिति स्थिते विचार्यते । स हि कर्तृधर्मो वा स्यात्, कर्मधर्मो वा, करणधर्मो वा, नियोक्तृधर्मो वेति ।

139. **विधि**रिति । यद्विज्ञानं चिकीर्षाप्रसूते(तं) स विधिस्त[ज्]ज्ञापको वा । नियोज्यानामस्मदादीनां प्रवृत्तौ यः पुरुषस्याभिप्रायः तेन हि प्रवृत्तेरिष्टाभ्युपायता प्रतीयते, दर्शयिष्यते चैतदग्रे । चिकीर्षाजनकज्ञान(प)-कज्ञानविषयस्य क्रियमाणसाधनत्वादेर्योऽनुमापकः सोऽपि विधिरित्यर्थः । प्रवर्तना प्रवृत्तौ प्रयोजकव्यापारनियुक्ति-रपि सैव । एतत् सर्वमितरवादिसम्मतपक्ष[134B]निरसनमन्तरेण व्यवतिष्ठत इति सम्भवितपक्षं निराकर्तुमुपन्यस्यति **– स हि कर्तृधर्मो वे**त्यादि । प्रथमद्वितीयतृतीयपक्षनिरसने चतुर्थपक्षव्यवस्थितौ पुरुषाभिप्रायसिद्धावभिप्रायाधार-पुरुषविशेष ईश्वरः सेत्स्यतीति दूरे निर्णयो भविष्यतीति विकल्पतात्पर्य[म्] । अनुपलब्धलिङ्गाम(द)पीच्छोत्पद्यते, न प्रवृत्तिरित्यतिप्रसङ्गात् । ज्ञानस्य च विषयोपहारद्वारा प्रवर्तकत्वे विषय एव विधिरिति समुदायार्थः । एतच्च सर्वं विस्तरेण स्पष्टी भवितान्यामन्दबुद्धिभिरभियुक्तैर्विविच्यते ।

140. न प्रथमः ।

इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्विरोधतः ।
असत्त्वात् प्रत्ययत्यागात् कर्तृधर्मो न सङ्करात् ॥८॥

स हि न स्पन्द एव, आत्मानमनुपश्येदित्याद्यव्याप्तेः । ग्रामं गच्छतीत्यादावतिव्याप्तेश्च । नापि तत्कारणं प्रयत्नः । तस्य सर्वाख्यातसाधारणत्वात् । ननु न सर्वत्र प्रयत्न एव प्रत्ययार्थः । करोतीत्यादौ प्रकृत्यर्थातिरेकिणस्तस्याभावात् । संख्यामात्राभिधानेन प्रत्ययस्य चरितार्थत्वात् । ततो लिङ्गादिवाच्य एव प्रयत्न इति । न, कुर्यादित्यत्रापि तुल्यत्वात् । प्रयत्नमात्रस्य प्रकृत्यर्थत्वेऽपि तस्य पराङ्गताऽऽ-पन्नस्य प्रत्ययार्थत्वान्न तुल्यत्वमिति चेत् । न, तथापि तुल्यत्वात् । न चैकस्य तद्वाचकत्वेऽन्यस्य तद्विपर्यय आपद्येत । एको द्वौ बहव एषितीत्यादौ व्यभिचारात् । तत्र द्वितीयसंख्येच्छादिकल्पने करोति प्रयतते इत्यादावपि तथा स्यात् । प्रत्येकमन्यत्र सामर्थ्यावधृतौ सम्भेदे तथा कल्पनायास्तु-ल्यत्वात् । रथो गच्छतीत्यादौ तदसम्भवे का गतिरिति चेत् ।

140. **कर्त्रे**ति प्रयोज्यवृद्धम(मु)पदिशति । **कर्तृधर्म** इति कर्तुरनुष्ठातुर्धर्मः किं स्पन्दो वा तत्कारणं प्रयत्नो वा तत्कारणमिच्छा वा तत्कारणं ज्ञानं वेति विकल्पाः । तत्र प्रथमे **इष्टहानेरनिष्टाप्तेरि**ति बाधकम् । द्वितीयेऽ**प्रवृत्तेरि**ति, **विरोधत** इति **सङ्करादि**ति च । न हि यत्नो यत्नस्य हेतुर्यत्नप्रतीतेर्वा । यत्नस्य कारणमपि त्विच्छेति । यत्नस्य यत्नहेतुत्वे स्वात्मनि वृत्तिविरोध इति । सर्वाख्यातसाधारणत्वेन सङ्कर इति । तृतीये **असत्त्वादि**त्युत्तरः, न च लिङ्श्रवणकाले सा सती । [135A] उत्तरदृष्टे उपान्त्यपङ्क्तौ त्रुटिर्द्वाद्व्या लिङेव तां जनयतीत्यादिना प्रतिपत्तव्यम् । लिङेव तां जनयतीत्याशङ्क्य **प्रत्ययत्यागादि**त्युत्तरम् । **स ही**त्यादिना अतिव्याप्तेरित्यन्तेन इष्टहानेरनिष्टाप्तेरिति विवृतम् । सर्वाख्यातसाधारण्यादित्यनेन। सङ्करादिति विपञ्चितम् । आख्यातमात्रेण न प्रयत्नोऽभिधीयते किन्तु ली(लि)ङादिवाच्यः प्रयत्न इति स(म)तमाशङ्कते **– नन्वि**ति। ननु प्रकृत्यर्थातिरेकिणः प्रत्ययार्थस्याभावे प्रत्ययप्रयोगवैयर्थ्यमित्यत्र आह - **सङ्ख्ये**ति। यदि प्रकृत्यर्थातिरिक्त-प्रत्ययाभावात् सङ्ख्यामात्र अभिधानमन्यत्र तदा प्रकृतेऽपि प्रकृत्यर्थातिरिक्तप्रयत्नाभावात् सङ्ख्यामात्राभिधानम-स्त्वित्याशयवान् परिहरति **– न, कुर्यादित्यत्रे**ति । करोत्यर्थो यत्नमात्रम् । प्रत्ययार्थस्तु तस्य देवदत्तादिसम्बन्धितेति । विशे[ष]माशङ्क्य तुल्यत्वेन समाधत्ते - **प्रयत्नमात्रस्ये**ति । किंचकत्वे (किञ्च प्रकृतेर्धात्वर्थवाचकत्वे) प्रत्ययस्यापि तद्वाचकत्वमविरोधादन्यत्र प्रकृतिप्रत्यययोस्तथादर्शनाच्चेति दर्शयति **– न चैकस्ये**ति । एकस्य

प्रकृतिरूपस्य कृञः प्रयत्नवाचकत्वेऽन्यस्य करोतीत्यादौ लिङादेस्तद्विपर्ययस्तदवाचकत्वमापद्यते । प्रकृतिप्रत्यययोः समानार्थयोरपि क्व[चिद्] विशिष्टप्रयोगो दृश्यत इत्यत आह - **एको द्वावित्यादि** । अथैवममीषां नैकार्थत्वमात्रम्, किं तर्हि भिन्नार्थतेत्यत्रापि समानमुत्तरमित्याहुः – तत्र **द्वितीयसङ्ख्येति**। यद्येक इत्यत्र प्रातिपदिकेनाप्यन्यदेकत्वमभिधीयते विभक्त्याऽप्यन्यदित्यभिमतं तदा करोतीत्यत्रापि प्रकृत्याऽप्यन्यः प्रयत्नोऽभिधीयते [135B] प्रत्ययेनाऽप्यन्य इति समः समाधिरित्यर्थः । ननु प्रयत्नसम्भवासम्भवाभ्यां करोतेः प्रयोगदर्शना[द्] 'देवदत्तो गच्छति' 'रथो गच्छति' ततश्च धात्वर्थसामान्यमेव करोत्यर्थ इति साम्प्रतम्। यथोक्तम् -

भावाभावप्रयोगस्य द्विविधा खलु दर्शनात् ।
धात्वर्थवर्ति सामान्य(न्यं) करोत्यर्थमुपागमत् ॥

इत्याशयवानाशङ्कते – **रथो गच्छतीति** ।

141. तन्तवः पटं कुर्वन्तीत्यत्र या । लोकोपचारोऽयमपर्यनुयोज्य इति चेत्, तुल्यम् । लिङः कार्यत्वे वृद्धव्यवहाराद् व्युत्पत्तौ सर्वं समञ्जसम् । आख्यातमात्रस्य तु न तथेति चेत् । न, विवरणादेरपि व्युत्पत्तेः । अस्ति च तदिह – किं करोति ? पचति पाकं करोतीत्यर्थः इत्यादिदर्शनात् । तथापि फलानुकूलताऽऽपन्नधात्वर्थमात्राभिधाने तदतिरिक्तप्रयत्नाभिधानकल्पनायां कल्पनागौरवं स्यात्, अतो विवरणमपि तावन्मात्रपरमिति चेत् । भवेदप्येवं यदि पाकेनेति विवृणुयात्, न त्वेतदस्ति । धात्वर्थस्यैव पाकमिति साध्यत्वेन निर्देशात् । ततस्तं प्रत्येव किञ्चिदनुकूलताऽऽपन्नं प्रत्ययेनाभिधानीयमिति युक्तम् । तथापि तेन प्रयत्नेनैव भवितव्यम्, न त्वन्येनेति कुत इति चेत् । नियमेन तथा विवरणात् । बाधकं विना तस्यान्यथाकर्तुमशक्यत्वात् । अन्यथा अतिप्रसङ्गात् । स्यादेतत्, यस्य कस्यचित् फलं प्रत्यनुकूलतापत्तिमात्रमेव करोत्यर्थः, न तु प्रयत्न एव, सोऽपि ह्यनेनैवोपाधिना प्रत्ययेन वक्तव्यः, न तु यत्नत्वमात्रेण, प्रयत्नपदेनाविशेषप्रसङ्गात्, तद्वरं तावन्मात्रमेवास्तु लाघवाय, अन्यथा त्वनुकूलत्वप्रयत्नत्वे द्वावुपाधी कल्पनीयौ, अचेतनेषु सर्वत्र गौणार्थास्तिङोऽसति बाधके कल्पनीया इति चेत् ।

141. 'गङ्गायां जलम्' 'गङ्गायां घोषः' इतिवल्लौकिकप्रयोगस्योभयथादर्शनादित्याशयवान् परिहरति – **तन्तव** इति । न च वाच्यं तन्तवः पटं कुर्वन्तीत्यत्र मुख्यार्थत्वे किमनुपपन्नम् । न हि करोतिरपि प्रयत्नार्थः किन्तु क्रियासामान्यवचन इत्यभ्युपगमः । नापि तन्तूनां कर्तृत्वानुपपत्तिः, न हि ज्ञानां(ना)दिसमवायकर्तृत्वं, किन्तु कारकाव(न्त)रनैरपेक्ष्यमित्यन्ये । धातुप्रत्ययमभिधीयमानव्यापारवत्त्वमर्थोऽपि तन्तवः पटमुत्पादयन्ति । मिथो यः संयोगः स तेषामुत्पादनमिति । न चैवं काचिदनुपपत्तिराविरस्तीति । **स्यादेतदित्यादिनैतदेवाशङ्क्य** तदेव निराकरिष्यमाणत्वादिति । इह प्राभाकरा अपि 'भावार्थाः कर्मशब्दाः' इति सूत्रस्थाच्छब्दद्वयादित्यादितो धात्वर्थ एकां काञ्चिदवस्थामापन्नो भाव इति व्याचक्षते । तथाहि धातुः स्वरूपेण भावमाचष्टे, आख्यातं तु यावता कर्मक्षणे निरूपणं फलं सिद्ध्यति तावति वर्तते, 'ओदनं पचति' इति दर्शनात्, न ह्येकेन कर्मक्षणेनोदनः सिद्ध्यतीति । तदर्थस्य आख्यातप्रयोगो विरुध्यते । [136A] अतः फलार्थो व्यापारसमूहो भाव्यत्वाद् भावनेत्युच्यते, भाव्यमानश्चासौ फलं साधयतीत्याशङ्कते-**तथापीति**। अयमर्थः । योऽयं पाकादिरूपो धात्वर्थस्तस्य या फलानुकूलता सैवाख्यातप्रत्ययेनाभिधीयताम् । अन्यथा कल्पनागौरवात् । न तु प्रयत्नाभिधानकल्पना, तत्र प्रमाणाभावात् । तस्माद् विवरणमपि करोतीत्यादिपदं धात्वर्थस्यैव फलानुकूलतामुपदर्शयति । **न [तु] प्रयत्न**

इति। पाचको हि धात्वर्थः तस्यौदनफलानुकूलत्वे 'देवदत्तः काष्ठैरोदनं पचति' इतिवद् ओदनं पाकेन पचतीति प्रयोगप्रत्ययप्रसङ्गात् । न चैव[म]स्त्विति वाच्यम् । किं करोति । पचति पाकं करोतीति सर्वजनसिद्धत्वादित्याशयवान् समाधत्ते – **भवेदप्येतदिति** । सुबोधमन्यत् । कस्यचित् फलानुकूलतामाशङ्क्य परिहरति – **स्यादेतदित्यादिना** । **अत एवेति** । चिकीर्षाप्रभवो हि प्रयत्नः स्वसाध्यमनागतं भावयति । तत्र फलापेक्षया तस्य पूर्वावस्था सा यत्नः कृतिः चितिः वाभिधीयते ।

142. अत्रोच्यते –

कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना ॥९॥

यत्नपूर्वकत्वं हि प्रतिसन्धाय घटादौ कृत इति व्यवहारात् । हेतुसत्त्वप्रतिसन्धानेऽपि यत्नपूर्वकत्वप्रतिसन्धानविधुराणामङ्कुरादौ तदव्यवहारात् करोत्यर्थो यत्न एव तावदवसीयते । अन्यथा हि यत्किञ्चिदनुकूलपूर्वकत्वाविशेषाद् घटादयः कृताः, न कृतास्त्वङ्कुरादय इति कुतो व्यवहारनियमः । तेन च सर्वमाख्यातपदं विव्रियते इति सर्वत्र स एवार्थ इति निर्णयः । तथा च समुदिते प्रवृत्तं पदं तदेकदेशेऽपि प्रयुज्यते, विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत् । अन्यथाऽपि मध्यमोत्तमपुरुषगामिनः प्रत्ययाः, प्रथमे पुरुषे जानाति इच्छति प्रयतते अध्यवस्यति शेते संशेते इत्यादयश्च गौणार्था एवाचेतनेषु । न च वृत्त्यन्तरेणापि प्रयोगसम्भवे शक्तिकल्पना युक्ता । अन्यायश्चानेकार्थत्वमिति स्थितेः ।

142. **सैव कृतिरेव** भावना किंविशिष्टा, पूर्वापरीभूता पूर्वापरीभूतत्वे सतीत्यर्थः । न चैवंभूतो यत्नपदस्यार्थः । ततश्च यत्न एव भावना, न तु व्यापार इत्यर्थः । करोत्यर्थो यत्न एवेति कुत इत्यत उक्तं घटाद्यङ्कुरादीनां हे[तु]मत्त्वाविशेषेऽपि कृताकृतव्यवहारनियमेन । अत्र च युक्त्यन्तरमाह – **कर्तृरूपेति** । नन्वेवमपि पूर्वापरी[136B]भूतत्वं यत्नत्वमनुकूलत्वं चेति त्रितयमेवाऽऽख्यातवाच्यम्, त्रितयाभावे च कथमाख्यातपदं प्रवर्तत इत्याशङ्क्याह – **तथा चेति** । यत्नस्य पूर्वापरीभूतत्वानुकूलत्वे प्रवृत्तमाख्यातम्, जातं फलानुकूलत्वं तावत् किं धात्वर्थस्य, 'रथो गच्छति' इत्यादौ प्रयुज्यते ? लोके भाक्तः प्रयोग इति तात्पर्यम् । समुदिते प्रवृत्तस्य पदस्यैकदेशेऽपि प्रवृत्तिरित्यत्र निदर्शनमाह – **विशुद्धमात्रमिति**। उक्तं च –

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च ॥

अतो जन्म-संस्कार-विद्यासु तिसृषु श्रोत्रियपदं प्रवर्तत इत्युक्तम् । तथा च क्वचित् ब्राह्मणमात्रे प्रयोगो भाक्त इत्यर्थः । अपि च अचेतनेष्वपि सर्वत्र गौणार्थत्वं मा भूदित्याभिमानिको यत्र वाच्यताविशेषस्तच्चोभयथाऽप्यर्जनीयमायातमित्याह – **अन्यथेति** । यथा देवदत्त-यज्ञदत्तयोः परस्परयुद्धे 'त्वं यदि शरान् मुञ्चस्यहमपि शरान् मुञ्चामि' इतिवच्चित्रस्थयोरपि परस्परसम्मुखयुद्धे 'त्वं यदि शरान् मुञ्चस्यहमपि शरान् मुञ्चामि' इति प्रत्ययप्रयोगयोस्तुल्यत्वादेकत्रमुख्यत्वमन्यत्र गौणत्वम् । तथा च देवदत्तो जानाति इच्छति यतते अध्यवस्यति शेते संशेते इति लोके प्रत्ययप्रयोगौ तथा चित्रस्थयोरपि(स्था अपि) जानन्ति इच्छन्ति यतन्ते अध्यवस्यन्ति शेरते संशेरत इत्यपि प्रत्ययप्रयोगौ तुल्याविति । एवं तावद् 'गङ्गायां जलं' '[गङ्गयां] घोषः' वन्मुख्यगौणार्थत्वव्यवस्थितेः सर्वजनसिद्धत्वेन दुष्परिहरत्वादित्युक्तम् - संप्रत्यक्षादिशब्दवदनेकार्था एव जानातीत्यादयः शब्दाः

सन्त्विति मन्यमानमपि प्रयोगवैधर्म्येणैकत्र वाच[क]त्वमन्यत्र गौणवृत्त्या [प्र]योगोपपत्तावपि वाचकत्वं [137A] कल्पते । गौणव्यवहारापलापप्रसङ्ग इत्यनिष्टोपदर्शनेन बोधयति – **न चेति** ।

143. अत एवानुभवोऽपि – यावदुक्तं भवति पाकानुकूलवर्तमानप्रयत्नवांस्तावदुक्तं भवति पचतीति । एवं तथाभूतातिवृत्तप्रयत्नोऽपाक्षीदिति । एवं तथाभूतभाविप्रयत्नः पक्ष्यतीति । न तु पचतीति पाकानुकूलयत्किञ्चिद्वानिति । अन्यथाऽतिथावपि परिश्रमशयाने पचतीति प्रत्ययप्रसङ्गात् । अपि च कर्तृव्यापार एव कुञर्थश्चेतनश्च कर्ता, अन्यथा तद्व्यवस्थाऽनुपपत्तेः । न ह्यभिधीयमानव्यापारवत्त्वं कर्तृत्वम्, अनभिधानदशायां कुर्वतोऽप्यकर्तृत्वप्रसङ्गात् । नाप्याख्यातप्रत्ययाभिधानयोग्यव्यापारशालित्वं कर्तृत्वम्, योग्यताया एवानिरूपणात् । फलानुगुणमात्रस्य सर्वकारकव्यापारसाधारणत्वात् । नापि विवक्षातो नियमः अविवक्षादशायामनियमप्रसङ्गात् । स्वव्यापारे नेदमनिष्टमिति चेत् । एवं तर्हि 'स्वव्यापारे च कर्तृत्वं सर्वत्रैवास्ति कारके' इति न्यायेन करणादिविलोपप्रसङ्गः । न स्वव्यापारापेक्षया करणादिव्यवहारः, किन्तु प्रधानक्रियापेक्षया । अस्ति हि काञ्चित् क्रियामुद्दिश्य प्रवर्तमानानां कारकाणामवान्तरव्यापारयोगः, न त्ववान्तरव्यापारार्थमेव तेषां प्रवृत्तिरिति चेत् । तर्हि तदपेक्षयैव कर्तृकर्मादिव्यवहारविशेषनियमे किं कारणमिति चिन्त्यताम् । स्वातन्त्र्यादीति चेत् । ननु तदेव किमन्यत् प्रयत्नादिसमवायादिति विविच्याभिधीयतामिति । तस्मात् सर्वत्र समानव्यापार एवाख्यातार्थः । तथापि फलानुगुणतैवास्तु प्रत्ययस्य प्रवृत्तिनिमित्तम्, प्रयत्नस्त्वाक्षेपतो लप्स्यते इति चेत् ।

143. उक्तमर्थमनुभवमुखेन पुरस्करोति – **अत एवेति** । [**परि**]**श्रमशयान** इति । एवं कृताकृतविभागेनेति हेतुं व्याख्याय कर्तृरूपव्यवस्थयेति व्याख्यातुमुपक्रमते – **अपि चेति** । **तद्व्यवस्थेति** । लक्षणान्तरसंभवादिति भावः । नन्वस्ति लक्षणं धातुप्रत्ययाभ्यां प्राधान्येनाभिधीयमानव्यापारत्वं, यदुक्तम् - यस्य व्यापारं प्राधान्ये[न] धातुराख्यातं प्रत्ययो वाऽभिधत्ते स चेतनोऽचेतनो वा स्वतन्त्रः कर्तेत्याशङ्क्य निराकरोति – **न हीति** । अत्र हि तथाभूताभिसम्बन्धो वा विवक्षितस्तं प्रति योग्यता वा ? नाद्य इत्याह – **न ह्यभिधीयमानेति**। द्वितीयमाशङ्क्य निराचष्टे **नापीत्यादिना** । फलानुगुणत्वं योग्यत्वमिति प्रासङ्गिकत्वान्नोपादेयमित्याह – **फलेति**। 'विवक्षातः कारकाणि भवन्ति' इति वैयाकरणसूत्रसिद्धमर्थमुत्थाप्य निराकरोति – **नापीति** । फलानुमेयगुणतया वक्तुमिष्टं यत् तत् कारकं कर्तृ नेतरदित्यत्र यद् यदा फलानुगणतया वक्तुमिष्यते तत् तदा कर्तृ[कार]कं भवति, यदा तु वक्तुमिच्छा न भवति तदा न, कर्तृत्वे वा सर्वकर्तृ प्राप्तमित्यर्थः । अत्र शङ्कते – **स्वव्यापारेति**। समाधत्ते – **एवं तर्हीति** । प्रधानक्रियोद्देशेन प्रवृत्तिरपि न कर्तृव्यवहारबीजम्, सर्वकारकाणां तथात्वप्रसङ्गस्य दुर्वारत्वात् । न च वाच्यम् आरादुपकारकत्वात् । सन्निपत्योपकारकं करणम्, करणव्यापारोपकारकं कर्मेत्यादि। कर्तुरपि करणवत् सन्निपत्योपकारकत्वाविशेषः । पूर्वं धात्वर्थस्य फलानुकूलत्वमाशङ्क्य परिहृतं संप्रति लातोतते[१] यद्विशेषात् तद्व्यापरस्य व्यवहारपर्यन्तमनुवृत्तेः । तस्मादन्यस्य कर्तव्यं(तृव्य)वस्थितस्यासम्भवात् कर्तृव्यवहारनिमित्तं प्रयत्नादिसमवाय एव प्रष्टव्य इत्याह – **प्रयत्नादीति** । न त्वनन्यलभ्यः शब्दार्थः इति मतिः। प्रकारान्तरलभ्यस्य प्रयत्नस्य न प्रत्ययवाच्यतेत्याशयवान् शङ्कते – **तथापीति** ।

---

१. भ्रष्टः पाठः ।

144. न, –

भावनैव हि यत्नात्मा सर्वत्राख्यातगोचरः ।
तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥१०॥

केन हि तदाक्षिप्येत । न तावदनुकूलत्वमात्रेण, तस्य प्रयत्नत्वेनाव्यापनात् । न हि यत्नत्वैकार्थसमवाय्येवानुकूलत्वम् । अत एव न संख्यया, तस्याः संख्येयमात्रपर्यवसायित्वात् । कर्त्रेति चेत् । न । द्रव्यमात्रस्याकर्तृत्वात् । व्यापारवतश्चाभिधाने व्यापाराभिधानस्यावश्याभ्युपगमनीयत्वात् । नापि धात्वर्थेन तदाक्षेपः । विद्यते इत्यादौ तदसम्भवात् । न ह्यत्र धात्वर्थो भावनाऽपेक्षी, सत्ताया नित्यत्वात् । तत्र न भविष्यतीति चेत् । न । पूर्वापरीभूतभावनाऽनुभवस्याविशेषात् । भावनोपरागेण ह्यतथाभूतोऽप्यर्थस्तथा भासते इति । न च पदान्तरलब्धया भावनयाऽनुकूलतायाः प्रत्ययार्थस्यान्वयः । तदसम्भवात् । न खलु प्रकृत्यैव साऽभिधीयते । धातूनां क्रियाफलमात्राभिधायित्वात् । अन्यथा पाक इत्यादावपि भावनाऽनुभवप्रसङ्गात् । नापि चैत्र इत्यादिना पदान्तरेण । प्रकृतिप्रत्यययोरुभयोरप्यकारकार्थत्वात् । ओदनमित्यादेः कारकपदत्वात् तस्य च क्रियोपहितत्वात् तेनाभिधानमाक्षेपो वा, कथमन्यथौदनमित्युक्ते किं भुङ्क्ते पचति वेति विशेषाकाङ्क्षेति चेत्, न । पचतीत्युक्ते किमोदनं तेमनं वेति विशेषाङ्क्षादर्शनात् । सा चाक्षेपाभिधानयोरन्यतरमन्तरेण न स्यात् । तस्यां दशायां न चेदाक्षेपो नूनमभिधानमेवेति । स्यादेतत्, अभिधीयतां तर्हि कर्ताऽपि । तदनभिधाने हि सङ्ख्येयमात्रमाक्षिप्य सङ्ख्या कथं कर्तारमन्वियात्, न तु कर्मादिकमपि । शाकसूपौ पचति शाकसूपौदनान् पचतीत्यादौ विरोधनिरस्ता सङ्ख्या चैत्र इति कर्तारमविरुद्धमनुगच्छतीति चेत् । चैत्र ओदनं पचतीत्यत्र का गतिः ।

144. भवेदप्येत[दे]वं यद्यन्यतः प्रयत्नलाभो भवेन्न त्वस्ति [137B] प्रकारान्तरेणानुपपत्तेरित्याशयवान् समाधिमुपक्रमते – **भावनैवेति**। तथा **विवरणध्रौव्यादित्यस्य** प्रागेव [वि]वृतार्थत्वादा**क्षेपानुपपत्तित** इत्येतद्विवृणोति । **ते(?के)न हीति** । **तदिति** प्रयत्नत्वमित्यर्थः । **कर्त्रेति** आख्यातार्थेनेति शेषः । अत्र **कर्त्रेति** द्रव्यमात्रमभिप्रेतं व्यापारवद्वा । नाद्यः, तन्मात्रस्याकर्तृत्वादित्यकारकत्वादित्यर्थः । यथोक्तं **न्यायवार्तिककृता** 'न द्रव्यमात्रं कारकं नापि कर्तृव्यापारमात्रम्' इत्यादि । द्वितीये दूषणमाह - **व्यापारवतश्चेति** । ननु सत्ताया नित्यत्वेन पूर्वापरीभावो विरुध्यत इत्यत आह – **भावनोपरागेणेति** । ननु मा भूदाक्षेपो यदा पदान्तरेण भावनाऽभिधीयते अनुकूलता चाख्यातेन, तथा च भावना आक्षेपमन्तरेणापि प्रकृतिप्रत्ययार्थयोरिव परस्परमथ(र्थ)योभ(र्भ)विष्यतीत्याशयवानाशङ्कते – **न च पदान्तरेति** । **तदसम्भवादिति** । यत्नात्मकभावनाभिधायकपदान्तरासम्भवादित्यर्थः । एतदेव विशदीकर्तुं विचारमत्रारम्भते – **न खल्विति** । **नापि चैत्र** इति । प्रकृतिस्तावदत्र शुद्धप्रातिपदिकार्था, प्रथमाविभक्तिरपि प्रातिपदिकार्थवचनमात्र इति **पाणिनिस्मृतेः** । कारकार्थस्य तु भावनार्थत्वं सम्भवेत् । यस्य व्यापारवत [138A] एव कारकत्वान्नान्यस्येत्यर्थः । **तस्य चेति कथमन्यथेति** । यदि कारकपदेनौदन[म्] इत्यनेन क्रि[या]सामान्यस्याक्षेपतो वाऽभिधानतो वा न प्रतिपादनं तदा क्रियासामान्यस्यानधिगतार्थत्वात् कथं तद्विशेषजिज्ञासा स्यात् । तस्माद् विशेषाकाङ्क्षायाः सामान्यानुभवपूर्वकत्वाविनाभावाद् ओदनमिति कर्मपदेन क्रियासामान्यमभिधीयत इत्यर्थः । विशेषाकाङ्क्षा हि प्रतिपत्तुर्जिज्ञासा । सा चाविनाभाविन्यर्थविशेषे भवति । यथा दृष्टे रसविशेषे जिज्ञासेत्युक्ता(क्तम्) । न चैतदेव क्रियापदस्याप्यत एव कर्मसामान्या-

भिधायकत्वप्रसङ्ग इत्याह - **एवमि(पचती)त्युक्ते** इति । **तस्यां दशायामिति** । सामान्यविशेषयोरुभयोरुपलभि-(ब्धिः) । प्रागभावकाले केन कस्याक्षेप इत्यतो विशेषाकाङ्क्षादर्शनात् कर्मसामान्याभिधानमेवेत्यतिप्रसज्येतेत्यर्थः । तदेवमाक्षेपतो यत्नलाभ इति पक्षं निराकृत्य यत्नाभिधानसामर्थ्यसंभव [इ]त्यभिहिते विभागबलेन प्रयत्नाभिधान-प्र(म)स्तीति प्रयत्नोऽप्यभिधान(धीयता)मिति पक्षं निराकर्तुमाशङ्कते – **अभिधीयतामिति** ।

145. एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि तथा, यववराहादिवदिति चेत् । न, पच्यते इत्यादावपि तथाभावप्रसङ्गात् । चैत्राभ्यां चैत्रैरिति विरोधनिरस्ता सूप इत्यविरुद्धं कर्म समनुक्रामतीति चेत् । चैत्रमैत्राभ्यां शाकसूपौ पच्येते इत्यत्र का गतिः । अन्यत्र निर्णीतेनार्थेन व्यवहार इति चेत् । न, पचतीत्यादावपि तथाभावप्रसङ्गात् । तत्र पूर्वक एव निर्णयः, पच्यते इत्यत्र त्वपर इति चेत् । न, विशेषाभावात् । आत्मनेपदपरस्मैपदाभ्यां विशेष इति चेत् । न, पच्यते पचते पक्ष्यते इत्यादौ विप्लवप्रसङ्गादिति । दृश्यते च समानप्रत्ययाभिहितेनान्वयः सङ्ख्यायाः । तद् यथा – भूयते सुप्यते इत्यादौ । न हि तत्र कर्त्रा कर्मणा वा अन्येनैव वा केनचिदन्वयः किन्तु भावेनैव । अनन्वये तदभिधायिनोऽनर्थकप्रसङ्गात् । आक्षिप्तेन चान्वये तत्रापि कर्त्रैवान्वयापत्तेः । को हि सुप्यते स्वपितीत्यनयोः कर्त्राक्षेपं प्रति विशेषः ।

145. **यववराहेति** । 'यवमयश्चरुर्भवति' इत्यत्र दीर्घशूकस्य वाच्यतायां व्यवस्थापितस्य अन्यत्रापि 'यवैर्यजेत' इत्यत्रापि तस्यैव वाच्यतायामित्यर्थः । **तथाभावप्रसङ्गादिति** । आख्यातेनाभिहितभावनायास्तत्रान्वय-प्रसङ्गात् । तथा च देवदत्तेनौदनः प[138B]च्यत इति प्रयोगो न स्यात् किन्त्वोदनं पच्यते देवदत्त इति भावः । **पचतीति** यथा शाकसूपौ पच्येते इत्यत्र कर्मगता सङ्ख्याऽभिधीयते तथा 'देवदत्त ओदनं पचति' इत्यत्रापि कर्त्र(र्म)गतस्यैकत्वस्याभिधानप्रसङ्गः । **तत्र पूर्वक एवेति** । 'शाकस्त(सू)पौदनानि पचति' इत्यत्रैकत्वस्य कर्मणि विरुद्धत्वात् कर्तृगतमेकत्वं प्रतिपाद्यत इत्यत्र पूर्वक एव निर्णयः, पच्यते इत्यत्रापरः कर्मगतमेकत्वं प्रतिपाद्यत इत्यर्थः । **पचते** इति । यदा वा तस्य कर्मगतैकत्वं पचते इत्यस्यापि कर्मगतैकत्वम्, नैकं प्रति प(प्र)तिपादकत्वं स्यादित्यर्थः । ननु यथाख्या[तम]भिधीयते कर्त्रा च, तदापि कथं सङ्ख्यायाः कर्त्रा सहान्वय इत्यत आह – **दृश्यते चेति** । यथाहि भावोत्पन्नेनाख्यातेन भूयत इत्यादौ भावगतमेकत्वं प्रतिपाद्यते भावस्य सङ्ख्यायाश्चैकप्रत्ययाभिहितत्वात् । तथा कर्तुराख्याताभिधाने कर्तुः सङ्ख्यायाश्च समानप्रत्ययाभिहितत्वेन परस्पर-मन्वय इत्यर्थः । ननु कर्त्रादिभिरन्वयो यदि भवेत् तदा को दोष इत्यत आह – **अनन्वय** इति । कर्त्रादिवद् भावनयाऽप्यनन्वयेऽनन्वितमेव स्यात् । तथा च पौर्वापर्यायोगादप्रतिसम्बद्धार्थकुण्डमजाजिनमितिवदपार्थकं निग्रह-स्थानमित्यर्थः । ननु भावनाक्षिप्तेनान्येन केनचिदन्वयोऽस्या भविष्यतीत्यत आह - **आक्षिप्तेन चेति** । यद्याक्षि-[139A]प्तेन सङ्ख्याया अयं योऽभिधीयते यथा पचतीत्यत्राक्षिप्तेन कर्त्रा सङ्ख्यायास्तु योऽभिधीयते तथा लिङादावप्याक्षिप्तेन कर्त्रैवं स[ङ्]ख्याया अन्वये योऽस्त्वित्यर्थः । **को हीति** । आक्षेपकारणभावनाभिधानस्यो-भयत्राविशेषादित्यर्थः ।

146. स्यादेतत्, भावकर्मणोरित्याद्यनुशासनबलात् तावत् भावकर्मणी प्रत्ययवाच्ये, ततस्तद-भिहिता सङ्ख्या ताभ्यामन्वीयते । यस्तु प्रत्ययो न तत्रोत्पन्नः तदभिहिता सङ्ख्या 'मुख्यं वा पूर्वचोदनाल्लोकवत्' [मीमांसासूत्र १२.२.२३] इति न्यायेन कर्तारमेवाश्रयते इति नियमः । न ।

विपर्ययप्रसङ्गात् । 'शेषात् कर्तरि परस्मैपदम्' 'कर्तरि शब्' इत्यनुशासनबलाद् भावकर्तारौ प्रत्यय-वाच्यौ, ततस्तदभिहिता सङ्ख्याऽपि ताभ्यामन्वीयते । यस्तु प्रत्ययो न तत्रोत्पन्नः तदभिहिता सङ्ख्या तेनैव न्यायेन कर्मबलमाश्रयेदिति नियमोपपत्तेः । तस्मान्मतिकर्दममपहाय यथानुशासनमेव गृह्यते इति प्राप्तम् । एवं प्राप्तेऽभिधीयते –

आक्षेपलभ्ये सङ्ख्येये नाभिधानस्य कल्पना ।
सङ्ख्येयमात्रलाभेऽपि साकाङ्क्षेण व्यवस्थितिः ॥११॥

146. **भावकर्मणोरिति** । 'भूयते देवदत्तेन' 'क्रियते कटकः' इत्यत्र भावकर्मणोरनुशासनबलाद् भावकर्मणी प्रत्ययवाच्ये । यस्तु भावे कर्मणि वा नोत्पन्नो यथा करोतीति तदर्थै[र]भिहिता सङ्ख्या कर्तार-मेवानुगच्छति । कर्तुः कारकेषु मुख्यतेति । 'अग्रा(आग्ना)वैष्णवमेकादशकपालं [चरुं] निर्वपेत्' 'अग्रा(आग्ना)-सारस्वतमप्यप्रयोजयेत्' इति । अत्राग्नावैष्णवधर्मा अग्रतो भवन्त्वथ सारस्वतधर्मा इत्यनियमे प्राप्ते आग्ना-वैष्णवधर्मा एव प्रथमं भवन्ति । अत्र पूर्वचोदितत्वादिति हेतुः । पूर्वं ह्याग्नावैष्णवाश्चोदिता इति तस्यैव प्रथमं धर्मा भवन्ति नोत्तरस्य सारस्वतस्य, तेन धर्मान्तराणां विरोधात् पूर्वधर्मैरेव चोत्तरस्य सिद्धेर्नोत्तरः सारस्वतः स्वधर्मान् प्रयोजयति । अस्योदाहरणं **लोकवदिति** । यथा लोके विवादे प्रस्तुते यत्र साक्षिद्वयं पृच्छ्यते, तत्र प्रथमः पृष्टो यदि तमर्थमनुजानाति, कामः(मं) [द्वितीयः] पृष्टश्चापलपति, तत्र प्रथमपृष्टव्यवहारेणैव व्यवहारो नोत्तरस्य, त[स्य]मुख्यत्वात् । यथा लोके मुख्यं मुखप्रक्षालेनादीति केचिदुदाहरन्ति । अत्रापि कारकेषु प्रथमं कर्तैव चोदित इति क्रमव्यतिक्रमे प्रयोजनबाधनयोरभावादविशिष्टसङ्ख्या कर्तारमेवाश्रयत इति युक्तमित्य-[139B]र्थः । **तेनैव न्यायेने**ति । मुख्यत्वादित्यादिन्यायेनेत्यर्थः । **कर्मबलमाश्रयेदि**[1]ति । तथा च व(प)च्यते देवदत्त ओदनमिति [न] स्यात् किन्तु देवदत्तेन पच्यते ओदन इत्यर्थः । यथानुशासनमिति **पाणिन्या**दि-सूत्रेणेत्यर्थः । तेन कर्तरि विहितस्य प्रत्ययस्य कर्तृवाचकत्वे कर्मणि विहितस्य कर्मवाचकत्वमिदं स्वीकर्तव्यम् । अन्यथष्टि(था शब्द)व्यवस्थि[त्य]नुपपत्तेरित्यर्थः । अनन्यलभ्यस्य शब्दार्थत्वात् । आक्षेपलभ्यत्वे तु द(त)-दनुपपत्तेः । साकाङ्क्षि(क्ष)व्यवस्थितेश्चातिप्रसङ्गनिराकरणम् । तथा च व्यवस्थोपपद्यते इति सर्वं समञ्जसमित्याह – **आक्षेपलब्ध(भ्ये)** इति । नन्वेवमपि सङ्ख्याया विशेषस्तु कथं लभ्यत इत्यत आह – **सङ्ख्येयमात्रे**ति ।

147. सङ्ख्याऽपि तावदियं भावनाऽनुगामिनी, यं यं भावनाऽन्वेति तं तं सङ्ख्याऽपीति स्थितेः एकप्रत्ययवाच्यत्वनियमात् । भावना च शुद्धं प्रातिपदिकार्थमात्रमाकाङ्क्षति । न हि व्यापारवन्तं व्यापार आश्रयते, आत्माश्रयत्वात्, समवायं प्रति तदनुपयोगात्, विजातीयव्यापारवतोऽकर्तृत्वाच्च । न च द्वितीयाद्याः प्रातिपदिकविभक्तयः । ततः प्रथमानिर्दिष्टेनैव भावनाऽन्वीयते इति तस्यान्वययोग्यता-नियमात् सङ्ख्याऽपि तदनुगामिनी तेनैवान्वीयते इति नातिप्रसङ्गः, नञर्थवत् । यथा हि चैत्रो न गौरो न स्पन्दते न कुण्डलीत्यादौ विशेषणविशेष्यसमभिव्याहाराविशेषेऽपि नञा तदनभिधानाविशेषेऽपि नञर्थस्यविशेषणांशैरेवान्वयो न विशेष्यांशेन । ननु बाधात् तत्र तथा, न हि विशेष्येण तदन्वये विशेषणोपादानमर्थवद् भवेत्, तन्निषेधेनैव विशेषणनिषेधोपलब्धेः । उभयनिषेधे चावृत्तौ वाक्यभेदा-दनावृत्तौ निराकाङ्क्षत्वादिति चेत् । न, तुल्यत्वात् । समानप्रत्ययोपात्तभावनाऽऽक्षिप्तान्वयोपपत्तौ

१. मुद्रितमूले तु 'कर्म समाश्रयेत्' इति पाठः ।

बाधकं विना सन्निहितत्यागे व्यवहितपरिग्रहस्य गुरुत्वात् । भावनायाश्च सामान्याक्षेपेऽपि साकाङ्क्ष-परित्यागे निराकाङ्क्षान्वयानुपपत्तेः । न ह्यन्यतराकाङ्क्षा अन्वयहेतुः, अपि तूभयाकाङ्क्षा । प्रातिपादिकार्थो हि फलेनान्वयमलभमानः क्रियासम्बन्धमपेक्षते, भावनाऽपि व्यापारभूता सती व्यापारिणमित्युभयाकाङ्क्षा अन्वयहेतुः । कटं कटेनेत्यादि तु कारकतयैव फलसमन्वितं न व्यापारान्तरमपेक्षते इति निराकाङ्क्षमिति ।

147. श्लोकं व्याचष्टे – **सङ्ख्या तावदिति** । **सङ्ख्यापीति स्थितेरिति** । समानप्रत्ययोपात्तभावना क्षिप्तान्वयोपपत्तावित्यादिना वक्ष्यमाणवाक्यबलादिति भावः । एतदेवमनग्नि(ग्नि) भावयति । **एकप्रत्ययेति**। ननु भावनापि भावमात्राकाङ्क्षिणी कथं सङ्ख्येयविशेषान्वयं सङ्ख्यायाः कर्तुमीष्ट इत्यत आह - **भावना चेति**। कुत इत्यत आह - **न हीति** । हि यस्मादर्थे । **आत्माश्रयत्वादिति** । व्यापारवत्त्वेनैव व्यापारवत्त्वोपपादनादित्यर्थः । व्यापारान्तरकल्पनायामनवस्थानादिति शेषः । ननु व्यापारवत्त्वेनैव व्यापारस्य समवाय उपपादयिष्यतीत्यत आह – **समवायं प्रतीति** । यद्यपि चात्र व्यापारापेक्षत्वे व्यापारसमवायस्यानवस्थैव दूषणं तथापि समवायस्य नित्यतया व्यापारोप्त(रान्त)रानुपयोग[140A] इत्ययमुद्र(द्रा)वये(नेऽ)पराध इति त एव दर्शिनः। किञ्च भावना तु स्वान्वयाय सजातीयव्यापारवत्त्वं वाऽऽक्षिपति अन्यजातीयव्यापारवत्त्वं वा । आद्येनानवस्थान्मा(नमा)[त्मा]श्रयप्रसङ्ग उक्तः । द्वितीये त्वापो गृन्वि(गन्धव)दित्यन्वय इति दर्शयन्नाह - **विजातीयेति**। न हि घटनिष्पादनानुगुणव्यापारेण पा[क]कर्तृत्वम्, पाकोत्पत्त्यनुकूलव्यापारेण वा घटकर्तृत्वम्, कुलालं पासुपकतायाः[१] दृष्टमिति । नन्वाकाङ्क्षा तु शुद्धप्रातिपदिकभावना । तथापि द्वितीयाविभक्तिरूपोपादानोपनीतेनापि कुतो नान्वय इत्यत आह - **न च द्वितीयाद्या हीति** । न चैत्र इत्यादिना जातिगुणकर्मानि(णि) यथालिख्य विकल्प्य प्रतिभासं निषेध्यतया दर्शयति – **आवृत्ताविति** । एषा ह्यत्र वचनव्यक्तिः, यं तावन्न तथैव चैत्रपदव्यो(व्या)पीति। उद्देश्यविशेषणविवक्षायामित्यर्थः । -- आवृत्तिर्नास्ति तत् कुतो वाक्यभेद इत्यत आह - **[आ]वृत्ताविति**। प्रथमोच्चारितेऽपि येन केनभि(चि)न्निषेध्येन चरितार्थत्वात् । या ते व्याख्याताभिहितभावनेव व्रीहिभिरित्युपात्तकरण - - बद्धो न यवैरिति । तदे(दा) करणान्तरमाकर्षतीत्यर्थः । **सामान्याक्षेपेऽपीति** । यद्यपि व्यापारभूता हि भावना व्यापारे(रि)सामान्यमाक्षिपति - न तु कर्तृभूतव्यापारिविशेषः - तथापि साकाङ्क्षेण व्यापारिणा प्रातिपदिकार्थेनान्वीयते, न तु कारकाध(न्त)रेण तस्य निराकाङ्क्षत्वात् । उभयाकाङ्क्षाम(मे)व दर्शयति – **प्रातिपदिकेति**। अकारकतया प्रातिपदिकार्थस्य फलेनान्वयाभावात् [140B] फलान्वयसिद्ध्यर्थं द्वारभूतव्यापाराकाङ्क्षा व्यापारभूतायाश्च भावनायाः व्यापार्याकाङ्क्षा । अत उभयाकाङ्क्षायामुभयोरन्वयो भवति । कारकपदस्य तु कारकत्वेनैव फलान्वयात् भावनाया नाकाङ्क्षाऽस्तीत्यर्थः ।

148. अत एव 'आस्यते सुप्यते' इत्यादौ नाक्षिप्तेनान्वयः । न हि चैत्रेणेति तृतीयान्तशब्दस्य भावनायामाकाङ्क्षाऽस्ति । भाव्याकाङ्क्षाऽस्तीति चेत् । न, फलेन शयनादिधात्वर्थेनान्वयात् । फलसम्बन्धिनश्चात्र कर्त्रनतिरेकात्, न हि शयनादयो धात्वर्थाः कर्त्रतिरेकिसम्बन्धाः । न च फलतत्सम्बन्धिव्यतिरेकेणान्यो भाव्यो नाम यमपेक्षेत । स्यादेतत्, किमिति न प्रयुज्यते कटः करोति चैत्रमित्यादि, अभिहितानभिहितव्यवस्थाऽभावादिति चेत् । न, चैत्रमिति प्रथमान्तस्यासाधुत्वात् । द्वितीया-

---

१. भ्रष्टः पाठः ।

न्तस्य तु कर्मवचनत्वेन तत्सम्बन्धाद् भाव्यानपेक्षणीभावेन भावकमात्रमपेक्षेत । न च कटस्य चैत्रं प्रति भावकत्वम्, विपर्ययात् । अनाप्तेन तु विवक्षायां प्रयुज्यत एव । प्रयुज्यतां तर्हि कटः करोति चैत्र इत्यादि । न, नित्यसन्दिग्धत्वेन वाक्यार्थासमर्पकत्वात् । ततस्तदुपपत्तये विशेषस्य व्यञ्जनीयत्वात् । व्यज्यतां तर्हि तृतीयया चैत्रेणेति, एवं देवदत्तः क्रियते कटमिति व्यज्यतां द्वितीययेति चेत् । न, अप्रयोगात् । न ह्यनाप्तेनाप्येवंप्रायाणि प्रयुज्यन्ते । लक्षणाविरोधेन कुत एतदेवेति चेत् । लोकस्यापर्यनुयोज्यत्वात् । न हि गार्गिकयेति पदं साध्विति श्लाघाऽभिधायिपदसन्निधिमनपेक्ष्य प्रयुज्यते । तस्य तदुपाधिनैव विहितत्वादिति चेत् । एतदेव कुतः ? लोके तथैव प्रयोगदर्शनादिति चेत् । तुल्यम् । करोतीत्यादिककर्मविभक्तिसमभिव्याहारेणैव प्रयुज्यते, क्रियते इति कर्तृविभक्ति-समभिव्याहारेणैवेति किमत्र क्रियताम् । इममेव विशेषमुररीकृत्यानभिहिताधिकारानुशासनेन ह्येतावान् परामर्शः सर्वेषां हृदि पदमादधातीत्यभिधानानभिधानविभाग एव व्युत्पादनदशायां पेशल इति । स्यादेतत्, भवतु सर्वाख्यातसाधारणी भावना, कालविशेषसम्बन्धिनी सा लङाद्यर्थः, कालत्रयापरामृष्टा लिङर्थ इति चेत् । न, यत्नपदेन समानार्थत्वप्रसङ्गात् । विषयोपरागानुपरागाभ्यां विशेष इति चेत् । न, यागयत्न इत्यनेन पर्यायताऽऽपत्तेः । कर्तृसङ्ख्याऽभिधानानभिधानाभ्यां विशेष इति चेत् । न, यागयत्नवानित्यनेन साम्यापत्तेः । इष्ट एवायमर्थ इति चेत् । न, इतो वत्सरशतेनाप्यप्रवृत्तेः । फलसमभिव्याहाराभावान्न प्रवर्तते इति चेत् । न, स्वर्गकामो यागयत्नवानित्यतोऽप्यप्रवृत्तेः । तत् कस्य हेतोः ? न हि यत्नो यत्नस्य हेतुर्यत्नप्रतीतिर्वा यत्नस्य कारणम्, अपि त्विच्छा । न च साऽपि प्रतीता यत्नजननी येन सैव विध्यर्थ इत्यनुगम्यताम्, अपि तु सत्तया । न च लिङः श्रुतिकाले सा सती ।

148. ननु यदि स्वपी(पि)ति इत्यादावाक्षिप्तेन कर्त्राऽन्वयस्तदा सुप्यते इत्यादावाक्षिप्तेन कर्त्राऽन्व-योऽस्तीत्यत आह - **अत एवेति** । यत उभयाकाङ्क्षानिबन्धनः सम्बन्धोऽतो निराकाङ्क्षयोर्न घटत इत्यर्थः । कर्तुः कारणतयाऽन्वितस्य भावनाया निराकाङ्क्षित्वात् । ननु तथापि भावनायास्तावद् भाव्याकाङ्क्षा नास्ति न च भाव्यमन्यदस्ति । ततः कत्रै(तै)व केनचिद्रूपेण भाव्यो वक्तव्य इत्यत आह – **न, फलेनेति** । तथापि भावनायाः फलसम्बन्धितया कर्माकाङ्क्षाऽस्तीत्यत आह - **फलसम्बन्धिनश्चेति** । न ह्यकर्मकेषु धातुषु फलसम्बन्धि कर्मास्ति किन्तु कर्तैवात्र फलसम्बन्धीत्यर्थः । अभिहितादिविभागानभ्युपगमे सर्वविष्भा(शेषाभा)व इत्याशङ्क्य समाधत्ते – **स्यादेतदित्यादिना** । व्यज्यतामिति विशेष इति विभक्तिपरिणामेन योजनीयम् । **लोकस्येति**, यथोक्तम् –

सिद्धानुगममात्रं हि कर्तुर्युक्तं परीक्षकैः ।
न सर्वलोकसिद्धस्य रक्षणेन निवर्तनम् ॥ इति ॥

उक्तं च पाणिनीयैरपि 'लब्धस्थित्यनुरोधात्तु क्वचिदाश्रीयते' इति । एतदेवाग्रे स्पश्रेष्ठयिष्यति(स्पष्टं भविष्यति) । **इममेव विशेषमुररीकृत्येत्यादिना** यथा वा(बा)ह्यवास्तवोऽपि प्रकृतिप्रत्ययविभागो बलाद् व्युत्पादितः तथाऽभिहितानभिहितत्वमपि । वस्तुगत्या तु येषां [141A] पदानां यत्पदसमभिव्याहारनियमेन शिष्टप्रयोगस्तेषां [पदानां] त[त्]पदारभसनिधानेन युक्तेरिति मन्तव्यम् । यदुक्तम् – यत्नस्य सर्वाख्यातसाधारणत्वात् 'पचति' इत्यादेरपि विध्यर्थत्वप्रसङ्ग इति । तत्र समा[धा]नमाशङ्कते – **स्यादेतदिति** । अत्र उक्ताप्रवृत्तेरिति

दूषणं प्रतिज्ञातं निवेशयितुमाह - **यत्नपदेने**ति । कुतोऽप्रवृत्तिरित्याशङ्क्य प्रागुक्तविरोध इति । तदिदानीं विशेषयन्नाह – **तत् कस्ये**ति तत् कस्माद् हेतोरित्यर्थः । षष्ठी हेतुप्रयोग इति हेतोः षष्ठीविधानात् । विरोधं विशदयन्नाह – **न ही**ति । यत्नस्य यत्नहेतुत्वे स्वात्मनि वृत्तिविरोध इत्यर्थः । अस्तु तर्हि इच्छैव कर्तृधर्मा विधिरित्याशङ्क्याह - **न चे**ति । अत्र च असत्त्वादिति प्राक्प्रतिज्ञातमावेशयन्नाह - **अपि त्वित्यादि**ना।

149. न च लिङेव तां जनयति । अर्थविशेषमप्रत्यायन्त्यास्तस्यास्तज्जनकत्वे व्युत्पत्तिग्रहणवैयर्थ्यात् । अनुपलब्धलिङ्गच्चेच्छाऽनुत्पत्तिप्रसङ्गादिति । एतेन वृद्धव्यवहाराद् व्युत्पत्तिर्भवन्ती बालस्यात्मनि प्रवृत्तिहेतुर्योऽवगतस्तमेवाश्रयेत्, स्वयं च कुर्यामिति सङ्कल्पादेवायं प्रवृत्तः, ततः स एव लिङर्थ इति निरस्तम् । कुर्यामिति प्रयत्नो वा स्यादिच्छा वा ? नाद्यः, स्वात्मनि वृत्तिविरोधात् । न द्वितीयः, सा हि सत्तयैव प्रयत्नोत्पादिनी, न च लिङः श्रुतिकाले सा सतीत्युक्तम् । फलेच्छा तु निसर्गवाहितया सत्यपि न प्रयत्नं प्रति हेतुः । अन्यविषयत्वात् । तदर्थं च शास्त्रवैयर्थ्यात् । तस्याः कारणान्तरतः एव सिद्धेः, तत्प्रतिपत्त्यर्थमपि शास्त्रानपेक्षणात्, तस्या मनोवेद्यत्वात् । अप्राप्ते च शास्त्रानवकाशात् । तदभिधाने च स्वर्गकाम इति कर्तृविशेषणपौनरुक्त्यात्, तदा हि यजेतेत्यस्यैव यागकर्ता स्वर्गकाम इत्यर्थः स्यात् ।

149. प्रत्ययत्यागादिति निवेशयितुं भूमिमारचयति – **न च लिङ्गेव तामि**ति । **एतेने**ति वृद्धव्यवहारसङ्कल्पस्यार्थे व्युत्पत्तिव्यवहारे वा तदेव प्रयोज्यवृद्धस्य प्रवृत्तिहेतुत्वेन कल्पनीयम् । व(य)तः स्वात्मनि प्रवृत्तिहेतुत्वेनावगतम् । स्वात्मनि नियमने इष्टसाधनताज्ञानं प्रवृत्तिहेतुत्वेनावगतम् । न हि सिद्धस्य पदार्थस्य इष्टसाधनतावगमः प्रवृत्तिहेतुः किन्तु इष्टसाधनासमाय(मर्थ(इष्टसाधनं ममायम्) इति प्रतिपत्तेरनन्तरं योऽयं कुर्यामिति सङ्कल्प उत्पद्यते तदवगमादर्ह(हं) प्रवृत्तः, अतोऽयमपि प्रवर्तमानः प्रयोजक(ज्य)वृद्धः सङ्कल्पादेव [प्रवृत्तः] इत्यनुमिनोति । त[त]श्च सङ्कल्पज्ञानं लिङ्शब्दोच्चारणादनन्तरं जातमिति लिङ्शब्दमेव तत्करणमित्यवगच्छति। [141B] लिङ्गः सङ्कल्परूपविधिप्रतिपादकत्वमेवेति परमतमत्र निषेध्यत्वेनाभिप्रेतमिति स्वात्मनि वृत्तिविरोधादित्यनेनापि विरोध्य(ध)त इति श्लोकैकदेशो विवृत्तः । चिकीर्षारूपं सङ्कल्पं दूषयति - **सा ही**ति । एतेन सत्त्वादिति सङ्ग्रहश्लोकांशोऽपि [वि]वृतः । न तु फलेच्छा लिङः श्रुतिकाले सती । तथा च सैव लिङर्थो भविष्यतीति मतमाशङ्क्यापाकरोति - **फलेच्छा त्वि**ति । कुत इत्यत आह - **अन्यविषयत्वादि**ति । साधने खलु पुरुषः प्रवर्तते न फले तस्य सिद्ध्यसिद्ध्योरुभयोरपि प्रवृत्तिविषयत्वानुपपत्तेवै(वैं)यधिकरण्येनेच्छायाः प्रवृत्तिजनकत्वेऽतिप्रसङ्गादित्यर्थः । दूषणान्तरं समुथिनो(त्थापय)ति – **तदर्थं चे**ति । फलेच्छा खलु शास्त्रमुत्पादयेत् प्रतिपादयेद्वा ? आद्ये **तस्या** इति निसर्गसुन्दरस्वर्गादिफलज्ञानादेर्वैयर्थ्यम् । द्वितीयमाशङ्क्य दूषयति – **तत्प्रतिपत्यर्थमपी**ति । किमतो यद्येवमित्यत आह - **अप्राप्ते चे**ति । प्राप्ते त्वनवकाशादेरिति शेषः । अवकाशेऽपि वा पौनरुक्त्यलक्षणमभिधानसाङ्कर्यं प्रसज्यत इत्यादर्शयन्नाह – **तदभिधाने स्वर्गकाम** इति । कथमित्यत आह - **तदा ही**ति । तच्च वैयधिकरण्येन इच्छा प्रवृत्तिं जनयतीति ।

150. यदि च फलविषयैव साधनविषयं प्रयत्नं जनयेत्, अन्यत्रापि प्रसुवीत, नियामकाभावात्, हेतुफलभाव एव नियामक इति चेत् । न । अज्ञातस्य तस्य नियामकत्वे लिङं विनाऽपि स्वर्गेच्छातो यागे प्रवृत्तिप्रसङ्गात् । ज्ञातस्य तु तत्साधनत्वस्य नियामकत्वे तदिच्छैव तत्र प्रवर्तयतु । यो यत्

कामयते स तत्साधनमपि कामयत एवेति नियमात् । न च सा तदानीं सती । न च तज्ज्ञानमेव प्रयत्नजनकम्, तच्च लिङा क्रियते इति युक्तम् । स्वर्गकामो यागचिकीर्षावानित्यतोऽपि प्रवृत्तिप्रसङ्गात् । लिङो वेच्छां प्रतीत्यानिच्छन्नपि सर्वः प्रवर्तेत । स्वसम्बन्धितया तदवगमस्तथा न तु सामान्यत इति चेत् । न । प्रथमपुरुषेण तदभिधाने तस्याविध्यर्थत्वप्रसङ्गात् । ओदनकामस्त्वं पाकचिकीर्षावानित्यतोऽपि प्रवृत्त्यापत्तेश्च । अपि च सङ्कल्पज्ञानात् यदि प्रयत्नो जायेत तथापि सङ्कल्पस्य कुतो जन्म किमर्थं च । सङ्कल्पज्ञानादेव, प्रयत्नार्थं चेति चेत् । नन्विच्छाविशेषः सङ्कल्पः, स तावत् सुखे स्वभावतः, तत्साधने चौपाधिकः, सङ्कल्पविषयस्तु कथम् ? तत्साधनत्वादेवेति चेत् । तर्हि तत्साधनत्वज्ञानात् न तु सङ्कल्पस्वरूपज्ञानाद् भवितुमर्हति इति । अन्यथेष्टसाधनताज्ञानमप्यनर्थकमापद्येत । तस्मात् सङ्कल्पः प्रवर्तक इत्यभ्युपेयते, किन्तु सत्तामात्रेण न तु ज्ञात इति नासौ विधिः । ज्ञानं च विषयोपहारेणैव व्यवहारयति इति तद्विषय एवावशिष्यते इति कर्तृधर्मव्युदासः ।

150. कस्येयमा[काङ्]क्षेत्याशङ्क्याह - **यदि चे**ति । नियामकमाशङ्क्यते - **हेतुफले**ति । फलेच्छा [प्रयत्न]मर्ज्जयन्ती न सर्वत्र किन्तु फलकारण एवेति नातिप्रसङ्ग इत्यर्थः । विकल्प्य निराकरोति - **अज्ञातस्ये**त्यादिना । तदिच्छैवेति साधनविषयेच्छैवेत्यर्थः । ननु सुखानुया ----- [142B] कथं न तत्साधनं विषय इत्यत आह — **यो यदि**ति । सुखसाधनस्य जीवोपाधिकं सुखमस्त्येवेति भावः । अनु(स्तु) तर्हीच्छा साधनविषया प्रयत्नजननी लिङर्थ इत्यत आह — **न चे**ति । ननु मान ---- च्छा सती तज्ज्ञानमेव प्रवर्तकमस्तु। तच्च लिङा क्रियत इति मतमाशङ्क्यानिष्टप्रदर्शनेन निराकरोति - **न चे**ति । **सङ्कल्पविषयस्त्वि**ति। सङ्कल्पविषयो यः सङ्कल्प्य वि - - - - - ज्ञायतामित्यर्थः । न हि सङ्कल्पज्ञानमेव सङ्कल्पस्य कारणमित्याशयः । **तर्ही**ति । तथा चेष्टसाधनमेव विधिः स्यात् न तु सङ्कल्पः, तेन रूपेणाप्रवर्तकत्वादित्यभिप्रायः । यश्च महाब्र--- विधिरिच्छा प्रयत्नो वा भवेत् कार्यम्, न तु त[ज्]ज्ञान[मे]वेत्यभिधायात्र विप्रतिपन्नस्य नैयायिकस्य स्तन्याभिलाषमेवाह स्तन(न्य)पाने शि[शो]रपि प्रवृत्ति(त्तेः) कारणं साक्षा**दक्षपादो** महामुनिरित्यनेनावि[रो]ध उक्तः । तस्याविरोधमुपसंहरति - **तस्मात् सङ्क्ल्पे**ति । ननु कर्तृधर्मेषु प्रयत्न इच्छा वा न विधिः । ज्ञानं तु भविष्यतीत्यत आह - **ज्ञानं चे**ति । न हि निर्विषयं ज्ञानं प्रवर्तकम्, सर्वस्य सर्वत्र प्रवृत्तिप्रसङ्गात् । विषयविशेषावच्छिन्नत्वे तु यद्विषयोपहारेण प्रवर्तयति स एवार्थो विधिरित्यर्थः ।

151. अस्तु तर्हि कर्मधर्मः । नेत्युच्यते —

अतिप्रसङ्गान्न फलं नापूर्वं तत्त्वहानितः ।
तदलाभान्न कार्यं च न क्रियाऽप्यप्रवृत्तितः ॥१२॥

कर्म हि फलं वा स्यात्, तत्कारणमपूर्वं वा, तत्कारणं क्रिया वा ? न प्रथमः फलेच्छायाः प्रवृत्तिं प्रति अहेतुत्वात्, अतिप्रसङ्गादित्युक्तत्वात् । न द्वितीयोऽव्युत्पत्तेः । लिङो हि प्रवृत्तिनिमित्तमपूर्वत्वं वा स्यात्, उभयं वा ? न प्रथमः, शब्दप्रवृत्तिनिमित्तस्यापूर्वत्वस्य प्रमाणान्तरादवगतावपूर्वत्वव्याघातात्, अनवगतावव्युत्पत्तेः सम्बन्धिनोऽनवगमे सम्बन्धस्य प्रत्येतुमशक्यत्वात् । तत एवावगताविवरेतराश्रयदोषात्। न च गन्धवत्त्वेनोपनीतायां पृथिव्यां पृथिवीशब्दवत् अपूर्वे प्रवर्तते लिङिति युक्तम् । तत्रोभयोरपि प्रतीयमानत्वेन सन्देहकल्पनागौरवपुरस्कारेण पृथिवीत्व एव सङ्गतिविश्रान्तेरुपपत्तेः, न

त्वत्रापूर्वत्वप्रतीतिः । स्यादेतत्, कार्यत्वमुपलक्षणीकृत्य तावदेषा लिङ् प्रवृत्ता, तदुपलक्षितश्च यागो वा यत्नो वाऽन्यो वा शब्देतरप्रमाणगोचरो नाधिकारिविशेषणस्वर्गसाधनसमर्थः । न चाकाम्यफले कामी नियोक्तुं शक्यते । ततोऽन्यदेवालौकिकं किञ्चिदनेनोपलक्ष्यते, यो लिङादिप्रवृत्तिगोचर इति किमनुपपन्नमिति चेत् । उपलक्षणं हि स्मरणमनुमानं वा । उभयमप्यनवगतसम्बन्धेनाशक्यम् ।

151. तदेवं कर्तृधर्मो विधि[रिति पक्षं] विस्तरतो निराकृत्य कर्मपक्षं निराकर्तुमुपन्यस्यति - **अस्तु तर्हीति** । निराकरोति **अतिप्रसङ्गादित्यादिना** । अथापूर्वस्य कर्मस्य [142B] अपूर्वस्य शब्देतरप्रमाणागोचरत्वं व्यवस्थितम्, धर्मे चोदनैव प्रमाणमित्यभ्युपगमात् । इदानीं लिङ्गो व्युत्पत्तिमपूर्वेऽभ्युपगमा[त्] कुतो भवतामपूर्वे प्रमाणान्तरं प्रवृत्तमित्यपूर्वत्वहानिरित्यापतितमित्याह — **तत्त्वहानित** इति । न तु कार्यत्वे ननुपाधिना(ननु कार्यत्वेन उपाधिना) उपनीतेऽपूर्वे कार्यत्वेनैव निमित्तेन प्रवर्तिष्यते लिङित्याह — **तदलाभादिति** कार्यापूर्व(र्वा)-लाभादित्यर्थः । प्र[माणा]न्तरप्रणी(ती)ते हि वस्तुनि केनचिन्निमित्तेन किञ्चित्पदं प्रवर्तते, न त्वप्रतीते इति भावः । **कर्म हीति** । क्रियत इति व्युत्पत्त्या सर्वत्र कर्मपदं प्रवर्तते इति बोद्धव्यम् । तदलाभान्न कार्यतेति । निराकरणीयमाशङ्क्य उत्थाप्य निराकरोति — **न च गन्धवत्त्वेनेति** । **स्यादेतदिति** । तथाहि — वृद्धव्यवहाराद् व्युत्पद्यमानो बालः स्वात्मन्यवगतमेव प्रवृत्तिहेतुं लिङ्गार्थमाश्रय[मवधारयति], न क्रियामात्रावगमात्, नापि फलमात्रावगमात्, नापि फलसाधनत्वावगमात्, किन्तु कार्यमात्रप्रत्ययात् प्रवृत्तः । न खल्वन्ततः स्तनपानादि-कामपि क्रियां कार्यतया यदि स्तनेनावगतवान(न्) तावत् तस्यामपि प्रवृत्तः ततौ वा यो(तत्रोपायो) द्वारभेदेन लिङ्गादेवान्विताभिधानसिद्धौ योग्यं वान्वीयत इति कार्यान्विताभिधानसिद्धे चोदनासिद्धे चोदनाभिधानात् तत्रैव कार्यमर्थप्रतिपादकत एव प्रामाण्ये व्यवस्थां नीतेऽथ स्वसिद्धान्ते चावधृते नियोज्यविशेषणतया कार्ये विदिते स्वर्गादिफले च नियोज्यविशेषणे निर्ज्ञाते काम्यमानफलोत्पादनसमर्थनियोज्यवि[143A]शिष्टकार्यं वैदिकैर्लिङादि-प्रत्ययैरभिधेयीक्रियते । तथाऽभिधेयीकृतो न यागः शक्यः कल्पयितुं तस्याचिरस्थिरत्वात्, विपाककालानव-स्थानात्, अव्यवहितसाध्यलक्षणसाधनान्वयायोगात्, यागस्यैव नित्यत्वकल्पनायां मानान्तरविरोधात् । यथोक्तं गुरुभिः 'कर्मणो नित्यत्वविकल्पना च प्रमाणविरुद्धा' इति । तस्मात् कार्यमात्रासादितव्युत्पन्न -- योगयोर्याग-स्वर्गयोः कार्यत्वमुत्सृज्य तन्मध्यवर्तिनोऽपूर्वस्यैव सकलास्तिकसिद्धान्तसिद्धस्य कार्यत्वं वेदो बोधयति । अन्यथा स्वर्गोत्पादनसमर्थलिङ्गादिभिरभि--- । तदा तत्र र्क(किं) स्यात् । तस्य स्वयं दुःखरूपतया स्वविषयापेक्षावत् प्रवृत्तिसिद्धये गर्भवासोपकारन्यायेन स्ववृद्धि(द्धिः) स्वर्गमङ्गीकरोति । तदेवं सकलं मनसि निधायोक्तं गुरुभिः । आरम्भविषयो हि कर्मसञ्चाराभा[वो] विध्यर्थः । स्वर्गकामस्य चासाविति । आरम्भस्वर्ग इति भ्रम इत्य-पूर्वाधिकरणे आह **शालिकनाथः —**

अन्ततःस्तनपानादितृप्तिकार्येऽपि सा क्रिया ।
यावन्मात्रेण साध्यते तावतैव प्रवर्तते ॥
तत्र लोकानुसारेण क्रिया कार्येति यद्यपि ।
तथापि वेदेऽप्येवं तु सिद्धा[न्]तेऽवस्थिते सति ॥
स्वर्गकामादयः सर्वे नियोज्यत्वेन संस्थिताः ।
नियोज्य[143B]पुरुषः कार्यं स्वकीयत्वेन बुध्यते ॥

स्वर्गादिकामयोगाच्च साध्यत्वेनैव गम्यते ।
तेन साध्यत्वपर्यन्तस्वर्गादीच्छाविशेषितः ॥
तदेव शक्नुयाद् बोद्धुं कार्यं यत् कामसाधनम् ।

इति प्राभाकरादिगर्वसङ्क्षेपः । एतन्निराकरोति - **नेति**। तथाहि गङ्गादिपदं तीरमुपलक्षयतीत्यस्यायमर्थः । यत्र तत् स्वार्थमभिधाय प्रतीतचरस्वरूपसम्बद्धं तत्सम्बन्धिनं स्मारयति तदविनाभाविनमनुमापयतीति वा । अन्यथा लक्षणाबीजाविनाभावाभावात् प्रत्यासत्त्यनुस्मरणप्रयासवैफल्यप्रसङ्गाच्च । त[द्व]दिहापि कार्यत्वमपूर्वता प्रतीतचरमुपलक्षयितुमलमित्याशयवान् विकल्पयति - **उपलक्षणं हीति** ।

152. न हि संस्कारवन्मनोवददृष्टवद् वा कार्यत्वमपूर्वत्वमुपलक्षयति, ज्ञानापेक्षणात् । ततो हस्तीव हस्तिपकम्, धूम इव धूमध्वजम्, तत्सम्बन्धज्ञानादुपलक्षयेत्, न त्वन्यथा । तथा च न्याय-सम्पादनाऽप्यरण्ये रुदितम्, न हि युक्तिसहस्रैरप्यविदिते सङ्गतिग्रहोऽविदितसङ्गतिर्वा शब्दः प्रवर्तते इति । एतेन भेदाग्रहात् क्रियाकार्ये व्युत्पत्तिरिति निरस्तम्, न ह्यज्ञाते भेदाग्रहो व्यवहाराङ्गम्, अतिप्रसङ्गात् । किञ्चापूर्वत्वे प्रवृत्तिनिमित्ते कल्प्यमाने लौकिकी लिङर्नर्थिका प्रसज्येत, तत्रोपलक्षणीयाभावात् । तत्र कार्यत्वमेव प्रवृत्तिनिमित्तमिति यदि, प्रकृतेऽपि तथैवास्तु क्लृप्तत्वात् सम्भवाच्चेति ।

152. ननु मनो दृष्टस्वरूपं सम्बद्धमेवानुमापयति स्मारयति चेति दृष्टचरं तथेहापि स्यादित्याशङ्क्य निराकरोति — **न हीति** । उपलक्षणं [ज्ञापयति], न जनयतीत्यर्थः । ननु न्यायसम्पादनयाऽपूर्वस्य प्रतीतिरस्ति न वा । एवंसति प्रमाणापूर्वत्वव्याघातः । न्यायसम्पादनाया अप्रमाणत्वात् । यथाभूतप्रमाणसापेक्षा[र्थ]-परिच्छेदकत्वेन स्मृतिरप्रमाणं तथा भाविप्रमाणसापेक्षार्थपरिच्छेदकतया न्यायसम्पादनाऽपि स्मृतिवदप्रमाणं स्मृतिरेव वेत्यत आह - **तथा चेति** । न्यायसम्पादना हि [144A] अपूर्वात्मनि ज्ञानं जनयति न वा । न चेत्, कथमगृहीते सङ्गतिग्रहः । जनयति चेत्, यथार्थमयथार्थं वा । अयथार्थं चेद् गतं वेदप्रामाण्यं प्रत्याशया । यथार्थं चेदननुभूतगोचरमनुभूतगोचरं वा । अननुभूतगोचरं चेत् न्का(क्वा)पूर्वत्वम् । अनुभूतगोचरं तु भविष्यत्प्रमाणसापेक्षार्थपरिच्छेदकत्वात् स्मृतिवदप्रमाणम् । स्मृतिरेव न प्रथमः शिष्टाभ्यासवशेन भविष्यत्प्रमाणगोचरतयाऽनुमीयमानस्य शास्त्रार्थस्यानुमिते भाविप्रमाणविषयतयार्थः(र्थ)परिच्छेदिकाया अपि प्रामाण्यदर्शनात् । एवमात्माभ्यासपरस्य भविष्य - - -साक्षात्कार इति ज्ञानमप्रमाणं स्यात् । यदि तस्येच्छाकल्पितेन लक्षणेन वा प्रामाण्यव्यवहारः, तदा लिङर्थज्ञानं प्रमाणमिति सुतरामपूर्वस्य प्रमाणगोचरत्व - - - । तदिहापि प्रामाण्यव्यवहारो लोकसिद्धो वा वक्तव्यः परीक्षकसिद्धो वा परीक्षकान्तराभ्युपगमसिद्धो वा । न तावदाद्यः, न ह्यनुभूतपदार्थावगाहि विज्ञानं लौकिकां(का) अप्रमाणमिति व्यवहा(ह)रति(न्ति) । न द्वितीयः, परीक्षकानां सर्वत्र यथानुभवप्रमाणव्यवहारदर्शनात् । तत्र तद्विपर्यासस्यानुपपत्तेः । न च स्मृतिविस्मृतत्व(त्वं) तत्रानुभवसिद्धं वा स्यात् । अनुभवान्तरविषयत्वेनार्थपरिच्छेदकत्वादनुमितं वा परीक्षकान्तराभ्युपगमसिद्धं वा । नाद्यः, स्मरामीत्यनुभवाभावात् । न द्वितीयः, स्मरामीत्यनुभवेन स्मृतित्वं(त्व)स्य बाधित[144B]त्वात् । अन्यथा ज्ञानत्वेन सर्वस्मृतित्वानुमानप्रसङ्गात् । न तृतीयः, तद्भावात् । चतुर्थे तु ज्ञानमात्रं स्मरणमिति लक्षणकल्पनायां सर्वस्य ज्ञानस्य स्मृतित्वप्रसङ्गात् । तस्मान्न्याय-सम्पादनावलमवलमेवेति(नायालमेवेति) तात्पर्यम् । **एतेनेति** । अपूर्वस्याप्रतीतपूर्वत्वेनेत्यर्थः । स्थायिकार्यमेव प्रवृत्तिनिमित्तं क्रियाकार्ये तु तद्भेदाग्रहाल्लिङः प्रवृत्तेरित्यर्थः । -- एतदित्यत आह - **न हीति** ।

153. अस्तु तर्हि तदेव प्रवृत्तिनिमित्तम्, तर्कसम्पादनया त्वपूर्वव्यक्तिलाभ इति चेत् । न । नित्यनिषेधापूर्वयोरलाभप्रसङ्गात् । न चास्मिन् पक्षे एकत्र निर्णीतेन शास्त्रार्थेनान्यत्र तथैव व्यवहार इति सम्भवति । कार्यत्वस्यैव प्रवृत्तिनिमित्तत्वेन निर्णीतत्वात्, न त्वपूर्वत्वस्य । न्यायसम्पादनायाश्च तत्रासम्भवात् । फलानुगुण्येन हि व्यक्तिविशेषो लभ्यते, न च तत् तत्र श्रूयते । न चाश्रुतमपि कल्पयितुं शक्यते । बीजाभावात् । तद्धि विध्यन्यथाऽनुपपत्त्या ल्प्येत, कार्यत्वप्रत्ययान्यथाऽनुपपत्त्या वा, लोकवत् । न प्रथमः । भवतां दर्शने तस्योपेयरूपत्वात्, यतः श्रुतस्वर्गफलत्वेऽपि साध्यविवृद्धि-रुच्यते । न द्वितीयः । शब्दबलेन तत्प्रत्यये तदनपेक्षणात्, लोके हि तत्प्रत्यय इष्टाभ्युपायताऽधीनो न तु वेदे इत्यभ्युपगमात् । अन्यथेष्टाभ्युपायतैव प्रथमं वेदादवगन्तव्या, प्रमाणान्तराभावात्, ततः कार्यतेत्यानुमानिको विधिः स्यात्, न शाब्दः ।

153. तदेवमपूर्वस्य प्रतीतावपूर्वत्वहानिरित्युपक्रान्तनियता(त)प्रबन्धेन समर्थितम् । सम्प्रति तदलाभान्न कार्यत्वेनेति सङ्गृहीतस्य ष्ठी(स्वी)क -----**नित्यनिषेधापूर्वयोरिति** । 'अहरहः सन्ध्यामुपासीत, ब्राह्मणो न हन्तव्यः' इत्याभ्यां विधिनिषेधाभ्यां नित्यापूर्वस्य निषेधापूर्वसिद्धिपक्ष इत्यर्थः । **तत् तत्रेति** । तत् फ[लम्, तत्र विधिनि]षेधादावित्यर्थः । ननु विश्वजिदादावश्रुतमपि स्वर्ग[फलं] सर्वान् प्रत्यविशिष्टत्वादिति न्यायात् स्वर्गादिफलं कल्पयिष्यत इत्याशङ्क्य निराकरोति – **न चेति** । त[द्]दर्शने इति शेषः । **बीजाभावादित्यत्रापि** अन्वय इति शेषः । अपसिद्धान्तप्रसङ्गाच्च । बीजाभावमेव विकल्प्य दर्शयति – **तद्धीति कार्यमिति** । लोके हि भोजनादौ कार्ये तत्प्रत्यय इष्टसाधनतालिङ्गकः कार्यताप्रत्ययः । [145A] यदि भोजनादौ फलं नास्तीष्टसाधनतालिङ्गानुस[न्]धानहेतुकस्तत्र कार्यताप्रत्ययो न स्यात् तदवश्यं कार्यताप्रत्ययान्यथानुपपत्त्या यथा लोके फलं कल्प्यते तथा वेदेऽपि कल्पनीयमित्यर्थः । **भवतां दर्शन** इति । यस्य हि दर्शने समीहितसाधनतारूपो विधिः तन्मते समीहिततत्फलसम्बन्धमन्तरेणानुपपद्यमानः फलमुपकल्पयति । यस्य त्वनन्योद्देशप्रवृत्तवृत्तिसाध्यो विधिः तस्य कुतः फलकल्पना । स्वभावत एव कृतिसाध्यस्य कृत्युद्देश्यस्य च प्रति निराकाङ्क्षत्वात्, **तस्येति**। विधिन(र)पूर्वस्येव साध्यस्वर्गपर्यन्तं व्याप्नोति । [अ]पूर्वः स्वर्गं प्रति साधनमिति कृतिं प्रति साधनस्य गुणत्वानुपपत्ते. । **शब्दबलेनेति** । तवाभ्युपगम इत्यभिप्रायशेषः । तमेव दर्शयति - **लोके हीति** । तत्र हि कार्यताप्रत्ययः समीहितसाधनताज्ञानमपेक्षते यत्रेष्टसाधनत्वलिङ्गं विनोत्पत्तिर्भवति, यत्र पुनः शब्दसङ्केतं विनोत्पत्तिस्तत्र किं लिङ्गापेक्षयेति । एवमपि य----पि कर्तव्यताबोध इष्टाभ्युपायताप्रत्ययाधीन इत्यनुमन्यते तदेष्टसाधनताधियमपि वेद एव सूत(श्रूयत) इत्यवर्जनीयज्ञा(ता)पद्यते । अन्यथ(था)स्याभावादित्याह - **अन्यथेति** । तथाहि शब्दादवगतादिव लिङ्गात् कार्यताऽवगन्तुं शक्यत इति । न तत्र शब्दशक्तिकल्पना । एवं च कार्यतारूपो विधिरनुमानगम्यः स्यात्, न श(शा)ब्दः इत्यर्थः ।

154. आनुमानिकं फलमस्तु, यत् कतव्यं तदिष्टाभ्युपाय इति व्याप्तेरित्यपि न युक्तम् । सुखेन व्यभिचारात् । अन्यत्वे सतीति चेत् । न । दुःखाभावेन व्यभिचारात् । फलं विहायेति चेत् । तदेव किमुक्तं स्यात् । इष्टं स्वभावत इति चेत् । तर्हि ततोऽन्यदनिष्टं स्यात्, तच्च कर्तव्यमिति व्याघातः । तत्साधनमिति चेत् । तत्साधनत्वे सतीति साध्याविशिष्टं विशेषणम् । स्वभावतो नेदमिष्टं कर्तव्यं च, ततो नूनमिष्टसाधनमिति साधनार्थ इति चेत् । न । स्वभावतो नेदमिष्टमित्यसिद्धेः । अनन्योद्देशप्रवृत्त-कृतिव्याप्तवात्, अन्यथा तदसिद्धेः, ततो व्याघातादन्यतरापाय इति । अस्तु नित्यनिषेधापूर्वयोरलाभः,

किं नश्छिन्नमिति चेत् । किं नश्छिन्नं यदा कामाधिकारेऽपि तदलाभः, न हि लिङा कार्यं स्वर्ग-साधनमुक्तम् । नापि स्वर्गकामपदसमभिव्याहारान्यथानुपपत्त्या तल्लब्धम्, ब्राह्मणत्वादिवद् अधिकार्य-वच्छेदमात्रेणैवोपपत्तेः । न चेदमनुमानम् – यस्य यदिच्छातो यत् कर्तव्यं तत् तस्येष्टसाधनमिति । अन्येच्छयैव तत्कर्तव्यतायाः सुखेनानैकान्तिकत्वात्, औपाधिककर्तव्यतायाश्चेष्टसाधनत्वमप्रतीत्य प्रत्येतु-मशक्यत्वात् । किमनया विशेषचिन्तया, प्रतीयते तावच्छब्दादन्यदिच्छतोऽन्यत्कार्यमित्येतावतैवानुमान-मिति चेत् । नन्वन्वितमभिधानीयम्, योग्यं चान्वीयते, अन्यदिच्छतश्चान्यत् कर्तव्यमन्वययोग्यम्, तत् कथमभिधीयताम् । तत एव तत्साधनत्वसिद्धिरिति चेत् । एवं तर्हीष्टसाधनतैकार्थसमवायिकर्तव्यत्वा-भिधानादनुमानानवकाशः ।

154. **आनुमानिक**[145B]**मिति** । अयमर्थः । नित्यनिषेधादौ न विध्यन्यथानुपपत्त्या फलकल्पना, नापि कार्यताप्रत्ययान्यथानुपपत्त्या, किन्तु यत् कर्तव्यं नहि(तदि)ष्टाभ्युपाय इति कर्तव्यत्वेन फ[ला]नुमानं सिद्ध्य[तीत्य]र्थः - **फलं विहाये**ति । फलव्यतिरिक्तत्वे सति कर्तव्यत्वात् इष्टोपायतानुमानमित्यर्थः । **तर्ही**ति । फलेतरत्वं हि स्वभावतोऽनिष्टत्वम्, उद्देशप्रवृत्तं च तत्कृतिसाध्यत्वम् । न च यत् स्वभावतोऽनिष्टं तदुद्देशेन कृतिर्भवति । न च यदुद्देशेन कृतिर्न भवति तथो(दु)द्देशप्रवृत्तकृतिसाध्यकर्तव्यं भवतीत्यर्थः । **अनन्योद्देशे**ति । नित्यनिषेधादावुद्देश्यफलान्तराभावादित्यर्थः । **अन्यथे**ति । उद्देश्यफलान्तरसद्भावे नित्यविधित्वे स्वादे(स्वोद्दे)-श्यान्तराभावात् स्वभावानिष्टत्वासिद्धिरित्याह – **तत** इति । व्याप्ताविरोधादित्यर्थः । **अ[न]न्योद्देशप्रवृत्त** इति । साध्यत्वस्वभावानिष्टतयोरन्यतरापाय इत्यर्थः । नित्यनिषेधापूर्वयोरलाभे त्वन्यत्रापि नापूर्वसिद्धिरित्याह - **अस्त्वि**ति । ननु कथं कामाधिकारे [अपूर्व]लाभः । उक्तं हि 'का(मः) काम्यमानफलोत्पादनसमर्थ-वैदिकैर्लिङादिभिरभिधेयीक्रियते' इत्यत आह – **न ही**ति । तत्किं लिङेव निरपेक्षाऽभिदध्य(धा)ति स्वर्गकामादि-पदसमभिव्याहृता वा ? आद्य उक्तं **न ही**ति । एवं हि लौकिकी लिङर्थिका प्रसज्यत इत्युक्तमिति भावः । आलिङादिकार्यं चानन्योद्देशप्रवृत्तकृतिसाध्यम् । न च तत्स्वर्ग[146A]साधन[म्] । न हि प्रधानत्वेनैकादैवाभि-धीयमानं स्वर्ग(र्ग) प्रति साधनत्वेन गुणभूतत्वेनापि शक्यमभिधातुमिति तात्पर्यम् । द्वितीयमाशङ्क्य निराकरोति - **नापी**ति । स्वर्गकामपदसमभिव्याहारबलेन स्वर्गकामिसम्बन्धि तत्कार्यं वक्तव्यम् । तदेव च कार्यं स्वर्गकामि-सम्बन्धीति कृत्वा साध्यतोऽकृतिश्च, स्वर्गकामिसम्बन्धिधी सैव या स्वर्गकामितया जन्यते एव, अस्वर्गरूपं स्वर्गसाधनं च न स्वर्गकामिनः कार्यं भवितुमर्हति । स्वर्गसाधनत्वे तु कार्यस्य नियतमपूर्वलाभ इत्यर्थः । **ब्राह्मणत्वादिवदि**ति । अयमर्थः । यस्य सहजसुन्दरत्वेन स्वर्गकामेनोत्पन्ना[त]त्सम्बन्धिकार्यमिति वाक्यार्थो न तु स्वर्गकामेनाजनिता कृतिः तदुद्देश्यकार्यमिति कृतिस्वर्गकामनयोरपि कार्यकारणभावो वाक्यादवगम्यते । यथा च यथा यस्य ब्राह्मण्यमस्ति तस्य कार्यमित्यवगमः तथा यस्य स्वर्गकामनाऽस्ति तत्सम्बन्धि कार्यत्वमिति कार्यं प्रतीयते। ननु(न तु) स्वर्गकामनाजन्या कृतिः स्वर्गोद्देशप्रवृत्तकृतिसाध्य(ध्यं) च कार्यमि[ति] वाक्यात् प्रतीतिरस्ति। एवं च क(न) स्थायिनोऽपूर्वस्य लाभ इत्यर्थः । ननु वाक्यादपूर्वलाभो मा भूत् । स्वर्गकाम-पदसमभिव्याहारान्यथानुपपत्तेः । तथाप्यनुमानादपूर्वलाभोऽस्तिवति परमतमाशङ्क्य निराकरोति – **न चेदमि**ति । अनुमानमुपन्यस्यति – **यस्य यदिच्छात** इति । किमनि(न्ये)च्छया [146B] कर्तव्यत्वं स्वभावतः [वा]। अन्येच्छया कर्तव्यत्वे स्वोद्देशप्रवृत्तकृतिसाध्यत्वं भज्येत । द्वितीये सुखेन व्यभिचार इत्याह – **तदिच्छयैवे**ति। सुखमिच्छतः स्वभावतः सुखं कर्तव्यं भवति । न च तदिष्टोपाय इति व्यभिचारः । **तत एवे**ति स्वर्गसाधन-

त्वसिद्धिरित्यर्थः । **एवमिति** । न हीष्टसाधनताभिधाना[न्]तर्भाव्यान्यदिच्छतोऽन्यत् कर्तव्यमयोग्यतयाऽन्वेतुमर्हतीति भावः ।

155. न चान्विताभिधानेऽपि तत्साधनत्वसिद्धिः । अधिकार्यवच्छेदमात्रेणाप्यन्वययोग्यतोपपत्तेः । न च कार्यत्वमपूर्वे सम्भवति । तद्धि कृतिव्याप्यता चेत्, व्रीह्यादिष्वेव, सिद्धत्वात् । कृतिफलत्वाच्चेत्, यागस्यैव, ततस्तस्यैवाहत्योत्पत्तेः । कृत्युद्देश्यता चेत्, स्वर्गस्यैव, निसर्गसुन्दरत्वात् । न त्वपूर्वस्य, तद्विपरीतत् । स्तन्यपानादिवदौपाधिकीति चेत् । साऽपि यागस्यैव । स्वर्गस्य साध्यत्वस्थितौ यागस्यैव साधनत्वेनान्वयात् । कालव्यवधानान्नैतन्निर्वहतीति चेत्, यथा निर्वहति श्रुतानुरोधेन तथा कल्प्यताम् । व्यापारद्वारा कथञ्चित् स्यात्, न तु भिन्नकालयोर्व्यापारव्यापारिभावः । कारणत्वं च व्यापारेण युज्यते । अव्यवधानेन पूर्वकालनियमश्च तत्त्वम् । अन्यथाऽतिप्रसङ्गादिति चेत् । न, पूर्वभावनियममात्रस्य कारणत्वात् । कार्यानुगुणावान्तरकार्यस्यैव व्यापारत्वात्, कृषिचिकित्सादौ बहुलं तथा व्यवहारात् । लाक्षणिकोऽसाविति चेत् । न, मुख्यार्थत्वे विरोधाभावात् । अस्तु तर्हि पुत्रेण हते ब्रह्मणि चिरध्वस्तस्य पितुस्तमवान्तरव्यापारीकृत्य कर्तृत्वम्, तथा च लोकयात्राविप्लव इति चेत् । न । सत्यपि सुते कदाचित् तदकरणात् तस्मिन्नसत्यपि कदाचित् करणादनिर्वाहकतया तस्य व्यापारत्वायोगात् । यं जनयित्वैव हि यं प्रति यस्य पूर्वभावनिर्वाहः, स एव तं प्रति तस्य व्यापारो नापरः, यथाऽनुभवस्य स्मरणं प्रति संस्कारः, तस्य ह्यन्वयव्यतिरेकानुविधाने सिद्धे तदन्यथानुपपत्त्या संस्कारः कल्प्यते, न त्वन्यथा, तथेहापि । न चेदेवम्, तवापि ब्रह्मभिदुरशरविमोकसमसमयहतस्य हन्तृत्वं न स्यात्, स्याच्च स्वनिवेशनशयानस्य तत्पितुरिति । एतेनोभयं वेति निरस्तम् । अस्तु तर्हि क्रियाधर्म एव कार्यत्वं विधिः, सर्वो हि कर्तव्यमेतदिति प्रत्येति, ततः कुर्यामिति सङ्कल्प्य प्रवर्तते इति चेत् । न । कर्तव्यं मयेति कृत्यध्यवसायार्थो वा स्यात् ? कर्तव्यं मयेत्युचितार्थो वा स्यात् ? तत्र प्रथमः सङ्कल्पान्न भिद्यते । व्यवहितकार्यसङ्कल्पो हि कर्तव्यो मयेति, सन्निहितकार्यसङ्कल्पस्तु कुर्यामिति । स च न लिङर्थः । सत्तामात्रेण प्रवर्तनादित्युक्तम् । तदेतत् कर्तव्यतायां जातायां प्रवर्तते इति वस्तुस्थितौ भ्रान्तैर्ज्ञातायामिति गृहीतम् । औचित्यं तु क्रियाधर्मः प्रागभाववत्त्वम्, तस्मिन् सति शक्यत्वं वा, तस्मिन् सति कर्तारं प्रत्युपकारकत्वं वा ? प्रथमे कुतश्चिदपि न निवर्तते । द्वितीये दुःखेऽपि तथाविधे प्रवर्तेत । तृतीये तु वक्ष्यते । अस्तु तर्हि करणधर्मः । न । करणं हि शब्दः, तद्धर्मोऽभिधा वा स्यात्, तदर्थो भावनादिर्वा, तद्धर्म इष्टसाधनता वा ? न प्रथमः –

असत्त्वादप्रवृत्तेश्च नाभिधाऽपि गरीयसी ।
बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः ॥१३॥

155. अस्त्वन्यदिच्छतोऽन्यत् कर्तव्यमन्वययोग्यं तथा[पि] नेष्टसाधनत्वमनुमातुं शक्यत इत्याह – **न चेति** । कुत इत्यत आह – **अधिकारीति** । कार्यत्वमपूर्वस्य विकल्प्य निराकरोति – **न चेति** । शङ्क्यते – **व्यापारद्वारेति कारणत्वं चेति** । न च प्रकृते तथेति शेषः । तत्त्वं कारणत्वमित्यर्थः । **अनिर्वाहकतयेति** । उक्तमेतत् - यत् कारणं दृष्टं श्रुतं वा यया क्रियया विना नोपपद्यते सा [त]त्कारणत्वनिर्वाहायाऽवान्तरव्यापार इति । न च व्यापारी अव्यभिचारी फलावस्प(सा)नोऽन्यथातिप्रसङ्गात् । न चेह पितुः कारणत्वं सिद्धं, न च

पुत्रस्य व्यापारलक्षणयोग इत्याशयवान् विशदयति - **यं जनयित्वेति** । **उभयं वेति** । कार्यत्वमपूर्वत्वं च लिङः प्रवृत्तिनिमित्तमिति न सम्भवतीत्यर्थः । न क्रियापीति संगृहीतम् । विधिवादिनमाशङ्कते — **अस्तु तर्हीति** । **अध्यवसायार्थो वेति** । अध्यवसायार्थः चिकीर्षा । शेषं तु सुबोधम् । तृतीये तु वक्ष्यते । [147A] कर्त्रु(त्री)पेक्षितोपायतानिराकरणे[ने]त्यर्थः । परानी(परस्वी)कृतकरणधर्मविधिं निराकर्तुमाशङ्कते — **अस्त्विति**। निराकरोति — **नेति** । **तदर्थो भावनादिर्वा** करणमित्यनुषञ्जनीयम् । तथा च तस्य शब्दार्थभावनादेकः करणधर्म इत्यु(त्य)साधुः, नानेत्यर्थः । अभिधापक्षे दूषणं संगृह्णाति - **असत्त्वादित्यादिना** । अभिधाया असत्त्वात् । सत्त्वेऽप्यप्रवर्तकत्वान्नाभिधा विधिरित्यर्थः । अन्येषु पक्षेषु बाधसम्भवात् परिशेषादभिधापक्षो भविष्यतीत्याशङ्क्य अत्रापि बाधसम्भव इति परिहरति — **बाधकस्येति** ।

156. सङ्गतिप्रतिसन्धानाधिकायां तस्यां प्रमाणाभावात् । अन्यसमवेतस्यापूर्ववदन्यव्यापारत्वेनाप्युपपत्तेः । विषयतयाऽपि च स्वव्यापारं प्रति लिङ्गवद्धेतुभावाविरोधात्, अधिकत्वेऽपि ततोऽप्रवृत्तेः । बालानां तदभावेऽपि तद्भावात् । शब्दान्तरेण तच्छ्राविणामप्यप्रवृत्तेः । न च विलक्षणैव सा लिङ्गो विषयः । तद्वैलक्षण्यं प्रतीतं प्रति चेत्, अर्थविशेषोऽपि स्यात् । प्रवृत्तिमात्रं प्रति चेत्, अभिधासमवेतं तदिति कुतः ? तत्सन्निधानादिति चेत् । न । अनियमात् । अन्यस्य सर्वस्य निषेधादिति चेत् । न । प्रवृत्तिहेतुत्वनिषेधस्य तुल्यत्वात् । शब्दैकवेद्यत्वे चाव्युत्पत्तेः । प्रवृत्त्यन्यथानुपपत्तिसिद्धे व्युत्पत्तिरित्यपि वार्तम् । न हि प्रवृत्तिहेतुः कश्चिदस्तीति प्रवर्तते । इष्टसाधनता तु स्यात् । सर्वो हि मया क्रियमाणमेतन्मतं समीहितं साधयिष्यतीति प्रतिसन्धत्ते, तत इच्छति कुर्यामिति, ततः करोतीति सर्वानुभवसिद्धम् । तदयं व्युत्पित्सुर्यज्ज्ञानात् प्रयत्नजननीमिच्छामवाप्तवान् तज्ज्ञानमेव लिङ्श्राविणः प्रवृत्तिकारणमनुमिनोति । ततश्च कर्तव्यतैकार्थसमवायिनी इष्टसाधनता लिङर्थ इत्यवधारयति । न च वाच्यम् - एवं चेत् वरं कर्तव्यतैवास्तु, अवश्याभ्युपगमनीयत्वात्, कृतमिष्टसाधनतया इति । यथा हि नेष्टसाधनतामात्रं प्रतीत्य प्रवर्तते, असाध्येषु व्यभिचारात् । तथा प्रयत्नविषयसमवायिनीमिष्टसाधनतामधिगम्याधिकारी प्रवर्तते इत्यनुभवः ।

१५६. **असत्त्वादिति** विवृणोति — **सङ्गतीति** सङ्केतवासन(ना)नु शब्दार्थ अर्थज्ञानं जनयतीति सङ्केतग्रहणमेवाभिधेत्यर्थः । ननु च सर्वस्यैव करणस्य स्वकार्ये ल(?)[१] व्यापारवन्तमुपलब्धम् । अत शब्दस्यापि स्वार्थप्रतिपादने कर्तव्ये व्यापारेण संभवितव्यम् । न चास्य सङ्गतिः प्रतिसन्धानमन्तरान्तरव्यापारो भवितुमर्हति व्यापारिणं शब्दं विहाय तस्यात्मसमवेतत्वात् । ततो यः शब्दसम्बन्धो व्यापारः शब्दार्थप्रतीत्यर्थानुकूला साऽभिधेति परमतं हृदि निधायाह — **आत्मसमवेतस्येति** । यथा ह्यात्मन(नि) समवेतम[147B]प्यपूर्वं यागादे[र्व्यापार]स्तथा सङ्गतिप्रतिसन्धानमात्मसमवेतमपि शब्दव्यापारो भविष्यतीत्यर्थः । ननु च यो व्यापारी तस्य व्यापारे कारणत्वमुपलब्धं यथा कुठारस्योद्यमननिपतनादि तरुसंयोगे । अतः शब्देनापि स्वव्यापारे कारणेन भवितव्यम् । न च तस्य सङ्गतिसन्धाने कारणत्वमस्त्यतः तदन्य एव शब्दाधारोत्पत्तिशब्दव्यापारोऽभिधेति स्वीकर्तव्यमिति [हृदि] निधामा(या)ह — **विषयतयापीति** । यथा हि लिङस्य स्वपरामर्शरूपेऽवान्तरव्यापारे विषयतया कारणत्वम् तथा सङ्गतिप्रतिसन्धाने वाच्यवाचकभावनिरूपणेऽऽत्मा(त्म)नि विषयतया शब्दस्य

---

१. पाठोऽपूर्णोऽस्पष्टश्च ।

कारणत्वं भविष्यति । न हि वाचकत्वं शब्दस्वरूपनिरूपणं विनेत्यर्थः । अस्तु वा शब्दव्यापारोऽभिधाभाव(वः), अभिधीयतां च लिङा[त्], तथापि नासौ प्रवृत्तिहेतुः अपुरुषार्थत्वात् । समुद्रतरणोपदेशादपि प्रवृत्त्यापत्तेश्चेत्याह - **अधिकत्वेऽपी**ति । प्रवर्तकश्च विधिरभिमत इति रहस्य[म्] । व्युत्पन्नाभिधा लिङः प्रतिपद्यमाना अपि न प्रवर्त[न्]ते इत्यभिधायाव्युत्पन्नास्तु अभिधामबुद्ध्यमाना अपि प्रवर्त[न्]ते इत्याह – **बालानां त्वि**ति । तदभा[148A]वेऽपि तद्भावाद् वृत्तिभावादित्यर्थः । उक्तं च न चाभिधानेऽभिधानेऽपि मतंश्च हि न शिशव इति(ती) ति[१] । अभिधाशब्देनाऽप्यभिधाबोधवतामप्यप्रवृत्तिरित्याह – **शब्दान्तरेणे**ति । नन्वभिधाशब्दा[द]भिधामात्रं प्रतीयते लिङस्तु विलक्षणैवेति परो मन्यते तदाशङ्क्य निराचष्टे - **न चे**ति । **अर्थविशेषोऽपी**ति । 'अर्थेनैव विशेषो हि निराकारतया धियाम्' इति न्यायादर्थविशेषं विना बुद्धिविशेषस्यानुत्पत्तेरित्यर्थः । तत्सन्निधानादिति । अभिधायाः सन्निहितत्वादभिधा समवायिनीं विलक्षणा(णां) प्रवृत्ति(त्तिं) विधत्त इत्यर्थः । **अनियमादि**ति । इष्टसाधनतादेरपि सन्निहितत्वादित्यर्थः । ननु [उ]क्तं **काशिका**कृता यत् सकलेतरप्रकारव्युदासादित्याद्या(दि) [तत्] हृदि [निधाय] शङ्कते – **अन्यस्ये**ति । शेषमतिरोहितम् । द्वितीयपक्षमाशङ्कते – **इष्टसाधनता त्वि**ति ।

157. तत्र विषयो धातुना भावनाऽऽख्यातमात्रेण, शेषं तु तद्विशेषेण लिङा इत्येवमिष्टाभ्युपायतायामधिगतायामन्वयबलात् तद्विषयस्येष्टसाधनत्वावगतिरिति कर्तव्यतैकार्थसमवायिनीष्टाभ्युपायता लिङः प्रवृत्तिनिमित्तमित्युक्तम् । करणस्येष्टसाधनताभिधाने ज्योतिष्टोमेनेति तृतीयया न भवितव्यमिति तु देश्यमवैयाकरणस्यावधीरणीयमेव । तत्सङ्ख्याभिधानं हि तदभिधानमाख्यातेन, न च तत् प्रकृते । न च यागेष्टसाधनताभिधानं लिङा, किन्त्वन्वयबलात् तल्लाभ इत्युक्तम् । यत् तु सिद्धापदेशादपि प्रतीयते इष्टसाधनता, न चातः सङ्कल्पात्मा प्रवृत्तिरस्तीति देश्यम् । तत्र समुत्कटफलाभिलाषस्य समर्थस्य तत्साधनतावगमेऽपि न प्रवृत्तिरिति कः प्रतीयात् । सर्वपक्षसमानं चैतत् समानपरीहारं चेति किं तेन । अत्राभिधीयते – अस्तु प्रयत्नविषयसमवायिनीष्टसाधनता प्रवृत्तिहेतुः, तथापि नासौ लिङर्थः, सन्देहात् । सा हि किं साक्षादेव लिङाऽवगम्यते, स्तनपानादावनुमानादिव बालेन, किं वा तत्प्रतिपादितात् कुतश्चिदर्थादनुमीयते, चेष्टाविशेषानुमितादिवाभिप्रायविशेषात् समयाभिज्ञेनेति सन्दिह्यते । एवं च सति सा नाभिधीयते इत्येव निर्णयः ।

157. **तत्र विषय** इति । भावनाविषयो याग इत्यर्थः । भावना प्रयत्नः । **शेषस्त्वि**(षं त्वि)ति । भावनायाः कालत्रयापवामर्शे(त्रयावमर्शे) इष्टसाधनत्वादित्यर्थः । **तद्विशेषेणे**ति आख्यातविशेषेणेति । **तद्विशेषस्ये**ष्टसाधनीभूत[148B]भावनाविषयस्य । भावना हि स्वर्गसाधनतयेष्टेति तत्कारणं यागोऽपि इष्टसाधनमित्यर्थः । **अवैयाकरणस्ये**ति । अभिहिताधिकारस्य लिङकृत्तद्धितसमासैरुपसङ्ख्यानमित्यनेन नियमितत्वात् । **न चे**ति । कारकादिभिरप्यभिधानदर्शनात् प्रदर्शनीयात्रार्थ[ता] । तदिति वाच्य(च्यं) शिष्टैस्तथाप्रयुज्यमानत्वात् । तदपेक्षयैव तस्य तथात्वव्यवस्थापनात् । अन्यथाऽनियमप्रसङ्गादिति । तदत्र कृत्तद्धितसमासानामसम्भवात् न तथा । लिङ्-आख्यातेन यागसङ्ख्याभिधानमिति वाच्यम्, न चैवमिहास्तीत्याह – **तत्सङ्ख्याभिधानमि**ति । कुतोऽने[ने]त्यत आह – **न चे**ति । न हि [य]जेतेति करणे प्रत्ययो येन करणसङ्ख्यामभिदध्यात्, किन्तु कर्तरीति

---

१. भ्रष्टं वाक्यम् ।

[तत्सङ्ख्याभिधानमिति] । लिङा चेष्टसाधनतामात्रावगमेऽपि न यागे इष्टसाधनताप्रत्ययः । पचेत्-पठेत्-गच्छेत्-तिष्ठेदित्यादिषु यागे [इ]ष्टसाधनताप्रतीतिप्रसङ्गादित्याह — **न चे**ति । चो हेत्वर्थे । यतो हेतो**रन्वयबलात् तल्लाभ इत्युक्तं** ततो न **यागेष्टसाधनताभिधानमि**त्यर्थः । इष्टसाधनतान(व)गमेऽपि न प्रवृत्तिरिति हेतुत्वविरहान्नेष्टसाधनताविधिरिति केनचिदुक्तमुत्थाप्य फलाभिलाषिणो न तु प्रवृत्तिरिति निराकरोति — **यत्त्वि**त्यादिना **कः प्रतीयादि**त्यने(न्ते)न । [149A] यदि वा सिद्धापदेशादिष्टसाधनतामवगम्य न प्रवर्तत इति नेष्टसाधनताविधिरिति तथा पूर्वोक्तेषु कर्मधर्मादिषु सिद्धापदेशादपूर्वकार्यतादिप्रतीतावपि न प्रवृत्तिरिति कर्मधर्मादयो विधयो [न] भवेयुरित्याशयवानाह — **सर्वपक्षे**ति । समानं चैतद्दूषणमित्यर्थः । यदि तत्र फलाभिलाक्षणिकः-(लाषिणः) प्रवृत्तिरिति नोक्तं दूषणमिति तदा प्रकृतेऽपि तथैव समाधिरवसेय इत्याशयवानाह — **समानपरिहारं चे**ति । एवमिष्टसाधनताविधिपक्षं पराभ्युपगतं विस्तरतो व्युत्पाद्य स्वसिद्धान्तानुसारतो निराकर्तुं सन्देहं तावदुत्पादयति **अस्ति**त्यादिना **सन्दिह्यत** इत्यन्तेन । अत्र निर्णयसु(मु)पक्रमते — **एवं च सती**ति ।

158. हेतुत्वादनुमानाच्च मध्यमादौ वियोगतः ।
अन्यत्र क्लृप्तसामर्थ्यान्निषेधानुपपत्तितः ॥१४॥

तथाहि — 'अग्निकामो दारुणी मथ्नीयात्' इति श्रुत्वा कुत इत्युक्ते वक्तारो वदन्ति यतस्तन्मन्थनादग्निरस्य सिद्ध्यतीति । 'तरति ब्रह्महत्यां योऽश्वमेधेन यजते' इत्यादाविष्टाभ्युपायतायामेवावगतायामनुमिमते तान्त्रिकाः — यदश्वमेधेन यजेत मृत्युब्रह्महत्यातरणकाम इत्यादिविधिम् । निन्दया च निषेधम् । तत् यथा — 'अन्धं तमः प्रविशन्ति ये के चात्महनो जनाः' इत्यतो 'नात्मानं हन्यात्' इति । कुर्याः कुर्याम् इत्यत्र विधिविहितैव लिङ् नेष्टाभ्युपायतामाह, किन्तु वक्तृसङ्कल्पम् न हीष्टाभ्युपायो ममायमिति कुर्यामिति पदार्थः, किन्तु तत्प्रतिपत्तेरनन्तरं योऽस्य सङ्कल्पः कुर्यामिति, स एव । सर्वत्र चान्यत्र वक्तुरेवेच्छाऽभिधीयते लिङेत्यवधृतम् । तथाह्याज्ञाऽध्येषणाऽनुज्ञासंप्रश्नप्रार्थनाऽऽशंसालिङिनान्यत् चकास्ति । यां वक्तुरिच्छामननुविदधानस्तत्क्षोभाद् बिभेति, सा आज्ञा । या तु श्रोतुः पूजासम्मानव्यञ्जिका, साऽध्येषणा । वारणाभावव्यञ्जिका अनुज्ञा । अभिधानप्रयोजना सम्प्रश्नः । लाभेच्छा प्रार्थना । शुभाशंसनमाशीरिति । न च विधिविकल्पेषु निषेध उपपद्यते । तथाहि — यदाऽभिधा विधिः तदा न हन्यात् हननभावना नाभिधीयते इति वाक्यार्थो व्याघातान्निरस्तः । यदा कालत्रयापरामृष्टा भावना तदा नेति सम्बन्धोऽत्यन्ताभावो मिथ्या ।

158. कुतो नाभिधीयत इत्यत आह — **हेतुत्वादि**त्यादि । अग्निकामो दारुणी मथ्नीयादिति श्रुते कुत इत्यनुयोगे प्रतिवक्तारो भवन्ति तत्प्रयत्नस्य हेतुत्वादिति । अत्र च लिङा इष्टसाधनताभिधाने प्रश्नोत्तरक्रमो न भवेदित्यर्थः । **अनुमानादि**ति । विधिरिति शेषः । **अश्वमेधेने**ति । यदि लिङा इष्टसाधनताऽभिधीयते तदेतस्मादेव वाक्यादश्वमेधस्य बह्महत्यातरणसाधनत्वावगते विधि(धे)रनुमानं व्यर्थम् । विधेरपि हीष्टसाधनता प्रत्येतव्या, सा चास्मादेव वाक्यात् प्रतीतेति किं विध्यनुमानेन । तस्मात् तदेव विध्यनुमानमुपपद्यते यदीष्टसाधनता[149B]व्यतिरिक्तोऽर्थो विधिना प्रतिपद्येत इति रहस्यम् । **मध्यमादावि**ति विवृणोति । **कुर्याः कुर्यामित्यत्रे**ति । यदि प्रथमपुरुषे विधिविहित(ता) या लिङेष्टसाधनता अ[भिधीयते] तदा मध्यमोत्तमपुरुषयोरपि विधिविहिता लिङेष्टसाधनतामभिदध्यात् । नन्वेवमभिधत्ते । तस्मान्मध्यमादाविष्टसाधनताविरहे वक्तृतं(सं)-

कल्प [एव लिङर्थः], तद्वत् प्रथमपुरुषेऽपीति बोद्धव्यम् । **अन्यत्र क्लृप्तसामर्थ्यादिति** विवृणोति - **सर्वत्रेति**। निगदव्याख्यातमेतत् । **निषेधानुपपत्तित** इति विवेचयति --- अभिधाविधिपक्षे अयं चाख्यातयोगी वा निषेधो धात्वर्थसङ्गतो वा । चरमे मुख्यार्थत्वे हननप्रागभाव एव भावनोपदेशे विधिवैयर्थ्यम्, असाध्यत्वात् । प्रथमे तु तदर्थे हि [ह]ननभावना । तत्र च निषेधसम्बन्धिनी हननभावना नास्तीति चेत् वैपरीत्यपरिच्छेदान्मिथ्या ततो हननभावनाभिधीयत इति पारिशेष्यादवसीयते [इत्याशय]वानपाकरोति – **तथाहीति** । वाक्यार्थो व्याघाततो निरस्तः यथाह - भावनापदं हननभावनाभिधायकं हननभावनां नाभिधत्त इति व्याघातः । तथा हन्या[दितिपदं] हननभावनाभिधायकमिष्टमभिधाविधिवादिना । तथा च तन्निषेधे व्याघात इत्यर्थः । भावना हि क्वचिच्च वर्तमानकालसम्बद्धा [150A] प्रतीयते यथा पचतीति, क्वचिदतीतकालसम्बद्धा यथा अपाक्षीदिति, क्वचिद् भाविकालसम्बद्धा यथा पक्षीदिति, क्वचित्कालत्रयानवच्छिन्ना यथा पचेदिति । अतः कालत्रयानवच्छिन्ना भावना लिङादिभिरभिधीयते । अतः सैव विधिरिति केचिद् वादिनो मन्यन्ते । तन्मतनिषेधार्थमाह - **कालत्रयेति** । यदा सकलकाला[न]वच्छिन्ना भावना 'न हन्यात्' इति कृत्वा निषिध्यते तदा हननभावना नास्तीति वाक्यार्थः। स च प्रमाणबाधितत्वाद् मिथ्येति ।

159. यदा कार्यं तदा न हन्यात् न हननं कार्यमित्यनुभवविरुद्धम् । क्रियत एव यतः । न हननेन कार्यं हननकारणकं कार्यं नास्तीत्यर्थ इत्यपि नास्ति । दुःखनिवृत्तिसुखाप्त्योरन्यतरस्य तत्र सद्भावात् । हननकारणकमदृष्टं नास्तीत्यर्थ इति तु निरातङ्कं दृष्टार्थिनं प्रवर्तयेदेवेति साधु शास्त्रार्थः । अहननेनापूर्वं भावयेदिति त्वशक्यम् । कारणस्यानादित्वेन कार्यस्यापि तथाभावप्रसङ्गात्, भावनायाश्च तदविषयत्वात् । अहननसङ्कल्पेनेति यावज्जीवमविच्छिन्नतत्सङ्कल्पः स्यात् । सकृत् कृत्वैव वा निवृत्तिः । पश्चाद् हन्यादेवाविरोधात् । सम्पादितो ह्यनेन नियोगार्थः । यावद् यावद् हननसङ्कल्पवान् तावत् तावद् विपरीतसङ्कल्पेनापूर्वं भावयेदिति वाक्यार्थः, तथाभूतस्याधिकारित्वादित्यपि वार्तम् । तदश्रुतेः । प्रसक्तं हि प्रतिषिध्यते नाप्रसक्तमिति चेत् । न वै किञ्चिदिह प्रतिषिध्यते । तदभावः प्रतिपाद्यते इति निषेधार्थः । हननकरणकमपूर्वं वाक्यार्थः । किञ्च न हन्यादिति अहननेनापूर्वस्य कर्तव्यताप्रत्ययो जातो वेदात्, जातश्च हननक्रियायां रागात् । निष्फलाच्च कार्यादपेक्षितफलं गरीय इति न्यायेन हन्यादेवेत्यहो वेदव्याख्याकौशलमास्तिक्याभिमानिनो मीमांसकदुर्दुरूढस्य । इष्टसाधनतापक्षेऽपि न हन्यात् न हननभावना इष्टाभ्युपाय इति वाक्यार्थः । तथा चानिष्टसाधनत्वं कुतो लभ्यते । न हीष्टसाधनं यन्न भवति तदवश्यमनिष्टसाधनं दृष्टमुपेक्षणीयस्यापि भावात् । यत् रागादिप्रसक्तं प्रतिषिध्यते तदवश्यमनिष्टसाधनं दृष्टम्, यथा सविषमन्नं न भुञ्जीथा इति, तेन वेदेऽप्यनुमास्यते, इत्यपि न साधीयः । प्रतिषेधार्थस्यैव चिन्त्यमानत्वात् । न हि कर्तव्यत्वस्येष्टसाधनत्वस्य भावनाया वा अभावः प्रतिपादयितुं शक्यते, लौकिकानां लौकिकप्रमाणसिद्धत्वात् । तथापि प्रतिपाद्यते तावदिति चेत् । न । पाषण्डागमनिषेधेनानैकान्तात् । नासौ प्रमाणमिति चेत् ।

159. कार्यविधिपक्षेऽपि निषेधो न घटते इत्याह - **यदा कार्यमिति** । कार्यं कृतिसाध्यं कृत्युद्देश्यं च । तत्र हननं कृतिसाध्यं कृत्युद्देश्यं च न भवतीत्युभयमपि बाधितं, हननस्य कृतिसाध्यत्वादिति । भावनायां हि कृत्युद्देश्यत्वयोरनुभवसिद्धत्वादिति । **अहननेनेति** । अ[हननं] हननप्रागभावः, तस्यानादित्वेन कार्यस्यापूर्व-

स्यापि तथाभावोऽनादित्वं संप्रयो(स)ज्येतेत्यर्थः । ननु हननप्रागभावभावनाऽपूर्वमाध(द)धास्यतीत्यत आह — **भावनायाश्चेति** । अतद्विषयत्वं प्रागभावाविषयत्वं प्रागभावस्यासाध्यत्वादिति । भावना हि प्रयत्नरूपा साध्यविषयि-[णीति][150B] सिद्धः(द्धे) प्रागभावस्तस्या [अ]विषयो भवितुमर्हतीत्यर्थः । नन्वहननसङ्कल्पोऽपूर्वं भावयिष्यतीति मतमाशङ्क्य निराकरोति — **अहननसङ्कल्पेनेति** । अहननसङ्कल्पेना[पूर्वं भा]वयेदिति वाक्यार्थव्युत्पादने तु किं सकृदहननसङ्कल्पेनापूर्वं भावयेद् यावज्जीवं वा । आद्ये दूषण[माह] - **सकृत् कृत्वैवेति** । सर्वदेति दूषयति **यावज्जीवमिति** । **या[व]दिति** । हननप्रवृत्तिमात्राधिकारी ने(ते)न यदा यदा हनने प्रवृत्तस्तदा तदा तद्विपरीतसङ्कल्पेनापूर्वं भावयेदित्यर्थः । **तदश्रुतेरिति** परिहारे कृते परः शङ्कते - **[प्रसक्तं हीति]**। परिहरति - **न वै किञ्चिदिति** । कथं तं प्रतिषिध्यत इति जिज्ञासापरं बोधयितुमुक्तमर्थं विवेचयति - **तदभावः प्रतिपद्यत** इत्यादिना **वाक्यार्थ** इत्यने(न्ते)न । स बोध ----- **न हीति** । यदि तावन्निषेधशास्त्रेणेतिट[1] उच्चैर्निषिध्यमानः कर्तव्यतारूपो वेष्टसाधनतारूपो वा निषिध्यते, तदशक्यो निषेद्धुं लौकिकानां कर्तव्यत्वादीनां लौ[किकप्रमा]णसिद्धत्वादिति । ननु बाधितस्यापि प्रतिपादनं दृष्टम्, अग्निना सिञ्चेदिति वदित्याशयवानाशङ्कते - **तथापीति** । परिहरति — **न, पाषण्डेति** । पूर्वमुक्तं यत् प्रसक्तं प्र[सा]ध्यते[151A] तदवश्यमनिष्टसाधनमित्यादि । तथा च प्रसक्तैव हि हिंसा यागादिविषया पाषण्डैः प्रतिषिध्यते, न च सा अनिष्टसाधनमिति व्यभिचार इत्यर्थः । ननु प्रमाणवाक्येन प्रतिषेधोऽभिमतः, न च पाषण्डवाक्यानि तथेत्याशयवान् शङ्कते — **नासाविति** ।

160. न, अर्थविपर्ययप्रतिपादनाविशेषेऽस्यापि तथाभावात् । तात्पर्यतः प्रामाण्यमिति चेत् । न । विधिनिषेधयोरनन्यपरत्वात् । न विधौ परः शब्दार्थ इति वचनात् । तथापि निषेधे तथा भविष्यतीति चेत् । न । अविनाभावतदुद्देशप्रवृत्त्योरभावात् । नाप्यसुराविद्यादिवदस्य नञो विरोधि-वचनत्वम्, क्रियासङ्गतत्वात् । असमस्तत्वाच्च । तस्मात् —

विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः ।
अभिधेयोऽनुमेया तु कर्तुरिष्टाभ्युपायता ॥

160. ननु यदि प्रमाणबाधितमर्थं प्रतिपादयतः पाषण्डवाक्यस्याप्रमाणत्वम्, य(त)दा [न] हन्यादिति वाक्यस्याप्रमाणत्वमित्याशयवान् परिहरति — **न, अर्थविपर्ययेति** । हननं कर्तव्यं न भवतीत्ययमर्थो न हन्यादित्यनेन प्रतिपाद्यते । तत्र प्रमाणाबाधितन(त)[या] न कर्मभावनायाः प्रतीयमानत्वादित्यर्थः । ननु यथा गङ्गायां घोष इत्यस्य वाक्यस्य तीरान्वये तात्पर्यात् तत्प्रतिपादकत्वम्, तथा न हिंस्यादिति निषेधवाक्यस्य निषिध्यमानानसर्व(नानिष्ट)साधनतायां तात्पर्यात् तत्प्रतिपादकत्वमिति । विशेषमुररीकृत्य शङ्कते — **तात्पर्य[त]** इति । अर्थवादादिवचनात(ना)[म]न्यत्र विधौ तात्पर्यमभ्युपेयते न तु विधिवचनस्यापीति सर्वजनसिद्धमेतदिति परः । **न, विधीति** । पुनः शङ्कते — **तथापीति** । परिहरति — **न, अविनाभावेति** । तत्र हि लक्षणीयार्थपरत्वं यत्र [151B] तेनार्थेन शब्दार्थस्याविनाभावो भवति, तदुद्देशेन शब्दः प्रयुज्यते । न हीह विधिनिषेधवाक्यमन्य-परतया प्रयुज्यते । न वाक्येन सहास्याविनाभावोऽस्तीति निषेधो ह्यत्र परिस्फुरति । न च तस्यानर्थसाधनत्वेना-विनाभाव इत्यर्थः । ननु यथा असुर इति पदेन अविद्या इति पदेन न देवभावमात्रं विद्याभावमात्रं वाभिधीयते,

---

१. पाठो भ्रष्टः ।

अपि तु देवविरोधिनो दानवाः विद्याविरोधिनः स(छ)द्यवादेयो(वादिनो)ऽभिधीयन्ते य(त)थाऽत्रापि नेष्टसाधनतानिषेधमात्रभिधीयते किन्तु तद्विरुद्धमनर्थसाधनत्वमिति शङ्कते – **नाप्यसुरे**ति । परिहरति – **क्रियासङ्गतत्वादि**ति । न हन्यादिति निषेधः क्रियासङ्गतोऽकृतसमासश्च प्रातिपदिकसङ्गतश्च नञशब्दो विरोधिवचनो लोके दृष्ट इत्यर्थः । तदेवं कर्तृकर्मकरणधर्मा न विधिरिति पराङ्गीकृतान् [पक्षान्] विस्तरतो निराकृत्य कर्तृकर्मकरणधर्मविधिपक्षेषु च निषेधामु(नु)पपत्तिमुपक्रान्तां(न्तान्) समर्थ्य स्वाभिमतनियोक्तृधर्मविधिमुपसंहरति - **तस्मादि**ति ।

161. तत्र स्वयङ्कर्तृकक्रियेच्छाऽभिधानं कुर्यामिति । सम्बोध्यकर्तृकक्रियेच्छाऽभिधानं कुर्या इति । शेषकर्तृकक्रियेच्छाऽभिधानं कुर्वीतेति । तथा चाग्निकामो दारुणी मथ्नीयादित्यस्य लौकिकवाक्यस्यायमर्थः सम्पद्यते अग्निकामस्य दारुमथने प्रवृत्तिर्ममेष्टेति । ततः श्रोताऽनुमिनोति – नूनं दारुमथनयत्नोऽग्नेरुपाय इति । यद्विषयो हि प्रयत्नो यस्याप्तेनेष्यते, न तस्यापेक्षितहेतुः । तथा तेनावगतश्च, यथा ममैव पुत्रादेर्भोजनविषय इति व्याप्तेः । विषं न भक्षयेदित्यस्य तु विषभक्षणगोचरा प्रवृत्तिर्मम नेष्टा इत्यर्थः । ततोऽपि श्रोताऽनुमिनोति – नूनं विषभक्षणभावना अनिष्टसाधनम् । यद्विषयो हि प्रयत्नः कर्तुरभिमतसाधकोऽप्याप्तेन नेष्यते स ततोऽधिकतरानर्थहेतुः, तथा तेनावगतश्च, यथा ममैव पुत्रादेः क्रीडाकर्दमविषभक्षणादिविषय इति व्याप्तेः । लौकिक एव वाक्ये अयं प्रकारः कदाचिद् बुद्धिमधिरोहति न तु वैदिकेषु, तेषु पुरुषस्य निरस्तत्वात् इति चेत् । न । निरासहेतोरभावात् । तदस्तित्वेऽपि प्रमाणं नास्तीति चेत् । मा भूदन्यत्, विधिरेव तावद्गर्भ इव पुंयोगे प्रमाणं श्रुतिकुमार्याः किमत्र क्रियताम् । लिङो वा लौकिकार्थातिक्रमे य एव लौकिकास्त एव वैदिकास्त एव चैषामर्था इति विप्लवेत । तथा च जबगडदशादिवत् अनर्थकत्वप्रसङ्ग इति भव सुस्थः । स्यादेतत् । तथापि वक्तृणामुपाध्यायानामेवाभिप्रायो वेदे विधिरस्तु कृतं स्वतन्त्रेण वक्त्रा परमेश्वरेणेति चेत् । न, तेषामनुवक्तृतयाऽभ्यासाभिप्रायमात्रेण प्रवृत्तेः शुकादिवत् तथाविधाभिप्रायाभावात् । भावे वा न राजशासनानुवादिनोऽभिप्राय आज्ञा, किं नाम राज्ञ एवेति लौकिकोऽनुभवः ।

161. लिङादिभिः प्रत्यै(प्रत्ययै)रभिधेयो विधिर्वक्त्रभिप्रायरूपत्वे कुर्यात् कुर्याः[152A] कुर्यामित्यत्रार्थवैचित्र्यात्यया न स्यादित्याशङ्क्याह – **तत्र स्वयमि**त्यादि । उद्देश एव तात्पर्यमित्यादि । लोके लोकवृत्तानुसारत इत्यभिहितम् । तत्र लौकिकवाक्यस्यैव तावन्नियोक्तृधर्मप्रतिपादकत्वमिति दर्शयति । तथाहि **अग्निकाम** इत्यादिना **क्रीडाकर्दम[विष]भक्षणादिविषय इति व्याप्तेरि**त्यन्तेनेति । य **एव लौकिका** इति । 'हिरण्यपर्णो वनस्पति' तथा 'उत्ताना वै देवगावो वहति' इत्यादिकमुदाहृत्य विचारिता(तं) किं य एव लौकिका शब्दा अग्न्यादयस्त एव वैदिका अन्ये वेति । तत्र हिरण्यपर्णोत्तानवहनरूपं किञ्चिद्वैधर्म्येणान्यत्वेन पूर्वपक्षे(क्ष इ)ति, सिद्धान्तः स एव लौकिकास्त एव वैदिकास्त एव चामीषामर्था इति । तथाहि लोके परिदृष्टा एव प[दार्था] वेदेऽपि प्रत्यभिज्ञायमानाः कथमन्यतया वक्तुं शक्यते । उत्तानवहनवाक्यादेस्तु अन्यथैव ग्रहचक्रभ्रमणदर्शनेन वर्णितः । न चात्रानादिवहनरूप[स्य] [किं]चिद्वैधर्म्यादर्थस्य अत्यन्त वे(भे)द इति सांप्रतम् । यद्यैववामनागाके एवसानवराश्चिपितृनांशिका[१] इति । **अनर्थकत्वप्रसङ्ग** इति । गृहीतसङ्गतेर्लौकिक[152B]पदादन्यत्वेना-

---

१. भ्रष्टः पाठः ।

गृहीतसङ्गतित्वादित्यर्थः ।

162. श्रुतेः खल्वपि –

कृत्स्न एव हि वेदोऽयं परमेश्वरगोचरः ।
स्वार्थद्वारैव तात्पर्यं तस्य स्वर्गादिवद् विधौ ॥१६॥

न सन्त्येव हि वेदभागा यत्र परमेश्वरो न गीयते । तथाहि – स्रष्टृत्वेन पुरुषसूक्तेषु, विभूत्या रुद्रेषु, शब्दब्रह्मत्वेन मण्डलब्राह्मणेषु, प्रपञ्चं पुरस्कृत्य निष्प्रपञ्चतयोपनिषत्सु, यज्ञपुरुषत्वेन मन्त्रविधिषु, देहाविर्भावैरुपाख्यानेषु, उपास्यत्वेन च सर्वत्रेति । सिद्धार्थतया न ते प्रमाणमिति चेत् । न । तद्धेतोः कारणदोषशङ्कानिरासस्य भाव्यभूतार्थसाधारणत्वात् । अन्यत्रामीषां तात्पर्यमिति चेत् । स्वार्थप्रतिपादन-द्वारा, शब्दमात्रतया वा ? प्रथमे स्वार्थेऽपि प्रामाण्यमेषितव्यम् । तस्यार्थस्यानन्यप्रमाणकत्वात् । अत एव तत्र तस्य स्मारकत्वमित्यपि मिथ्या । तत्प्रतिपादकत्वेऽपि न तत्र तात्पर्यमिति चेत् । स्वार्थापरित्यागे ज्योतिःशास्त्रवदन्यत्रापि तात्पर्ये को दोषः । अन्यथा स्वर्गनरकव्रात्यश्रोत्रियादिस्वरूपप्रतिपादकानाम-प्रामाण्ये बहु विप्लवेत । तत्राबाधनात् तथेति चेत् । तुल्यम् ।

162. सिद्धार्थे तु वृद्धव्यवहारे । कार्ये कार्यान्विते वार्थे शब्दानां शक्तिरवधारिता । प्रवृत्तिनिवृत्तियोग्यो ह्यर्थस्तदर्थं(र्थः) पदस्येत्युपदिश्यते । प्रवृत्तिनिवृत्तियोग्यता च कार्यस्य कार्यान्वितस्य वा न तु तद्विपरीतस्य, सिद्धानां चार्थानामकार्यत्वात् कार्यानन्वितत्वाच्च न तेषु शब्दस्य [शक्तिः] । ननु स(श)ङ्कते – अतस्तदप्रतिपादकतया तु शब्दास्ते न प्रमाणम् । सिद्धे चार्थे शब्दस्य प्रामाण्यादर्शनाच्च । इत एव बाधकः । शब्दस्य अन्यत्र तात्पर्यान्नेत्य- - - - धिः । **तद्धेतोरि**ति । अयमर्थः । अप्रामाण्यं त्रिधा भिन्न(न्नं) मिथ्यात्वाना(ज्ञा)नसंशयैः । तत्र न तावत् सिद्धार्थानामप्रतिपादकत्वं साध्यार्थेषु साध्यार्थप्रतिपत्तिव[देव ते]ष्वपि सिद्धस्यार्थस्य परिस्फुरणात् । नापि संशयजनकत्वेनाप्रामाण्यम्, अवस्थितस्य स्वार्थाप्रतिपादकत्वात् । नापि मिथ्यात्वेन, बाधकानुल्लेखात् । अतः साध्यार्थवत् सिद्धा[र्था]ना[म]पि प्रामाण्यकारणदोषाशङ्क्या एवंभूतस्यापि वेदस्य सिद्धार्थस्य न प्रामाण्यमिति चेत्, तदेतत् तुल्यं साध्यार्थेष्वपि । अथापौरुषेयत्वनिर्णयात् सर्वज्ञपुरुषप्रणीत[153A]त्वनिश्चयाद्वा साध्यार्थानां प्रामाण्यं तदे[तत्] तुल्यं सिद्धार्थेष्वपि । तदिदमुक्तम् - **भाव्यभूतार्थसाधारणत्वादि**ति **अन्यथे**ति । कार्ये कार्यान्विते च शब्दस्य शक्तेरवधारणे सिद्धार्थानामपि तत्रैव तात्पर्यमित्यर्थः । **शब्दमात्रतये**ति । स्वार्थमप्रति-पाद्येत्यर्थः । किं प्रतीयमानसिद्धार्थान्वयपुरस्कारेण कार्ये तात्पर्यं तत्परिहारेण वा । प्रथमे न किञ्चिदनुपपन्नमित्याह **– स्वार्थेऽपी**ति । **अत एवे**ति । अनन्यप्रमाणकत्वादेवेत्यर्थः । **ज्योतिःशास्त्रवदि**ति । अयमर्थः । यथा ज्योतिः-शास्त्रस्यामावास्यादिकालप्रतिपादकत्वेन च संवा---प्रतिपादकत्वेन दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वंशते ब्राह्मणोऽग्नीनादधीतेत्यादौ सिद्धार्थे प्रामाण्यमपरिहरत एव कार्यान्वितार्थप्रतिपादकस्य प्रामाण्यं स्यात् तथेश्वरस्वरूप-प्रतिपादयत एव वेदराशेरीश्वरमुपासीतेत्युपासनादिकार्यान्वितेश्वरस्वरूपप्रतिपादनात् प्रामाण्यम् । द्वितीये दूषणम् **– स्वर्गनरके**त्यादि । सिद्धार्थस्वर्गनरकादिप्रतिपादकस्यागमस्य तत्राप्रामाण्ये निषेधविध्योरपि न निवृत्तिः स्यादित्यर्थः ।

---

१. प्रतिपाद्यमान इति पाठः समीचीनः ।

163. न तादृगर्थः क्वचित् इष्ट इति चेत् । स्वर्गादयोऽपि तथा । तन्मिथ्यात्वे तदर्थिनामप्रवृत्तौ विधानानर्थक्यप्रसङ्ग इति चेत् । इहापि तदुपासनाविधानानर्थक्यप्रसङ्गः । तन्मिथ्यात्वे हि सालोक्य-सायुज्यादिफलमिथ्यात्वे कः प्रेक्षावान् तमुपासीतेति तुल्यमिति । वाक्यादपि । संसर्गभेदप्रतिपादकत्वं ह्यत्र वाक्यत्वमभिप्रेतम् । तथा च यत् पदकदम्बकं यत् संसर्गभेदप्रतिपादकं तत् तदनपेक्षसंसर्गज्ञान-पूर्वकम्, यथा लौकिकम्, तथा च वैदिकमिति प्रयोगः । विपक्षे च बाधकमुक्तम् ।

सङ्ख्याविशेषादपि –

स्यामभूवं भविष्यामीत्यादिसङ्ख्या च वक्तृगा ।
समाख्याऽपि न शाखानामाद्यप्रवचनादृते ॥१७॥

कार्यतया हि प्राक् सङ्ख्योक्ता, सम्प्रति तु प्रतिपाद्यतयोच्यते । तथाहि उत्तमपुरुषाभिहिता सङ्ख्या वक्तारमन्वेतीति सुप्रसिद्धम् । अस्ति च तत्प्रयोगः प्रायशो वेदे । ततस्तदभिहितया तयाऽपि स एवानुगन्तव्यः, अन्यथाऽनन्वयप्रसङ्गात् । अथवा – समाख्याविशेषः सङ्ख्याविशेष उच्यते । काठकं कालापकमित्यादयो हि समाख्याविशेषाः शाखाविशेषाणामनुस्मर्यन्ते । ते च न प्रवचनमात्र-निबन्धनाः प्रवक्तृणामनन्तत्वात् । नापि प्रकृष्टवचननिमित्ताः । उपाध्यायेभ्योऽपि प्रकर्षे प्रत्युतान्यथा-करणदोषात् । तत्पाठानुकरणे च प्रकर्षाभावात् । कतिचनादौ संसारे प्रकृष्टाः प्रवक्तार इति को नियामक इति । नाप्याद्यस्य वक्तुः समाख्येति युक्तम् । भवद्भिस्तदनभ्युपगमात् । अभ्युपगमे वा स एवास्माकं वेदकार इति वृथा विप्रतिपत्तिः । स्यादेतत्, ब्राह्मणत्वे सत्यवान्तरजातिभेदा एव कठत्वादयः । तदध्येया तदनुष्ठेयार्था च शाखा तत्समाख्यया व्यपदिश्यते इति किमनुपपन्नम् । न । क्षत्रियादेरपि तत्रैवाधिकारात् । न च यो ब्राह्मणस्य विशेषः स क्षत्रियादौ सम्भवति । न च क्षत्रियादेरन्यो वेद इत्यस्ति । न च कठाः काठकमेवाधीयते तदर्थमेवानुतिष्ठन्तीति नियमः, शाखासञ्चारस्यापि प्रायशो दर्शनात् । प्रागेवायं नियम आसीदिदानीमयं विप्लवते इति चेत् । विप्लव इव तर्हि सर्वदा, कठाद्य-वान्तरजातिविप्लवादित्यगतिरेवेयम् । तस्मादाद्यप्रवक्तृवचननिमित्त एवायं समाख्याविशेषसम्बन्ध इत्येव साध्विति । स एवं भगवान् श्रुतोऽनुमितश्च, कैश्चित् साक्षादपि दृश्यते प्रमेयत्वादेर्घटवत् ।

163. **सालोक्यं** समानलोकता । **सायुज्यं** समानात्मना मर्त्यलोकाद् विशिष्टपु[रुषार्थ]वशेन [153B] शिवादिलोके वसेत् । शिव[लोके] तत्सार्वज्ञ्याणिमादिकैश्वर्यवान् वसेदित्यर्थः । ननु विपक्षे किं बाधकमित्यत आह - **विपक्षे च बाधकमुक्तमिति** निरर्थकत्वप्रसङ्गः । [शक्तिहानाप]त्तिप्रसङ्गश्चेत्यादि । **अन्यथेति** । उत्तम-पुरुषाभिहिता हि सङ्ख्या यदि वक्त्रा सहान्वयं नाऽभिधत्ते तदाऽन्येनाप्यन्वयं नाभिदध्यात्, विरोधात् । तथा चानन्वितसङ्ख्याप्रतिपादा[त्] अनन्वितार्थत्वं स्यादित्यर्थः । नन्वस्मर्णमाणकर्तृकेषु कठादिसमाख्याया अन्यनिबन्ध-कत्वात् कथमतः कर्तुरनुमानम् । तदुक्तम् –

काठादिकसमाख्या च एतत्कर्तृनिबन्ध[ना] ।
[तथा]स्य कर्तृमत्ताऽतस्तया न परिकल्प्यते ॥

तथा कारिकाया[म्]

अन्यथाप्युपि(प)पन्नत्वादियं प्रवर्तनोदिता[१] ।
न शक्ता कर्तृमूलाघ(य) प्राक्ते [च] स्मरणं स्थितम् ॥ इति

परोक्तं हृदि निधाय – न च [ते] **प्रवचनमात्रनिबन्धना** इत्याह । 'दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता' इत्याशङ्क्य समाधिमारभते – **अपि चे**ति **प्रागेवे**ति । अनुभवत्वस्याबाधितबुद्धिविषयत्वादित्यर्थः । **न च सम्भवतीत्यपी**ति । स्मृतावेवानुभवत्वारोप इत्यनुषञ्जनीयम् । कुतो न सम्भवतीत्यत आह – **न ही**ति । अतीन्द्रियदेशे मनसो योगेन । सुबोधमितरत् । [154A] यदुक्तमुपासनैव क्रियते । श्रवणा[न]न्तरस्मेतेति-(मननमिति) । तदियता प्रबन्धेन सकलवादिमतनिरसनेन निष्पाद्य तत्पु(त्फलं) कथयितुमर्थान्तरमुपोद्यते **क[ठे]**ति । स एष **भगवानि**त्यादिना । तत्र प्रमाणमाह – **प्रमेयत्वादेरि**ति । आदिग्रहणादभिधेयत्वसत्त्वद्रव्यत्वादय **उद्योतकराचार्य**वचनमनुसृत्य वक्तव्याः ।

164. ननु तत्सामग्रीरहितः कथं द्रष्टव्यः । सा हि बहिरिन्द्रियगर्भा मनोगर्भा वा तत्र न सम्भवति । चक्षुरादेर्नियतविषयत्वात् । मनसो बहिरस्वातन्त्र्यात् । तदुक्तम् 'हेत्वभावे फलाभावात्' इत्यादि । न कार्यैकव्यङ्ग्यायाः सामग्र्या निषेद्धुमशक्यत्वात् । अपि च दृश्यते तावद् बहिरिन्द्रियोपरमेऽपि असन्निहितदेशकालार्थसाक्षात्कारः स्वप्ने । न च स्मृतिरेवासौ पटीयसी । स्मरामि स्मृतं वेति स्वप्नानुसन्धानाभावात् । पश्यामि दृष्टमित्यनुव्यवसायात् । न चारोपितं तत्रानुभवत्वम् । अबाधनात् । अननुभतस्यापि स्वशिरश्छेदनादेरवभासनात् च । स्मृतिविपर्यासोऽसाविति चेत् । यदि स्मृतिविषये विपर्यास इत्यर्थः तदाऽनुमन्यामहे । अथ स्मृतावेवानुभवत्वविपर्यासः इति तदा प्रागेव निरस्तः । न च सम्भवत्यपि, न ह्यन्येनाकारेणाध्यवसितोऽन्येन ज्ञानावच्छेदकतयाऽध्यवसीयते । तथा च स घट इत्युत्पन्नायां स्मृतौ भ्राम्यतस्तं घटमनुभवामीति स्यात्, न त्विमं घटमिति । न ह्ययं घट इति स्मृतेराकारः । तस्मादनुभव एवासौ स्वीकर्तव्यः । अस्ति च स्वप्नानुभवस्यापि कस्यचित् सत्यत्वम्, संवादात् । तच्च काकतालीयमपि न निर्निमित्तम् । सर्वस्वप्नज्ञानानामपि तथात्वप्रसङ्गात् । हेतुश्चात्र धर्म एव । स च कर्मजवत् योगजोऽपि योगविधेरवसेयः, कर्मयोगविध्योस्तुल्ययोगक्षेमत्वात् । तस्मात् योगिनामनुभवो धर्मजत्वात् प्रमा, साक्षात्कारित्वात् प्रत्यक्षफलम्, धर्माननुगृहीतभावनामात्रप्रभवस्तु न प्रमेति विभाग इति । अतस्तत्सामग्रीविरहोऽसिद्धः । तथापि विपक्षे किं बाधकमिति चेत् । 'द्वे ब्रह्मणी वेदितव्ये' इत्यादियोगविधिवैयर्थ्यप्रसङ्गः अशक्यानुष्ठानोपायोपदेशकत्वात् । न चासाक्षात्कारिज्ञान-विधानमेतत् । अर्थज्ञानावधिनाऽध्ययनविधिनैव तस्य गतार्थत्वात् इति । एतेन परमाण्वादयो व्याख्याता इति । तदेनमेवम्भूतमधिकृत्य श्रूयते 'न द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति । 'एकमेवाद्वितीयम्' इति । 'पश्यत्यचक्षुः स शृणोत्यकर्णः' इति । 'द्वे ब्रह्मणी वेदितव्ये परं चापरमेव च' इति । 'यज्ञेन यज्ञमयजन्त देवाः' इति । 'यज्ञा वै देवाः' इति । 'यज्ञो वै विष्णुः' इत्यादि । स्मर्यते च –

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । इति ।
मदर्थं कर्म कौन्तेय ! मुक्तसङ्गः समाचर । इति ।

---

१. प्रवचनादिना इति पाठो मुद्रिते श्लोकवार्तिके वेदनित्यताधिकरणे श्लोक ८.

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः । इति ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते । इत्यादि ।

अनुशिष्यते च साङ्ख्यप्रवचने ईश्वरप्रणिधानम् । तमिमं ज्योतिष्टोमादिभिरिष्टैः प्रासादादिना पूर्तेन शीतातपसहनादिना तपसा अहिंसादिभिर्यमैः शौचसन्तोषादिभिर्नियमैः आसनप्राणायामादिना योगेन महर्षयोऽपि विविदिषन्ति । तस्मिन् ज्ञाते सर्वमिदं ज्ञातं भवतीत्येवं विज्ञाय श्रुत्वैकतानस्तत्परो भवेत् । यत्रेदं गीयते –

मन्मना भव भद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ इति ॥

164. **कार्यैकव्यङ्ग्याया** इति सामग्र्या अभावो न भावयोग्यानुपलम्भेन निरूपणीयः दृश्यकारणसमुदाय-रूपाया असामग्र्याः ग्रहणयोग्यत्वासिद्धेः । अथ म[तं] कार्यव्यङ्ग्या सामग्री, अतस्तदभावः कार्याभावादेव निरूप्यते, तत्कार्यमप्यस्याः प्रत्यक्षज्ञानं, तच्च पुरुषान्तरसमवेतमयोग्यमिति तदभावो नानुपलम्भेन शक्यते ज्ञातुमिति, तदभावादपि न सामग्र्या भावनिरूपणमिति सामग्रीविरहो सिद्धः । ननु मा सैत्सीतानुपलब्धिकारकः सामग्रीविरहः, इन्द्रियत्वा[द्धि निरूप]कस्तावत्य(त्ये)वमात्मग्राहकत्वाभावः सेत्स्यतिं । न च प्रकृष्टेन्द्रिय-तयाऽविषयेऽपि प्रवृत्तिः संभावनीया रूपेऽपि श्रोत्रवृत्तिप्रसङ्गात् । यथोक्तम् – [154B]

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ॥ इति ॥ [श्लोकवा० चोदनासूत्र श्लोक ११६]

शेषम् । **एतेने**ति । 'परमाण्वादयः कस्यचित्प्रत्यक्षाः प्रमेयत्वात् घटवत्' इत्यस्मादप्यनुमानाद् योगी सिद्ध्यतीत्यर्थः । **प्रासादादिने**त्यादिग्रहणात् परिखावलयादिः । अनशनादिनेत्यादिग्रहणाज्जलादि । आसनप्राणा-यामादिनेत्यादिग्रहणादत्र प्रत्याहारधारणाध्यानादिः । अहिंसादिभिरित्यत्रास्तेयब्रह्मचर्यादिः । संतोषादिभिरित्यत्र शौचतपःस्वाध्यायादिः । किमर्थमित्याह – **तस्मिन् ज्ञाते** इति युक्त्येति । अनिन्द्रियदेशेन नः संयोगेन ।

165. इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते
येषां नास्पदमादधासि हृदये ते शैलसाराशयाः ।
किन्तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तकाः
काले कारुणिक, त्वयैव कृपया ते भावनीया नराः ॥१८॥

अस्माकं तु निसर्गसुन्दर ! चिराच्चेतो निमग्नं त्वयी-
त्यद्धाऽऽनन्दनिधे ! तथापि तरलं नाद्यापि सन्तृप्यते ।
तन्नाथ ! त्वरितं विधेहि करुणां येन त्वदेकाग्रतां
याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातना ॥१९॥

इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्री-
र्यद्वासयेदपि च दक्षिणवामकौ द्वौ ।
नो वा ततः किममरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पितेन ॥२०॥

इति श्रीन्यायाचार्यपदाङ्कितमहामहोपाध्यायश्रीमदुदयनविरचितं
न्यायकुसुमाञ्जलिप्रकरणं समाप्तम् ॥

165. किमस्य प्रणयनप्रयोजनं तर्हीत्यत आह — **अमरेशे**ति । यस्त्वेवमपि निरवकाशन्यायविस्तरागमान्विते [सर्वभूतान्तर्]वर्तिभव्य[पार्व]तीपतौ कुमताभ्यासरसावसेकदुरवलेपदुर्विदग्धतया न श्रद्धैकतानः कात्यायनीकान्तमाकलयति तं प्रत्याह — **इत्येवमि**ति । **प्रत्यु(स्तु)ते**ति । विप्रतीपविधयः विपरीतप्रकाराः इत्यर्थः । काले कदाचिद् भवच्चिन्तका इति योजना । भावनीया इति वासनीया अनुकम्पनीया इति यावत् । हन्तास्वन्येषां यथातथा शङ्का[155A]दिकमलकलङ्कस्तावन्नास्माकमस्तीत्याह — **अस्माकमि**ति । **याम्या** इति । यमो देवता यासामित्यर्थः । तदेवं स्वर्गनिर्माणप्रकर्षप्रत्ययानन्दकन्दलितकण्ठः प्राह — **इत्येष नीती**ति । अत्र यदि निर्लज्जः कश्चिदेवं ब्रूयात् ननु मास्मानेषा कुसुमाञ्जलिर्वासयति इति तं प्रति स कष्टमिवाह — **नो वा तत** इति । इति परमपाशुपताचार्यपण्डितश्रीवामेश्वरध्वजविरचिते न्यायकुसुमाञ्जलिनिबन्धने पञ्चमः परिच्छेदः समाप्तः ।

दोषेष्वेव गुणाः स्वयं[वि]रचिते ग्रन्थे गुणेष्वेव च
दोषा न(अ)न्यकृते(तौ) यदाप्यवहिताः शक्ताः समारोपितुम् ।
तन्मुक्त्वैव तथापि धूर्तचरित:(तं) माहात्म्यमालम्ब्य च
ग्रन्थोऽयं गुण[त]यैव सततं सद्भिः समावर्ण्यताम् ॥१॥

पारम्पर्यवशाद् गुरोर्गुरुगुणग्रामैः सहस्रादिभि-
र्वादात्स्वीयविचारतश्च सुधियां सस्व(शश्व)च्च सवदितः(संवादतः) ।
निर्णीतं कुसुमाञ्जलेः किमपि यत्तत्त्वं मया सांप्रतम्
कार्यस्तत्र विपर्ययो न चतुरैरटि(द्य) विचारोद्यतैः ॥२॥
यस्मिन् जल्पति वाक्यवक्रिमवशाद् वक्रत्वमत्यद्भुतं
बिभ्राणास्तदूपोधि(दुपाधयः) [155A] षडपि ते तर्काः पुरोवादिनाम् ।
तस्मात्तत्त्वमवेत्य तात्त्विकगुरोः श्रीमद्विरूपाक्षत-
श्चक्रे वृत्तिमिमां समाहितमतिर्वामध्वजो धीरधीः ॥३॥

शुभमस्तु । सार्व[ज्ञ्यादिगुणमूर्ति]निरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु विनाशं सर्वत्र सुखीभवन्तु लोकाः ॥

स्वस्ति । परमभट्टारकपरमेश्वरपरमशैवसत्प्रक्रियोपेतमहाराजाधिराजमहासामन्ताधिपतिः राजाश्रीयुवराजदेवसद्भुज्यमानचौसानगरावस्थितमहामहोपाध्यायमिश्रशूलपाणेः सुत उपाध्याय महादेवस्य पाठार्थं तीरभुक्ति सं० [चौसावास्तीक] कर्णकुलालङ्कारठक्कुरश्रीमाधवेन लिखितमिदम् । यथा दृष्टं तथा लिखितमिदम् । गतविक्रमादित्यसंवत् १३१२ भाद्रसुदि ४ रविदिने शुभमस्तु ।

परिशिष्ट - १

न्यायकुसुमाञ्जलिकारिकार्धपादानाम्

अकारादिक्रमेण सूची

अक्षाश्रयत्वाद् दोषाणाम्	३.२१[१]	इष्टसिद्धिः प्रसिद्धेंऽशे	३.४
अज्ञातकरणत्वाच्च	३.२०	इष्टहानेरनिष्टाप्तेः	५.८
अतिप्रसङ्गान्न फलं	५.१२	ईशस्यैष निवेशितः	१.१
अदृश्यदृष्टौ सर्वज्ञो	३.१६	ईश्वरादिपदं सार्थं	५.६
अदृष्टिबाधिते हेतौ	३.६	उद्देश एव तात्पर्यं	५.६
अनियम्यस्य नायुक्ति	३.१९	उद्भिद्वृश्चिकवद् वर्णाः	२.२
अनुकूलस्तु तर्कोऽत्र	५.३	उपासनैव क्रियते	१.३
अनैकान्तादसिद्धैर्वा	४.३	एकतानिर्णयो येन	१.१७
अनैकान्तः परिच्छेदे	३.१३	एकस्य न क्रमः क्वापि	१.७
अन्यत्र क्लृप्तसामर्थ्यात्	५.१४	कर्तृधर्मा नियन्तारः	१.१४
अन्यथाऽनपवर्गः स्यात्	१.१४	कारं कारमलौकिकाद्भुतमयं	२.४
अन्विता इति निर्णीते	३.१५	कार्यत्वान्निरुपाधित्वम्	५.५
अप्राप्तेरधिकप्राप्तेः	४.१	कार्यायोजनधृत्यादेः	५.१
अभावविरहात्मत्वं	३.२	किन्तु प्रस्तुतविप्रतीपविधयः	५.१८
अभिधेयोऽनुमेया तु	५.१५	कृताकृतविभागेन	५.९
अर्थापत्तिरसौ व्यक्तम्	३.९	कृत्स्न एव च वेदोऽयं	५.१६
अर्थेनैव विशेषो हि	४.४	क्रिययैव विशेषो हि	४.४
अवच्छेदग्रहध्रौव्यात्	३.२२	क्वायोग्यं बाध्यते शृङ्गं	३.१
असत्त्वात् प्रत्ययत्यागात्	५.८	चिरध्वस्तं फलायालं	१.९
असत्त्वादप्रवृत्तेश्च	५.१३	जन्मसंस्कारविद्यादेः	२.३
अस्माकं तु निसर्गसुन्दर ! चिरात्	५.१९	जयेतरनिमित्तस्य	१.१३
आकाङ्क्षा सत्तया हेतुः	३.१३	तज्ज्ञानं विषयस्तस्य	५.७
आक्षेपलभ्ये संख्येये	५.११	तत्त्वे यत्नवता भाव्यम्	१.६
आगमादेः प्रमाणत्वे	३.५	तदन्यस्मिन्नविश्वासात्	२.१
आभासत्वे तु सैव स्यात्	३.५	तदभावात् प्रवृत्तिर्न	३.१८
इत्येवं श्रुतिनीतिसंप्लवजलैः	५.१८	तदयोगव्यवच्छेदः	४.५
इत्येष नीति	५.२०	तदलाभान्न कार्यं च	५.१२
इत्येषा सहकारिशक्तिरसमा	१.२०	तद्युक्तं तत्र तच्छक्तम्	१.१८

१. ३.२१ = स्तबक ३ कारिका २१

तद्वैशिष्ट्यप्रकाशत्वात्	४.३	प्रत्यक्षादेरसाध्यत्वात्	३.१०
तन्नाथ ! त्वरितं विधेहि करुणां	५.१९	प्रत्यात्मनियमाद् भुक्तेः	१.४
त्रया विवरणध्रौव्यात्	५.१०	प्रमायाः परतन्त्रत्वात्	२.१
तर्काभासतयाऽन्येषां	५.३	प्रवाहो नादिमानेष	१.६
तं देवं निरवग्रहस्फुरदभि	२.४	प्रवृत्तिः कृतिरेवात्र	५.७
तं सर्वानुविधेयमेकमसम	३.२३	प्राप्त्यन्तरेऽनवस्थानात्	३.२२
दृष्टलाभफला वापि	१.८	बाधकस्य समानत्वात्	५.१३
दृष्ट्यदृष्ट्योर्न सन्देहो	३.६	भावनैव हि यत्नात्मा	५.१०
दुष्टोपलम्भसामग्री	३.३	भावो यथा तथाऽभावः	१.१०
देवताः सन्निधानेन	१.१२	मितिः सम्यक्परिच्छित्तिः	४.५
देवोऽसौ विरतप्रपञ्चरचना	१.२०	यत्न एव कृतिः पूर्वा	५.९
न चासौ क्वचिदेकान्तः	३.१७	यथार्थोऽनुभवो मानम्	४.१
न तस्यां नोपलम्भोऽस्ति	३.३	यदुपास्तिमसावत्र	१.२
न प्रमाणमनाप्तोक्तिः	३.१६	योग्यादृष्टिः कुतोऽयोग्ये	३.१
न बाधोऽस्योपजीव्यत्वात्	५.२	लेशादृष्टिनिमित्तदुष्टिविगम	४.६
न मानयोर्विरोधोऽस्ति	३.१९	वर्षादिवद्भवोपाधिः	२.२
न वैजात्यं विना तत् स्यात्	१.१६	वाक्यात् सङ्ख्याविशेषाच्च	५.१
नान्यदृष्टं स्मरत्यन्यो	१.१५	वासनासंक्रमो नास्ति	१.१५
नान्या सामान्यतः सिद्धिः	३.४	विच्छेदेन पदस्यापि	५.५
निमित्तभेदसंसर्गात्	१.१२	विधिर्वक्तुरभिप्रायः	५.१५
निरञ्जनावबोधार्थो	३.१७	विना तेन न तत्सिद्धिः	१.१६
निर्णीतशक्तेर्वाक्याद्धि	१.१४	विफला विश्ववृत्तिर्नो	१.८
नैकताऽपि विरुद्धानाम्	३.८	व्यस्तपुंदूषणाशङ्कैः	३.१५
नो वा ततः किम्	५.२०	व्याघातावधिराशङ्का	३.७
न्यायचर्चेयमीशस्य	१.३	व्यापकस्यापि नित्यस्य	१.१९
पदार्थान्वयवैधुर्यात्	३.१२	व्याप्तिस्मृतिविलम्बेन	३.१४
परस्परविरोधे हि	३.८	व्यावर्त्याभाववत्तैव	३.२
परोक्ष्यसमवेतस्य	१.१३	शक्तिभेदो न चाभिन्नः	१.७
पूर्वभावो हि हेतुत्वं	१.१९	शङ्का चेदनुमाऽस्त्येव	३.७
प्रतिपत्तेरपारोक्ष्यात्	३.२०	श्रुतान्वयादनाकाङ्क्षं	३.१२
प्रतिबन्धो विसामग्री	१.१०	सङ्ख्येयमात्रलाभे तु	५.११
प्रतियोगिनि सामर्थ्यात्	३.२१	सत्पक्षप्रसरः सतां	१.१
प्रत्यक्षादिभिरेभिरेवमधरो	३.२३	समयो दुर्ग्रहः पूर्वं	३.११

समाख्याऽपि च शाखानां	५.१७	स्वगुणाः परमाणूनां	१.११
सम्बन्धस्य परिच्छेदः	३.१०	स्वभावनियमाभावात्	४.२
सम्भोगो निर्विशेषाणां	१.९	स्वभाववर्णना नैवम्	१.५
संस्कारः पुंस एवेष्टः	१.११	स्वर्गापवर्गयोर्मार्गम्	१.२
साक्षात्कारिणि नित्ययोगिनि पर	४.६	स्वातन्त्र्ये जडताहानिः	५.४
सादृश्यस्यानिमित्तत्वात्	३.११	स्वार्थद्वारैव तात्पर्य	५.१६
साधर्म्यमिव वैधर्म्यं	३.९	हेतुत्वादनुमानाच्च	५.१४
सापेक्षत्वादनादित्वात्	१.४	हेतुभूतिनिषेधो न	१.५
सिद्ध्यसिद्ध्योर्विरोधो न	५.२	हेतुशक्तिमनादृत्य	१.१८
सुघटत्वेऽपि सत्यर्थे	४.२	हेत्वभावे फलाभावात्	३.१८
स्थैर्यदृष्ट्योर्न सन्देहो	१.१७	हेत्वभावे फलाभावः	५.४
स्यामभूवं भविष्यामि	५.१७	ह्रासदर्शनतो ह्रासः	२.३

परिशिष्ट - २

सङ्केतगतानां ग्रन्थ-ग्रन्थकारादिनाम्नां सूचिः

अक्षचरण 31
अक्षपाद 173
अभिनवनैयायिक 96
अभिनवमीमांसक 95
ईश्वरकृष्ण 30
उद्योतकराचार्य 187
एकदेशिमत 20, 22
कणभक्ष 31
कपिल 40
कर्णकुल 189
कालिदास 156
काशिका 112, 115, 180
काशिकाकृत् 115, 180
कीर्ति (धर्मकीर्ति) 9
कुसुमाञ्जलि 1, 45, 126, 189
गुरु 174
गुरुमत 73, 95
चार्वाक 4, 5, 8, 9, 10, 11, 13, 15, 29, 34, 42, 62, 88, 89, 90, 141
चिरन्तननैयायिक 89
चौसा 140, 189
चौसानगर 189
जरन्मीमांसकमत 95
ज्ञाततावादी 133
ज्ञानश्री 36
तीरभुक्ति 140, 189
त्रिलोचनगुरु 129
[धर्म]कीर्ति 9
न्यायकुसुमाञ्जलि 140, 189
न्यायवार्तिककृत् 167
नैयायिक 9, 20, 48, 88, 95, 113, 173
नैयायिकमत 108
नैयायिकैकदेशिमत 12, 55, 96
नैयायिकैकदेशी 54, 95
पतञ्जलिमत 3
पाणिनि 169
पाणिनिस्मृति 167
पाणिनीय 171
प्राभाकर 19, 28, 67, 73, 106, 164, 175
प्राभाकरमत 65
बौद्ध 5, 13, 14, 15, 35, 39, 42, 90, 95, 126, 141, 150
बौद्धधिक्कार 150
बौद्धमत 16, 38
भट्ट (कुमारिल) 97
भट्टमत 65
भाष्यकृत् 112
भूषण 50
भूषणकार 95, 97, 125
मण्डन 155
महादेव 140, 189
महाव्रत 25, 26, 27

महाव्रतिमत 3
माधव 140, 189
माध्यमिक 45
मीमांसक 4, 5, 12, 18, 22, 62, 69, 73, 88, 89, 96, 128, 130, 131, 141
मीमांसा 10
मीमांसामत 46
मीमांसावार्तिक 92
युवराजदेव 189
वाचस्पति 146
वामध्वज 1, 80, 126, 140, 189
वामेश्वरध्वज 45, 125, 140, 189
वार्तिककृत् 88, 116, 117
विन्ध्यवासी 30
विरूपाक्ष 1, 117, 141, 189
वेद 3-5, 47, 49, 50, 54, 73-78, 106, 107, 128, 174, 184, 185
वेदान्ती 45
वैनाशिक 113
वैयाकरणसूत्र 166
वैशेषिक [illegible], 103, 105
व्यास 70
शक्तिवाद 29
शबरस्वामी 95
शालिकनाथ 174
शूलपाणि मिश्र 140, 189
सङ्केत 1
साङ्ख्य 31, 45, 95
साङ्ख्यमत 3, 97, 111
सुगत 155
सूक्ष्मजातिवादी 13
सूत्रकार 61, 92, 138
सूत्रकृत् 94
सौगतमत 38



L. D. INSTITUTE OF INDOLOGY
AHMEDABAD 380 009